

THE FREE INDOLOGICAL COLLECTION

WWW.SANSKRITDOCUMENTS.ORG/TFIC

# FAIR USE DECLARATION

This book is sourced from another online repository and provided to you at this site under the TFIC collection. It is provided under commonly held Fair Use guidelines for individual educational or research use. We believe that the book is in the public domain and public dissemination was the intent of the original repository. We applaud and support their work wholeheartedly and only provide this version of this book at this site to make it available to even more readers. We believe that cataloging plays a big part in finding valuable books and try to facilitate that, through our TFIC group efforts. In some cases, the original sources are no longer online or are very hard to access, or marked up in or provided in Indian languages, rather than the more widely used English language. TFIC tries to address these needs too. Our intent is to aid all these repositories and digitization projects and is in no way to undercut them. For more information about our mission and our fair use guidelines, please visit our website.

Note that we provide this book and others because, to the best of our knowledge, they are in the public domain, in our jurisdiction. However, before downloading and using it, you must verify that it is legal for you, in your jurisdiction, to access and use this copy of the book. Please do not download this book in error. We may not be held responsible for any copyright or other legal violations. Placing this notice in the front of every book, serves to both alert you, and to relieve us of any responsibility.

**If you are the intellectual property owner of this or any other book in our collection, please email us, if you have any objections to how we present or provide this book here, or to our providing this book at all. We shall work with you immediately.**

**-The TFIC Team.**

University of Mysore

Oriental Research Institute Publications
SANSKRIT SERIES No 97

GENERAL EDITOR
SRI H. DEVEERAPPA, M.A.,
*Director, Oriental Research Institute, Mysore*

कवितार्किकसिंह–सर्वतन्त्रस्वतन्त्र–श्रीवेदान्ताचार्यविरचितः

# तत्त्वमुक्ताकलापः

श्रीनृसिंहराजप्रणीतानन्ददायिन्याख्यव्याख्यासंवलितया
मूलकृदुपज्ञसर्वार्थसिद्ध्याख्यवृत्त्या समलङ्कृतः
चतुर्थसंपुटम्

# TATTVAMUKTĀKALĀPA

AND

# SARVĀRTHASIDDHI

OF

## SRI VEDĀNTĀCHĀRYA


WITH THE

## COMMENTARY ĀNANDADĀYINĪ OF SRI NRSIMHARAJA

**Vol IV**


EDITED BY
VIDWAN T. T. SRINIVĀSAGOPĀLĀCHĀRYA,
*Rt First Resident Pandit, Oriental Research Institute, Mysore.*

MYSORE
PRINTED BY THE SENIOR ASST DIRECTOR, GOVT BRANCH PRESS
1956




R 672 x, G 68, 2

J 54



श्रीतत्त्वमुक्ताकलापसर्वार्थसिद्धिप्रणेतारः कवितार्किकसिंहसर्वतन्त्रस्वतन्त्र

# श्रीमद्वेदान्ताचार्याः

(A D. 1270-1369)

॥ श्रीः ॥

श्रीमते हयवदनपरब्रह्मणे नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# सव्याख्यसर्वार्थसिद्धिसहिततत्त्वमुक्ताकलापस्थनायकसरस्य प्रस्तावना

जयति निगमान्ततत्त्वं जयति च वैदान्तदेशिकी सूक्तिः ।
तदुभयमननविभूम्ना तृप्तास्सन्तो जयन्तु भुवि विबुधाः ॥

अयि मान्या निखिलनिगमान्ततत्त्वनिर्धारणबद्धादरास्सुधीमणयः ! सुविदितमेवैतत्तत्रभवतां यत्किल कवितार्किकसिंहैः सर्वतन्त्रस्वतन्त्रैः श्रीमद्वेदान्ताचार्यैः निगमान्ततत्त्वधारणसौकर्यार्थं स्रग्धरावृत्तपरिशोभमानपद्यमुक्तामणिभिर्ग्रथितं तत्त्वमुक्ताकलापाख्यं प्रबन्धरत्नं सूत्रप्रबन्धवदविस्तरमपि सकलार्थसंग्राहकं जगतीतले विराजत इति ।

तस्यास्य प्रबन्धरत्नस्य मूलकृद्भिरेवाचार्यपादैः प्रणीता नातिविस्तृता नातिसंकुचिता च वृत्तिरूपा सर्वार्थसिद्धयाख्या व्याख्या मूलश्लोकसंगृहीतार्थविवरणरूपा परिदृश्यते । यथोक्तं तैरेवाचार्यपादैर्ग्रन्थादौ—

नातिव्यासव्यतिकरवती नातिसंकोचखिन्ना
वृत्तिस्सेयं सरसरुचिरा कल्प्यतेऽस्माभिरेव ॥

इति । तदिदं सव्याख्यं तत्त्वमुक्ताकलापाख्यं प्रबन्धरत्नं जडद्रव्यसरः, जीवसरः, नायकसरः, बुद्धिसरः, अद्रव्यसरः, इति पञ्चभिर्ग्रन्थान्तरालिकभागैस्सराख्यैर्विभक्तं दृश्यते ।

अत्र च विशिष्टाद्वैतसिद्धान्तनिर्धारणैदंपर्येण युक्तिप्रमाणसंप्रदायोपपत्त्यादिप्रकाशनपूर्वकं भगवद्रामानुजसंयमीन्द्रस्थापितं निगमान्ततत्त्वजातं समग्राहि । प्रसङ्गादत्रेतराणि वैदिकान्यवैदिकानि च दर्शनानि तत्तद्युक्तिप्रमाणादिविमर्शनपुरस्सरं सुपरीक्षितानि चेत्येतत्प्रबन्धपरिशीलयितृणामपाणिपिहितमिति नात्रास्माभिरधिकं प्रस्तूयते ।

तस्यास्य प्रबन्धरत्नस्य जडद्रव्यसराह्वयः प्रथमो भागः पुरा प्रथमसंपुटे श्रीमन्नृसिंहराज-श्रीमदभिनवरङ्गनाथब्रह्मतन्त्रपरकालस्वामिवर्यप्रणीताभ्यां आनन्ददायिनी-भावप्रकाशाख्याभ्यां व्याख्याटिप्पणाभ्यां सार्धमेतत्संस्थातः संमुद्रय प्राकाश्यमनायि।

तदनु द्वितीये संपुटे द्वैतीयीकजीवसरगतो जीवाणुत्वनिरूपणान्तो ग्रन्थभागोऽपि ताभ्यामेवानन्ददायिनीभावप्रकाशाख्यव्याख्याटिप्पणाभ्यां सह प्रकाशितः।

तदनन्तरं च परुद्वत्सरे तृतीये संपुटे जीवसरगत एव तदुपरितनो मोक्षोपायभूतभक्तिनिरूपणान्तोऽपरोऽपि भागस्ताभ्यामेवानन्ददायिनीभावप्रकाशाख्यव्याख्याटिप्पणाभ्यां सहैव मुद्रयित्वा प्राकाश्यमुपनीतः।

तदिदानीं भावप्रकाशाख्यटिप्पणप्रणेतॄणां श्रीमदभिनवरङ्गनाथब्रह्मतन्त्रपरकालस्वामिवर्याणां गूढार्थसंग्रहाभिख्यश्रीभाष्यटिप्पणप्रणयने तन्मुद्रापणादिषु चोररीकृतावधानतया प्रकृतावशिष्टभावप्रकाशाख्यटिप्पणप्रणयनेऽवश्यंभाविनं विलम्बं, परस्तादेतत्परिशिष्टतया पृथगवशिष्टभावप्रकाशटिप्पणमुद्रापणं, मुहुर्मुहुरहमहमिकयाऽऽवेद्यमानं बहूनां प्रेक्षावतां मुद्रितसव्याख्यसर्वार्थसिद्धिप्रबन्धावेक्षणकौतूहलं, सुबहोः कालात्समारब्धमुद्रणस्य सव्याख्यसर्वार्थसिद्धिप्रबन्धस्यास्य प्रकृते एकया व्याख्यया वाऽपि साकं मुद्रापणेन समापनौचित्यं चानुचिन्तयतामेतत्संस्थाध्यक्षाणां निदेशमनुरुध्य संपुटेऽस्मिन् तत्त्वमुक्ताकलापस्थस्तृतीयो नायकसर आनन्ददायिनीव्याख्यामात्रसंवलितया सर्वार्थसिद्ध्याख्यव्याख्यया साकं संमुद्रय प्रकाश्यते।

एतद्ग्रन्थप्रणेत्रादिविषयेऽवश्यवक्तव्यांशस्सर्वोऽपि प्रथम एव संपुटे प्रकाशित इति न पुनरत्र तद्विषये लेखनीं प्रसारयामः।

## एतत्संपुटगतनायकसरप्रतिपाद्यविषयसंग्रहः

एतत्संपुटपरिदृश्यमाने नायकसरे—परब्रह्मणो जगच्छरीरकत्व-जगत्कर्तृत्व-जगदुपादानत्व-वाच्यत्व-वेद्यत्व-शाब्दमुख्यवृत्तिविषयत्वादीन् प्रसाध्य, नारायणेतरस्य परतत्त्वतामभिमन्यमानानां बहूनां वादिनां मतानि निरस्य नारायणस्यैव परतत्त्वतां सुबहु-

प्रमाणादिप्रपञ्चनपुरस्सरं स्थापयित्वा, ईश्वरसाधकानां नैयायिकाभिमतानां कार्यत्वादिहेतूनां प्रतिक्षेपपुरस्सरमीश्वरस्य शास्त्रैकसमधिगम्यत्वं संसाध्य, परब्रह्मणश्चिदचिदीश्वरविकारवत्त्व-सर्वानुवृत्तसन्मात्रत्व-स्वलीलार्थजीवादिपरिणामित्वौपाधिकजीवभाववत्त्व-साविद्यत्वादिवादिमतानि प्रमाणयुक्त्यादिप्रपञ्चनपूर्वकमपाकृत्य, भावरूपाज्ञानसाधकानि पञ्चपादिकाविवरणचित्सुखीयाद्युपलभ्यमानान्यनुमानानि जगन्मिथ्यात्वसाधकदृश्यत्वाद्यनुमानानि च निराकृत्य, परब्रह्मणोऽप्राकृतनित्यविभूतिमत्त्वं शुभविग्रहवत्त्वं अस्त्रभूषणादिमत्त्वं परव्यूहादिरूपपञ्चकवत्त्वं पूर्णषाड्गुण्यवत्त्वं सर्वज्ञत्वं सर्वशक्तित्वं इच्छावत्त्वं साध्यप्रसादादिमत्त्वं च साधयित्वा ईश्वरनिरूपणप्रयोजनाभिधानेनोपसंहृतमित्ययमत्र सामान्यतः प्रतिपाद्यप्रधानविषयसंग्रहः। विशेषतः प्रतिपाद्यविषयाश्च पृथगनुपदं प्रदर्शितायां विषयसूचन्यां द्रष्टव्या इति विस्तरभियाऽत्र विरम्यते।

## उपसंहारः

१. संपुटेऽस्मिन्नादावेतत्संपुटगतनायकसरस्थप्रतिपाद्यविषया यथामति समग्राहिषत।

२. तदनन्तरं सर्वार्थसिद्धिमूलभूततत्त्वमुक्ताकलापस्थनायकसरगतश्लोकाः तत्तद्व्याख्यास्थलप्रदर्शनार्थं शिरसि तत्तत्पुटसंख्यानिर्देशपूर्वकं प्रेक्षावतां सुग्रहत्वाय पृथङ्निरदिश्यन्त।

३. तदन्वत्रत्यसर्वार्थसिद्धौ तत्र तत्रोपलभ्यमानाः सर्वार्थसिद्धिकृत्प्रणीतास्संग्रहकारिकास्समुद्धृत्य पृथक्प्रादर्शिषत।

४. ततः परमेतत्संपुटगततत्त्वमुक्ताकलापस्थनायकसरगतश्लोकार्धानां अकारादिवर्णक्रमेण सूचनी न्यवेशि।

५. तत उपरिष्टादेतत्संपुटदृश्यमानानां सर्वार्थसिद्धिकृत्प्रणीतसंग्रहकारिकार्धानामप्यकारादिवर्णक्रमेण सूचनी प्राकाशि।

६. तत ऊर्ध्वमेतत्संपुटगतसर्वार्थसिद्धयानन्ददायिन्योरुल्लिखितानां प्रमाणवचनानां प्रायस्तत्तदाकरसूचनपूर्वकं तत्तदुल्लेखपुटसंख्यानिर्देशसहितं चाकारादिवर्णक्रमेण सूचन्याविष्कृता।

७. ततः परस्तादेतत्संपुटगतसर्वार्थसिद्धयानन्ददायिन्योस्सामान्यतो विशेषतश्चोद्धृतानां ग्रन्थकृन्नाम्नां ग्रन्थनाम्नां च तत्तदुद्धृतिपुटाङ्कसंसूचनपूर्वकं सूचनी प्रादर्शि।

८ अन्ते च सीसकाक्षरयोजकाद्यनवधानोपजनितमक्षरस्खालित्यादिकं परिहर्तुमशुद्धसंशोधनपत्रिकाऽपि समयोजि। तथाऽपि मानुषशेमुषीकुलभेनानवधानेनावश्यंभाविनः प्रमादान् क्षमन्तां प्रमोदन्तां च गुणैकग्राहिणो विपश्चिन्मणय इत्यभ्यर्थ्यते ॥

वेदान्ततत्त्वमुक्तारत्नैर्मुक्ताकलापकं कृत्वा।
सर्वार्थसिद्धिदाता स जयतु वेदान्तदेशिकः श्रीमान् ॥

इत्याशास्ते च.

सहृदयविद्वद्विधेयः

तिरु. तिरु. श्रीनिवासगोपालाचार्यः,

मैसूरु ता॥ ८-१-१९५५. महीशूरराजकीयप्राच्यविद्यासंशोधनसंस्थाविश्रान्तप्रधानपण्डितः.

# एतत्संपुटस्थनायकसरस्थप्रतिपाद्यविषयसूचनी

---


| | विषयः | पुटसंख्या |
|---|---|---|
| 1 | कारणवाक्यश्रूयमाणसदादिपदानां जगच्छरीरकब्रह्म-परत्वसाधनम्. | 1— 3 |
| 2 | चेतनसामान्य–प्रकृति–मुक्तात्मान्यतमस्य जगत्कर्तृता स्यादित्याशङ्काया निरासः. | 4— 7 |
| 3 | सर्वसमस्येश्वरस्य स्वान्योभयार्थतया यथाजीवकर्म जगत्स्रष्टृत्वकथनम् | 8— 9 |
| 4 | यथाजीवकर्म निग्रहीतुर्भगवतः क्रोधस्यापि तत्प्रीत्या-धायकतासमर्थनम्. | 10—12 |
| 5 | ब्रह्मणोऽवाप्तकामत्वोक्तेः काम्याभावपरत्वतात्पर्यकता-निरासः. | 13—14 |
| 6 | सहकारापेक्षत्वेऽपि भगवतस्स्वातन्त्र्यनिर्वाहः, तस्यो-पादानत्वकर्तृत्वादिसमर्थनं च. | 15—17 |
| 7 | अप्रत्यक्ष ईश्वरः कथमङ्गीकार्य इति चार्वाकशङ्काया निराकरणम्. | 18—19 |
| 8 | अनुमानविशेषैः कापिलागमेन च निरस्ताया ब्रह्म-जगत्कारणतायाः श्रौतत्वेन समर्थनम्. | 20—22 |
| 9 | स्वयंप्रकाशतया सिद्धस्यापि भगवतो वाच्यत्ववेद्य-त्वयोस्समर्थनम | 23—24 |
| 10 | ब्रह्मणो वाङ्मनसगोचरत्वेऽपि तदगोचरताप्रत्यायक-श्रुतेस्तात्पर्यकथनम्. | 25—26 |
| 11 | ब्रह्मणोऽवाच्यत्वावेद्यत्वसाधकानुमानस्य निराकर-णम्. | 27—28 |

| | विषयः | पुटसंख्या |
|---|---|---|
| 12 | ब्रह्मणो मुख्यशब्दवृत्तिविषयत्वाभावसाधनस्य निरसनम्. | 29—30 |
| 13 | ब्रह्मणः काल्पनिकमुख्यवृत्तिविषयतावादस्य निरासः | 31—32 |
| 14 | सामान्यप्रवृत्तसदादिशब्दानां समानप्रकरणश्रुतनारायणशब्दादिभिर्विशेषपरत्वसमर्थनम् | 33—35 |
| 15 | समाख्याबाधकश्रुत्यादिना शंभ्वादिपदानामपि नारायणपरत्वसाधनम्. | 36—38 |
| 16 | शंभ्वादिपदानां रुद्रादौ गौणत्वस्य विष्णावेव प्रवृत्तिनिमित्तपौष्कल्यान्मुख्यत्वस्य च कथनम् | 39—40 |
| 17 | 'शिव एव केवल' इत्यादिगतशिवादिपदानां सौबालैकवाक्यतया विष्णुपरत्वसमर्थनम्. | 41 |
| 18 | तमोधिष्ठातृनारायणस्य कारणत्वानभ्युपगमे बहुश्रुतिव्याकोपप्रदर्शनम् | 42—43 |
| 19 | ततो 'यदुत्तरतरं' इति श्रुतेरुत्कृष्टान्तरनिषेधकयस्मादिति-श्रुत्यन्तरानुवादकतासाधनम्. | 44—46 |
| 20 | कारणपुरुषस्य परिच्छेदोक्तेरुपासनार्थत्वस्य, सेतुत्वश्रुते प्राप्यान्तराभावपरत्वस्य च साधनम्. | 47—48 |
| 21 | सर्ववेदश्रुतपुंसूक्तस्य प्राकरणिकानन्यथासिद्धलिङ्गान्नारायणपरत्वसमर्थनम्. | 49—50 |
| 22 | इन्द्रादिविषयकमोक्षार्थविद्याश्रुतेस्तद्द्वारकविष्णूपासनापरत्वाभिधानम् | 51 |
| 23 | देवतान्तरविषयनमस्कृतिबाहुल्यश्रवणस्य परत्वव्यतिरिक्ताभिप्रायाविष्करणम्. | 52 |
| 24 | विष्णोः स्वशासनानुसृतिफलभोगोत्पत्त्यादिश्रवणस्याभिप्रायकथनपूर्वकं तस्याकर्मवश्यत्वादिसाधनम्. | 53—55 |
| 25 | विष्णोरेव परतत्त्वतास्थापकानन्यथासिद्धप्रमाणभूयस्त्वप्रपञ्चनम्. | 56—58 |
| 26 | मध्यस्थोक्तिषु तथा ब्रह्माद्येकैकमहिमपरेषु पुराणादिष्वपि विष्णोरेव तत्रतत्र पारम्यकथनदर्शनात्तस्यैव परत्वसाधनम्. | 59—60 |

| | विषयः | पृष्ठसंख्या |
|---|---|---|
| 27 | शिल्पज्योतिश्शास्त्रादिषु तथा बोधायनटङ्कद्रविडादि-महावैदिकप्रणीतेषु निबन्धेष्वपि विष्णोरेव उत्कर्षकथनादपि तत्परत्वसाधनम् . | 61—62 |
| 28 | महेश्वरादिसमाख्यायाश्श्रुतिबाधितत्वात्तया विष्ण्वन्यस्य परत्वसाधनासंभवाभिधानम् . | 63—64 |
| 29 | अभिन्नत्रिमूर्ति-त्रिमूर्त्युत्तीर्ण-भिन्नत्रिमूर्ति-विष्णुव्यतिरिक्त-कल्पभेदभिन्नानामीश्वरत्वमितिवादिनां निरसनम् . | 65—66 |
| 30 | प्रवाहेश्वरत्व—प्रतिफलनकल्पेश्वरत्वादिकल्पकपक्षाणां निराकरणम् . | 67 |
| 31 | सर्गाद्यसिद्ध्यापादनेनेश्वरस्योपदेशानुमानसिद्धतानिरसनम् . | 68—73 |
| 32 | नैयायिकोदितेश्वरसाधककार्यत्वादिहेतूनां निरसनारम्भः | 73—74 |
| 33 | ईश्वरस्यानुमानिकतावादिपक्षे ईश्वरस्य तद्वाद्यनिष्टकायकरणानित्यज्ञानाद्यापादनम् . | 75—79 |
| 34 | यत्नमात्रसत्त्वेऽप्यात्मलक्षणोपपत्त्या नैयायिकमते ईश्वरस्य निरपेक्षयत्नवत्त्वसिद्ध्यापादनम् . | 80—84 |
| 35 | नैयायिकमते अदृष्टविशेषजनितयत्नवज्जीवानामेव क्षित्यादिकर्तृत्वापादनम् . | 85 |
| 36 | ईश्वरस्य मनःकरणकागन्तुकज्ञानवादनिरसनपूर्वकं जीवादृष्टैरेव सर्वोपपत्त्यापादनम् . | 86—89 |
| 37 | अनुमानाज्जीवातिरिक्तक्षित्यादिकर्तृसाधनेऽनिष्टप्रसञ्जनम् | 90—96 |
| 38 | कर्तृभिन्नकारकान्तरैः कार्यसंभवोपपत्तेस्तार्किकाभिमतसकर्तृकानुमानदूषणम् . | 97—99 |
| 39 | नैयायिकोक्तसकर्तृकानुमानस्य सोपाधिकत्वापादनेन दूषणम् . | 100—104 |
| 40 | ईश्वरानुमानासंभवे तद्भीत्या स्वेतरात्मानुमानं च न स्यादित्याशङ्काया निरासः. | 104—106 |
| 41 | केवलव्यतिरेकिहेतुदूषणेनेश्वरसाधकव्यतिरेकिहेतुदूषणम् | 107—108 |

| | विषय | पृष्ठसंख्या |
|---|---|---|
| 42 | नैयायिकाभिमतानामीश्वरसाधकानां सर्वेषामपि हेतूनां स्थालीपुलाकनीत्या निरासः. | 109 –112 |
| 43 | ईश्वरस्य शास्त्रैकवैद्यत्वसाधनफलकथनम्, ईश्वरानुमानदूषणेऽपि शास्त्राविरोधकथनं च. | 113 |
| 44 | ईश्वरास्यानुमानिकतानिरासे प्रसक्तस्य शास्त्रयोन्यधिकरणसांख्याधिकरणविरोधस्य निस्तारः. | 114—115 |
| 45 | ईश्वरस्य जगदुपादानत्वे निर्विकारश्रुत्यविरोधौचित्ययोस्समर्थनम्. | 116—119 |
| 46 | ब्रह्मण्यन्यैरपि किंचिद्विशेषणाभ्युपगमावश्यंभावेन शास्त्रानुमतचिदचिद्वैशिष्ट्याभ्युपगमस्यैवोचितत्वाभिधानम् | 120—121 |
| 47 | चिदचिदीश्वरविकारवब्रह्मवादिमतस्य निराकरणम् .. | 122—124 |
| 48 | सच्चित्सुखस्वरूपब्रह्मणस्सर्वत्रानुवृत्तिरिति मतस्य निरसनम्. | 125—129 |
| 49 | अव्यक्तवत् ब्रह्मणः स्वलीलार्थं जीवादिपरिणाम इति भेदाभेदवादिमतस्य निरासः. | 130—132 |
| 50 | अनाद्यनत्यन्तभिन्नजडोपाधिप्रयुक्तब्रह्मपरिणामवादिजैनगन्धिभास्करपक्षस्य विकल्पषट्कोद्भावनपूर्वकं निरसनम् | 133- 138 |
| 51 | निरस्तसमस्तभेदकूटस्थविज्ञानैकरसं ब्रह्मैवाविद्यातिरोहितं प्रपञ्चात्मना विवर्तत इति सौगतगन्धिमतस्य निरासः. | 139—140 |
| 52 | ब्रह्मणोऽविद्यया तिरोधानस्य तदधीनस्य विक्षेपस्याप्यनिष्टापत्त्या दूषणम्. | 141—145 |
| 53 | ब्रह्मणोऽविद्यादर्शनस्य दोषनिरपेक्षत्वसापेक्षत्वपक्षद्वयेऽप्यनिष्टप्रसक्त्या निरसनम्. | 146—149 |
| 54 | भावरूपाज्ञानवादनिरसनम् .... .. . | 150—152 |
| 55 | पञ्चपादिकाविवरणोक्तभावरूपाज्ञानवादस्य निरास. | 153—157 |
| 56 | चित्सुखोक्तभावरूपाज्ञानानुमाननिराकरणम् .... | 158—163 |
| 57 | ब्रह्माज्ञानकल्पकमते निर्विकारत्वनिरवद्यत्वादिबोधकश्रुतिविरोधापादनम्. | 163—167 |

| | विषयः | पृष्ठसंख्या |
|---|---|---|
| 58 | ब्रह्मणस्सदोषनिर्दोषावस्थाद्वयकल्पननिरसनपूर्वकं जीवेश्वरभेदसमर्थनम्. परमसाम्यश्रुतिनिर्वाहश्च. | 168—173 |
| 59 | भावरूपाज्ञानस्य श्रुतिसिद्धत्ववादिमतनिराकरणम् ... | 174 |
| 60 | श्रुत्यादिगतमायाविद्यादिशब्दानां तत्तत्प्राकरणिकार्थविशेषव्यवस्थापनम्. | 175—181 |
| 61 | निर्दोषश्रुत्यविरोधार्थं कल्पितस्य ब्रह्मजीवानुबन्धिमायाविद्याविभागपक्षस्य निरासः. | 182—184 |
| 62 | मिथ्याभूतप्रपञ्चोपादानत्वनिर्वाहार्थं ब्रह्मण्यविद्याकल्पनमिति मतस्य लोकश्रुतिप्रक्रियाविरोधोद्भावनेन निरास. | 185—190 |
| 63 | कार्यकारणैकरूप्यकल्पनामूलभूतस्य प्रकृतिविकृत्यैकरूप्यनियमस्य निरसनम्. | 191—192 |
| 64 | प्रपञ्चमिथ्यात्वसाधकपरोक्तदृश्यत्वहेतावसिद्ध्यादिदोषोद्भावनम्. | 193 198 |
| 65 | सत्येतरस्य मिथ्याशब्दार्थत्वकल्पने व्याघातादिप्रदर्शनम् | 199—202 |
| 66 | मिथ्यात्वसाधकानुमाने दृष्टान्तीभूतशुक्तिरूप्यशब्दार्थस्य दुर्निरूपत्वापादनेन व्याप्तयसिद्ध्यापादनम्. | 203 |
| 67 | दृश्यत्वहेतुकानुमाने साध्यस्य बहुधा विकल्पनपूर्वकं निरसनम्. | 204—206 |
| 68 | यथाकथञ्चित्तत्र साध्यनिर्वाहेऽपि दृश्यत्वहेतोरप्रयोजकत्वाद्यापादनम्. | 207 |
| 69 | मिथ्यात्वानुमाने बाधस्य साध्यत्वे सिद्धसाध्यत्वाद्यापादनम्. | 208—211 |
| 70 | सदसद्विलक्षणत्वरूपमिथ्यात्वस्य साध्यत्वे तत्स्वरूपं सप्तधा विकल्प्य निरसनम्. | 212—216 |
| 71 | साध्यभूतमिथ्यात्वस्य स्वरूपत इव धर्मतोऽपि विकल्पासहत्वप्रपञ्चनम्. | 217—219 |
| 72 | साध्यवद्दृश्यत्वहेतोरपि विकल्पासहत्वप्रतिपादनम् | 219—220 |
| 73 | दृश्यत्वहेतोः स्वरूपासिद्ध्याद्यापादनेन दूषणम् | 221—222 |
| 74 | मिथ्यालिङ्गेन जगतो मिथ्यात्वसाधने ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गाद्यापादनम्. | 223—224 |

| | विषयः | पृष्ठसंख्या |
|---|---|---|
| 75 | जगत्सत्यत्ववादिमते परैरापादिताया दृग्दृश्यसम्बन्धानुपपत्तेर्निरसनम्. | 225—228 |
| 76 | जगन्मिथ्यात्वसाधकव्यावर्तमानत्वहेतो. कुतश्चिद्भिन्नत्व बाध्यत्व-नश्वरत्व-कदाचिदप्रकाशमानत्व-पर-प्रकाश्यत्व-किञ्चिद्देशव्यावृत्तत्व निखिलदेशव्या-वृत्तत्वादिरूपत्वासंभवोपपादनपूर्वकं निरसनम्. | 229—235 |
| 77 | जगन्मिथ्यात्वसाधककालविशेषसत्त्वरूपहेतोराभास--त्वादिनिरूपणेन निरसनम्. | 236—241 |
| 78 | प्रत्यक्षानुमानविरुद्धस्य जगन्मिथ्यात्वकल्पनस्य आम्नायैरप्यशक्यत्वकथनपुरस्सरं 'ब्रह्मैवेदं' 'नेह नानास्ति' इत्यादिश्रुतीनामब्रह्मात्मकजगन्निषेधादितात्पर्यकत्वोपपादनम्. | 242—247 |
| 79 | प्रत्यक्षस्य प्रत्यक्षान्तरेणेवागमबाध्यत्वसंभवादागमाज्जगतो मिथ्यात्वकल्पनं स्यादिति परकीयाशङ्कानिराकरणार्थं परोक्षभूतानुमानागमादिभिर्बाध्याबाध्यप्रत्यक्षविवेचनम्. | 247—250 |
| 80 | प्रत्यक्षस्य तन्मूलकानुमानस्य च दोषमूलत्वादागमबाध्यत्वं स्यादिति मते अनैकान्तिकत्वातिप्रसङ्गान्योन्याश्रयचक्रकाद्यापादनम्, तन्मते शास्त्रस्यापि दोषमूलकत्वाद्वैतासाधकत्वयोः प्रसञ्जनम्. | 251—255 |
| 81 | सत्यपि दोषसाम्ये परत्वमात्रेण शास्त्रस्य प्रत्यक्षबाधकत्वकल्पनेऽतिप्रसङ्गापादनम्. | 256—258 |
| 82 | नियतपौर्वापर्यकस्थले परप्राबल्यानुग्राहकापच्छेदन्यायस्याप्रवृत्त्या भेदबोधकपूर्वश्रुतीनामेव प्राबल्यादभेदश्रुतीनां भेदनिषेधतात्पर्यकत्वाभावसाधनम्. | 259—262 |
| 83 | भेदस्य प्रत्यक्षत्वात्तस्य शास्त्राविषयत्वमिति मतस्य निरासार्थं भेदसामान्यस्य शास्त्रविषयत्वसमर्थनम्. | 263—266 |
| 84 | जगन्मिथ्यात्ववादिमते वेदतत्प्रामाण्यबोद्धृबुद्धयादीनामपि मिथ्यात्वात्तेषां यादवप्रकाशोक्तरीत्या बौद्धसाम्यस्यापादनम्. | 267---268 |

| | विषयः | पुटसंख्या |
|---|---|---|
| 85 | जगन्मिथ्यात्ववादिनां निर्णये बाधकानां विकल्पानामापादनम्. तन्मते वेदमोक्षस्वयंप्रकाशत्वादिषु विकल्पदौःस्थ्यापादनं च. | 269—272 |
| 86 | नित्यविभूतिसद्भावग्राहकाणां प्रमाणानां संग्रहणम् | 273—274 |
| 87 | अव्यक्ततमोमध्यगेश्वरमुक्तभोगस्थानकल्पकयादवप्रकाशमतस्य निरास.. | 275—276 |
| 88 | वैकुण्ठस्याण्डान्तर्वर्तित्ववादनिरसनपुरस्सरं तत्र नित्यानित्यविभागोपपत्तिकथनम्. | 277 |
| 89 | सृष्टिप्राक्कालोत्तरकालयोरेकत्वबहुत्वश्रवणस्य नामरूपाविभागविभागतात्पर्यकत्वेन नित्यस्थानसत्त्वेऽनुपपत्त्यभावोपपादनम्. | 278—279 |
| 90 | नित्यविभूतेर्जडत्व-स्वयंप्रकाशत्वपक्षयोरुपपादनम् ... | 280—282 |
| 91 | मुक्तनित्येश्वरस्वयंप्रकाशत्ववन्नित्यविभूतेरपि स्वयंप्रकाशत्वेऽनुपपत्त्यभावसाधनम्. | 283—285 |
| 92 | अप्राकृतस्थानादेर्नित्यत्वे अनुपपत्त्यभावसमर्थनम् | 286—287 |
| 93 | परविग्रहस्य नित्यत्वसमर्थनम्, अवतारविग्रहाणामैच्छिकत्वोपपादनं च. | 288—290 |
| 94 | योगविशेषसक्तानां चित्तालम्बनसिद्ध्यर्थमीश्वरस्य दिव्यविग्रहपरिग्रहवदस्त्रभूषणादिमत्त्वस्याप्युपपत्त्या प्रामाणिकत्वसमर्थनम्. | 291—293 |
| 95 | भगवद्विग्रहस्थानायुधादिविधिनिषेधयोः श्रौतहिंसाविधिनिषेधयोरिव विषयभेदादविरोधसमर्थनम् | 294—295 |
| 96 | देवतासामान्यस्य शरीर-हविर्भक्षण-युगपत्सांनिध्य-प्रीति-फलदातृत्वनिराकर्तृमीमांसकैकदेशिमतस्य सूत्रकृदनभिमतत्वोपपादनपूर्वकं विध्यर्थवादमन्त्रस्मृतीतिहासपुराणाद्यनुमतस्य विग्रहादिमत्त्वस्य समर्थनम्. | 296—298 |
| 97 | परव्यूहविभवार्चान्तर्याम्यात्मकभगवद्रूपपञ्चकेऽपि पूर्णषाड्गुण्यवत्त्वसमर्थनपूर्वकं सङ्कर्षणादिव्यूहत्रिके | 299—301 |

| | विषयः | पृष्ठसंख्या. |
|---|---|---|
| | प्रत्येकं गुणद्वयोक्तेस्तन्मात्राविष्करणाभिप्रायकत्व-कथनम्. | |
| 98 | सङ्कर्षणादिव्यूहत्रिके पराभेदसत्त्वेऽप्युपकाराभिमान-लीलात्रयव्यवस्थोपपादनम् | 302—303 |
| 99 | परस्परविरोधात्त्रिव्यूहचतुर्व्यूहपक्षयोः काल्पनिकतेति शङ्कायाः छान्दोग्यतैत्तिरीयाद्यधीतमिथोविरुद्ध-भूतत्रैविध्यपाञ्चविध्यादितत्त्वसंख्यान्यवस्थावन्नि-र्वाहसम्भवान्निरसनम्. | 304—305 |
| 100 | कल्पभेदाभिप्रायकतया निर्वाहसम्भवात्संहितास्वभिन्न-नाम्नो मूर्तेर्विभिन्नकारणकत्ववर्णभुजादिवैषम्योक्ते-र्विरोधप्रशमनम्. | 306—307 |
| 101 | ईश्वरस्वरूपे भोक्तृभोग्यन्यायेन समष्टिव्यष्टिभेदमनो-मयप्राणमयवाङ्मयाख्यव्यूहत्रयकल्पकब्रह्मदत्त म-तस्य निर्विकारश्रुत्यादिविरोधाद्यापादनेन निर-सनम्. | 307 - 309 |
| 102 | एकस्मिन्नेवेश्वरेऽभिधीयमानयोः प्रष्टृत्वप्रतिवक्तृत्वयोरभि-नयतासमर्थनपूर्वकं तत्फलकथनम्. | 310 —311 |
| 103 | विस्मयकारिभगवच्चरित्राणां सङ्कोचादिशक्तिसूक्ष्म-स्थूलावस्थाभेदादिभिर्निर्वाहात्सत्यतास्थापनम्. | 312—313 |
| 104 | कालभेदाधीनोल्लेखभेदाद्यसम्भवेन भगवतस्सर्वज्ञता-यामनुपपत्त्यापादनम्. | 314— 315 |
| 105 | उल्लेखभेदतदभावपक्षयोर्द्वयोरपि दोषनिस्तारोक्तया भगवतस्सार्वज्ञ्यसाधनम्. | 316—317 |
| 106 | विना विरुद्धघटनं भगवतस्त्वेतराशक्त्याव्याहतघटकत्वे-नैव सर्वशक्तित्वसमर्थनम्. | 318—319 |
| 107 | ज्ञानप्रयत्नवत्त्वेऽपीश्वरस्य न चिकीर्षावत्त्वमिति मत-स्यानुवादः, तत्खण्डनारम्भश्च | 320—321 |
| 108 | प्रतिबन्दिप्रयोगसम्भवाच्छ्रुत्यादिबलाच्चेश्वरस्येच्छावत्त्व-स्यापि साधनम्. | 322 – 325 |

| | विषयः | पुटसंख्या |
|---|---|---|
| 109 | गाङ्गोदक-पञ्चगव्यादिवत्स्वरूपत एव पावनस्य निरपेक्षस्य चेश्वरस्य प्रसादादिमत्त्वं नास्तीति मतस्यानुवादपुरस्सरं निराकरणम्. | 326—327 |
| 110 | ईश्वरस्वरूपादिनिरूपणस्य प्रयोजनाभिधानेन नायकसरोपसंहरणम्. | 327—329 |


एवमयमत्र यथामति प्रतिपाद्यार्थस्समग्राहि, इतोऽपि किञ्चिद्विस्तरेण प्रतिपत्रं शिरसि प्रतिपाद्यविषया निर्दिष्टा द्रष्टव्याः ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
गुणैकग्राहिणस्तच्च सहन्तामिह सूरय ॥

इत्यभ्यर्थयते

सहृदयविद्वद्वशंवदः

**तिरु. तिरु. श्रीनिवासगोपालाचार्यः**

महीशूरराजकीयप्राच्यविद्यासंशोधनसंस्थाविश्रान्तप्रधानपण्डितः

श्रीः

# एतत्सम्पुटगततत्त्वमुक्ताकलापस्थनायकसरगतश्लोकाः

---

### आगमिकेश्वरसिद्धिः

*[1] व्याप्तयाद्यव्याकुलाभिः [2] श्रुतिभिरधिगतो विश्वनेता [6] स विश्वं
क्रीडाकारुण्यतन्त्रः सृजति [9] समतया जीवकर्मानुरूपम् ।
[11] रोषोऽपि प्रीतये स्यात्सुनिरसविषयस्तस्य निस्सीमशक्तेः
[13] स्वेच्छायां सर्वसिद्धिं वदति भगवतोऽवाप्तकामत्ववादः ॥ १ ॥

### ईश्वरस्य निर्बाधत्वम्

[18] अप्रत्यक्षः परात्मा तदिह न घटते धातुरध्यक्षबाधो
योग्याद्दृष्टेरभावान्न खलु न भवता [7] स्वीकृतस्स्वेतरात्मा ।
[20] तस्मिन् देहानपेक्षे श्रुतिभिर (धिगते) वसिते देहबाधान्न बाधो
वेदेभ्यो नानुमान [21] न च पुरुषवचस्तिष्ठते बद्धवैरम् ॥ २ ॥

### ब्रह्मणोऽवाच्यत्वावेद्यत्वपरिहारः

[22] वाच्यत्वं वेद्यतां च स्वयमभिदधति ब्रह्मणोऽनुश्रवान्ताः
[25] वाक्चित्तागोचरत्वश्रुतिरपि हि परिच्छित्त्यभावपयुक्ता ।
[26] नो चेत्पूर्वापरोक्तिस्ववचनकलहस्सर्ववेदान्तबाध-
स्तत्सिद्धिर्हेतुभिश्चेत्प्रसजति [27] विहतिर्धर्मिसाध्यादिशब्दैः ॥ ३ ॥

### सद्ब्रह्मादिशब्दानां लक्षकत्वानुपपत्तिः

[29] नित्यं ब्रह्मादिशब्दा निरुपधिकसतो लक्षका इत्ययुक्तं
[30] मुख्यस्यान्यस्य [31] हानेर्न च निपुणधियो मुख्यमिच्छन्ति लक्ष्यम् ।

---

* अत्र सर्वत्र पङ्क्तिरुपरि दृश्यमानाः सङ्ख्याः तत्तत्पुटसङ्ख्यासूचिका इति बोध्यम्.

शास्त्रेभ्यस्तत्प्रसिद्धौ सह परिपठनाद्विश्वकर्तोऽपि सिध्ये-
[73] द्धर्मानुष्ठापनार्थं तदनुमितिरतो नैव शक्या कदाचित् ॥ १५ ॥

### ईश्वरानुमानभङ्ग

साध्यं यादृक्सपक्षे [74] नियतमवगतं स्याद्धि पक्षेऽपि तादृक्
[75] तस्मात्कर्मादियुक्तः प्रसजति विमते कार्यताद्यैस्तु कर्ता ।
एतत्तत्सिद्ध्यसिद्ध्योर्न घटत इति न क्ष्मादिपक्षे सपक्ष-
[76] व्याप्ताकारप्रसङ्गात्तदनुपगमने न क्वचित्स्यात्प्रसङ्गः ॥ १६ ॥
[77] यत्कार्यस्योपयुक्त तदिह भवतु नः किं परेणेति चेन्न
ज्ञानादेरुद्भवे तद्विषयनियमनेऽप्यर्थनादिन्द्रियादेः ।
[78] नित्यं ज्ञान विभोस्तन्न नियतविषयं तेन नान्यार्थन चे-
न्नानित्यस्यैव दृष्टेस्तव कथमजसंयोगभङ्गोऽन्यथा स्यात् ॥ १७ ॥
[80] किं वा धीच्छे गृहीते विषयनियतये ते हि यत्नोऽत्र नेच्छेत्
[81] निर्हेतुस्तत्प्रमेष्टा भवतु विषयवानेष तद्वत्स्वतस्ते ।
[82] प्रोक्ते यत्ने स्वभावाद्विषयवति सधीः स्यादितीदं क्व दृष्टं
[84] यद्वा धीस्तं हि नित्य न तु जनयति ते सा कथं तन्नियन्त्री ॥ १८ ॥
[85] निःश्वासादिप्रयत्नक्रम इह भवतां जीव एवास्त्वदृष्टे-
[86] र्यद्वा तैरेव सर्वं घटत इति भवेत्तत्कृता सिद्धसाध्यम् ।
क्लृप्तावन्यस्य कर्तृद्वयमुपनमति त्वत्सपक्षे तथा स्यात्
[91] पक्षेऽपीत्यव्यवस्था यदि विफलतया त्यक्तिराद्येऽपि सा स्यात् ॥ १९ ॥
साध्यो हेत्वादिवेदी मत इह कलया सर्वथा वा तवासौ
पूर्वत्रेशो न सिध्येन्न [93] कथमपि भवेद्यासिसिद्धिः परत्र ।
पक्षस्पर्शाद्विशेषान्न खलु समधिकं पक्षधर्मत्वलभ्यं
[95] कल्प्योऽन्यस्ते [96] विशेषस्सुकृतविषमता जीवशक्तिस्तु सिद्धा ॥ २० ॥

[97] कार्यं स्यात्कर्त्रभावेऽप्यवधिभिरितरैः कालवत्स ह्यसिद्धः
[98] ते चादृष्टप्रयुक्तास्तदपि यतनवत्स्यात्तु यत्नानपेक्षम् ।
[99] एकत्यागेऽन्यहेतुत्यजनमिति च न ध्वंसवत्सावधित्वात्
तस्माद्धेतोरभावे न फलमिति गतिस्तद्विशेषे विशेषः ॥ २१ ॥
[100] धर्मो यावत्सपक्षानुगत उपधिरित्यभ्युपेतस्त्वयाऽपि
[101] त्यागे तस्यात्र तद्वच्छिथिलितनियमाः क्वापि नोपाधयस्युः ।
तादृग्धर्मात्ययाच्च प्रकरणसमता [104] स्यान्न चातिप्रसङ्गः
पक्षादिस्थित्यबाधा[105]न्निरुपधिकतया स्यात्परात्मानुमा तु ॥ २२ ॥
[107] सर्वस्याव्यावीतहेतोरपि च निरसनं द्रक्ष्यसि स्वप्रसङ्गे
[171] श्रुत्याऽत्र व्याप्तिसिद्धावलमनुमितिभिर्निष्फलः संप्लवोऽपि ।
तस्मादुल्लोकभूमा स कथमनुमया विश्वकर्ता प्रसिध्येत्
[112] शास्त्रानुक्तत्वबाधद्वयपरिहृतये शास्त्रयोनित्वसूत्रम् ॥ २३ ॥

### सांख्याधिकरणविरोधपरिहारः

[114] प्राज्ञाधिष्ठानशून्यं न तु परिणमितुं शक्तमव्यक्ततत्त्वं
[115] वास्यादौ व्याप्तिसिद्धेरिति यदभिहितं सांख्यसिद्धान्तभङ्गे ।
सोऽपि प्राज्ञव्युदासेऽप्यनुमितिशरणान् प्रत्युपात्तः प्रसङ्गो
नेष्टे तत्सिद्धयसिद्धयोरनुमितिरिति खल्वाशयस्सूत्रकर्तुः ॥ २४ ॥

### ईश्वरस्य जगन्निमित्तोपादानत्वोपपत्तिः

अस्यैवाचिन्त्यशक्तेरखिलजनयितुः स्यादुपादानभावः
सूक्ष्माव्यक्तादिदेहः परिणमति यतोऽनेकधा स्थूलवृत्त्या ।
[117] निष्कृष्टेऽस्मिन् शरीरिण्यखिलगुणगणालङ्कृतानन्दरूपे
संपद्यन्ते समस्तास्समुचितगतयो निर्विकारादिवादाः ॥ २५ ॥
[118] कर्तोपादानमेव स्वसुखमुखगणे स्वप्रयत्नप्रसूते
संयोगं स्वस्य मूर्तैस्स्वयमुपजनयन्नीश्वरोऽप्येवमिष्टः ।

सर्वोपादानभावस्तत इह घटते सर्वकर्तर्यमुष्मिन्
[119] सर्वश्रुत्यैकरस्यप्रणयिभिरुचितं द्वारमत्राभ्युपेतम् ॥ २६ ॥

### ईश्वरस्य जगत्कारणवैशिष्ट्यावश्यंभाव:

[120] साविद्यं केऽपि सोपाधिकमथ कतिचिच्छक्तिभिर्जुष्टमन्ये
स्वीकृत्यैकाद्वितीयश्रुतिमपि जगदुस्तद्विशिष्टैक्यनिष्ठाम् ।
[121] नित्यत्वं विग्रहत्वं प्रकृतिपुरुषयोर्हेतुतां विश्वकर्तु-
स्तद्वैशिष्ट्यं च शास्त्रप्रथितमजहतां कोऽपराधोऽतिरिक्तः ॥ २७ ॥

### ब्रह्मणश्चिदचिदीश्वरविकारवत्त्वभङ्ग

[122] ब्रह्मोपात्तान्विकारान् कतिचिदभिदधुश्चेतनाचेतनेशान्
[123] नैतद्युक्तं यदीशादनाधिकमनघं निर्विकारं श्रुतं तत् ।
[124] भिन्नाया ब्रह्मशक्तेर्विकृतय इति चेद्ब्रह्मजन्यत्वभङ्गो
भेदाभेदोपपाद्यं सकलमिति मते सप्तभङ्गी न दूष्या ॥ २८ ॥

### सर्वानुवृत्तसन्मात्रब्रह्मत्वभङ्गः

[125] विश्वं चित्तद्गुणानुद्भव इह घटते रत्नगन्धादिनीत्या
[126] सर्वं ब्रह्मेत्यधीतं त्रिविधमिति च तद्दाशताद्यस्य चोक्तम् ।
[127] तस्मात्सर्वानुवृत्तं सदनवधिदशाचित्रमित्यप्ययुक्तं
प्रत्यक्षागोचरत्वप्रभृतिबहुभिदावादिसर्वोक्तिबाधात् ॥ २९ ॥

### ब्रह्मणः स्वलीलार्थजीवादिपरिणामवादभङ्ग.

[130] अव्यक्तं त्वन्मतेऽपि ह्यनवयवमथाप्येतदंशा विकाराः
ते चान्योन्यं विचित्रा पुनरपि विलयं तत्र तत्त्वेन यान्ति ।
[131] इत्थं ब्रह्मापि जीवः परिणमति विहृत्यर्थमित्यप्यसारं
स्वानर्थैकप्रवृत्तेः प्रसजति च तदा सर्वशास्त्रोपरोधः ॥ ३० ॥

### ब्रह्मण औपाधिकजीवभावभङ्गः

[132] ब्रह्मैवोपाधिभिन्नं भजति बहुविधां संसृतिं [133] सोऽप्यनादि-
स्तस्मान्नात्यन्तभिन्नो जड इति तु मते दुःखमद्वारकं स्यात् ।
[124] सौभर्यादौ व्यवस्था न कथमुपधिभिः स्वावतारेषु चैषा
[135] सर्वज्ञस्यैक्यवेदी कथमनवधिभिर्जीवदुःखैर्न दुःख्येत् ॥ ३१ ॥
[136] बन्धो ब्रह्मण्यशेषे प्रसजति स यदोपाधिसंयोगमात्रात्
सादेश्याच्चेदुपाधौ व्यभिचरति भवेद्बन्धमोक्षाव्यवस्था ।
[137] अच्छेद्ये छेदनादिर्विहत उपधिभिर्न स्वतोंऽशस्तवास्मिन्
[138] नोपाधिर्जीवतामप्यनुभवितुमलं ब्रह्मरूपोऽप्यचित्त्वात् ॥ ३२ ॥

### साविद्यब्रह्मविवर्तवादभङ्गः

नापि ब्रह्मण्यविद्यास्थगितनिजतनौ विश्वमेतद्विवृत्तं
[139] तस्मिन् सा स्वप्रकाशे कथमिव विलगेत्तत्प्रकाशैकबाध्या ।
न ह्येतस्मिन्नविद्याविलयकृदधिको वृत्तिवेद्यो विशेषो
[140] बाधो वृत्तिस्वरूपाद्यदि भवति तदा ज्ञानबाध्यत्वभङ्गः ॥ ३३ ॥

### तिरोधानाद्यनुपपत्तिः

[141] छन्नत्वे स्वप्रकाशादनधिकवपुषो ब्रह्मणस्स्यादभावो
भावानां छादनं हि स्फुरणविलयनं तस्य वोत्पत्तिरोधः ॥
[142] मिथ्यादोषाद्भ्रमोक्तौ कथमधिकरणं सत्यमित्येव वाच्यं
नाधिष्ठानानवस्था भवतु तव यथा नास्त्यविद्यानवस्था ॥ ३४ ॥

### अविद्यादर्शनानुपपत्तिः

[145] दोषाभावेऽप्यविद्या स्फुरति यदि ततः किं न विश्वं तथा स्यात्
[146] सा चान्यां कल्पिकां चेदभिलषति तदा साऽपि चेत्यव्यवस्था ।
नापेक्षा चेदनादेरकलुषधिषणागोचरत्वात्सती स्यात्
[748] ब्रह्मैवास्यास्तु दोषो यदि न तु विरमेद्ब्रह्मणो नित्यभावात् ॥ ३५ ॥

### भावरूपाज्ञानप्रत्यक्षभङ्ग

[149] ज्ञातेऽज्ञातेऽप्यभाव· [150] खलु दुरवगमस्संविदस्तेन भाव·
स्यादज्ञानं यदीहाप्यपरिहृतमिदं [151] तद्विरोधादिसाम्यात् ।
[152] तुल्यैवाकारभेदात्परिहृतिरुभयोः क्लृप्तिरत्राधिका ते
[153] मुग्धोऽस्मीत्यादिसाक्षात्कृतिरपि नियतं तत्प्रतिद्वन्दिगर्भा ॥ ३६ ॥

### पञ्चपादिकाविवरणोक्तभावरूपाज्ञानानुमानभङ्गः

स्वाजन्मान्यस्वदेश्यस्वविषयवृतिकृत्स्वव्यपोह्यार्थपूर्वा
[154] ध्वान्तोत्थाद्यप्रभावद्विमतमतिरिहापूर्वनिर्भासनाच्चेत् ।
अज्ञानाज्ञानभेत्री किमियमनुमितिः स्वेष्टभङ्गोऽन्यथा तु
[155] व्यर्थाऽसाविन्द्रियादिष्वतिचरणमसिद्ध्यादि च स्याद्विकल्पे ॥ ३७॥

### चित्सुखोक्तभावरूपाज्ञानानुमानभङ्ग

[158] यच्चोक्तं दैवदत्ती मितिरितरमितिन्यायतो हन्त्यनार्दिं
मात्वात्तन्मित्यभावाधिकमिति तदपि स्यादबाधं विपक्षे ।
[159] नाभावो भावतोऽन्यो न च पुरुषभिदाऽस्त्येकजीवत्ववादे
[162] दृष्टान्ते ध्वंसकत्वं न च विदितमिदं ध्वंसतामात्रसिद्धेः ॥ ३८ ॥

### ब्रह्माज्ञानानुमानानां नित्यनिर्दोषश्रुतिबाध्यत्वम्

[163] अस्पृष्टावद्यतोक्तेर्न खलु विषयतामभ्युपेयादविद्या
न क्षेत्रज्ञोऽपि तापत्रयपरितपनान्नापि तद्ब्रह्म मौग्ध्यात् ।
[165] मिथ्यात्वाद्वेषभावो न भवति यदि किं तन्निरासप्रयासै-
रुच्छेत्तव्यापुमर्थान्वयत इह परः कोऽभिलप्येत दोषः ॥ ३९ ॥

### अविद्याकल्पकश्रुतार्थापत्तिभङ्गः

[168] शुद्धे ब्रह्मण्यविद्या यदि न घटते तस्य जीवैक्यवाद-
स्तस्मान्निर्दोषतोक्तिर्निरुपधिदशया निर्वहेदित्ययुक्तम् ।

[169] प्रत्यक्षादिप्रमाणानुगुणबहुविधश्रुत्यबाधेन नेतुं
शक्येऽप्यैक्यादिवाक्ये बहुगुणनिधये ब्रह्मणेऽसूयसि त्वम् ॥ ४० ॥

### मायादिशब्दानां ब्रह्मदोषप्रतिपादकत्वानुपपत्तिः

[174] मायाविद्यादिशब्दैः प्रकृतिरभिमता ज्ञानकर्मादयो वे-
[181] त्येतत्तत्तत्प्रदेशे स्फुटविदितमतो न त्वदिष्टाऽस्त्यविद्या ।
किं चाविद्यादिशून्यः पर इति विविधाम्नायकण्ठोक्तमर्थं
[182] क्षेप्तुं मायादिशब्दः क्षम इति वदत. स्यादविद्या तवैव ॥ ४१ ॥

### मायाविद्याविभागभङ्ग

निर्दोषश्रुत्यबाधप्रणयिभिरुदितो ब्रह्मजीवानुबन्धी
[183] मायाविद्याविभागोऽप्यफल इह परोन्मोहनार्था हि माया ।
मिथ्यार्थान् दर्शयित्वा विहरणमपि तैस्तादृशं भावयन्ती
[184] मायैव स्यादविद्या न कथमितरथा स्यादनुच्छेदनीया ॥ ४२ ॥

### अविद्याकल्पककार्यमिथ्यात्वानुपपत्तिभङ्गः

[185] मिथ्याभूतस्य सत्यं निरुपधि भजते न ह्युपादानभाव
तस्योपाधिश्च मिथ्यात्मक इति निरधिष्ठानता नास्य युक्ता ।
[186] तस्मात्सत्यानृते द्वे मिथुनमिति न सद्विश्वसत्ता ह्यबाध्या
सद्विद्यायां च कार्यं ननु कथमसतस्सद्भवेदित्युपात्तम् ॥ ४३ ॥

### उपादानोपादेयसालक्षण्यनियमभङ्ग

[190] कार्याणां यत्सरूपं किमपि गुणमयं कारणं कापिलोक्तं
तत्क्षिप्तं माक्षिकादेः क्रिमिमुखजननात्सूत्रकारैर्द्वितीये ।
[192] तस्मान्मिथ्यात्मकस्य स्वयमनुपधिकं सत्यमेवास्तु सूतिः
सत्योपादानवादे जगदपि न मृषा स्यादितीष्टं त्विदं नः ॥ ४४ ॥

विश्वमिथ्यात्वसाधकदृश्यत्वानुमानभङ्गः

[196] दृश्यत्वाद्विश्वमिथ्यावचसि विहतयोऽसिद्धयश्चात्र बह्व्यः
[197] पक्षादेस्सिद्ध्यसिद्ध्योर्न हि गतिरितरा नापि वादाङ्गमीदृक् ।
[198] मर्यादा लोकसिद्धां विजहत इह ते नापरा सा प्रसिध्ये-
[199] न्निर्मर्यादोक्तिमात्राज्जगदपलपतः किं न सत्यं ततस्तत् ॥ ४५ ॥
साध्ये सत्येतरत्वे कथित इह भवेत्स्वस्य हि स्वान्यभावो
[200] नान्यत्सत्य तु दृष्टं तदवधिकभिदासाधने चेष्टसिद्धिः ।
[201] सत्यत्वं चेन्निषेध्यं प्रसजति दहनेऽप्युष्णतायां निषेधः
साध्यं त्वक्षाद्यबाध्यं यदि किमपि पर तेन न व्याप्तिसिद्धिः ॥ ४६ ॥
[204] स्वात्यन्ताभावदेशे विदितमिति यदि स्थाप्यमिष्टं क्वचित्त-
[205] त्तत्रैवेति त्वशक्यं क्वचिदपि न तथा ह्यस्ति सिद्धान्तासिद्धिः ।
[207] बाधश्चास्मिन्नुपाधिस्समधिकदशादेशकालाद्युपाधौ
[208] नासौ साध्योऽत्र[211] मानं निखिलमपि यतस्तद्विधानैकतानम् ॥४७॥
[212] तुच्छत्वं ते न हीष्टं सदसदितरता व्याहतत्वादिदुःस्था-
[214] सिद्धा चासौ परेषां [216] भवदनभिमतोऽन्यात्मना वेद्यतादिः ।
[226] विश्वं हीदं मृषा नस्तदितरवपुषा त्वन्मतारोपितैश्च
म्यादेवं दूरतस्ते ध्रुवमपसरतोऽप्युक्तदोषानुषङ्गः ॥ ४८ ॥
[217] साध्यं मिथ्या न वा ते द्वितयमनुचितं निष्फलत्वादिदोषा-
दाद्यं हीष्टं ममापि प्रसजति भजतस्सत्यभेदः परस्मिन् ।
पक्षीकारेऽस्य [218] बाधादिकमतिचरणं तद्धि हिष्कारपक्षे
[219] तच्चेद्ब्रह्मस्वरूपं भुवनमभिहितं हन्त सब्रह्मकं स्यात् ॥ ४९ ॥
इष्टं ब्रह्मापि दृश्यं तव च कथयतस्तस्य जिज्ञास्यतादीन्
[220] मिथ्या चेद्दृश्यताऽस्मिन्ननु विमतिपदेऽप्येवमेषा त्वयेष्टा ।
[222] लिङ्गं जाड्यादिकं चेत्तदपि मम मते ह्यंशतस्स्यादसिद्धं
[223] मिथ्यालिङ्गैश्च सिध्येत्किमपि यदि भवेद्धाप्यधूमोऽग्निलिङ्गम् ॥ ५० ॥

### व्यावर्तमानत्वानुमानभङ्गः

[229] व्यावृत्त शुक्तिरूप्यं विदितमिह मृषा विश्वमेवं न किं स्यात्
मैवं हेतोरयुक्तेस्स खलु भिदुरता बाध्यता नाशिता वा ।
[230] आद्येऽनैकान्त्यमन्त्ये [231] स्वसमयविहतिर्मध्यमे स्यादसिद्धि-
[232] र्धीविच्छेदादिकल्पान्तरमपि कथितैश्चूषितं दोषबृन्दैः ॥ ५१ ॥

### अनित्यमिथ्यात्वक्लृप्तिपरिहारः

[236] यत्स्यात्तत्सर्वदा स्याद्यदि च न भवेत्तच्च न स्यात्कदाऽपि
क्वापि व्योमारविन्दादिवदिति यदि न [237] व्याहतेस्साध्यहेत्वोः ।
[238] मध्ये सत्त्वं गृहीत्वा खलु तदुभयतोऽसत्त्वलिङ्गं गृहीतं
[241] सामग्र्या चावधी द्वौ स्फुटतरविदितौ साऽपि तत्तत्प्रवाहात् ॥ ५२ ॥

### निषेधश्रुतीनां प्रत्यक्षादिविरुद्धप्रतिपादकत्वानुपपत्तिः

[242] आम्नायस्यापि शक्तिर्न खलु गमयितुं स्वोपजीव्यप्रतीपं
[243] यूपादित्यैक्यवाक्यप्रभृतिभिरितरथा नोपचारं भजेत ।
[246] अक्षाम्नायः स्वपूर्वापरविहतिभयान्नेति नेत्यादिवाक्यं
[247] वैलक्षण्यादिमात्रं प्रथयति भुवनाद्ब्रह्मणो विश्वमूर्तेः ॥ ५३ ॥

### परोक्षबाध्यत्वयोग्यायोग्यप्रत्यक्षविभागः

प्रत्यक्षेणैव पुंसां भवति दृढतरो देह एवात्ममोहो
[248] ज्वालैक्यप्रत्यभिज्ञाद्युभयमपि च तद्बाध्यते ह्यागमाद्यैः ।
तस्मादक्षादिसिद्धं श्रुतिभिरपि जगद्बाध्यतामित्ययुक्तं
संदेहार्थेषु शक्तं यदिह न खलु तद्दोषदूरेष्वपि स्यात् ॥ ५४ ॥

### शास्त्रप्रत्यक्षयोर्दोषसाम्यापादनम्

[261] प्रत्यक्षं दोषमूलं श्रुतिरिह न तथा पौरुषेयत्वहाने-
स्तस्मास्सा बाधिकाऽस्येत्यसदखिलधियामन्ततो दोषसाम्यात् ।

[254] शास्त्रस्यापि ह्यविद्याप्रभृतिभिरुदयस्सम्मतस्त्वन्मतस्थै-
[255] स्तस्यानाविद्यभावे न हि निखिलभिदापह्नवश्शक्यशङ्कः ॥ ५५ ॥

### दोषसाम्ये परस्य बाधकत्वानुपपत्तिः

[256] दोषोत्थत्वाविशेषे न हि भवति परं पूर्वबाधप्रगल्भं
दोषज्ञानं तु मा भूदविदुषि पुरुषे वस्तुतस्त्वन्यथा तत् ।
[257] निर्दोषत्वाभिमन्तॄम्वसमयिमतिभिः किं न मिथ्याकृतान्ताः
[258] प्राबल्यं चेन्निषेधः पर इति मुखरं तुर्यबुद्धस्य तूर्यम् ॥ ५६ ॥

### भेदतन्निषेधश्रुत्योरपच्छेदन्यायानर्हत्वम्

[259] निर्दोषं यच्च शास्त्रं तदपि बहुविधं बोधयत्येव भेदं
वाक्ये तत्त्वोपदेशप्रकरणपठिते नान्यपर्यं प्रतीमः ।
[260] नात्रापच्छेदनीतिर्नियमति सदोपक्रमन्यायसिद्धेः
[262] स्वप्रख्याप्यापलापे श्रुतिरपि वृषलोद्वाहमन्त्रायते वः ॥ ५७ ॥

### अलौकिकभेदस्य शास्त्रवेद्यत्वोपपत्तिः

[263] भेदः प्रत्यक्षसिद्धो न निगमविषयस्स्यादिति त्वर्भकोक्तिः
[264] प्रख्यातादन्यमेनं प्रथयति यदसौ त्वन्मताद्वैतवन्नः ।
[265] सन्मात्रग्राहि चाक्षं नियमयसि ततो ब्रह्म दृश्यं मृषा स्यात्
किं ते श्रुत्या तदानीं [266] फलमभिलषतां कापशूद्राधिकारः ॥ ५८ ॥

### प्रपञ्चमिथ्यात्ववादिनां सौगतसाम्यापादनम्

[267] वेदा बुद्धागमाश्च स्वयमपि हि मृषा मानता चैवमेषां
[268] बोद्धा बुद्धिः फलं च स्थिरतदितरताद्यन्तरालं च बुद्धेः ।
आतस्त्रैविद्यडिम्भान् ग्रसितुमुपनिषद्वारवाणोपगूढै-
प्रायः प्रच्छादिता स्वापटुभिरसुरता पौण्ड्रकाद्वैतनिष्ठैः ॥ ५९ ॥

### प्रपञ्चमिथ्यात्ववादिनां बाधकविकल्पोदाहरणम्

[269] त्वन्निष्ठा सिद्धयसिद्धयोः परमतनियतिस्सिद्धिमेवाधिरूढा
[270] वेदस्यामानतायां त्वदभिमतहतिर्मानतायां च तद्वत् ।
[271] साध्याऽसाध्याऽपि मुक्तिस्त्वदुपगमहता तत्समं चान्यदित्थं
[272] रक्षोभ्यः प्रेषितोऽयं रघुपतिविशिखो राहुमीमांसकेभ्यः ॥ ६० ॥

### नित्यविभूतिसद्भावः

शुद्धस्याशुद्धसृष्टिक्रम इति कथितश्शुद्धसत्वे तु तत्त्वे
[273] स्थानं नित्यं श्रुतं [274] तत्स्मृतमपि [277] कलया तत्र देहाद्यवस्थाः ।
[278] सृष्टेः प्रागेकमेवेत्यपि निगमवचः स्रक्ष्यमाणव्यपेक्षं
[279] नो चेत्स्वाभीष्टमायोपधिविलये स्वस्ति विश्वप्रसूत्यै ॥ ६१ ॥

### नित्यविभूतेर्जडाजडत्वपक्षौ

[280] ज्ञानत्वं चेद्रहस्यागमविदितमिति स्वीकृतं नित्यभूतेः
षाड्गुण्यात्मत्वमेवं प्रसजति सह तत्पाठतोऽतो जडा सा ।
[281] तत्सम्बन्धात्कृतश्चित्तदुपचरणमित्याहुरेके परे तु
ज्ञानत्वाजाड्यकण्ठोक्त्यनुगुणमवदन् मुख्यतामात्मनीव ॥ ६२ ॥

### नित्यविभूतेरजडत्वोपपत्तिः

[283] निस्संकोचा समस्तं चुलकयति मतिर्निर्नित्यमुक्तेश्वराणां
बद्धानां नित्यभूतिर्न विलसति ततः कस्य सा स्वप्रकाशा ।
मैवं नित्येश्वरादेस्सति मतिविभवे साऽस्तु तेनानपेक्षा
[284] वेद्यानुद्भासकाले मतिरिव न तु सा बन्धकाले विभाति ॥ ६३ ॥

### अप्राकृतस्थानादेरनित्यत्वादिपरिहारः

[286] तत्त्वान्यप्राकृतानि त्रिगुण इव परीणामतश्चेद्भवेयुः
स्थानादि स्यादनित्यं न यदि न घटते भूततादीति चेन्न ।

अत्रत्यक्ष्मादितत्त्वक्रमनियतगुणप्राक्रियाद्यैकरूप्या-
[287]न्नित्येऽपि स्यान्निमित्तानुगतिनियमितस्तत्तदाख्याविशेषः ॥ ६४ ॥

### परविग्रहनित्यत्वम्

[288]निर्दिष्टं पौष्करादौ स्वयमखिलकृता स्वं वपुर्नित्यसिद्धं
नित्या लिङ्गेति चैकायननिगमविदो वाक्यभाष्यादि चैवम् ।
नित्यत्वं वासुदेवाह्वयवपुषि जगौ मोक्षधर्मे मुनीन्द्रो
[289]नित्येच्छातस्तदा तत्तदिह विहतिमान् सांशजन्मादितर्कः ॥ ६५ ॥

### परस्यास्त्रभूषणाद्यनुपपत्तिपरिहारः

[292]अस्त्रैर्वा भूषणैर्वा किमिह भगवतोऽवाप्तकामस्य तस्मा-
देवो देहेऽपि वीतावरण इति जगुः केऽपि जैनोपजप्ताः ।
किं वा देहेन विश्वात्मन इति वदतां किं प्रतिब्रूयुरेते
[293]तच्चेत्तस्याश्रितार्थं तदधिकरणकं सर्वमप्येवमस्तु ॥ ६६ ॥

### विग्रहादिविधिनिषेधविरोधप्रशमनम्

[294]रूपस्थानायुधाख्याजनिलयविधृतिव्याप्तीच्छागुणादे-
र्विश्वाधारे निषेधो विधिरपि विषयद्वैतशाम्यद्विरोधौ ।
इत्थभूते निषेधः क्वचिदपि न विधिं बाधते सावकाशः
[295]कल्याणैरस्य योगस्तदितरविरहोऽप्येकवाक्यश्रुतौ च ॥ ६७ ॥

### विग्रहादिपञ्चकनिराकरणपरिहारः

[296]देहादिर्देवतानां हविरनुभवनं संनिधेर्यौगपद्यं
प्रीतिर्दानं फलस्याप्यसदिति कथयन्त्यर्धलोकायतस्थाः ।
तत्राध्यक्षादिदूरस्वमहिमसदृशाशेषवैशिष्ट्यमासां
[297]तत्तद्विध्यर्थवादप्रभृतिभिरविदुस्तत्परैरेव शिष्टाः ॥ ६८ ॥

### परव्यूहादिरूपपञ्चकस्यापि पूर्णषाड्गुण्यवत्त्वम्

[299] साधुत्राणादिहेतोस्तदुचितसमये विग्रहांशैः स्वकीयैः
स्वेच्छातस्सत्यरूपो विभुरवतरति स्वान् गुणौघाननुज्झन् ।
[300] व्यूहे संकर्षणादौ गुणनियतिरभिव्यक्तिवैषम्यमात्रा-
[301] द्वृद्धिह्रासाद्यभावात्स हि भवति सदा पूर्णषाड्गुण्यशाली ॥ ६९ ॥

### व्यूहेषु विशेषाभिमानादिविरोधपरिहारः

शास्त्रादीनां प्रवृत्तिः प्रतितनु नियता स्याद्धि संकर्षणादौ
[302] जीवादौ या विभज्याभिमतिरिह लयोत्पत्तिरक्षाविधिश्च ।
तत्तद्विद्याविशेषप्रतिनियतगुणन्यायतस्तौ तु नेयौ
[303] सर्वस्यैकोऽभिमन्ता स हि सकलजगद्व्याप्तृनिष्वेककर्ता ॥ ७० ॥

### व्यूहगणनावैषम्यनिर्वाहः

[304] त्रिव्यूहः क्वापि देवः क्वचिदपि चतुर्व्यूह उक्तस्तदेवं
व्याघातेऽन्योन्यबाधादुभयमिदमसत्कल्पनामात्रमस्तु ।
तत्राद्ये व्यूहभेदे त्रियुगगुणतया चिन्तनीये परस्मा-
द्युक्ताभेदाविवक्षा तदनुपगमने तत्त्वसंख्यादिबाधः ॥ ७१ ॥

### प्रादुर्भावादिप्रक्रियान्तरोपपत्तिः

[305] मूर्तीनां मूलमूलिप्रभृतिषु बहुधा वैपरीत्यप्रतीते-
[306] र्वर्णादौ बीजतादिव्यवहृतिवदियं वर्णना भावनार्था ।
मैवं कालादिभेदात्प्रशमितविहतौ कल्पितत्वं न कल्प्य
नो चेद्ब्रह्माद्युदन्तेष्वपि विषमकथाभेदवैयाकुली स्यात् ॥ ७२ ॥

### ईश्वरस्वरूपविषयसमष्टिव्यष्ट्यादिवादनिरासः

[307] ईशस्य व्यष्टिभेदानभिदधति मनोवाङ्मयादीन् यदन्ये
[308] तत्र द्वेधा यदीष्टा विकृतिरविषया निर्विकारागमाः स्युः ।

नित्यत्रित्वे तु नैकेश्वरनियमगतिर्भ्रान्तिसिद्धे विभागे
309 मायादायादपक्षः श्रुतिरपि नियतैरस्त्वधिष्ठानभेदैः ॥ ७३ ॥

### ईश्वरस्य स्वात्मनि शिष्याचार्यत्वाद्यभिनयफलम्

310 युक्तिः प्रश्नोत्तरादेर्न हि पुरुषभिदां बुद्धिभेदं च मुक्त्वा
तस्माद्व्यूहादिभेदे कतिचन पुरुषाः स्युः परेणानुबद्धाः ।
311 तन्न स्वच्छन्दलीलः स्वयमभिनयति स्वान्यतां सर्ववेदी
तद्वच्छिष्यादिवृत्तिप्रसृतिमिह सतां शिक्षयन् सानुकम्पः ॥ ७४ ॥

### आश्चर्यवृत्तान्तविशेषसत्यत्वम्

312 विश्रान्तवार्तिबालोदरगतमखिलं कस्य विश्वासभूमि-
स्तस्मादौपेन्द्रमीदृग्भवतु रसवशादिन्द्रजालं प्रवृत्तम् ।
मा भूदाश्चर्यशक्तेरवितथमिदमित्येव सर्वाप्तसिद्धे-
र्व्याघातस्योपशान्तिस्तदनुगुणदशाभेदयोगादिभिः स्यात् ॥ ७५ ॥

### सार्वज्ञ्यानुपपत्तिनिरासः

315 यद्भावित्वेन बुद्धं भवति तदथ चातीतरूपं तदस्मि-
न्नुल्लेखो भिद्यते चेदकरणजमतेरैकरूप्य प्रकुप्येत् ।
प्राचीनोल्लेख एव स्थितवति तु गते भाविबुद्धिर्भ्रमः स्यात्
316 मैवं पूर्वापरादिक्रमनियतसदोल्लेखसत्यत्वसिद्धेः ॥ ७६ ॥

### ईश्वरस्य सर्वशक्तित्वस्थापनम्

318 नीलं किंचित्तदानीमरुणमिति न खल्विन्द्रजालादृतेऽद्धा
नो चेदेवं विरोधः क्वचिदपि न भवेत्कश्च जैनेऽपराधः ।
319 तस्मादीशो विरुद्धद्वितयमघटयन् सर्वशक्तिः कथं स्या-
न्मैवं व्याघातशून्येष्वनितरसुशकेष्वस्य तादृक्त्वसिद्धेः ॥ ७७ ॥

ईश्वरस्येच्छावत्त्वसिद्धिः

[320] संगृह्य ज्ञानयत्नौ कतिचन निखिलस्रष्टुरिच्छां तु नैच्छन्
तस्यां द्वेषः क एषामनुमितिशरणानीकनासीरभाजाम् ।
[324] श्रुत्या तद्बोधयत्नावभिदधति यदि क्षम्यतामेवमिच्छा
निर्वाह्यं त्वासकामप्रभृतिवचनमप्यान्यपर्यायपरुद्धम् ॥ ७८ ॥

ईश्वरस्य साध्यप्रसादादिमत्त्वम्

[325] स्वीकृत्येशानतत्त्वं कतिचन जहतस्तत्प्रसादादिसाध्यं
[326] गङ्गम्भःपञ्चगव्यप्रभृतिवदवदन् पावनत्वादि तस्य ।
तच्छ्रुत्यादिप्रतीपं यदपि च फलदं दर्शितं निष्प्रसादं
[327] तच्चैतस्य प्रसादादिति हि निजगदुर्धर्ममर्मज्ञचित्ताः ॥ ७९ ॥

ईश्वरनिरूपणप्रयोजनविशेषः

त्रय्यन्तोदन्तचिन्तासहचरणसहैरेभिरस्मिन् परस्मिन्
[328] भक्तिश्रद्धास्तिकत्वप्रभृतिगुणसिरावेधिभिस्तर्कशस्त्रैः ।
स्वार्थत्वस्वाश्रयत्वस्ववशयतनताद्यूहवर्गोपवर्ग-
श्छेद्येताच्छेद्यपूर्वोत्तरसरयुगलस्यूततत्त्वस्थितीनाम् ॥ ८० ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापे
तृतीयो नायकसरः.

———

श्रीः

# नायकसरेऽस्मिंस्तत्रतत्र सर्वार्थसिद्धौ दृश्यमानाः सर्वार्थसिद्धि-कृत्प्रणीताः संग्रहकारिकाः

---

प्रयोजनादिविरहान्न कर्तेश इति ब्रुवन् ।
तस्य सिद्धावसिद्धौ च व्याघातादिपराहतः ॥ १ ॥
(1 श्लो.–व्या, पुटं 8)

सहकारिभिरारम्भे न स्वातन्त्र्यं विहन्यते ।
तत्सद्भावप्रवृत्त्योश्च स्वाधीनत्वव्यवस्थितेः ॥ २ ॥
कारकान्तरवैधुर्ये किमपेक्ष्य स्वतन्त्रता ।
शरीरमप्यधिष्ठेयं सहकार्येव कुर्वतः ॥ ३ ॥
निरपेक्षस्वतन्त्रस्य सहकारिमतस्सदा ।
अप्रवृत्तिः प्रवृत्तिर्वा नित्यं स्यादिति चेन्न तत् ॥ ४ ॥
तत्तदिच्छाविशेषेण तत्क्रमस्योपपत्तितः ।
इच्छासंतत्यनादित्वान्न च मूलक्षयः क्वचित् ॥ ५ ॥
गुणेतरविपर्यासमन्योन्यसहकारिताम् ।
विवक्षातः क्वचित्प्राहुर्निस्समत्वान्निमित्तताम् ॥ ६ ॥
प्राप्यः परमभोग्यत्वान्निषेव्यः स्वामिभावतः ।
शक्तिकारुण्यभूम्ना च शरण्यस्सीदतां प्रभुः ॥ ७ ॥
बहिरन्तश्च तद्व्याप्तिस्तत्र यत्रोभयं भवेत् ।
विभोरणोश्च न बहिर्नान्तस्तस्मान्न सा तयोः ॥ ८ ॥
विभोर्न च्छिद्रमणुना नाणूनां विभुना च तत् ।
यथाप्रमाणं संबन्धमात्रमेव तयोर्भवेत् ॥ ९ ॥
आकाशव्यतिभेदादेरसंभाव्यस्य चोदना ।
अकाशादिकमिच्छद्भिरनिच्छद्भिश्च दुर्वचा ॥ १० ॥
न विभज्येत गच्छद्भिर्न विहन्ति गतिं च तत् ।
अस्पर्शत्वात्तथाभूतं विभु वाऽविभु वाऽस्ति नः ॥ ११ ॥

विभ्वणुप्रतिषेधेन मध्यमं च निषेधता ।
सर्वासत्त्वं च दुस्साधं सदसत्त्वविकल्पतः ॥ १२ ॥
समस्तमूर्तसंयोगस्तंभवेद्यस्य तद्विभु ।
तत्संभवोज्झितं द्रव्यं महत्त्वाणुत्वचित्रितम् ॥ १३ ॥
अणोरणीयान्महतो महीयानित्यनुश्रवः ।
विश्वव्यापित्वतात्पर्यान्न मिथो बाधमृच्छति ॥ १४ ॥
यदल्पपरिमाणेन पृथूनां ग्रसनं श्रुतम् ।
अचिन्त्यमिदमित्येके चिन्तनश्रमभीरवः ॥ १५ ॥
(1 श्लो.-व्या, पुटं 13-17)

य एवं स्यादसर्वज्ञः सर्वज्ञं न स बुध्यते ।
इति ब्रुवाणास्सार्वज्ञ्यं लभन्तां तन्निषेधतः ॥ १६ ॥
(2 श्लो.-व्या, पुटं 22-23)

दुस्साधं क्वचिदप्येवमवाच्यत्वादि कस्यचित् ।
किं पुनस्सर्ववचसां प्रतिष्ठा यत्र तत्र तु ॥ १७ ॥
(3 श्लो-व्या, पुटं 29)

नित्या चेश्वरबुद्धिस्ते नानुभूतिर्न च स्मृतिः ।
न प्रमा न भ्रमश्च स्यात्तत्तत्कारणवर्जनात् ॥ १८ ॥
अनुभूत्यादिहेतूनामभावेऽपि तथा यदि ।
स्मृतिहेतोरभावेऽपि स्मृतिरेषा न किं भवेत् ॥ १९ ॥
(8 श्लो.-व्या, पुटं 81)

ईश्वराकूतमेदं च श्रौतादृष्टं यदीच्छसि ।
नृगुणापूर्वकल्पनिस्ते निष्फलैव तदा भवेत् ॥ २० ॥
(9 श्लो-व्या, पुटं 89)

न च स्वेनान्यदेहादेरधिष्ठानादिसंभवः ।
सौभरिन्यायतस्तत्तत्प्रतिसन्धिप्रसङ्गतः ॥ २१ ॥
न च स्वान्यानुमानेऽपि विजातीयत्वकल्पना ।
निरुपाधिकता तत्र भवेदनुमितेस्ततः ॥ २२ ॥
परदेहस्थलिङ्गानामन्यथासिद्धिकल्पने ।
स्वदेहेऽपि तथैवेति नैरात्म्यमवशिष्यते ॥ २३ ॥
आगमादात्मनां सिद्धावीश्वरस्य तु किं पुनः ।
परात्मनिश्चयाभावे त्वागमोऽपि न सेत्स्यति ॥ २४ ॥
(22 श्लो-व्या, पुटं 106-7)

तस्मादेवंविधानेकबाधशङ्कापनुत्तये ।
नित्यनिर्दोषशास्त्रैकवेद्यत्वमिह सूचितम् ॥ २५ ॥
शब्दप्रमाणके तस्मिन् यथाशब्दं व्यवस्थितिः ।
सर्वैरनतिलङ्घ्येति न शङ्कातङ्कसंभवः ॥ २६ ॥
(23 श्लो-व्या, पुटं 113)

न हि वस्तु विकल्प्येत न विरुद्धसमुच्चयः ।
न चोभयपरित्यागो विहितं जहतः क्वचित् ॥ २७ ॥
(47 श्लो-व्या, पुटं 206)

अविधेयमनाधेयमशेषमधिकं समम् ।
नेति वस्तुपरिच्छेदाभावस्स्याद्विश्वदेहिनः ॥ २८ ॥
यस्तु वस्त्वन्तराभावमपरिच्छित्तिमिच्छति ।
कथितोऽसौ कथानर्हः क्षीवोन्मत्तैडमूकवत् ॥ २९ ॥
किंच संख्यापरिच्छेदराहित्यं किं न दृश्यते ।
मानबाधाद्यदि समं निर्बाधेऽर्थे स्थितिः स्थिता ॥ ३० ॥
(47 श्लो.-व्या, पुटं 210-11)

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥ ३१ ॥
(49 श्लो.-व्या, पुटं 218)

दृक्सम्बन्धश्च दृश्यानामसत्यत्वे विवक्षितः ।
सत्यत्वादिविकल्पेन सीदत्यनुपपत्तिमान् ॥ ३२ ॥
(50 श्लो.-व्या, पुटं 225)

संबन्धफलसिद्धौ च स्वरूपे दुरपह्नवे ।
अन्तर्भावबहिर्भावविवादस्त्विह निष्फलः ॥ ३३ ॥
ये च दृग्दृश्यसंबन्धे संयोगादिविकल्पतः ।
दोषाः प्रलपितास्तेऽत्र दृश्याः सत्यत्वभीरवः ॥ ३४ ॥
संबन्धमात्रदौर्घट्यात्तद्विशेषोऽपि दुर्घटः ।
इति चान्धस्य जात्यन्धयष्टिदानोपमं विदुः ॥ ३५ ॥
(50 श्लो.-व्या, पुटं 226)

मिथ्यात्वेन च दृश्यत्वं स्वतस्संबन्धि साधयन् ।
अप्रामाण्यस्वतस्सिद्धिमुद्गिरत्यनया गिरा ॥ ३६ ॥
(50 श्लो.-व्या, पुटं 228)

तत्रापि नश्वरत्वेन नित्यसत्त्वं निरुध्यताम् ।
स्वकालेतरकाले च तेन मिथ्यात्वमिष्यताम् ॥ ३७ ॥
(51 श्लो.–व्या, पुटं 231)

यत्र क्वचिन्न क्वचित्स्यात्खरशृङ्गादिनीतितः ।
इति मध्यमशिक्षा च स्वविधिक्षेपखण्डिता ॥ ३८ ॥
(51 श्लो.–व्या, पुटं 235)

किंचानित्यत्वसत्यत्वे नानित्यं सत्यतां त्यजेत् ।
तदसत्यत्वपक्षे तु नित्यत्वात्सत्यता भवेत् ॥ ३९ ॥
(52 श्लो.–व्या, पुटं 241)

अतः प्रत्यक्षमात्रस्य दोषमूलत्वकल्पना ।
निर्दोषज्ञप्तिसद्भावं न सहेतेति निश्चिनु ॥ ४० ॥
(55 श्लो.–व्या, पुटं 255)

निगूहनं चतुष्काणां द्वन्द्वानां च प्रकाशनम् ।
षाड्गुण्यस्य तथाभूतसमाधिस्थोपयोगतः ॥ ४१ ॥
(69 श्लो.-व्या, पुटं 300)

य एव स्यादसर्वज्ञः सर्वज्ञं न स बुध्यते ।
इति तद्बोधबाधार्थी तन्निषेधेऽपि न क्षमः ॥ ४२ ॥
(76 श्लो.–व्या, पुटं 317)

———

श्रीः

# एतत्संपुटगततत्त्वमुक्ताकलापस्थनायकसरगतश्लोकार्धानां अकारादिवर्णक्रमेण सूचनी

———


पुटसंख्या

अ

अक्षाम्नायस्स्वपूर्वापरविहतिभयात् (53 श्लो.) . 246
अच्छेद्ये च्छेदनादिर्विहत उपधिभिः (32 श्लो.) .. 137
अज्ञानाज्ञानभेत्त्री किमियमनुमितिः (37 श्लो.) .. 154
अत्रत्यक्ष्मादितत्त्वक्रमनियतगुण (64 श्लो.) .. 286
अन्तर्यन्ता च नारायण इति कथितः (5 श्लो.) ... 35
*अप्रत्यक्षः परात्मा तदिह (2 श्लो.) ... 18
*अव्यक्तं त्वन्मतेऽपि ह्यनवयवम् (30 श्लो.) ... 130
*अस्त्रैर्वा भूषणैर्वा किमिह भगवतः (66 श्लो.) .. 292
*अस्पष्टावद्यतोक्तेर्न खलु (39 श्लो.) .... 163
*अस्यैवाचिन्त्यशक्तेरखिलजनयितुः (25 श्लो ) ... 116

आ

आतस्त्रैविद्यडिम्भान् ग्रसितुमुपनिषद्वारवाण-(59 श्लो.) ... 268
*आद्यं रामायणं तत्स च निगमगणे पञ्चमः (11 श्लो.) 56
आद्येऽनैकान्त्यमन्त्ये स्वसमयविहतिः (51 श्लो.) .... 230
आम्नातश्चैष नारायण इति (8 श्लो.) ... 50
*आम्नायस्यापि शक्तिर्न खलु गमयितुं (53 श्लो.) .... 242

इ

इत्थं ब्रह्मापि जीवः परिणमति विहत्यर्थं (30 श्लो.) .. 131
इत्थंभूते निषेधः क्वचिदपि न विधिं बाधते (67 श्लो.) .... 294
इन्द्रादीनामिव स्यान्निजसुकृतवशात् (14 श्लो.) .... 67


---

*एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम्.

| | पुटसंख्या |
|---|---|
| *इन्द्रेशानाद्यभिख्या स्वयमिह (13 श्लो.) .... | 63 |
| *इष्टं ब्रह्मापि दृश्यं तव च कथयतः (51 श्लो.) .... | 269 |
| **ई** | |
| *ईशस्य व्यष्टिभेदानभिदधति मनो-(73 श्लो.) ... | 307 |
| **उ** | |
| उक्तं नारायणाधिष्ठितमिति (6 श्लो ) ... | 42 |
| **ए** | |
| *एकं त्रेधा विभक्तं त्रितयसमधिकं (14 श्लो.) .... | 65 |
| एकत्यागऽन्यहेतुत्यजनमिति च न (21 श्लो.) . | 99 |
| एतत्तत्सिद्धयसिद्धयोर्न घटत इति न (16 श्लो.) .... | 75 |
| **क** | |
| *कर्तोपादानमेव स्वसुखमुखगुणे (26 श्लो.) .... | 118 |
| *कार्यं स्यात्कर्त्रभावेऽप्यवधिभिरितरैः (21 श्लो ) | 97 |
| *कार्याणां यत्स्वरूपं किमपि गुणमयं (45 श्लो ) ... | 190 |
| किं चाविद्यादिशून्यः पर इति (41 श्लो ) | 181 |
| किं वा देहेन विश्वात्मन इति वदतां (66 श्लो.) .. | 292 |
| *किं वा धीच्छे गृहीते विषयनियतये (18 श्लो.) ... | 80 |
| क्लृप्तावन्यस्य कर्तृद्वयमुपनमति (19 श्लो.) .... | 90 |
| **छ** | |
| *छन्नत्वे स्वप्रकाशादनधिकवपुषः (34 श्लो.) .... | 141 |
| **ज्ञ** | |
| *ज्ञातेऽज्ञातेऽप्यभावः (36 श्लो.) | 149 |
| *ज्ञानत्वं चेद्रहस्यागमविदितमिति (62 श्लो.) | 280 |
| **त** | |
| तच्छुत्यादिप्रतीपं यदपि च फलदं (79 श्लो ) .... | 326 |
| तत्तद्विद्याविशेषप्रतिनियतगुणन्यायतः (70 श्लो.) .... | 302 |


*एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम्.

| | पृष्ठसंख्या |
|---|---|
| *तत्त्वान्यप्राकृतानि त्रिगुण इव (64 श्लो ) | . 286 |
| तत्राध्यक्षादिदूरस्वमहिम- (68 श्लो.) | .... 296 |
| तत्सम्बन्धात्कुतश्चित्तदुपचरणमित्याहुः (62 श्लो ) | ... 281 |
| तत्र स्वच्छन्दलीलः स्वयमभिनयति (74 श्लो.) | . 311 |
| तत्राद्ये व्यूहभेदे त्रियुगगुणनया (71 श्लो.) | .. . 304 |
| तस्मात्सत्यानृते द्वे मिथुनमिति न सत् (44 श्लो.) | ... 186 |
| तस्मात्सर्वानुवृत्तं सदनवधि- (29 श्लो.) | 127 |
| तस्मादक्षादिसिद्धं श्रुतिभिरपि जगत् (54 श्लो.) | . 248 |
| तस्मादीशो विरुद्धद्वितयमघटयन् (77 श्लो.) | ... 319 |
| तस्मादुल्लोकभूमा स कथमनुमया (23 श्लो) | .... 111 |
| तस्मान्नित्यात्मकस्य स्वयमनुपधिकं (45 श्लो ) | ... 192 |
| तस्मिन् देहानपेक्षे श्रुतिभिरधिगते (2 श्लो.) | ... 20 |
| तादृग्धर्मात्ययाच्च प्रकरणसमता (22 श्लो ) | . . 101 |
| *तुच्छत्वं ते न हीष्टं सदसदितरता (49 श्लो.) | 212 |
| तुल्यैवाकारभेदात्परिहृतिरुभयो· (36 श्लो.) | . 152 |
| त्यक्तान्यो मूलवेदः कठपरिपठिताः (11 श्लो ) | .. . 57 |
| *त्रय्यन्तोदन्तचिन्तासहचरणसहैः 80 श्लो.) | .. 327 |
| *त्रिव्यूहः क्वापि देवः क्वचिदपि हि (71 श्लो.) | . . 304 |
| *त्वन्निष्ठा सिद्धयसिद्धयोः परमतनियतिः (60 श्लो ) | . 269 |

द

| | |
|---|---|
| *दृश्यत्वाद्विश्वमिथ्यावचसि विहतयः (46 श्लो.) | ... 193 |
| *देहादिर्देवतानां हविरनुभवनं (68 श्लो.) | ... 296 |
| *दोषाभावेऽप्यविद्या स्फुरति यदि (35 श्लो.) | ... 145 |
| *दोषोत्थत्वाविशेषे न हि भवति परं (56 श्लो.) | ... 256 |

ध

| | |
|---|---|
| *धर्माणां स्थापनार्थं स्वयमपि भजते (10 श्लो.) | .... 53 |
| *धर्मो यावत्सपक्षानुगत उपाधिः (22 श्लो.) | .... 100 |


*एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम्.

पृष्ठसंख्या

न


न ह्येतस्मिन्नविद्याविलयकृदधिकः (33 श्लो.) ... 139
नात्रापच्छेदनीतिर्निगमति (57 श्लो.) ... 260
*नापि ब्रह्मण्यविद्यास्थगितनिजतनौ (33 श्लो.) .. 138
नापेक्षा चेदनादेरकलुषधिषणा-(35 श्लो.) .... 146
नाभावो भावतोऽन्यो न च (38 श्लो.) . 159
नित्यं ज्ञानं विभोस्तन्न नियतविषयं (17 श्लो.) ... 78
*नित्यं ब्रह्मादिशब्दा निरुपाधिकसतो लक्षकाः (4 श्लो.) ... 29
नित्यत्रित्वे तु नैकेश्वरनियतगतिः (73 श्लो ) .... 308
नित्यत्वं वासुदेवाह्वयवपुषि जगौ (65 श्लो.) 288
नित्यत्वं विग्रहत्वं प्रकृतिपुरुषयोः (27 श्लो') .. 121
*निर्दिष्टं पौष्करादौ स्वयमखिलकृता (65 श्लो ) 288
*निर्दोषं यच्च शास्त्रं तदपि बहुविधं (57 श्लो.) ... 259
निर्दोषत्वाभिमन्तृस्वसमयिमतिभिः (56 श्लो.) ... 257
*निर्दोषश्रुत्यबाधप्रणयिभिरुदितः (42 श्लो.) .... 182
*निश्श्वासादिप्रयत्नक्रम इह भवतां (19 श्लो.) 85
निष्कृष्टेऽस्मिन् शरीरिण्यखिलगुण- (25 श्लो.) .... 117
*निस्संकोचा समस्तं चुलकयति मतिः (63 श्लो.) .... 283
*निस्साधारण्यनारायणपदविषये (5 श्लो.) ... 33
*नीलं किंचित्तदानीमरुणमिति न (77 श्लो.) . 318
नो चेत्पूर्वापरोक्तिस्ववचन-(3 श्लो.) .... 26
नो चेत्स्यान्नैक ईशो न भवति (13 श्लो ) .... 64


प


पक्षस्पर्शाद्विशेषान्न खलु समधिकं (20 श्लो.) .... 93
पक्षीकारेऽस्य बाधादिकमतिचरणं (50 श्लो.) . . 217
पारम्यं त्वान्यपर्याप्त न भवति (9 श्लो.) .... 51
*पुंसूक्तं सर्ववेदप्रपठनमहितं (8 श्लो.) . 49


* एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम्.

| | पृष्ठसंख्या |
|---|---|
| *प्रत्यक्षं दोषमूलं श्रुतिभिरिह न तथा (55 श्लो.) | .. 251 |
| प्रत्यक्षादिप्रमाणानुगुणबहुविध-(40 श्लो ) | ... 169 |
| *प्रत्यक्षेणैव पुंसां भवति दृढतरः (54 श्लो.) | 247 |
| प्राचीनोल्लेख एव स्थितवति तु गते (76 श्लो ) | ... 315 |
| *प्राज्ञाधिष्ठानशून्यं न तु परिणमितुं (24 श्लो.) | .. 114 |
| प्रोक्ते यत्ने स्वभावाद्विषयवति सधीः (18 श्लो.) | .... 82 |
| **ब** | |
| *बन्धो ब्रह्मण्यशेषे प्रसजति (32 श्लो.) | ... 136 |
| बाधश्चास्मिन्नुपाधिस्समधिगतदशा-(48 श्लो ) | .. 207 |
| *ब्रह्मैवोपाधिभिन्नं भजति बहुविधां (31 श्लो.) | .... 132 |
| *ब्रह्मोपात्तान्विकारान् कतिचिदभिदधुः (28 श्लो.) | 122 |
| **भ** | |
| भिन्नाया ब्रह्मशक्तेर्विकृतय इति (28 श्लो.) | .... 124 |
| *भेदः प्रत्यक्षसिद्धो न निगमविषयः (58 श्लो.) | .... 263 |
| **म** | |
| *मध्यस्थोक्तिर्विरुद्धे परमहिमपरे (12 श्लो.) | .... 58 |
| मध्ये सत्त्वं गृहीत्वा खलु तदुभयतः (52 श्लो.) | ... 238 |
| मर्यादां लोकसिद्धां विजहत इह ते (46 श्लो.) | ... 198 |
| मा भूदाश्चर्यशक्तेरवितथमिदमित्येव (75 श्लो.) | ... 312 |
| *मायाविद्यादिशब्दैः प्रकृतिरभिमता (41 श्लो.) | .... 174 |
| मिथ्यात्वाद्दोषभावो न भवति (39 श्लो.) | .... 105 |
| मिथ्यादोषाद्धमोक्षौ कथमधिकरणं (34 श्लो.) | .. 142 |
| *मिथ्याभूतस्य सत्यं निरुपधि भजते (43 श्लो.) | .... 185 |
| मिथ्यार्थान् दर्शयित्वा विहरणमपि (42 श्लो.) | .... 183 |
| मुख्यत्वे बाधकं च क्वचिदपि न (4 श्लो.) | ... 32 |
| *मूर्तीनां मूलमूलिप्रभृतिषु (72 श्लो.) | .... 305 |
| मैवं कालादिभेदात्प्रशमितविहतौ (72 श्लो.) | ... 306 |
| मैवं नित्येश्वरादेस्सति मतिविभवे (63 श्लो.) | ... 283 |


* एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम् .

पुटसंख्या

य

*यः प्रोक्तस्सर्वकर्तुः परमखिलतनोः (7 श्लो ) .. 44
*यच्चोक्तं दैवदत्ती मतिरितरमिति (38 श्लो.) .... 158
*यत्कार्यस्योपयुक्तं तदिह भवतु (17 श्लो.) .... 77
*यत्स्यात्तत्सर्वदा स्यात् (52 श्लो.) .... 236
*यद्भावित्वेन बुद्धं भवति तदथ (76 श्लो ) ... 315
*युक्तिः प्रश्नोत्तरादेर्न हि पुरुषभिदां (74 श्लो ) .... 310

र

*रुद्रेन्द्रादिश्च यत्र स्फुरति परतया (9 श्लो ) .... 51
*रूपस्थानायुधाख्याजनिलय- (67 श्लो.) . 294
रोषोऽपि प्रीतये स्यात्सुनिरसविषयः (1 श्लो.) .... 11

ल

लिङ्गं जाड्यादिकं चेत्तदपि मम मते (50 श्लो ) ... 222

व

*वाच्यत्वं वेद्यतां च स्वयमभिदधति (3 श्लो.) .... 23
*विश्वं चित्तद्रुणानुद्भव इह घटते (29 श्लो.) .... 125
विश्वं हीदं मृषा नस्तदितरवपुषा (49 श्लो ) ... 216
विश्वव्याप्तस्य तस्योचितमुपधिपरिच्छेदनात् (7 श्लो.) .... 47
*विश्वान्तर्वर्तिबालोदरगतमखिलं कस्य (75 श्लो.) .... 312
*विष्णोरप्यस्त्यभिख्या शिव इति (6 श्लो.) ... 39
*वेदा बुद्धागमाश्च स्वयमपि हि मृषा (59 श्लो.) .. 267
वैषम्यं शिल्पशास्त्रप्रभृतिषु विविधं (12 श्लो.) . 61
*व्याप्तध्याद्यव्याकुलाभिश्श्रुतिभिरधिगतः (1 श्लो.) .... 1,2
*व्यावृत्तं शुक्तिरूप्यं विदितमिह मृषा (51 श्लो.) ... 229
व्यूहे संकर्षणादौ गुणनियतिः (69 श्लो.) .. 300

श

शास्त्रस्यापि ह्यविद्याप्रभृतिभिरुदयः (55 श्लो.) .... 254


* एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम्.

पुटसख्या

श

*शास्त्रादीनां प्रवृत्ति. प्रतितनु नियता (70 श्लो.) .... 301
शास्त्रेभ्यस्तत्प्रसिद्धौ सह परिपठनात् (15 श्लो.) ... 72
*शुद्धस्याशुद्धसृष्टिक्रम इह कथितः (61 श्लो.) .... 272
*शुद्धे ब्रह्मण्यविद्या न यदि न घटते (40 श्लो.) .... 168
शुद्धः स्वेच्छावतारैर्भजति सुलभतां 10 श्लो.) .... 54
श्रुत्या तद्बोधयत्तावभिदधति यदि (78 श्लो.) .... 324

स

*सङ्गृह्य ज्ञानयत्नौ कतिचन निखिलस्रष्टुः (78 श्लो.) ... 320
सत्यत्वं चेन्निषेध्यं प्रसजति (47 श्लो.) .. 201
सन्मात्रग्राहि चाक्षं नियमयति (58 श्लो.) .. 265
*सर्गादीनामसिद्धौ न हि निगमगिरां भज्यते (15 श्लो.).... 68
*सर्वस्यावीतहेतोरपि च निरसनं (23 श्लो.) . 107
सर्वोपादानभावस्तत इह न घटते (26 श्लो ) .... 118
*साधुत्राणादिहेतोस्तदुचितसमये (69 श्लो.) . . 299
*साध्यं मिथ्या न वा ते द्वितयमनुचितं (50 श्लो.) .... 217
*साध्यं यादृक्सपक्षे नियतमवगतं (16 श्लो.) ... 73
साध्याऽसाध्याऽपि मुक्तिः (60 श्लो.) .... 271
+साध्यं सत्येतरत्वे कथित इह भवेत् (47 श्लो.) .... 199
*साध्यो हेत्वादिवादी मत इह कलया (20 श्लो.) .... 91
*साविद्यं केऽपि सोपाधिकमथ (27 श्लो.) .... 120
सृष्टेः प्रागेकमेवेत्यपि निगमवचः (61 श्लो.) .... 278
सोऽपि प्राज्ञव्युदासेऽप्यनुमितिशरणान् (24 श्लो ) .... 115
सौभर्यादौ व्यवस्था न कथमुपधिभिः (31 श्लो.) .... 134
*स्वाजन्मान्यस्वदेश्यस्वविषय- (37 श्लो.) .... 153
*स्वात्यन्ताभावदेशे विदितमिति यदि (48 श्लो.) .... 204
स्वार्थत्वस्वाश्रयत्वस्ववशयतनताद्यूह- (80 श्लो.) .... 328
*स्वीकृत्येशानतत्त्वं कतिचन जहतः (79 श्लो.) .... 325


---

* एतच्चिह्नाङ्कितानि श्लोकपूर्वार्धानीति बोध्यम् .

# संपुटेऽस्मिन् सर्वार्थसिद्धौ तत्र तत्र दृश्यमानानां ग्रन्थकृत्प्रणीत-संग्रहकारिकार्धानां अकारादिवर्णक्रमेण सूचनी


| संग्रहकारिकार्धानि | पु.सं. | पङ्क्ति.सं. |
|---|---|---|
| **अ** | | |
| [B] अचिन्त्यमिदमित्येके चिन्तनश्रमभीरवः .... | 17 | 5 |
| [A] अणोरणीयान्महतो महीयानित्यनुश्रवः ... | 17 | 2 |
| [A] अतः प्रत्यक्षमात्रस्य दोषमूलत्वकल्पना .... | 255 | 6 |
| [A] अनुभूत्यादिहेतूनामभावेऽपि तथा यदि ... | 81 | 11 |
| [B] अन्तर्भावबहिर्भावविवादस्त्विह निष्फलः ... | 226 | 9 |
| [B] अप्रवृत्तिः प्रवृत्तिर्वा नित्यं स्यादिति चेन्न तत् | 14 | 6 |
| [B] अप्रामाण्यस्वतस्सिद्धिमुद्गिरत्यनया गिरा .... | 228 | 10 |
| [A] अविधेयमनाधेयमशेषमधिकं समम् ... | 210 | 6 |
| [B] अस्पर्शत्वात्तथाभूतं विभु वाऽविभु वाऽस्ति नः | 16 | 6 |
| **आ** | | |
| [A] आकाशव्यतिभेदादेरसंभाव्यस्य चोदना ... | 16 | 3 |
| [B] आकाशादिकमिच्छद्भिरनिच्छद्भिश्च दुर्वचा .... | 16 | 3 |
| [A] आगमादात्मानां सिद्धावीश्वरस्य तु किं पुनः.... | 107 | 8 |
| **इ** | | |
| [B] इच्छासंतत्यनादित्वान्न च मूलक्षयः क्वचित् . | 14 | 8 |
| [B] इति चान्धस्य जात्यन्धयष्टिदानोपमं विदुः ... | 226 | 13 |
| [B] इति तद्बोधबाधार्थी तन्निषेधेऽपि न क्षमः ... | 317 | 7 |
| [B] इति ब्रुवाणास्सार्वज्ञ्यं लभन्तां तन्निषेधतः .... | 23 | 5 |
| [B] इति मध्यमशिक्षा च स्वविधिक्षेपखण्डिता .. | 235 | 9 |


अत्र [A] इत्यङ्कितानि सग्रहकारिकापूर्वार्धानि.

[B] इत्यङ्कितानि तूत्तरार्धानीति ज्ञेयम्.

| सग्रहकारिकाधानि | | पु.सं. | पङ्क्ति.सं. |
|---|---|---|---|
| **ई** | | | |
| [A] ईश्वराकूतभेदं च श्रौताद्दृष्टं यदीच्छसि | .... | 89 | 6 |
| **क** | | | |
| [B] कथितोऽसौ कथानर्ह. क्षीवोन्मत्तैडमूकवत् | ... | 211 | 5 |
| [A] कारकान्तरवैधुर्ये किमपेक्ष्य स्वतन्त्रता | .. . | 14 | 3 |
| [A] किंच संख्यापरिच्छेदराहित्यं किं न दृश्यते | .... | 211 | 6 |
| [A] किं चानित्यत्वसत्यत्वे नानित्यं नित्यतां व्रजेत् | | 241 | 13 |
| [B] किं पुनस्सर्ववचसां प्रतिष्ठा यत्र तत्र तु | | 29 | 7 |
| **ग** | | | |
| [A] गुणेतरविपर्यासमन्योन्यसहकारिताम् | ... | 15 | 2 |
| **त** | | | |
| [A] तत्तदिच्छाविशेषेण तत्क्रमस्योपपत्तितः | | 14 | 7 |
| [A] तत्रापि नश्वरत्वेन नित्यसत्त्वं निरुध्यताम् | .... | 231 | 6 |
| [B] तत्संभवोज्झितं द्रव्यं महत्त्वाणुत्वचित्रितम् | | 16 | 10 |
| [B] तत्सद्भावप्रवृत्तेश्च स्वाधीनत्वव्यवस्थितेः | .... | 14 | 2 |
| [B] तदसत्यत्वपक्षे तु नित्यत्वात्सत्यता तयोः | .... | 241 | 14 |
| [A] तस्मादेवंविधानेकबाधशङ्कापनुत्तये | .... | 113 | 4 |
| [B] तस्य सिद्धावसिद्धौ च व्याघातादिपराहतः | | 8 | 5 |
| **द** | | | |
| [A] दुस्साधं क्वचिदप्येवमवाच्यत्वादि कस्यचित् | .... | 29 | 6 |
| [A] दृक्संबन्धश्च दृश्यानामसत्यत्वे विवक्षितः | .... | 225 | 8 |
| [B] दोषाः प्रलपितास्तेऽत्र दृश्याः (श्या) सत्यत्व-भीरवः | | 226 | 11 |
| **न** | | | |
| [A] न च स्वान्यानुमानेऽपि विजातीयत्वकल्पना | .... | 106 | 9 |
| [A] न चं स्वेनान्यदेहादेरधिष्ठानादिसंभवः | ... | 106 | 5 |

अत्र [A] इत्यङ्कितानि सग्रहकारिकाणां पूर्वार्धानि. [B] इत्यङ्कितानि तूत्तरार्धानीति ज्ञेयम्.

| संग्रहकारिकार्धानि | पु.सं. | पङ्क्ति.सं. |
|---|---|---|
| [B] न चोभयपरित्यागो विहातिं जहतः क्वचित् .... | 206 | 3 |
| [B] न प्रमा न भ्रमश्च स्यात्तत्तत्कारणवर्जनात् .... | 81 | 10 |
| [A] न विभज्येत गच्छद्भिर्न विहन्ति गतिं च यत् | 16 | 5 |
| [A] न हि वस्तु विकल्प्येत न विरुद्धसमुच्चयः .. | 206 | 2 |
| [B] नित्यनिर्दोषशास्त्रैकवेद्यत्वमिह सूचितम् .... | 113 | 5 |
| [A] नित्या चेश्वरबुद्धिस्ते नानुभूतिर्न च स्मृतिः | 81 | 9 |
| [A] निरपेक्षस्वतन्त्रस्य सहकारिमतस्सदा ... | 14 | 5 |
| [B] निरुपाधिकता तत्र भवेदनुमितेस्ततः .... | 102 | 10 |
| [B] निर्दोषज्ञप्तिसद्भावं न सहेतेति निश्चिनु .... | 255 | 7 |
| [B] नृगुणापूर्वकल्पितिस्ते निष्फलैव तदा भवेत् .... | 89 | 7 |
| [B] नेति वस्तुपरिच्छेदाभावः स्याद्विश्वदेहिनः .... | 210 | 7 |
| **प** | | |
| [A] परदेहस्थलिङ्गानामन्यथासिद्धिकल्पने .... | 107 | 6 |
| [B] परात्मनिश्चयाभावे त्वागमोऽपि न सेत्स्यति | 107 | 9 |
| [A] प्रयोजनादिविरहान्न कर्तेश इति ब्रुवन् .... | 8 | 4 |
| [A] प्राप्यः परमभोग्यत्वान्निषेध्यस्स्वामिभावतः .... | 15 | 4 |
| **ब** | | |
| [A] बहिरन्तश्च तद्वथाप्तिस्तत्र यत्रोभयं भवेत् .... | 15 | 6 |
| **म** | | |
| [B] मानबाधाद्यदि समं निर्बाधेऽर्थे स्थितिः स्थिता | 211 | 7 |
| [A] मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् | 218 | 6 |
| [A] मिथ्यात्वेन च दृश्यत्वं स्वतस्सम्बन्धि साधयन् | 228 | 9 |
| **य** | | |
| [A] य एवं स्यादसर्वज्ञः सर्वज्ञं न स बुध्यते .... | 22 | 10 |
| [A] य एव स्यादसर्वज्ञः सर्वज्ञं न स बुध्यते .... | 317 | 6 |
| [B] यथाप्रमाणं संबन्धमात्रमेव तयोर्भवेत् .... | 16 | 2 |
| [A] यदल्पपरिमाणेन पृथूनां ग्रसनं श्रुतम् .... | 17 | 4 |


अत्र [A] इत्यङ्कितानि सग्रहकारिकाणा पूर्वार्धानि, [B] इत्यङ्कितानि तूत्तरार्धानीति ज्ञेयम् .

| संग्रहकारिकार्धानि | पु.सं. | पङ्क्ति.सं. |
|---|---|---|
| [A] यत्र क्वचिन्न क्वचित्तत्खरशृङ्गादिनीतितः ... | 235 | 8 |
| [A] यस्तु वस्त्वन्तराभावमपरिच्छित्तिमिच्छति .... | 211 | 4 |
| [A] ये च दृग्दृश्यसम्बन्धे संयोगादिविकल्पतः .... | 216 | 10 |
| **व** | | |
| [B] विभोरणोश्च न बहिर्नान्तस्तस्मान्न सा तयोः... | 15 | 7 |
| [A] विभोर्न च्छिद्रमणुना नाणूनां विभुना च तत् | 15 | 8 |
| [A] विभ्वणुप्रतिषेधेन मध्यमं च निषेधता .... | 16 | 7 |
| [A] विवक्षातः क्वचित्प्राहुर्निस्समत्वान्निमित्तताम् | 15 | 3 |
| [B] विश्वव्यापित्वतात्पर्यान्न मिथो बाधमृच्छति .... | 17 | 3 |
| **श** | | |
| [B] शक्तिकारुण्यभूम्ना च शरण्यस्सीदतां प्रभुः .... | 15 | 5 |
| [A] शब्दप्रमाणके तस्मिन् यथाशब्दं व्यवस्थितिः | 113 | 6 |
| [B] शरीरमप्यधिष्ठेयं सहकार्येव कुर्वतः .... | 14 | 4 |
| **स** | | |
| [A] संबन्धफलसिद्धौ च स्वरूपे दुरपह्नवे .. | 226 | 8 |
| [A] संबन्धमात्रदौर्घट्यात्तद्विशेषोऽपि दुर्घटः .... | 226 | 12 |
| [B] सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् | 218 | 7 |
| [B] सत्यत्वादिविकल्पेन सीदत्यनुपपत्तिमान् .. | 225 | 9 |
| [A] समस्तमूर्तसंयोगस्संभवेद्यस्य तद्विभु .... | 16 | 9 |
| [B] सर्वासत्त्वं च दुस्साधं सदसत्त्वविकल्पतः ... | 16 | 8 |
| [B] सर्वैरनतिलङ्घ्येति न शङ्कातङ्कसंभवः ... | 113 | 7 |
| [B] सौभरिन्यायतस्तत्तत्प्रतिसन्धिप्रसङ्गतः ... | 106 | 6 |
| [B] स्मृतिहेतोरभावेऽपि स्मृतिरेषा न किं भवेत् | 80 | 12 |
| [B] स्वकालेतरकाले च तेन मिथ्यात्वमिष्यताम् .. | 231 | 7 |
| [B] स्वदेहेऽपि तथैवेति नैरात्म्यमवशिष्यते ... | 107 | 7 |


---

अत्र [A] इत्यङ्कितानि संग्रहकारिकाणां पूर्वार्धानि, [B] इत्यङ्कितानि तूत्तरार्धानीति ज्ञेयम्.

श्रीः

# संपुटेऽस्मिन् सर्वार्थसिद्धयानन्ददायिन्योरुपात्तानां प्रमाणानामकारादिक्रमेण सूचनी


| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| | अ | | |
| अक्षरं तमसि लीयते (आ) सु. 2 | .... | 274 | 23 |
| ,, | .... | 275 | 19 |
| अक्षरे परमे व्योमन् (स) म. ना. 1-1 | .... | 275 | 2 |
| अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनं (स) | .... | 86 | 4 |
| अग्नेश्शिवस्य माहात्म्यं (आ) मत्स्यपुराणं | .... | 66 | 21 |
| अचेतना परार्था च (स) परमसंहिता 2 | .. | 179 | 3 |
| अजामेकां (स) श्वे. 4-5, म. ना. 12-5 | .... | 123 | 7 |
| अङ्गुलस्याष्टभागोऽपि (स) वि. पु. | .... | 102 | 5 |
| अजान् ह वै पृश्नींस्तपस्यमानान् (स) | .... | 72 | 5 |
| अजोऽपि सन्नव्ययात्मा (स) गी. 4-6 | .... | 299 | 9 |
| ,, (आ) गी. 4-6 | .... | 300 | 15 |
| अणोरणीयान्महतो महीयान् (स) क. 1-2-20 श्वे. 3 20, म ना. 12-1, कै. 20. | | 313 | 4 |
| अत्र विद्विष्टमनसः (आ) स्कान्दम् | .... | 59 | 17 |
| अथ नामधेयं सत्यस्य सत्यं (स) बृ. 2-3-6 | .... | 25 | 8 |
| ,, | .... | 188 | 5 |
| ,, | .... | 246 | 13 |
| अथात आदेशो नेति नेति (स) बृ. 2-3-6 | .... | 246 | 9 |
| अथातो ब्रह्मजिज्ञासा (स) ब्र. सू. 1-1-1 | .. | 219 | 16 |
| अद्भ्यस्संभूतः (आ) म. ना. 1-3 | | 43 | 22 |
| अद्भ्यसंभूतो हिरण्यगर्भः (स) म ना. 1-3 | | 43 | 9 |
| अदृश्यमग्राह्यं (स) मु. 1-1-6 | .... | 127 | 14 |
| अधिकं तु भेदनिर्देशात् (स) ब्र. सू. 2-1-22 | .... | 172 | 7 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| अधीगर्थदयेशां कर्मणि (आ) पा. सू. 2-3-52 | .... | 240 | 13 |
| ,, | .... | ,, | 14 |
| अनादेर्ध्वंसिनी मात्वात् (स) चित्सुखी | .... | 158 | 9 |
| अनिर्वाच्याविद्याद्वितयसचिवस्य (स) भामती | .... | 120 | 9 |
| अनिष्टाननुकूलत्वे (आ) | ... | 75 | 20 |
| अनुमानानुगृहीतं च प्रमाणं (आ) | .... | 114 | 16 |
| अनृतेन हि प्रत्यूढाः (स) छा. 8-3-2 | .... | 144 | 4 |
| ,, | .... | 180 | 9 |
| ,, (आ) | .... | 144 | 10 |
| अनेन साम्यं यास्यामि (स) मो. ध. | .. | 6 | 10 |
| ,, | .... | 172 | 4 |
| अन्धस्सन्नन्धो भवति (स) छा 8-4-2 | .... | 48 | 7 |
| अन्नमयो यज्ञः (आ) | .... | 281 | 17 |
| अन्यूनश्चाप्यवृद्धश्च (स) स्मृतिः | .... | 301 | 7 |
| अपागादग्नेरग्नित्वं (स) | ... | 188 | 2 |
| अपि वा शब्दपूर्वत्वात् (आ) पू. मी. सू. 9-1-9 | | 297 | 14 |
| अप्राकृतं सुरैर्वन्द्यं (स) जितन्ता 2-2-1 | .... | 277 | 4 |
| अप्राप्य मनसा सह (स) तै. 2-4-1 | . | 23 | 9 |
| अभिगमनेनावद्यति (आ) | .... | 298 | 10 |
| अमृतस्यैष सेतुः (स) मु. 2-2-5 | .... | 47 | 14 |
| ,, (आ) | .... | 47 | 21 |
| अरोषणो ह्यसौ देवः (स) उपरिचराख्याने | | 10 | 4 |
| अविद्यया मृत्युं तीर्त्वा (स) ई. 11, मै. 7-9 | .... | 179 | 10 |
| ,, (आ) ,, | .... | 179 | 21 |
| अविद्याकर्मसंज्ञाऽन्या (स) वि. पु. 6-7-61 | .... | 180 | 5 |
| अविद्यातरुसंभूति बीजं (स) | .... | 180 | 8 |
| अविद्यायामन्तरे वर्तमानाः (स) क. 1-2-5, मु. 1-2-8 | | 180 | 6 |
| अविद्यासञ्चितं कर्म (स) वि पु. 2-13-70 | .. | 180 | 7 |
| अव्यक्तं कारणं यत्तत् (स) | .... | 143 | 12 |
| अव्यक्तमक्षरे लीयते (स) सु. 2. | .... | 41 | 2 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| ,, | (आ) | 274 | 22 |
| अश्वमेधशतैरिष्ट्वा | (आ) इ. स. 33-180 | 53 | 17 |
| असदेवेदमग्र आसीत् | (आ) छा. 3-19-1 | 180 | 23 |
| असाधारणं तु त्रिविधम् | (आ) वरदराजीयम् | 231 | 23 |
| अस्तु मा मा हिंसीः | (आ) | 52 | 19 |
| अस्मान्मायी सृजते विश्वमेतत् | (स) श्वे. 4-9 | 3 | 3 |
| ,, | | 172 | 9 |
| ,, | (आ) | 174 | 19 |
| अहं वासुदेवः | (स) ब्र. बि 22 | 58 | 8 |
| अहं वासुदेव इति सततं | (आ) ब्र. बि. 22 | 58 | 15 |
| अहमर्थो द्विविधो जीवरूपः | (आ) | 129 | 11 |
| अहमिमास्तिस्रो देवताः | (स) छा. 6-3-2 | 259 | 15 |

आ

| | | | |
|---|---|---|---|
| आकाशमेकं हि यथा | (स) या. स्मृ. प्रा. 144 | 136 | 14 |
| आकाशाद्वायुः | (आ) तै. 2-1-1 | 305 | 15 |
| आगमेनानुमानेन | (स) यो. सू. भा. 1-48 | 113 | 12 |
| आज्ञसेरसुक् | (आ) पा. सू. 7-1-50 | 274 | 16 |
| आज्यैः स्तुवते | (आ) | 189 | 14 |
| आत्मन आकाशस्संभूतः | (आ) तै. 2-1-1 | 305 | 14 |
| आत्मनो वै शरीराणि | (स) | 134 | 8 |
| आत्म (न्ये) नैवात्मानं (परमं ब्रह्म) पश्यति | (स) नृ. उ. 5. | 219 | 17 |
| आत्मा वाऽरे द्रष्टव्यः | (स) बृ. 2-4-5 | 219 | 17 |
| आत्मेति तूपगच्छन्ति | (आ) ब्र. सू. 4-1-3 | 58 | 17 |
| आत्मेश्वरं | (स) म. ना. 11-3 | 62 | 6 |
| आत्मैवेदं सर्वं | (स) छा. 7-25-2 | 245 | 4 |
| आदित्यवर्णं तमसः परस्तात् | (स) श्वे. 3-8 | 273 | 10 |
| आदित्यो यूपः | (स) | 243 | 10 |
| आनन्दं नाम तल्लोकं | (आ) | 281 | 15 |

| उपात्तप्रमाणानि | पृ. | स | पङ्क्ति | स |
|---|---|---|---|---|
| आनन्दं ब्रह्मणो विद्वान् (स) तै. 2-4-1, 2-9-1 .... | 26 | | 5 | |
| ,, ... | 26 | | 16 | |
| आयुर्घृतं (स) .... | 281 | | 12 | |
| आलोड्य सर्वशास्त्राणि (स) म. भा. अनु. 18-34 | 60 | | 5 | |
| ,, (आ) .. | 60 | | 17 | |
| आसीदिदं तमोभूत (स) म. स्मृ. 1-5 . . | 41 | | 10 | |
| ,, (आ) . | 42 | | 8 | |
| ,, ,, .... | ,, | | 12 | |
| इ | | | | |
| इक्कृष्यादिभ्यः (आ) 3-3-108 पा-सूत्रे वार्ति. 2232 | 221 | | 20 | |
| इच्छागृहीताभिमतोरुदेहः (स) वि॰ पु. 6-5-84 | 177 | | 3 | |
| ,, .... | 289 | | 6 | |
| इच्छाद्वेषप्रयत्नसुखदुःख (स) अ. सू. 1-1-10 .... | 84 | | 10 | |
| इतरव्यपदेशाद्धिताकरण (स) ब्र. सू १-1-21 . | 172 | | 6 | |
| इदं पुरुषसूक्तं हि (स) म. भा. मोक्ष . | 49 | | 8 | |
| इदं सर्वमसृजत (स) छा. 1-2-5 .... | 7 | | 6 | |
| ,, ... | 112 | | 6 | |
| इदमेकं सुनिष्पन्नं (आ) म. भा. अनु. 18-34 | 60 | | 18 | |
| इन्द्राय राज्ञ एकादशकपालं (आ) तै. सं. 2-3-6 | 298 | | 9 | |
| इन्द्रो मायाभिः पुरुरूपः (स) छा 2-5-19 | 176 | | 7 | |
| इववद्वैववार्थकाः (आ) | 171 | | 12 | |
| ई | | | | |
| ईश्वरश्शंभुरादित्यः (आ) स. नाम | 66 | | 15 | |
| ईश्वरस्य मनोमयवाङ्मय (आ) ब्रह्मदत्तीयम् . | 128 | | 20 | |
| ईश्वराव्याकृतप्राणैः (स) कात्यायनकारिका .... | 122 | | 7 | |
| उ | | | | |
| उच्चैः ऋचा क्रियते (आ) .... | 46 | | 19 | |
| उच्चैः साम्ना उपांशु यजुषा (आ) .. | 46 | | 19 | |
| उज्जहारात्मनः केशौ सितकृष्णौ (आ) .... | 301 | | 17 | |

| उपात्तप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| उत्ताना वै देवगवा वहन्ति (आ) | .... | 20 | 20 |
| उत्तीर्णं ब्रह्म धर्मं (आ) नवीनशैवीयम् | .... | 62 | 12 |
| उभयप्राप्तौ (आ) पा. सू. 2-3-66 | ... | 240 | 9 |
| उमासहायं नीलकण्ठं प्रशान्तं (आ) कै. 7 | .... | 33 | 21 |
| **ऋ** | | | |
| ऋतं पिबन्तौ सुकृतस्य (आ) क. 3-1 | ... | 144 | 3 |
| ऋते तमेकं पुरुषं (स) म. भा. शा. 347-32 | ... | 277 | 13 |
| ,, | .... | 289 | 5 |
| ऋते मायां विशालाक्षीं (स) श्री. रा. उ. | ... | 175 | 4 |
| **ए** | | | |
| एक एव रुद्रो न द्वितीयाय (स) श्वे. 3-2, अ. शि. 5 | | 52 | 5 |
| एक एव हि भूतात्मा (स) अ. बि 12 श्लो. | .... | 137 | 8 |
| एकधा बहुधा चैव (स) | .... | 137 | 9 |
| एकधैवानुद्रष्टव्यं (स) बृ. 4-4-20 | .... | 246 | 7 |
| एकमेव (आ) छा. 6-2-1 | .... | 66 | 10 |
| एकमेवाद्वितीयं (आ) छा. 6-2-1 | .... | 120 | 14 |
| ,, | .... | 133 | 17 |
| एकश्शास्ता न द्वितीयोऽस्ति (आ) म. भा. आश्व. 27-1. | | 7 | 13 |
| ,, (स) | .... | 308 | 12 |
| एकाकी न रमेत (आ) बृ. 1-4-3 | .... | 12 | 17 |
| एकैव मूर्तिर्बिभिदे त्रिधाऽस्य (स) | .... | 65 | 7 |
| एको देवस्सर्वभूतेषु गूढः (आ) श्वे. 6-11, ब्रह्म. 3 | | 7 | 12 |
| ,, (स) | .... | 66 | 9 |
| ,, | .... | 308 | 11 |
| एको ह वै नारायण आसीत् (आ) म. ना. 1 | .... | 33 | 16 |
| एतं सेतुं तीर्त्वा (स) छा. 8-1-2 | ... | 48 | 6 |
| ,, (आ) | ... | 180 | 16 |

| उपात्तप्रमाणानि | पृ. स | पङ्क्ति सं. |
|---|---|---|
| एतस्माज्जायते प्राणः (आ) मु. 2-1-3, कै. 15 .... | 72 | 20 |
| एतौ द्वौ विबुधश्रेष्ठौ (स) म. भा. शा. 350-19 .... | 10 | 5 |
| एवं तु मन्यमाना वै (आ) स्कान्दम् . . | 59 | 16 |
| एष म आत्माऽन्तर्हृदये (स) छा. 3-14-3 . | 47 | 9 |
| एष सर्वभूतान्तरात्मा (स) सु. 7, मु. 2-1-4 ... | 35 | 12 |
| एष सेतुर्विधरण एषां (आ) बृ 4-4-22, मै. 7-7.. . | 47 | 21 |
| ,, (स) . | 48 | 4 |
| एष ह्येवानन्दयाति (आ) तै 2-7-1 .... | 327 | 21 |
| **क** | | |
| कथमसतस्सज्जायेत (आ) छा. 6-2-1 ... | 187 | 4 |
| कपिलो यदि सर्वज्ञः (स) ... | 21 | 15 |
| करणाधिपाधिपः (आ) श्वे. 6-9 . | 172 | 17 |
| कर्मणि च (आ) पा. सू. 2-2-14 ... | 240 | 10 |
| कर्मात्मा त्वपरो योऽसौ (स) मो. ध. .... | 173 | 11 |
| कारणं तु ध्येयः (स) .... | 36 | 9 |
| कार्यायोजनधृत्यादेः (स) ... | 73 | 11 |
| ,, .... | 111 | 12 |
| किङ्करा मम ते नित्यं (स) भगवदुक्तिः ... | 6 | 9 |
| किमात्मको भगवान् (स) .. | 282 | 2 |
| किमात्मिकैवैषा भगवतो व्यक्तिः (स) .. | 281 | 14 |
| कुतस्तु खलु सौम्यैवं स्यात् (स) छा. 6-2-2 ... | 186 | 16 |
| क्रान्त्वा निगीर्य पुनरुद्गिरति (स) स्तो र. 14 श्लो. | 59 | 6 |
| क्रियावद्गुणवत्समवायिकारणम् (स) वै. सू. 1-1-15 | 84 | 5 |
| क्षरं त्वविद्या ह्यमृतं तु विद्या (स) श्वे. 5-1 .... | 178 | 7 |
| क्षरं प्रधानं (स) श्वे. 1-10 . | 178 | 8 |
| क्षयं तमस्य रजसः पराके (स) तै. सं. 2 का. 2 प्र. | 273 | 11 |
| क्षोभयामास संप्राप्ते (स) .... | 4 | 5 |
| **ख** | | |
| खादिरो यूपो भवति (आ) .... | 174 | 21 |

| उपात्तप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| | **ग** | | |
| गोपिकामध्यगं वेणुं (आ) | .... | 291 | 16 |
| गौणं लाक्षणिकं वाऽपि (आ) त. वा. | .. | 189 | 17 |
| गौणश्चेन्नात्मशब्दात् (आ) ब्र. सू. 1-1-6 | .... | 2 | 20 |
| गौरनाद्यन्तवती सा जनित्री (स) आथर्वणिकी चूलिकोपनिषत् 5 (मन्त्रिकोपनिषत्). | | 3 | 9 |
| ,, | .... | 143 | 11 |
| ,, | .. | 178 | 11 |
| ग्रावाणः प्लवन्ते (आ) | .... | 244 | 11 |
| | **घ** | | |
| घटध्वंसे घटाकाशः (स) | .... | 137 | 11 |
| | **च** | | |
| चक्रं शंखं तथा खड्गं (स) | .... | 291 | 12 |
| | **छ** | | |
| छागस्य वपाया मेदसः (आ) | .. | 35 | 14 |
| छागो वा मन्त्रवर्णात् (आ) | .... | 35 | 14 |
| ,, | .... | 171 | 14 |
| | **ज** | | |
| जनिकर्तुः (आ) पा. सू 1-4-30 | .... | 115 | 19 |
| जनितेन्द्रस्य जनितोत विष्णोः (स) | .... | 54 | 7 |
| जन्म कर्म च मे दिव्यं (आ) गी 4-9 | ... | 293 | 19 |
| जीवभूतस्सनातनः (आ) गी. 15-7 | .... | 5 | 21 |
| जीवव्यष्टिवदीश्वरव्यष्टयोऽपि (स) | .... | 129 | 2 |
| जुष्टं यदा पश्यत्यन्यमीशं (स) श्वे. 4-7 | .... | 169 | 12 |
| ज्ञानात्मकः (स) | .... | 282 | 3 |
| ज्वरार्तो जलशायिनं (आ) | .... | 293 | 15 |
| | **त** | | |
| तं षड्विंशकमित्याहुः (स) मन्त्रिकोपनिषत् | .... | 276 | 6 |
| त इमे सत्याः कामाः (स) छा. 8-3-1 | .... | 180 | 10 |
| त एते बहुपाप्मानः (स) | .... | 113 | 10 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| तच्चाकाशं सनातनम् (स) श्री रा. उ. का. | .... | 274 | 7 |
| ततो यदुत्तरतरं (स) श्वे. 3-10 | .. | 44 | 6 |
| ,, (आ) ,, | .... | 45 | 3 |
| ,, ,, | .. | 45 | 16 |
| तत्त्वमसि (आ) छा. 6-8-7, 6-9-4 | .... | 172 | 15 |
| ,, | .... | 244 | 14 |
| तत्त्वमस्ययमात्मा ब्रह्म (स) बृ. 2-5-19 | ... | 168 | 15 |
| तत्र यः परमात्माऽसौ (स) मो. ध. | ... | 173 | 8 |
| तत्रानन्दमया लोकाः (आ) | .... | 280 | 19 |
| तत्सत्यं स आत्मा (आ) छा. 6-8-7 | .... | 190 | 16 |
| तत्सवितुर्वरेण्यं (स) बृ. 6-3-6, मै. 6-7, म. ना. 15-2. | | 41 | 9 |
| तत्सृष्ट्वा तदेवानु (स) तै. 2-6-1 | ... | 36 | 7 |
| तथाऽऽत्मैकोऽप्यनेकस्थः (स) | .... | 136 | 15 |
| तथापि पुरुषाकारः (आ) जितन्ते स्तोत्रम् | .... | 293 | 13 |
| तदक्षरं (स) श्वे. 4-18 | .. | 41 | 9 |
| तदक्षरं तदमृतं (आ) | .... | 48 | 13 |
| तदक्षरे (आ) म. ना. 1-2, 3 | .... | 276 | 14 |
| ,, | .... | 274 | 20 |
| तदन्यस्मिन्ननाश्वासात् (स) कुसुमाञ्जलि 2-1 | .. | 71 | 3 |
| तदरूपमनामयम् (स) श्वे. 3-10 | . | 45 | 4 |
| तदाज्यानामाज्यत्वं (आ) | ... | 189 | 14 |
| तदात्मानं स्वयमकुरुत (स) तै. 2-7-1 | .... | 118 | 15 |
| तदुपर्यपि बादरायणः (आ) ब्र सू. 1-3 25 | .... | 299 | 5 |
| तदेव लग्नं सुदिनं तदेव (आ) | .. . | 61 | 20 |
| तदैक्षत (स) छा. 6-2-3 | .... | 2 | 10 |
| तदैक्षत बहु स्यां (स) छा. 6-2-3 | .... | 84 | 9 |
| तद्धेदं तर्ह्यव्याकृतमासीत् (स) बृ. 1-4-7 | .... | 2 | 8 |
| ,, | .... | 278 | 6 |
| ,, (आ) | .... | 180 | 23 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| तद्धैक आहुः (स) | .... | 186 | 15 |
| तद्ब्रह्म (स) तै. 3-1-1 | .... | 219 | 17 |
| तद्विजिज्ञासस्व (स) तै. 3-1-1 | ... | 25 | 10 |
| " | .... | 219 | 17 |
| तद्विप्रासो विपन्यवः (स) नृ. पू. 5-10, आर. 5, वासु. 4, मुक्ति. 2-78. | | 274 | 5 |
| तद्विष्णोः परमं पदं (स) क. 3-9, मै. 6-2-6, सु. 6 | | 273 | 8 |
| तमः परे देव एकीभवति (स) सु. 2 | .... | 179 | 5 |
| तमसः परस्तात् (आ) श्वे. 3-8, मु. 2-2-6, म. ना. 1-5. | | 274 | 24 |
| तमेवं विद्वानमृतः (आ) पु सू. | .... | 40 | 15 |
| तयोरन्यः पिप्पलं स्वाद्वत्ति (स) श्वे. 4-6, क. 3-1-1 | | 169 | 9 |
| तवान्तरात्मा मम च (स) म. भा. शा. 361-4 | ... | 65 | 10 |
| तस्मात्सर्वगतश्शिवः (आ) | .... | 40 | 12 |
| तस्मान्मुनीश्वरा यूयं (आ) स्कान्दम् | .... | 59 | 18 |
| तस्य तस्य तु माहात्म्यं (आ) | .... | 66 | 18 |
| तस्य ह वा एतस्य ब्रह्मणो नाम सत्यं (आ) | .... | 189 | 9 |
| तस्य हैतस्य पुरुषस्य रूपं (स) बृ. 2-3-6 | ... | 55 | 9 |
| तस्योदिति नाम (स) छा. 1-6-7 | .... | 25 | 8 |
| तादृगेव (स) क. 4-15 | .... | 171 | 6 |
| तावुभौ यदि सर्वज्ञौ (स) | ... | 21 | 16 |
| तेन नारायणः स्मृतः (स) म. स्मृ. 1 | .... | 41 | 11 |
| तेन मायासहस्रं तत् (स) वि. पु 1-19-20 | .... | 143 | 17 |
| " | .... | 175 | 5 |
| तेन वञ्च्यते लोकान् (स) भा. उ. 67-13-15 | . | 176 | 5 |
| तेनेदं पूर्णं पुरुषेण (स) श्वे. 3-9 | .. | 44 | 5 |
| " | ... | 44 | 10 |
| तेषां सत्यानां सतां (स) छा. 8-3-1 | .. | 180 | 10 |
| ते ह नाकं महिमानः (आ) पु. सू. | .... | 373 | 12 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्तिसं. |
|---|---|---|---|
| त्यक्त्वा देहं पुनर्जन्म (आ) गी. 4-9 | .... | 293 | 20 |
| त्यदादीनि (आ) पा. सू. 1-2-72 | . . | 287 | 10 |
| त्रयो वेदा अजायन्त (आ) | .. | 46 | 20 |
| त्रिगुणं तज्जगद्योनिः (स) | .. . | 179 | 2 |
| त्रिधा प्रकल्पयन् प्रज्ञां (स) यो. सू. भा. 1-48 | .... | 113 | 13 |
| त्रीणि रूपाणीत्येव सत्यं (स) छा. 6-4-1 | ... | 188 | 3 |
| त्रेधा विमानं प्रवदन्ति (आ) शिल्पे मरीचिसंहितायाम् . | | 61 | 11 |
| त्वं चिन्महोदधिरणुं तव बिन्दुमेकं (स) | .... | 130 | 10 |
| त्वं हि नः पिता योऽस्माकं (स) प्र. 6-8 | . | 181 | 14 |
| द | | | |
| ददृशुः कपिलं तत्र (स) | ... | 22 | 3 |
| दध्ना जुहोति (आ) आ. श्रौ. 6-25-10 | .... | 174 | 21 |
| दामोदरं बन्धगतः (स) | .... | 293 | 8 |
| दारुण्यग्निर्यथा तैलं तिले (स) | ... | 102 | 7 |
| दिव्यं स्थानमजरं (स) म. भा. | ... | 274 | 8 |
| दिव्यं स्थानमजरं चाप्रमेयं (आ) म. भा. | .... | 274 | 13 |
| दृश्यते तु (स) ब्र. सू. 2-1-6 | .. . | 190 | 12 |
| दृष्टमूलं द्विविधं (आ) वरदराजीयम् | | 231 | 12 |
| देवता वा प्रयोजयेदतिथिवत्( आ) पू.मी. सू.9-1-6 | | 297 | 11 |
| देवतिर्यङ्मनुष्याख्या (स) | .... | 177 | 5 |
| देवदत्तप्रमा तत्स्थप्रमा (स) चित्सुखीयम् | .... | 158 | 8 |
| देवमायेव निर्मिता (स) श्री रा. बा 1-26 | .... | 143 | 17 |
| ,, | .... | 175 | 3 |
| द्वन्द्वे घि (आ) पा. सू. 2-2-32 | .. . | 238 | 11 |
| द्वाविमौ कण्टकौ तीक्ष्णौ (स) | .. | 11 | 9 |
| द्वे वाव ब्रह्मणो रूपे (स) बृ. 2-3-1, मै. 6-3-15 | .... | 246 | 12 |
| द्व्येकयोः (स) पा. सू. 1-4-22 | .. | 193 | 5 |
| ,, (आ) ,, | .... | 287 | 12 |
| ,, ,, ,, | .... | | 15 |

| उपात्तप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| **ध** | | | |
| धन्यं तदेव लग्नं (स) | .. | 61 | 8 |
| धन्यं यशस्यमायुष्यं (आ) | . | 61 | 19 |
| धर्मसंस्थापनार्थाय (स) गी 4-8 | .... | 53 | 9 |
| धाता पुरस्ताद्यमुदाजहार (आ) पु. सू. | .... | 49 | 18 |
| धातुः प्रसादात् (स) श्वे. 3-20, म. ना. 8-3. | ... | 326 | 12 |
| ध्यायतेऽध्यासिता तेन (स) आथर्वणिकी (मन्त्रिकोपनिषत्) | | 3 | 7 |
| **न** | | | |
| न कर्मणा वर्धते (आ) बृ 4-4-23 | .... | 54 | 22 |
| ,, | . | 132 | 16 |
| न कर्मणा वर्धते नो कनीयान् (स) बृ 4-4-23 | .... | 67 | 7 |
| ,, | .. | 300 | 12 |
| न किरिन्द्र त्वदुत्तरः (स) ऋक्सं. 3-6-19-1 | . | 51 | 10 |
| ,, | .... | | 12 |
| न चानृषेर्दर्शनमस्ति किंचित् (स) | .... | 123 | 5 |
| न जायते (आ) क 2-18 | .... | 119 | 14 |
| न तत्समश्चाभ्यधिकश्च दृश्यते (स) श्वे. 6-8 | .... | 45 | 2 |
| न तस्य प्राकृता मूर्तिः (स) व. पु. 31-40 | .. . | 277 | 6 |
| न ते रूपं न चाकारः (स) जितन्ते स्तो. | ... | 292 | 10 |
| न त्वत्समस्त्वभ्यधिकः कुतोऽन्यः (स) गी. 11-43 | | 47 | 7 |
| न त्वेवाहं जातु नासं (स) गी. 2-12 | .... | 123 | 7 |
| न दिवा न रात्रिः (स) श्वे. 4-18 | .... | 43 | 7 |
| नपुंसकमनपुंसकेन (आ) पा. सू. 1-2-69 | .... | 222 | 18 |
| न ब्रह्मा नेशानः (स) म. ना. 1 | .... | 43 | 5 |
| नमस्ते अस्तु मा मा हिंसीः (स) | | 52 | 11 |
| न मे पार्थास्ति कर्तव्यं (स) गी. 3-22 | . . | 53 | 9 |
| न लिप्यते कर्मफलैः (स) मो ध. | . | 173 | 10 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| न सत्तन्नासदुच्यते (आ) गी. 13-12 | .... | 144 | 18 |
| ,, | .... | ,, | 23 |
| ,, (स) | .... | 145 | 5 |
| न सन्ति प्राणिनो यत्र (स) वि. पु. | ... | 102 | 9 |
| न सन्न चासच्छिव एव (स) श्वे. 4-18 | . | 33 | 18 |
| न सोऽस्ति प्रत्ययो लोके (आ) वाक्यपदीयम् | .... | 254 | 14 |
| ,, | ... | 254 | 20 |
| न हिंस्यात् (आ) | ... | 298 | 20 |
| नाना वा देवतापृथक्त्वात् (आ) पू. मी. सङ्कर्षकाण्डे 14-2-14. | | 298 | 11 |
| नान्यः पन्थाः (स) श्वे. 6-15 | ... | 40 | 7 |
| ,, | .... | 46 | 6 |
| ,, (आ) श्वे. 6-15 | . | 40 | 17 |
| नारायणः परं ब्रह्म (स) म. ना. 11-4 | .... | 123 | 11 |
| नासदासीन्नो सदासीत् (स) तै. ब्रा. 2-8-9 | .... | 41 | 6 |
| ,, | ... | 144 | 6 |
| ,, (आ) | .... | 41 | 19 |
| ,, ,, | . | 144 | 16 |
| ,, ,, | ... | | 19 |
| नास्य जरयैतज्जीर्यति (स) छा. 8-1-5 | ... | 124 | 10 |
| निगूहनं चतुष्काणां (स) | .. | 300 | 7 |
| नित्यं नित्याकृतिधरं (स) सात्वतम् | . | 288 | 12 |
| नित्यं हि नास्ति जगति (स) म. भा. शा. 347-32 | | 277 | 12 |
| ,, | .. | 288 | 16 |
| नित्यसिद्धे तदाकारे (स) पौष्करसंहिता | .... | 288 | 11 |
| नित्या भूतिर्मतिश्च (आ) त. मु. 1-6 | .... | 272 | 21 |
| नित्या लिङ्गा स्वभावसंसिद्धि. (स) रहस्यात्राय: | | 288 | 13 |
| नित्यैवैषा जगन्माता (आ) वि पु. 1-22 53 | .. | 80 | 13 |
| नित्यो नित्यानां चेतनश्चेतनानां (स) क. 2-5-13, श्वे. 6-13. | | 123 | 6 |

| उपात्तप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| नित्यो नित्यानां चेतनश्चेतनानां (आ) क. 5-13, श्वे. 6-13. | | 119 | 14 |
| ,, | ,, | 127 | 23 |
| ,, | ,, | 246 | 21 |
| निरञ्जनः परमं साम्यं (आ) मु. 3-1-3 | | 127 | 22 |
| ,, | (स) ,, | 171 | 4 |
| निरवद्यं (स) श्वे. 6-19 | | 164 | 9 |
| निरुपाधी च वर्तेते (स) | | 56 | 8 |
| निर्दोषो निरनिष्टः (स) | | 291 | 5 |
| निर्विकारं निरञ्जनं निरवद्यं (आ) श्वे. 6-19 | | 132 | 17 |
| निष्कलं निष्क्रियं शान्तं (स) श्वे. 6-19 | | 127 | 14 |
| ,, | (आ) ,, | 291 | 19 |
| निष्कलं निर्विकारं (आ) | | 290 | 10 |
| निष्कृष्टेऽस्मिन् शरीरिणि (आ) त. मु. 3-25 श्लो. | | 117 | 16 |
| नेति नेति (स) बृ. 2-3-6 | | 246 | 15 |
| ,, | | 247 | 10 |
| ,, | (आ) ,, | 246 | 22 |
| नेह नानाऽस्ति (आ) बृ. 4-4-19 | | 66 | 11 |
| ,, | | 245 | 6 |
| नैतं सेतुं (स) छा. 8-4-1 | | 48 | 8 |

प

| | | | |
|---|---|---|---|
| पञ्चर्त्विजस्समन्वारब्धाः (आ) | | 260 | 12 |
| पण्डितास्समदर्शिनः (आ) गी. 5-18 | | 246 | 20 |
| पतिं विश्वस्यात्मेश्वरं (स) म. ना. 11-3 | | 7 | 8 |
| पयसा जुहोति (आ) | | 174 | 21 |
| परात्परं पुरुषमुपैति (स) मु. 3-2-8 | | 171 | 2 |
| पराभिध्यानात्तु तिरोहितं (स) ब्र. सू. 3-2-4 | | 170 | 2 |
| पराऽस्य शक्तिर्विविधैव (स) श्वे. 6-8 | | 67 | 11 |
| ,, | (आ) ,, | 294 | 20 |

| उपात्तप्रमाणानि | पृ. सं. | पङ्क्ति सं. |
|---|---|---|
| परेण परधर्मीव(स) मोक्षधर्म 313, 26–31 | ... 6 | 12 |
| ,, | .... 172 | 3 |
| पवित्राणां पवित्रं यो (आ) स. ना. | . 189 | 13 |
| पशुना यजेत (आ) | .... 35 | 14 |
| पश्यत्यचक्षुः स शृणोत्यकर्णः (स) श्वे. 3-19 | . 20 | 6 |
| ,, | 314 | 7 |
| पादपांसुना यूपमनक्ति (आ) | . 174 | 21 |
| पादोऽस्य विश्वा भूतानि (स) पु. सू | .... 47 | 9 |
| पिकद्विरेफावलिगीतशोभम् (आ) | .... 11 | 14 |
| पुमांस्त्रिया (आ) पा. सू. 1–2–67 | .... 303 | 16 |
| पुरुष एवेदगं् सर्वं (स) पु. सू. | .. 44 | 9 |
| ,, | . 210 | 4 |
| ,, | 245 | 2 |
| पुरुषश्चाप्युभावेतौ (स) वि. पु. 6-4-39 | .. 179 | 9 |
| पुरुषोत्तमः कः (आ) स्तो. र, 12 श्लो | .... 64 | 17 |
| पूर्णस्य पूर्णः (आ) | .... 324 | 23 |
| पूर्णषाड्गुण्यविग्रहं (आ) | .. . 281 | 17 |
| पूर्वाबाधेन नोत्पत्तिः (स) | .... 256 | 8 |
| पृथगात्मानं (आ) श्वे. 1–6 | ... 5 | 19 |
| ,, | . 172 | 8 |
| ,, | 246 | 21 |
| पौर्वापर्ये पूर्वदौर्बल्यं (आ) पू. मी. 6-5-54 | .... 260 | 21 |
| प्रकृतिं पुरुषं चैव (स) गी. 13-19 सू. | .... 5 | 4 |
| ,, | . 123 | 8 |
| ,, | . .. 278 | 10 |
| प्रकृतिर्या मयाऽऽख्याता (स) वि. पु. 6-4-39 | . .. 179 | 8 |
| प्रकृतिर्विष्णुरीशानः (आ) रुद्रयामले वामागमे | ... 66 | 13 |
| प्रजापतिर्वा एक एवाग्र आसीत् (आ) मै. 2–6 | .... 33 | 19 |
| प्रजापतिश्चरति गर्भे अन्तः (आ) म. ना. 1–1 | .... 49 | 19 |
| प्रत्यक्परात्च (आ) त-मु. 1-6 | .. 272 | 20 |

| उपात्तप्रमाणानि | पृ. सं. | पङ्क्ति सं. |
|---|---|---|
| प्रमायाः परतन्त्रत्वात् (स) कुसुमाञ्जलिः 2-1 | .... 71 | 2 |
| प्रयोजनमनुद्दिश्य (स) | .... 8 | 11 |
| प्रशान्तं साक्षसूत्रकम् (स) | .... 291 | 4 |
| प्राज्ञेनात्मना संपरिष्वक्तः स) बृ. 4-3-21 | .... 170 | 4 |
| प्राज्ञेनात्मनाऽन्वारूढः (स) बृ. 4-3-35 | .... 170 | 5 |
| प्राप्य योगबलं कुर्यात् (स) | .... 134 | 9 |
| प्रीत्या प्रसूतव्यापारः क्रीडेत्याहुर्मनीषिणः (आ) | .... 12 | 8 |
| **ब** | | |
| बहुव्रीहौ (आ) पा. सू. 5-4-73 | .... 287 | 9 |
| बोद्धाऽनृतो बुद्धिफले (स) या. प्र. सं. | .... 268 | 14 |
| ब्रह्मण आनन्दः (स) तै. उ. 2-8-1 | .... 112 | 12 |
| ब्रह्मणस्तास्तु (आ) | .... 10 | 8 |
| ब्रह्मविदाप्नोति परं (स) तै. उ 2-1-1 | .... 25 | 15 |
| ,, (आ) तै. उ. 2-1-1 | .... 170 | 19 |
| ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे (स) अथर्वशिखा. उ. | .... 54 | 8 |
| ब्रह्मदाशा ब्रह्मदासाः (स) आधर्वणी संहितोपनिषत् | 127 | 8 |
| ब्रह्म वनं ब्रह्म स वृक्षः (स) | .... 244 | 5 |
| ब्रह्मविद्यामधिष्ठाय (स) | .... 180 | 4 |
| ब्रह्म वेद ब्रह्मैव (आ) मु. 3-2-9 | .... 26 | 15 |
| ,, ,, | .... 171 | 12 |
| ,, (स) मु. 3-2-9 | .... 171 | 3 |
| ब्रह्मैवेदं सर्वं (स) नृ. उ. ता. 7, बृ. 2-5-1 | .... 245 | 4 |
| ब्राह्मणार्थो यथा नास्ति (आ) महाभाष्यं | ... 31 | 14 |
| **भ** | | |
| भगवानिति शब्दोऽयं (स) | .... 56 | 7 |
| भगवद्धर्ममात्रेण (आ) | ... 320 | 76 |
| भजध्वं भवतापघ्नं (आ) स्कान्दं | ... 59 | 12 |
| भवन्ति तपतां श्रेष्ठ (स) वि. पु. 1-3-3 | .... 2 | 14 |
| भारतः पञ्चमो वेदः (आ) | .... 288 | 22 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| भूयश्चान्ते विश्वमायानिवृत्तिः (स) श्वे. 1-10 | .... | 143 | 14 |
| ,, | .... | 177 | 11 |
| भोगमात्रसाम्यलिङ्गाच्च (स) ब्र. सू. 4-4-21 | .... | 171 | 5 |
| भ्रान्तिज्ञानवतां पुंसां (स) | .... | 131 | 10 |
| भ्रामयन् सर्वभूतानि (स) गी. 18-61 | .... | 177 | 9 |
| **म** | | | |
| मङ्गलानां च मङ्गलम् (स) स. ना. | .... | 39 | 7 |
| मत्प्रसादात् (स) गी. 18-56 | .... | 326 | 12 |
| मन्वर्थविपरीता तु या स्मृतिः (स) | .... | 57 | 9 |
| मम माया दुरत्यया (स) गी. 7-14 | .... | 177 | 6 |
| ,, (आ) गी. 7-14 | .... | 177 | 15 |
| मम साधर्म्यमागताः (स) गी. 14-2 | .... | 6 | 5 |
| ,, | .... | 172 | 5 |
| ममैवांशो जीवलोके (स) गी. 15-7 | .... | 5 | 11 |
| मयाऽध्यक्षेण प्रकृतिः (स) गी. 9-10 | .... | 3 | 11 |
| मल्लमयो ग्रामः (आ) | .... | 281 | 8 |
| महीसुरोर्वीपतिवैश्यकास्ते (स) शिल्पशास्त्रं | .... | 60 | 9 |
| मायां तु प्रकृतिं विद्यात् (स) श्वे. 4-10 | .... | 174 | 7 |
| मायां न सेवे भद्रं ते (स) भा. उद्यो. 68-5 | .... | 176 | 3 |
| मायामात्रमिदं (आ) गौ. का. 1-17 | .. | 178 | 14 |
| मायामात्रं तु (स) ब्र. सू 3-2-3 | .... | 178 | 2 |
| माया वयुनं ज्ञानं (स) | .... | 177 | 2 |
| मायाविनं मायया वर्तमानं (स) वेदनिघण्टौ-धर्म-वर्गे 22-22. | | 176 | 3 |
| मुक्तोपसृप्यव्यपदेशाच्च (आ) ब्र. सू. 1-3-2 | .... | 6 | 16 |
| ,, ,, | .... | 171 | 3 |
| मृत्तिकेत्येव सत्यं (स) छा. 6-1-4 | ... | 188 | 3 |
| ,, (आ) छा. 6-1-4 | ... | 190 | 16 |
| मृत्युर्वै परे देव एकी भवति (स) | .... | 179 | 4 |
| मोहयिष्यामि मानवान् (स) | .... | 22 | 7 |

| उपात्तप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| **य** | | | |
| यः पृथिव्यां तिष्ठन् (आ) बृ. 3-7-3 | .... | 36 | 12 |
| य एतद्विदुरमृतास्ते भवन्ति (स) तै. ना. 1-3 | .... | 46 | 5 |
| य एषु सुप्तेषु जागर्ति (स) क. 2-5-8 | .... | 169 | 14 |
| यजेत्पुरुषसूक्तेन (आ) | ... | 48 | 21 |
| यतोऽतो ब्रह्मणस्तास्तु (स) | . | 9 | |
| यतो वा (आ) तै 3-1-1 | .... | 72 | 20 |
| ,, | .... | 128 | 18 |
| यतो वाचो निवर्तन्ते (स) तै. 2-2-1, 2-4-1 | .... | 112 | 7 |
| ब्रह्म 3. ,, | .... | 23 | 9 |
| ,, ,, | . | 25 | 12 |
| ,, ,, | .... | 26 | 9 |
| ,, (आ) तै. 2-4-1, 2-9-1, ब्रह्म 3. | | 32 | 15 |
| यत्प्रनृत्यदिवाभाति (स) | . .. | 122 | 8 |
| यत्प्रयन्त्यभिसंविशन्ति (स) तै. उ. 3-1-1 | .... | 25 | 10 |
| यत्र त्वस्य सर्वमात्मैवाभूत् (स) बृ. 2-4-14 | .... | 245 | 4 |
| यथाक्रमेणैव विमानमेषां (आ) शिल्पशास्त्रे मरीचि-संहितायां. | | 61 | 12 |
| यथा पृथिव्यामोषधयस्संभवन्ति (स) आथर्वणिकी मु. 1-1-7. | | 4 | 4, 7 |
| यथा शुद्धमुदकं शुद्ध उदके (आ) क. 1-4-15 | . .. | 171 | 20 |
| यथा सतः पुरुषात् (स) मु. 1-7 | .... | 4 | 9 |
| ,, (आ) मु. 1-7 | .... | 5 | 13 |
| यथा सर्वगतो विष्णुः (आ) वि. पु 1-8-17 | .... | 80 | 14 |
| यथैकस्मिन् मृण्मये पिण्डे (आ) | ... | 122 | 13 |
| यथोर्णनाभिस्सृजते च (स) मु. 1-1-7 | .... | 5 | 3 |
| यदन्यद्वायोरन्तरिक्षाच्च (आ) बृ. 2-3-2 | .... | 144 | 21 |
| यदाग्नेयोऽष्टाकपालः (आ) | .... | 273 | 19 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| यदा तमस्तत् (स) श्वे. 4-18 | ... | 40 | 8 |
| ,, | ... | 43 | 7 |
| ,, (आ) | .... | 41 | 17 |
| ,, ,, | .... | 33 | 18 |
| ,, ,, | .... | 43 | 12 |
| यदात्मको भगवान् (स) | .... | 281 | 14 |
| यदा यदा हि धर्मस्य (आ) गी. 4-7 | .... | 301 | 16 |
| यद्युद्गाताऽपच्छिद्येत (आ) | .... | 260 | 15 |
| यद्वाचाऽनभ्युदितम् (स) के. 4 | .... | 23 | 9 |
| यद्वृत्तयोगः प्राथम्यं (स) | .... | 174 | 12 |
| यन्न दुःखेन (आ) | .... | 243 | 22 |
| ,, | .... | 297 | 9 |
| यश्चाधनः कामयते (स) | .... | 11 | 12 |
| यस्तर्केणानुसंधत्ते (स) | .... | 114 | 8 |
| यस्मात्परं (स) श्वे. 3-9 म. ना. 10-4 | .... | 44 | 5 |
| ,, (आ) श्वे. 3-9 म. ना. 10-4 | ... | 44 | 18 |
| ,, | .... | 45 | 17 |
| यस्मिन् कल्पे तु यत्प्रोक्तं (आ) | .... | 66 | 17 |
| यस्य देवे परा भक्तिः (स) श्वे 6-23 | ... | 326 | 10 |
| यस्य पर्णमयी जुहूर्भवति (आ) तै. सं. 3-5-7 | .... | 174 | 22 |
| यस्य पृथवी शरीरं (आ) बृ. 3-7-3 सु. 7 | ... | 121 | 19 |
| यस्य मृत्युश्शरीरं (आ) सु. 7 | ... | 41 | 4 |
| यस्यात्मा शरीरं (आ) बृ. 5-7-22 मा. शाखा. | ... | 121 | 20 |
| यस्याव्यक्तं शरीरं (आ) सु. 7 | .... | 121 | 19 |
| यस्सर्वज्ञस्सर्ववित् (स) मु. 1-1-9, 2-2-7 | ... | 84 | 8 |
| ,, (आ) मु. 1-1-9, 2-2-7 | ... | 314 | 15 |
| यानि नामानि गौणानि (आ) | ... | 39 | 17 |
| युक्ता ह्यस्य हरयश्शता दश (स) बृ. 2-5-19 | .... | 176 | 10 |
| येनाक्षरं पुरुषं वेद (स) मु. 1-2-13 | .... | 25 | 11 |
| येऽप्यन्यदेवताभक्ताः (आ) गी. 9-53 | .... | 61 | 18 |

| ज्ञातप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| यो अस्याध्यक्षः परमे व्योमन् (आ) | .... | 274 | 19 |
| यो मे हस्तादिवर्ष्म (आ) त. मु. 2-1 | .... | 250 | 13 |
| यो वेद निहितं गुहायां (स) तै. 2-1-1 | .... | 25 | 10 |
| ,, (आ) ,, | .... | 120 | 11 |
| **र** | | | |
| राजसेषु तु कल्पेषु (आ) | ... | 66 | 22 |
| **ल** | | | |
| लक्षणहेत्वोः (स) पा. सू. 3-2-126 | .... | 238 | 5 |
| ,, | ... | 238 | 12 |
| लीङ् श्लेषणे (आ) धा. पा. दिवादि 1139 | ... | 179 | 20 |
| लोकं वैकुण्ठनामानं (स) द्वितीयजितन्ता 18-21 | | 276 | 9 |
| **व** | | | |
| वचसां वाच्यमुत्तमं (स) स. ना. | ... | 26 | 8 |
| वषट्कर्तुः प्रथमभक्षः (आ) | .... | 275 | 23 |
| वस्तुस्फोटस्स एकस्मिन् (आ) | .... | 254 | 17 |
| वाक्यात्संख्याविशेषाच्च (स) | ... | 73 | 12 |
| ,, | .... | 111 | 13 |
| वाचारम्भणं विकारो नामधेयं (स) छा. 6-1-4 | .... | 187 | 2 |
| ,, (आ) छा. 6-1-4 | .... | 187 | 10 |
| विकारजननीं मायां (स) आथर्वणिकी (मन्त्रिकोपनिषत्). | | 3 | 6 |
| विग्रहे च व्यूहविभवादयः (आ) न्या. सि. | .... | 290 | 15 |
| विज्ञानसारथिर्यस्तु (स) क. उ. 3-9 | .... | 57 | 12 |
| विद्यां चाविद्यां च यस्तद्वेद (स) ईश 11 | .... | 179 | 13 |
| विद्याचोरो गुरुद्रोही (स) | ... | 113 | 9 |
| विद्याबलं दैवबलं (आ) | .... | 61 | 21 |
| विद्याविनयसंपन्ने (स) गी. 5-18 | ... | 246 | 7 |
| ,, (आ) ,, | .... | 246 | 20 |
| विधिस्तु धारणेऽपूर्वत्वात् (आ) पू-मी. सू. 3-4-15 | | 273 | 7 |

| उपात्तप्रमाणानि | पु सं. | पङ्क्ति सं. |
|---|---|---|
| विप्रतिपत्तौ हविषा नियम्येत (आ) पू. मी. सू. 8-1-32. | 297 | 18 |
| विरोधे त्वनपेक्षं स्यात् (आ) पू. मी. सू. 1-3-3 .. | 21 | 20 |
| ,, | 123 | 18 |
| विश्वकर्मणस्समवर्ततादि (आ) तै. आ | 49 | 20 |
| विश्वमायानिवृत्तिः (आ) श्वे. 1-10 | 177 | 19 |
| ,, (स) | 184 | 12 |
| विश्वशंभुवं (स) ना. 11-3 | 38 | 4 |
| विषयित्वनिदानं च तज्ज्ञानं चापि (आ) | 320 | 17 |
| विष्णुमायामहावर्त (स) | 177 | 12 |
| विष्णुरेव परं ब्रह्म त्रिभेदं (स) .... | 65 | 8 |
| विष्णुरेव भूत्वा (स) .... | 172 | 2 |
| विष्णुर्वा अकामयत (आ) .... | 53 | 17 |
| विष्णोर्विचित्राः प्रभवन्ति मायाः (स) | 177 | 13 |
| विष्णोस्सकाशादुद्भूतं (स) वि.पु 1-1-31 .. | 60 | 4 |
| ,, (आ) ... | 60 | 13 |
| विष्णोरन्ये राध्यमानाः (स) शिल्पे गार्ग्यसंहिता ... | 61 | 5 |
| विष्ण्वाख्यं परमं पदं (आ) .. | 57 | 20 |
| वृद्धिह्रासभाक्त्वमन्तर्भावात् (आ) ब्र. सू 3-2-20 | 137 | 19 |
| वेदाच्छास्त्रं परं (आ) .... | 60 | 20 |
| वेदानध्यापयामास (स) .... | 56 | 12 |
| वेदोऽनृतो वुद्धकृतागमोऽनृतः (स) या. प्र. सं. ... | 268 | 13 |
| वेदो यमाश्रयेदर्थं (आ) .... | 189 | 18 |
| वेदैश्च सर्वैरहमेव (स) गी. 15-15 .... | 26 | 8 |
| वैष्णवं वामनमालभेत (आ) .... | 172 | 11 |
| व्यतिरेकाधिकरणनिवासशब्दैः (स) षडर्थसंक्षेपः | 274 | 4 |
| व्याप्तिस्तर्काप्रतिहतिः (आ) .... | 75 | 19 |
| व्रीहीन् प्रोक्षति (आ) .... | 243 | 20 |
| श | | |
| शंभुराकाशमध्ये (स) .... | 36 | 10 |
| ,, (आ) .... | 50 | 16 |

| उपात्तप्रमाणानि | पृ. सं. | पङ्क्ति सं. |
|---|---|---|
| शक्तयस्सर्वभावानामचिन्त्य (स) वि. पु. 1-3-2 .... | 9 | 12 |
| शब्दश्रुतिः—ईशानो भूतभव्यस्य (आ) श्रीभाष्यं | 37 | 5 |
| शब्दादेव प्रमितः (आ) ब्र. सू. .... | 37 | 3 |
| शाश्वतं शिवमच्युतं (स) म. ना. 11-3 ... | 38 | 5 |
| ,, (आ) ,, . | 40 | 15 |
| शुद्धसत्वमयं स्थानं (आ) .... | 274 | 26 |
| शूलं परश्वथं शक्तिः (आ) .... | 291 | 13 |
| श्रीश्च ते लक्ष्मीश्च पत्न्यौ (स) वाज ... | 49 | 11 |
| श्रुतेर्जाताधिकारः स्यात् (आ) पू-मी-सू. 3-3-1 | 46 | 19 |
| श्लाघह्नुङ्स्थाशपां (आ) पा. सू. 1-43-4 .. | 23 | 18 |
| **ष** | | |
| षाड्गुण्यप्रचुरा नित्यं (आ) .... | 281 | 16 |
| षाड्गुण्यस्य तथाभूत (स) ... | 300 | 8 |
| षिञ् बन्धने (स) धा पा. 1249 स्वादि ... | 41 | 5 |
| **स** | | |
| संख्ययाऽव्ययासन्न (आ) पा. सू. 2-2-25 ... | 287 | 8 |
| संख्याया अल्पीयस्याः (आ) 2-2-35 पा. सूत्रे. वार्ति 1417. | 287 | 11 |
| संदिग्धे तु वाक्यशेषात् (आ) पू.मी.सू. 1-4-24 | 50 | 13 |
| ,, .... | 171 | 14 |
| संभवाम्यात्ममायया (स) गी. 4-6 . | 176 | 11 |
| स एकाकी न रमेत (स) बृ. 3-4-3, महो. 1 .... | 12 | 3 |
| स एव देवः कृतभूतभावनः (स) .... | 161 | 11 |
| स एव सृज्यः स्रष्टा च (आ) .... | 123 | 23 |
| ,, (स) ... | 124 | 7 |
| सकला न यत्र क्लेशादयः (स) वि. पु 6-5-85 .... | 181 | 11 |
| स तु नारायणो ज्ञेयः (स) मो-ध. .... | 173 | 9 |
| सत्यं ज्ञानमनन्तं ब्रह्म (स) तै 2-1-1 ... | 124 | 11 |
| ,, ,, | 143 | 9 |

| उपात्तप्रमाणानि | | पु. सं. | पङ्क्ति सं. |
|---|---|---|---|
| सत्यं ज्ञानमनन्तं ब्रह्म (आ) | ... | 126 | 21 |
| ,, ,, | .... | 170 | 20 |
| ,, ,, | .... | 190 | 16 |
| सत्यसंकल्पः (स) | ... | 13 | 9 |
| सत्यं सत्यं पुनस्सत्यं (स) | .... | 60 | 5 |
| ,, (आ) | ... | 60 | 19 |
| सदा पूर्णः (आ) | .... | 324 | 22 |
| सदेव सौम्य (स) छा. 6-2-1 | .. | 2 | 12 |
| ,, (आ) | ... | 128 | 17 |
| ,, (आ) | .... | 278 | 24 |
| सदैकरूपरूपाय (स) वि. पु 1-2-1 | ... | 289 | 6 |
| स न साधुना कर्मणा (स) कौ. 3-8, बृ. 4-4-22 | .... | 67 | 8 |
| ,, | .... | 124 | 7 |
| ,, | .... | 300 | 3 |
| स भूमिं विश्वतो वृत्वा (स) पु. सू. | .... | 244 | 9 |
| समस्तशक्तिरूपाणि (स) वि. पु. 6-7-71 | | 177 | 4 |
| समाने वृक्षे पुरुषो निमग्नः (स) श्वे. 4-7 | .... | 169 | 11 |
| स यदि पितृलोककामः (स) श्वे. 8-2 1 | .... | 7 | 4 |
| सर्वं खल्विदं ब्रह्म (स) छा. 3-14-1 | .... | 126 | 11 |
| ,, | .... | 210 | 4 |
| ,, (आ) | .... | 244 | 16 |
| सर्वं प्रोक्तं त्रिविधं (स) श्वे. 1-12 | ... | 127 | 7 |
| सर्वं समाप्नोषि ततोऽसि सर्वः (स) गी. 11-40 | .... | 245 | 2 |
| सर्वगत्वादनन्तस्य (स) वि. पु. 1-19-85 | .... | 245 | 3 |
| सर्वदेवास्पदे विष्णौ (स) शिल्पे गार्ग्यसंहिता | .... | 61 | 6 |
| सर्वव्यवहारावैषम्यं समानत्वात् (आ) न्या. सू. भा. टी. | | 209 | 8 |
| सर्वशर्वशिवस्स्थाणुः (स) स. ना. | .... | 39 | 5 |
| सर्वान् कामान् सह ब्रह्मणा (आ) तै. 2-1-1 | .... | 127 | 33 |
| ,, | .... | 170 | 22 |

| उपात्तप्रमाणानि | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|
| सर्वाननशिरोग्रीवं (आ) श्वे. 3-11 | .... | 40 | 11 |
| सर्वे वेदा यत्रैकं (स) | .... | 25 | 9 |
| स संज्ञां याति भगवान् (स) | ... | 65 | 14 |
| सहकारिभिरारम्भे न स्वातन्त्र्यं (स) त. वा. | ... | 11 | 11 |
| सहस्रशीर्षं देवं (स) म. ना. 11-1 महो. 3 | .... | 46 | 10 |
| ,, | .... | 50 | 6 |
| सहस्रशीर्षा पुरुषः (स) श्वे. 3-14 पु. सू. 1 | .... | 46 | 10 |
| सहस्रस्थूणे विमिते (स) शाट्यायनीयं | .... | 273 | 12 |
| सात्विकेष्वथ कल्पेषु (आ) | .... | 66 | 20 |
| सायुज्यं प्रतिपन्ना ये (स) भगवदुक्तिः | .... | 6 | 8 |
| सुखैकतानं जनयेत् (स) | .... | 9 | 8 |
| सुपां सुलुक् (आ) पा. सू. 7-1-39 | .... | 274 | 15 |
| सुषुप्तयुत्क्रान्त्योर्भेदेन (स) ब्र. सू. 1-4-44 | .... | 170 | 6 |
| सुहृन्मित्रार्युदासीन (स) गी. 6-9 | ... | 246 | 7 |
| सूयते पुरुषार्थं च (स) मन्त्रिकोपनिषत् | ... | 3 | 8 |
| सूर्याय जुष्टं निर्वपामि (आ) | .... | 298 | 5 |
| सृष्टिस्थित्यन्तकरणीं (स) | .... | 55 | 8 |
| ,, | | 65 | 9 |
| सैषाऽऽनन्दस्य मीमांसा (स) तै. 2-8-1 | .... | 25 | 14 |
| सोऽकामयत (स) तै. 2-6-1 | .... | 2 | 10 |
| ,, | .... | 13 | 9 |
| ,, | ... | 84 | 9 |
| ,, | .... | 118 | 15 |
| ,, | | 324 | 8 |
| ,, | .... | 3 | 20 |
| ,, (आ) | .... | 123 | 22 |
| ,, ,, | .... | 324 | 17 |
| सोऽध्वनः पारमाप्नोति (स) क. 1-3-9 | .. | 57 | 13 |
| सोऽभिध्याय शरीरात्स्वात् (स) म. स्मृ. 1-8 | ... | 3 | 4 |
| सोमः पवते जनिता मतीनां जनितेन्द्रस्य (आ) | .... | 54 | 13 |

| उपात्तप्रमाणानि | | पु. सं | पङ्क्ति सं. |
|---|---|---|---|
| सोऽविद्याग्रन्थिं विकिरतीह (स) मु. 2-1-10 | .... | 180 | 7 |
| सोऽश्नुते सर्वान् कामान् (स) तै. 2-1-1 | .... | 170 | 7 |
| स्थितिसंयमकर्ताऽसौ (आ) वि. पु. | .... | 60 | 14 |
| स्थित्यदनाभ्यां च (स) ब्र. सू. 1-3-6 | .. | 169 | 10 |
| स्मृत्यनवकाशदोषप्रसङ्गात् (आ) ब्र. सू. 2-1-1 | | 62 | 17 |
| स्यान्नागरद्राविलवेसरं च (स) शिल्पं | .... | 60 | 8 |
| स्वमायया सांप्रतमागतं वा (स) | . . | 175 | 4 |
| स्वशास्त्रनिर्णयेऽसिद्धे (स) | .... | 270 | 7 |
| स्वशास्त्रनिर्णये सिद्धे (स) | .... | 270 | 8 |
| स्वसत्ताभासकं सत्त्वं (स) पञ्चरात्रं | .... | 282 | 4 |
| स्वातन्त्र्यमतुलं प्राप्य (स) | ... | 6 | 6 |
| स्वेच्छामात्रनिदानता (आ) | ... | 301 | 18 |

ह

| | | | |
|---|---|---|---|
| हरिं हरीतकीं चैव (स) वैद्यशास्त्रं | .... | 61 | 7 |
| हन्ताहमिमास्तिस्रो देवताः (आ) छा. 6-3-2, 3-4, 6-4-7, 6-8-6. | | 305 | 3 |
| हारकेयूरकटक (आ) | ... | 291 | 5 |
| हिरण्गर्भः (आ) म. ना. 1-12 | .. | 44 | 13 |
| हिरण्यगर्भस्समवर्तताग्रे (स) | . | 43 | 8 |
| हिरण्यगर्भो भूगर्भः (आ) स ना. | | 43 | 18 |
| हेत्वभावे फलाभावः (स) | .. | 99 | 16 |
| ह्रीश्च ते लक्ष्मीश्च पत्न्यौ (आ) पु. सू. उत्तरानु | .... | 33 | 21 |
| ,, (स) | | 49 | 10 |

अ. बि.—अमृतबिन्दूपनिषत्
अ. शि.—अथर्वशिखोपनिषत्
अ. सू.—अक्षपादसूत्रम्
(आ.)—आनन्ददायिनी
आ. श्रौ.—आपस्तम्बश्रौतसूत्रम्
इ. स.—इतिहाससमुच्चयः
ई.—ईशावास्योपनिषत्
ऋक्सं.—ऋक्संहिता
क.—कठोपनिषत्
के.—केनोपनिषत्
कै. -कैवल्योपनिषत
कौ.—कौषीतक्युपनिषत्
गी.—भगवद्गीता
गौ. का.—गौडपादकारिका
छा.—छान्दोग्योपनिषत्
त. मु.—तत्त्वमुक्ताकलापः
त. वा.—तन्त्रवार्तिकम्
तै.—तैत्तिरीयोपनिषत्
तै. आ.—तैत्तिरीयारण्यकम्
तै. ब्रा.—तैत्तिरीयब्राह्मणम्
तै. सं.—तैत्तिरीयसंहिता
धा. पा.—धातुपाठः
नृ. उ.—नृसिंहोत्तरतापिन्युपनिषत्
नृ. पू.—नृसिंहपूर्वतापिन्युपनिषत्
न्या. सि.—न्यायसिद्धाञ्जनम्
न्या. सू. भा. टी.—न्यायसूत्रभाष्यटीका
पा. सू.—पाणिनीयसूत्रम्
पु. सू.—पुरुषसूक्तम्
पू. मी. सू.—पूर्वमीमांसासूत्रम्
प्र.—प्रश्नोपनिषत्

बृ.—बृहदारण्यकोपनिषत्
ब्र. बि.—ब्रह्मबिन्दूपनिषत्
ब्र. सू.—ब्रह्मसूत्रम्
भा. उ.—भारतोद्योगपर्व
म. ना.—महानारायणोपनिषत्
म. भा. अनु.—महाभारतानुशासनपर्व
म. भा आश्र.—महाभारताश्रमवासिकपर्व.
म. भाष्यं—महाभाष्यम्
म. भा. शा.—महाभारतशान्तिपर्व
म. स्मृ.—मनुस्मृतिः
महो.—महोपनिषत्
मु.—मुण्डकोपनिषत्
मुक्ति.—मुक्तिकोपनिषत्
मै.—मैत्र्युपनिषत्
मो. ध.—महाभारतमोक्षधर्मपर्व
या. प्र. सं—यादवप्रकाशीयसंग्रहः
या. स्मृ.—याज्ञवल्क्यस्मृतिः
यो. सू. भा.—योगसूत्रभाष्यम्
व. पु.—वराहपुराणम्
वाज.—वाजसनेयकम्
वार्ति.—व्याकरणवार्तिकम्
वासु.—वासुदेवोपनिषत्
वि. पु.—विष्णुपुराणम्
वै. सू.—वैशेषिकसूत्रम्
श्री. रा.—श्रीमद्वाल्मीकिरामायणम्
श्वे.—श्वेताश्वतरोपनिषत्
(स.)—सर्वार्थसिद्धिः
स. नाम.—विष्णुसहस्रनाम
सु.—सुबालोपनिषत्
स्तो. र.—स्तोत्ररत्नं यामुनमुनिकृतम्

# संपुटेऽस्मिन् सर्वार्थसिद्ध्यानन्ददायिन्योः सामान्यतो विशेषतश्चोपात्तानां ग्रन्थकृन्नाम्नामकारादि-वर्णक्रमेण सूचनी


| उपात्तग्रन्थकृन्नामानि | | | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|---|---|
| | | | अ | | |
| अद्वैतव्याख्यायिनः (स) | .... | .... | ... | 120 | 8 |
| अद्वैतिनः (स) .... | .... | .... | .... | 18 | 8 |
| ,, .... | .... | .... | .... | 159 | 10 |
| अन्ये (आ) .... | .... | .... | .... | 13 | 21 |
| ,, .... | .... | .... | .... | 113 | 21 |
| अपरे (आ) ... | .... | .... | .... | 101 | 20 |
| ,, .... | .... | .... | .... | 109 | 24 |
| ,, .... | .... | .... | .. | 123 | 21 |
| अर्धलोकायतिकाः (स) | .... | .... | .... | 18 | 8 |
| ,, (आ) | .... | .... | .... | 18 | 17 |
| ,, ,, | .... | .... | .... | 22 | 12 |
| | | | आ | | |
| आचार्याः (आ) .... | .... | .... | .... | 10 | 14 |
| | | | उ | | |
| उदयनः (आ) .... | .... | .... | .... | 102 | 21 |
| | | | ए | | |
| एके (स) ... | .... | .... | .... | 17 | 5 |
| ,, (आ) .... | .... | .... | .... | 109 | 24 |

| उपात्तग्रन्थकृन्नामानि | | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|---|
| **क** | | | | |
| कणादजिनव्यतिरिक्ताः (आ) | .... | .... | 198 | 17 |
| कपर्दी (स) .... | .... | .... | 61 | 9 |
| कपिलः (स) .... | .... | .... | 21 | 9 |
| ,, (आ) .. | . . | .... | 21 | 22 |
| कश्चित् (स) .... | .... | . | 158 | 7 |
| कात्यायनः (आ) .... | .... | .... | 123 | 16 |
| काश्यपीयाः (सु) . . | .... | ... | 320 | 12 |
| केचित् (आ) 20-17, 37-18, 50-15, 63-18, 68-14 100-13, 101-20, 102-13, 106-21, 107-18, 120-18, 173-18, 175-11, 182-10, 195-13, 201-18, 208-19, 249-17 261-19, 270-17, 274-13, 276-20, 290-13, 291-2, 294-17, 307-8, 323-23 | | | | |
| कौषीतकिनः (स) .... | .... | .... | 273 | 13 |
| **ग** | | | | |
| गुहदेवः (स) .... | .... | .. | 61 | 9 |
| गौतमव्यतिरिक्ताः (आ) | .... | .. | 198 | 18 |
| **च** | | | | |
| चार्वाकः (स) .... | .... | .... | 18 | 7 |
| ,, ,, .... | .... | .... | 97 | 8 |
| ,, (आ) .... | .... | .... | 22 | 21 |
| ,, ,, .... | .... | . | 97 | 20 |
| चार्वाकव्यतिरिक्ताः (आ) | .... | .. . | 198 | 17 |
| चार्वाकादयः (आ) | .... | .... | 16 | 14 |
| चित्सुखः (आ) . | .... | . .. | 158 | 14 |
| **ज** | | | | |
| जैनगन्धिनः (स) ... | ... | .... | 138 | 10 |
| ,, .... | .... | .... | 200 | 13 |

| उपात्तग्रन्थकृन्नामानि | | | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|---|---|
| जैनाः (स) | .... | .... | .... | 206 | 5 |
| ,, (आ) | .... | .... | .... | 206 | 18 |
| | | ट | | | |
| टङ्कः (स) | .... | .... | .... | 61 | 9 |
| | | त | | | |
| तार्किकाः | .... | ... | .... | 67 | 18 |
| तार्किकादयः (आ) | | .. . | . . | 65 | 18 |
| तार्किकैकदेशी (आ) | | .... | .... | 67 | 19 |
| तैत्तिरीयाः (स) | .... | .... | .... | 49 | 11 |
| | | द | | | |
| द्रमिडः (स) | .... | ... | .... | 61 | 9 |
| द्रविडभाष्यकारादिः (आ) | | .. . | .... | 288 | 19 |
| | | न | | | |
| नवीनशैवः (आ) | .. . | .... | .... | 62 | 16 |
| नालिकेरद्वीपवासिनः (स) | | .... | .. . | 110 | 10 |
| निरीश्वरमीमांसकाः (स) | | .... | .... | 22 | 9 |
| निरीश्वरसांख्यः (आ) | | .... | .... | 114 | 10 |
| नैघण्टुकाः (स) | .... | .... | .. . | 177 | 2 |
| नैयायिकाः (स) | .... | .... | .... | 321 | 2 |
| नैयायिकादयः (स) | | .... | .... | 21 | 7 |
| न्यायभाष्यकारः (स) | | .... | .... | 209 | 7 |
| न्यायाचार्यः (स) | | .... | . . | 111 | 14 |
| | | प | | | |
| परः (स) | .... | .... | .... | 82 | 6 |
| ,, | .... | .... | .... | 91 | 8 |
| ,, | .... | .... | ... | 97 | 5 |
| ,, | .... | .... | .... | 124 | 12 |
| ,, | .... | .... | .... | 223 | 10 |

| उपात्तग्रन्थकृन्नामानि | | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|---|
| पराशरः (आ) | .... | ... | 60 | 12 |
| पराशरपाराशर्यादयः (स) | .... | .... | 60 | 4 |
| पौराणिकाः (आ) | .... | ... | 66 | 9 |
| **ब** | | | | |
| बोधायनः (स) | .... | .... | 61 | 9 |
| ब्रह्मदत्तः (स) | .... | .... | 118 | 16 |
| ,, (आ) | .... | .... | 118 | 20 |
| ,, ,, | .... | .... | 307 | 15 |
| ब्रह्मनन्द्यादिः (स) | .. | .... | 288 | 12 |
| **भ** | | | | |
| भट्टाचार्यः (आ) | .... | .... | 222 | 18 |
| भारुचिः (स) | .... | ... | 61 | 9 |
| भास्करः (आ) | .... | .... | 119 | 17 |
| ,, (स) | .... | .... | 132 | 8 |
| भास्करादिः (स) | .... | .... | 118 | 16 |
| भास्करीयाः (स) | .... | ... | 120 | 11 |
| ,, (आ) | .... | .... | 122 | 18 |
| भावाद्वैतिनः (स) | .... | .... | 167 | 2 |
| भेदाभेदवादिनः (स) | .... | .... | 130 | 7 |
| **म** | | | | |
| मन्दः (स) | ... | .... | 104 | 7 |
| मन्वादयः (आ) | .... | .... | 62 | 18 |
| माध्यमिकः (आ) | .... | .... | 16 | 19 |
| ,, | ... | ... | 209 | 16 |
| ,, (स) | .... | .. | 267 | 11 |
| मायावादी (स) | .... | .... | 267 | 12 |
| मायिनः (आ) | ... | .... | 65 | 19 |

| उद्धृतग्रन्थकृन्नामानि | | | पृ सं. | पङ्क्ति सं. |
|---|---|---|---|---|
| मायिनः (आ) | | | 129 | 10, 11 |
| ,, | | | 118 | 19 |
| मायिमतानुयायिनः (स) | .... | .... | 312 | 11 |
| माध्येकदेशिनः (आ) | .... | .... | 130 | 16 |
| मीमांसकः (आ) | .... | .... | 18 | 17 |
| ,, | ... | .... | 67 | 18 |
| ,, | .... | .... | 99 | 22 |
| ,, | .... | .... | 174 | 20 |
| मीमांसाभाष्यकारादयः (स) | .. | .... | 52 | 7 |
| मुग्धाद्वैतिनः | .... | .... | 255 | 9 |

य

| | | | | |
|---|---|---|---|---|
| यादवः (आ) | .... | .... | 119 | 17 |
| ,, | .... | .... | 113 | 18 |
| यादवप्रकाशः (स) | .... | .... | 275 | 4 |
| यादवप्रकाशीयाः (स) | .... | .... | 120 | 12 |
| यादवीयाः (आ) | . . | ... | 122 | 18 |

ल

| | | | | |
|---|---|---|---|---|
| लोकवेदनिघण्टुकाराः (स) | .... | .... | 141 | 3 |
| लोकायतिकः (आ) | .... | .... | 18 | 22 |
| ,, (स) | .... | .... | 19 | 4 |

व

| | | | | |
|---|---|---|---|---|
| वाजसनेयिनः (स) | .... | .... | 49 | 11 |
| वैभाषिकादिः (स) | .... | .... | 241 | 8 |
| वैशेषिकाः (आ) | .... | .... | 320 | 22 |
| ,, (स) | .... | .... | 321 | 2 |
| व्यासः (आ) | .... | .... | 60 | 15 |

| उपात्तग्रन्थकृन्नामानि | | | पृ. सं. | पङ्क्ति सं. |
|---|---|---|---|---|
| **श** | | | | |
| शाट्यायनिनः (स) | .... | .... | 273 | 11 |
| शाब्दा· (आ) | .... | .... | 254 | 16 |
| शैवैकदेशिनः (आ) | .... | .... | 65 | 18 |
| ,, | .... | .... | 66 | 22 |
| **स** | | | | |
| साङ्ख्यः (स) | .... | .... | 97 | 8 |
| ,, | .... | .... | 190 | 11 |
| साङ्ख्यवेदान्तिव्यतिरिक्ताः (आ) | | .... | 198 | 18 |
| सात्वतादयः (स) | .... | .... | 310 | 9 |
| सेश्वरसाङ्ख्यः (आ) | .... | . | 14 | 10 |
| सौगतः (स) | ... | ... | 97 | 8 |
| ,, | .... | .... | 267 | 9 |
| सौगतगन्धिनः (स) | .... | .... | 138 | 10 |

# संपुटेऽस्मिन् सर्वार्थसिद्ध्यानन्ददायिन्योस्सामान्यतो विशेषतश्चोपात्तानां ग्रन्थनाम्नामकारादि-क्रमेण सूचनी


| उपात्तग्रन्थनामानि | | | पु सं | पङ्क्ति सं. |
|---|---|---|---|---|
| अथर्वशिखा (स) | .... | .... | 54 | 8 |
| अन्तर्यामिब्राह्मणम् (स) | .... | .... | 36 | 6 |
| अमरादिः (आ) | .... | .... | 175 | 11 |
| **आ** | | | | |
| आक्षपादी (स) | .... | .... | 84 | 5 |
| **ए** | | | | |
| एकायनशाखा | .... | .... | 58 | 19 |
| **क** | | | | |
| कठवल्ली | .... | .... | 57 | 11 |
| काणभक्षी (स) | .... | .... | 84 | 6 |
| कात्यायनकारिका (स) | .... | .... | 122 | 9 |
| कात्यायनवचनम् (आ) | .... | .... | 123 | 21 |
| कूर्मादिपुराणानि (आ) | .... | .... | 62 | 18 |
| **ग** | | | | |
| गार्ग्यसंहिता शिल्पशास्त्रम् (आ) | | .... | 61 | 15 |
| गुणोपसंहारपादः (श्रीभाष्यं) (स) | | .... | 302 | 11 |
| **छ** | | | | |
| छान्दोग्यं (स) | .... | .... | 305 | 5 |
| **ज** | | | | |
| ज्योतिश्शास्त्रम् (स) | .... | .... | 61 | 2 |
| **त** | | | | |
| तन्त्रवार्तिकम् (आ) | .... | .... | 189 | 17 |
| तापनीयोपनिषत् | .... | .... | 57 | 15 |
| तैत्तिरीयकम् (स) | .... | .... | 305 | 5 |

| उपात्तग्रन्थनामानि | | | पृ.सं. | पङ्क्ति सं. |
|---|---|---|---|---|
| | | द | | |
| देवताधिकरणम् (श्रीभाष्ये) | (स) | .... .... | 297 | 6 |
| | | न | | |
| नारायणानुवाकः | (स) | .... .... | 38 | 4 |
| ,, | | .... . | 50 | 6 |
| नीतिशास्त्राणि | (स) | .. .... | 175 | 5 |
| न्यायभाष्यम् | (आ) | .... ... | 114 | 16 |
| न्यायसिद्धाञ्जनम् | (आ) | .. .. | 278 | 20 |
| ,, | | .... .... | 290 | 17 |
| | | प | | |
| पञ्चपादिकाविवरणम् | (स) | .. . . | 153 | 13 |
| पञ्चरात्रम् | | .... .... | 56 | 13 |
| पञ्चरात्रादि | (आ) | .... .... | 109 | 24 |
| परत्वदीपिका | (आ) | .... . . | 34 | 20 |
| परतत्त्वनिर्णयः | | .... ... | 58 | 14 |
| पारतक्र्यादिः | (आ) | .... .... | 175 | 11 |
| पुंसूक्तम् | | .... .... | 46 | 7 |
| पुरुषनिर्णयः, यामुनमुनिकृतः | (स) | .... | 33 | 6 |
| ,, ,, | (आ) | ... | 34 | 20 |
| पुरुषसूक्तम् | ,, | .... .... | 45 | 18 |
| ,, | ,, | .. . .... | 46 | 21 |
| ,, | (स) | .... .... | 48 | 10 |
| ,, | (आ) | ... .... | 48 | 19 |
| ,, | | . .. .. | 65 | 25 |
| | | ब | | |
| बुद्धिसरः, तत्त्वमुक्ताकलापस्थः | (स) | | 71 | 4 |
| बृहदारण्यकम् | (आ) | .... | 189 | 11 |
| ब्रह्मबिन्दूपनिषत् | (स) | .. .... | 58 | 8 |

| उपात्तग्रन्थनामानि | | | पु. सं | पङ्क्ति सं. |
|---|---|---|---|---|
| | भ | | | |
| भगवच्छास्त्रसंहिता (स) | ... | .... | 274 | 9 |
| भट्टकारिका (आ) | .... | .... | 13 | 14 |
| भारतादिः (स) | .. . | .... | 10 | 6 |
| | म | | | |
| मरीचिसंहिता शिल्पशास्त्रे (आ) | | .. | 60 | 22 |
| महाभारतम् (स) | ... | .... | 49 | 7 |
| ,, | .... | .... | 274 | 8 |
| ,, | .... | .. . | 277 | 11 |
| महाभाष्यं (वा) | ... | .... | 240 | 13 |
| महोपनिषत् | .. . | .... | 43 | 5 |
| महोपनिषदादि | .... | .... | 65 | 20 |
| महोपनिषन्मुण्डकतैत्तिरीयकविष्णुपुराणभागवत-ज्योतिश्शास्त्रादि (आ). | | | 42 | 24 |
| मात्स्यादिः (स) | .... | .... | 57 | 7 |
| माध्यमिकागमः (आ) | .... | .... | 26 | 20 |
| मूलवेदः (स) | .... | .... | 57 | 11 |
| मोक्षधर्मः भारतशान्तिपर्वस्थः (स) | | .... | 6 | 10 |
| ,, | .... | .... | 173 | 6 |
| | य | | | |
| याज्ञवल्क्यादिः (आ) | .... | .... | 58 | 18 |
| यादवप्रकाशीयसंग्रहः (स) | .... | .... | 268 | 12 |
| योगशास्त्रम् (आ) | .... | .... | 113 | 21 |
| | र | | | |
| रहस्यागमः (स) | .... | .... | 280 | 9 |
| रहस्याम्नायः (स) | .... | .... | 288 | 11 |
| रुद्रयामलम् (आ) | .... | .... | 66 | 11 |

| उपात्तग्रन्थनामानि | | | पृ. | स. | पङ्क्ति सं. |
|---|---|---|---|---|---|
| | व | | | | |
| वरदराजीयम् (आ) | .... | .... | 231 | | 22 |
| वाचस्पत्यम् (आ) | .... | .... | 176 | | 17 |
| वामागमः (आ) | ... | .... | 66 | | 11 |
| वार्तिकटीका (आ) | .... | .... | 86 | | 12 |
| विष्णुपुराणादिः (आ) | ... | .... | 102 | | 19 |
| विष्णुस्मृतिः (आ) | .... | ... | 109 | | 24 |
| वैद्यशास्त्रम् (आ) | ... | .... | 61 | | 19 |
| वैष्णवपुराणम् (स) | .... | .. | 289 | | 6 |
| | श | | | | |
| शारीरकं, श्रीभाष्यं (स) | .... | .... | 2 | | 12 |
| शिल्पशास्त्रम् (स) | .... | .... | 60 | | 6 |
| शास्त्रयोन्याधिकरणम्, श्रीभाष्यं (स) | | .. | 115 | | 10 |
| शिलालिग्रन्थः (आ) | .... | .... | 130 | | 18 |
| श्रीपौष्करं (स) | .... | .... | 288 | | 10 |
| श्रीभाष्यं (स) | .... | .... | 137 | | 6 |
| श्रीरामायणं उत्तरकाण्डः (स) | .. | .... | 274 | | 7 |
| श्रीसात्वतम् (स) | .... | .... | 288 | | 12 |
| | ष | | | | |
| षडर्थसंक्षेपः (स) | ... | .. | 294 | | 4 |
| | स | | | | |
| सांख्याधिकरणम् (स) | .. | .... | 114 | | 11 |
| सूत्रभाष्यटीका (आ) | .... | .... | 209 | | 19 |
| सुबालोपनिषत् (स) | .... | ... | 41 | | 3 |
| ,, | .... | .... | 58 | | 7 |
| ,, (आ) | .... | .... | 41 | | 19 |
| सौबालं (स) | .... | .... | 36 | | 14 |
| स्कान्दादि (आ) | .. | ... | 59 | | 20 |
| स्तोत्रभाष्यम् (आ) | .... | .... | 59 | | 23 |

# अशुद्धसंशोधनम्

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 1 | 22 | दे त्वं | देवि त्वं |
| 3 | 20 | अधिाष्ठा | अधिष्ठा |
| 6 | 11 | दुक्तः | दुक्तिः |
| 11 | 19 | म्येन | त्म्येन |
| 12 | 20 | दुख | दुःख |
| 15 | 25 | विभोर्भा-पा | (त्याज्यमिदम्) |
| 21 | 13 | नयति | नयेति- |
| 23 | 1 | त्वयोस्समर्थनम् | त्वपरश्रुतेर्निर्वाहः |
| 22 | 18 | त्ववा | त्वभावा |
| 23 | 17 | सी | सि |
| 24 | 13 | शसि | शस्वसि |
| 36 | 18 | यणसा | यणासा |
| 37 | 17 | त्यर्थैथक | त्यथार्थैक |
| 39 | 1 | ष्णोवव | ष्णावेव |
| 42 | 21 | निणी | निर्णी |
| 44 | 8 | तरमिदं ” | तरं ” |
| 47 | 14 | श्रत्या | श्रुत्या |
| 52 | 17 | तषु | तेषु |
| 60 | 13 | भाह | माह |
| 65 | 8 | तानं | तानां |
| 68 | 20 | मेवेति | मिति |
| 68 | 20 | णेवे | णेवे |
| 75 | 1 | रत्वसा | रस्म |
| 75 | 19 | ध्यदि | ध्येदि |
| 75 | 24 | ङ्गात | ङ्गान्त |
| 76 | 16 | सिद्ध्यद्ध्यादि | सिद्ध्यादि |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 77 | 1 | कार्य | काय |
| 80 | 20 | त्नात | त्नेति |
| 85 | 0 | निश्वासे | निःश्वासे |
| 88 | 21 | कत्वदि | कत्वादि |
| 90 | 9 | भानो | मानो |
| 91 | 21 | र्यङ्र्म | र्यङ्म |
| 92 | 11 | वागादे | यागादे |
| 92 | 18 | कैंचि | किंचि |
| 95 | 10 | निश्वासा | निःश्वासा |
| 95 | 13 | नाम्यथा ; स | नाम्य(था)स |
| 95 | 15 | शेषसा | शेषस्सा |
| 100 | 9 | चावर्त | च वर्त |
| 109 | 3 | त्कारि | त्कारि |
| 121 | 18 | कार | कारि |
| 124 | 9 | न क | ' न क |
| 125 | 6 | पक्षा | पक्षो |
| 145 | 1 | साक्षिस्व | साक्षित्व |
| 146 | 22 | शेन | शे न |
| 147 | 14 | स्यनि | स्य नि |
| 151 | 16 | नस्वस्तु | नन्वस्तु |
| 152 | 21 | गादि | गमादि |
| 157 | 1 | षट्कनिरासः | षट्केणानिर्वाहाद्धेतोर्नि-रासः |
| 157 | 10 | अनन्द | आनन्द |
| 157 | 25 | क्ताभाव | क्तभाव |
| 169 | 1 | रासः | निरासः |
| 170 | 14 | स्याप | अत्याप |
| 170 | 18 | दीनामे | दानीमे |
| 170 | 19 | थान्तरं | र्थान्तरं |
| 170 | 21 | मतन्तं ' | मनन्तं |

| पुटे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 170 | 22 | इति | इति |
| 170 | 23 | क्यीमित्य | क्यमित्य |
| 171 | 13 | त्यत्र तस्यै | त्यत्रस्यै |
| 175 | 3 | थ्यीवाचा | थ्यावाची |
| 175 | 12 | तत्कर्या | तर्क्या |
| 175 | 18 | गाना | गाणा |
| 176 | 12 | प्योचि | प्यौचि |
| 177 | 22 | विय | विषय |
| 178 | 6 | रात | रति |
| 178 | 24 | सिद्धोरि | सिद्धेरि |
| 181 | 8 | मिपि | मिरपि |
| 181 | 8 | वौशी | वैशि |
| 186 | 20 | स्वीर्कायामत्यत्रहि | स्वीकार्यमित्यत्राह |
| 189 | 21 | थ्यव | थ्याव |
| 201 | 15 | त्व व | त्ववं |
| 203 | 8 | थ्ययहा | थ्यवहा |
| 203 | 12 | कृत्वा | कत्वा |
| 207 | 3 | दशदे | दशादे |
| 218 | 12 | त्तर | त्तेर |
| 225 | 6 | हत्स्था | हात्स्था |
| 227 | 20 | श्रान्स्थि | श्रान्त्य |
| 229 | 1 | त्वसाध | त्वसाध |
| 229 | 20 | न सेत्या | न वेत्या |
| 230 | 17 | त्थमे | त्वमे |
| 230 | 20 | कालस | कालास |
| 242 | 6 | षस्वप्र | षस्वप्र |
| 243 | 17 | बोध | बाध |
| 244 | 5 | तथव | तथैव |
| 244 | 23 | क्षि. वि | क्षिवि |
| 249 | 16 | चत् | चेत् |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| 252 | 8 | बोध | बाध |
| 254 | 19 | ञ्चाऽध्य | ञ्चोऽध्य |
| 255 | 6 | भद | भेद |
| 256 | 14 | पार | परि |
| 256 | 20 | स्याप्यप | स्यापि प |
| 262 | 21 | ध्यस्वर्थ | ध्यर्थ |
| 262 | 23 | स्पराव | स्परवि |
| 263 | 18 | तस्याती | तस्याती |
| 263 | 19 | क्षितम्र | क्षिम्र |
| 265 | 13 | विषत्वं | विषयस्वं |
| 265 | 14 | शाक्षवि | शाक्षावि |
| 268 | 19 | स्तिर | स्थिर |
| 279 | 1 | दुस्वोक्ते | दुत्वोक्ते |
| 281 | 1 | योपाद | योपपाद |
| 281 | 3 | हु रेके | हुरेके |
| 289 | 1 | स्वोपाद | स्वोपपाद |
| 295 | 1 | दिविष | दिविष |
| 299 | 14 | प्रदान | प्रधान |
| 301 | 22 | संग | सङ्ग |
| 317 | 13 | ततित्वे | तीतत्वे |
| 318 | 17 | स्तुनो | स्तुनोः |
| 321 | 3 | कवच | कवेच |
| 321 | 5 | सगृ | संगृ |
| 321 | 6 | न ाह | न हि |
| 321 | 12 | उक्तात्त | ऊक्तोत्त |
| 323 | 4 | तथा | तदा |
| 323 | 15 | द्वरि | द्वारि |
| 323 | 21 | भावान् | भाववान् |

WD 863—GBPM—750—28-2-56.

॥ श्रीमते हयग्रीवाय नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

आनन्ददायिनीव्याख्योपेतसर्वार्थसिद्ध्याख्यवृत्त्या सहितः

# तत्त्वमुक्ताकलापः

## तृतीयो नायकसरः

---

तत्त्वमुक्ताकलापः

### व्याप्त्याद्यव्याकुलाभिः

सर्वार्थसिद्धिः

तदेवं प्रत्यगर्थद्वये प्रथमोद्दिष्टो जीवश्चिन्तितः । अथेश्वरश्चिन्त्यते । तत्र तावत्प्रमाणविशेषात् सिद्धिं प्रस्तौति—**व्याप्त्याद्यव्याकुलाभिरिति** । धर्मप्रवृत्तियुक्तसर्वदेशकालव्यापितयाऽन्यथाकरण-

आनन्ददायिनी

[1]देवि! त्वां मम वल्लभेति निगमाः स्त्रीषूत्तमामब्रुवन्
देव! त्वां मम पादचिह्नघटितोरस्कं परं तेऽवदन् ।
इत्येवं [2]वृषशैलनित्यगृहिणोर्नर्मोक्तिपारम्परी
अस्माकं दिशतादनन्तमसकृत्कल्याणपारम्परीम् ॥

उद्देश[3]क्रमात्संगतिरित्याह–**तदेवमिति** । तस्मात् प्रथमोद्दिष्टत्वादेव हेतोरित्यर्थः । उद्देशे वा किं नियामकमित्यत्राह—**अथेति** । धर्मस्य धर्म्यनन्तरभावित्वात् बुद्धेश्चेतनधर्मत्वादिति भावः । लक्षणप्रमाणाभ्यां वस्तुसिद्धिः, तत्रापि प्रमाणेन सिद्धे वस्तुनि लक्षणाद्व्यावृत्तिसिद्धिरिति प्रथमं श्रुतिप्रमाणसिद्धमाह—**तत्र तावदिति** । वृद्ध-

---

[1] देत्वं—**ख.** [2] वृषशैलशृङ्गगृहिणोर्नर्मोक्ति—**ग.** वृषशैलनित्यगृहिणीनर्मोक्ति—**क. ख.** [3] क्रमस्सं—**क. ख.**

तत्त्वमुक्ताकलापः

# श्रुतिभिरधिगतो विश्वनेता

सर्वार्थसिद्धिः

शङ्कानर्हाभिरित्यर्थः । यद्वा अनुमानवद्व्याप्तिपक्षधर्मतानिरूपणजनित-व्यभिचारसंभवादिरहिताभिरिति । **श्रुतिभिरिति** भ्रमादिमूलत्वासंभव-स्यापनम् । शब्दानां सिद्धे व्युत्पत्तिस्तत्र तात्पर्यं च साधयिष्यते । **विश्वनेता**–विश्वेषां यथेष्टं विनियोक्ता । स कथं श्रुतिभिरधिगतः? कारणवाक्येषु सदादिशब्दैः 'तद्धेदं तर्ह्यव्याकृतमासीत्' इत्यादिप्रदर्शित-स्याव्यक्तापरपर्यायस्य प्रधानस्याभिधानादिति चेत्, तन्न; अव्यक्तस्य "तदैक्षत" "सोऽकामयत" इत्याद्युक्तस्वसङ्कल्पपूर्वकसृष्ट्या[1]द्यसंभवात् । न खल्वीक्षणादिशब्दो भाक्तः; मुख्ये बाधकाभावस्य साधकभूयस्त्वस्य च **शारीरके** स्थापितत्वात् । 'सदेव सोम्येदमग्र आसीत्' इत्याद्यचेत-नसामानाधिकरण्यात् कारणमचेतनमिति चेन्न; सामानाधिकरण्यस्य

आनन्ददायिनी

प्रसिद्धिप्राचुर्यादाह—**यद्वेति** । श्रूयत इति श्रुतिरिति नित्यतावगमा-दित्यभिप्रायेणाह—**भ्रमादीति** । ननु कार्यार्थ एव शब्दानां व्युत्पत्तेः सिद्धे ब्रह्मणि श्रुतिः कथ प्रमाणं स्यादित्यत्राह—**शब्दानामिति** । बुद्धिसर इति शेषः । ननु श्रुतिवाक्ये जडकारणत्वप्रतीतेः कथमीश्वर-सिद्धिरित्याशङ्क्य ईक्षत्यधिकरणादिन्यायैस्तत्सिद्धिं स्मारयति–**स कथमि-त्यादिना। शारीरक इति** । 'गौणश्चेन्नात्मशब्दात्' (ब्र. सू. १-१-६) इत्यादिभिरित्यर्थः । ननु चेतन[2]परत्वे ह्यचेतनवाचिशब्दसामानाधि-करण्यं न स्यादिति शङ्कते—**सदेवेति** । सच्छब्दः सूक्ष्माचिद्विशिष्ट-चित्पर इति परिहरति—**सामानाधिकरण्यस्येति** । विशिष्टवाचि-

[1] चयोगात्–घ. [2] परत्वेऽप्यचे–ग.

## सर्वार्थसिद्धिः

स्थूलसूक्ष्मचिदचिद्वस्तुविशिष्टविवक्षयाऽप्युपपत्तेः । सर्वं च जगत् कर्तुश्शरीरतयाऽऽम्नातम् ; "अस्मान्मायी सृजते विश्वमेतत्" इति । ईदृशी च सृष्टिः "सोऽभिध्याय शरीरात्स्वात्" इत्युपबृंहिता । अधीयते चाथर्वणिकाः—

विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ।
ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ॥
सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् ।
गौरनाद्यन्तवती सा जनित्री भूतभावनी ॥

इति । अगीयत चैतत्—

मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् ।

## आनन्ददायिनी

त्वे प्रमाणमाह—**सर्वं चेति** । [1]अपृथक्सिद्धधर्मवाचकानां धर्मिबोधकत्वादिति भावः । ननु 'अस्मात्' इत्यादिवाक्ये प्रकृतेरेवोपादानत्व[2]प्रतीतिरितीश्वरो निमित्तमात्रमिति शङ्कां पराकरोति—**अस्मादिति** । स्वाच्छरीरादित्युपबृंहणेन अस्मान्मायीति मायाशरीरकः [3]परमात्मा अस्मात् स्वशरीरभूतादेव विश्वं सृजतीत्यर्थः । प्रकृतिशरीरिकात् स्वस्मादित्यन्ये । अन्यथा श्रुत्यन्तराविरोधमभिप्रेत्याह—**अधीयत इति** । [4]अधिष्ठानस्य शरीरत्वादिति भावः । एवमनभ्युपगमे 'सोऽकामयत' इत्यादिश्रुतिविरोधं, निर्विकारत्व-

---

1 अपृथक्सिद्धवाच—**ग.** 2 प्रतीतेरीश्वरो—**क. ख.** 3 परमात्मा स्वाच्छरीर—**ग.** 4 अधिष्ठितस्य शरी—**क. ख.**

## सर्वार्थसिद्धिः

इति । अतस्साक्षात् संकल्पाश्रयत्वम्, व्यवधानेन तु विकाराश्रयत्वमिति सर्वाविरोधः । ननु सद्विद्यायां मृत्पिण्डलोहमणिनखनिकृन्तनदृष्टान्तैः "यथा पृथिव्यामोषधयस्संभवन्ति" इत्यार्थवणिकवाक्याच्चाचेतनमात्रोपादानत्वं जगतः प्रतीयत इति चेन्न; मृत्पिण्डादिनिदर्शनानामेकविज्ञानेन सर्वविज्ञानस्यासंभवचोद्यपरिहारपरत्वात्, "यथा पृथिव्याम्" इति वाक्यस्य त्वेकस्माद्विचित्रानन्तोत्पत्तिसंभवार्थत्वात् । न तु चेतननैरपेक्ष्यमेतैस्सू[1]च्यम्; अन्यथा "यथा सतः पुरुषात्केशलोमानि" इति चेतनसन्निधिसापेक्षोत्पत्तिनिदर्शनायोगात् । अस्तु तर्हि तद्वदयस्कान्तादिनयेन निर्व्यापारपुरुषसन्निधानात् प्रकृतेः प्रवृत्तिः, सर्वस्य च कार्यजातस्य जीवकर्महेतु-

## आनन्ददायिनी

विरोधपरिहारं चाभिप्रेत्याह—**अत इति** । ननु सदादिशब्दानां चेतनपरत्वे स्वावान्तरवाक्यविरोधादाथर्वणवाक्यविरोधाच्चेक्षणं गौणं नेतव्यमिति शङ्कते—**नन्विति** । सद्विद्यावाक्यगतनिदर्शनस्याविरोधं दर्शयति—**मृत्पिण्डादीति** । तावताऽपि प्रकृतोपपत्तेरिति भावः । **एकस्मादिति**—[2]लोमानीत्यचेतनस्योपादानताप्रतिपादने न तात्पर्यमिति भावः । उक्तार्थं उपपत्तिमाह—**यथा सत इति** । सतश्चेतनत्वेऽपि स न जीवः, किंत्वीश्वर इत्यानन्दमयाधिकरणसिद्धार्थं वक्तुं जीवपरत्वं शङ्कते—**अस्त्विति** । सतः पुरुषात् केशलोमानीति वाक्यप्रतिपाद्यस्य पुरुषस्य निर्व्यापारस्यापि सन्निधिमात्रेण केशादिविकारवदित्यर्थः । तत्रोपष्टम्भकान्तरमाह—**सर्वस्य चेति** । कर्मवश्यस्यापहत-

---

1 च्यते-घ. 2 'लोमानीति' इति न दृश्यते-ग कोशे.

## सर्वार्थसिद्धिः

कत्वात्, अपहतपाप्मत्वसर्वज्ञत्वादीनां च तस्मिन्नवस्थाभेदेनोपपत्तेरिति; तन्न; "यथोर्णनाभिस्सृजते गृह्णते च" इति प्रथमोक्तदृष्टान्तवैषम्यात्।

प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः।
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ॥

इति पुरुषस्यापि पराधिष्ठानेन जगत्सृष्ट्युपयोगोक्तेः। न च जीवस्य सवर्तसमयसंहृतकरणकलेबरस्य मुख्येक्षणादिसंभवः। मुक्तस्तर्हि प्रकृतिपुरुषयोरधिष्ठाता स्यात्; तस्य सत्यसंकल्पस्य स्वेच्छया पितृलोकादिविचित्रकार्यस्रष्टृत्वाज्ञानान्मुख्येक्षणसिद्धेः। जीवान्यत्ववादाश्च बद्धान्यत्वविषयाः स्युः।

ममैवांशो जीवलोके जीवभूतस्सनातनः।

## आनन्ददायिनी

पाप्मत्वं कथमित्यत्राह--**अपहतेति**। "यथा सतः पुरुषात्" इत्यत्रापि परमात्मैव चेतनद्वाराऽधिष्ठाय जनयतीति न तद्विरोधोऽपीत्याह--**प्रकृतिं पुरुषं चैवेति**। यथाऽचेतनस्येक्षणाद्ययोगात् न कारणवाक्यप्रतिपाद्यत्वं तथा जीवस्यापीत्याह--**न चेति**। ननु जीवस्य मुख्येक्षणानुपपत्त्या न कारणत्वमिति शङ्कते--**मुक्तस्तर्हीति**। किंच तस्यैव कारणत्वं युक्तम्; कचित् सङ्कल्पमात्रेण सृष्टौ कारण[1]त्वस्याङ्गीकारादित्याह--[2]**तस्येति**। ननु 'पृथगात्मानं' इत्यादिभेदश्रुतेः कथमेवमित्यत्राह--**जीवान्यत्ववादाश्चेति**। **ममैवेति**। अन्यथा 'जीवभूतस्सनातनः' इति विरुध्येतेति भावः। ननु जगत्कारणस्य

---

[1] त्वाङ्गी--**ग**. [2] तस्य चेति--**ग**.

## सर्वार्थसिद्धिः

इति जीवत्वस्यावस्थारूपत्वोक्तेः ; मुक्तस्यैव हिरण्यगर्भादिदेहाधिष्ठानेन सृष्टिस्थित्यादिहेतुत्वमिति सर्वपुराणादिसामरस्यमिति ; तदपि मन्दम् ; एकस्यैवानाद्यन्तस्य सर्वमुक्तोपसृप्यत्वश्रवणात्,

" मम साधर्म्यमागताः "

स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते ।

इत्याद्युपबृंहणविरोधाच्च ।

सायुज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः ।

किङ्करा मम ते नित्यं भवन्ति निरुपद्रवाः ॥

इति च भगव[1]दुक्तेः । मोक्षधर्मे च " अनेन साम्यं यास्यामि " इति मुमुक्षोरभिसन्धिवचनम् । प्रपञ्चितं चैतत्—

परेण [2]परधर्मीव भवत्येष समेत्य वै ।

## आनन्ददायिनी

हिरण्यगर्भाधिष्ठा[3]तृत्वं दृश्यते, न चान्यो जीवो जीवान्तरमधिष्ठातुं समर्थ इत्याह —**मुक्तस्यैवेति** । सङ्कल्पमात्रेण सृजतोऽधिष्ठातृत्वोपपत्तेरिति भावः । 'मुक्तोपसृप्यव्यपदेशाच्च' इति सौत्रहेतुना निराचष्टे—**एकस्यैवेति । ममेत्यादि** । मुक्तेभ्योऽपि भेदावगमादिति भावः । ननु उपबृंहण एव स्वातन्त्र्यमतुलत्वेन विशेषितं, तथा च प्राप्यस्य यत् स्वातन्त्र्यं तादृशमिति लभ्यते । तत् स्वातन्त्र्यं च सृष्टिसंहारकर्तृत्वमेव, भेदवादश्च कथं चिन्त्य इत्याह—**सायुज्यमिति** । नित्यं किङ्करा इति युक्तं, न तु नित्यं निरुपद्रवा इति, व्यवधानात् । नन्वत्र साम्यशब्द ऐक्यपरोऽस्त्वित्यत्राह—**प्रपञ्चितमिति** । परेण समेत्य परधर्मीव

[1] दुक्तेः—घ. [2] परधर्मेण भवत्येष—परधर्मे च भवत्येष—परधर्मी च—पा. [3] ज्ञानं इ—ग.

## सर्वार्थसिद्धिः

इत्यादिभिः । एकस्य च सर्वप्रशासितृत्वं निस्सीमत्वं च श्रुतिस्मृतिशतसिद्धम् । अपि च मुक्तास्सर्वे किं संभूय जगत् सृजन्ति उत प्रतिनियतकार्याः? नाद्यः; "स यदि पितृलोककामः" इत्यादिभिरव्यवस्थितेच्छादृष्टेः, सर्वेषामेकरूपेच्छाकल्पौ गौरवात्, तथा चाश्रवणात् । न द्वितीयः; "इदं सर्वमसृजत" इत्यादिभिरेकस्य सर्वकर्तृत्वोक्तेः । समुदायैकत्वविवक्षा तु क्लिष्टा निर्मूला च; श्रुत्या क्लृप्त्या वा तदयोगात् । अतः "पतिं विश्वस्यात्मेश्वरम्" इति श्रुत एक एव सर्वकर्तेश्वरः ॥

### आनन्ददायिनी

परमात्मैव भवतीत्यर्थः । **एकस्य चेति ।**

'एको देवस्सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
एकश्शास्ता न द्वितीयोऽस्ति शास्ता' इत्यादिभिस्सिद्धमित्यर्थः ।

**स यदीति**—यदिशब्देनाव्यवस्थाप्रतीतेरित्यर्थः । ननु च श्रुत्यैवैकरूपेच्छावत्त्वमुच्यत इत्यत्राह—**अश्रवणादिति । इदं सर्वमिति ।** यद्यपि प्रथमपक्षेऽपीदं दूषणमस्ति, तथाऽपि दूषणान्तरस्य सत्त्वात्तदुक्तमिति ध्येयम् । ननु क्वचित् क्लिष्टाऽप्यभ्युपगम्यत इति चेत्तत्राह—**निर्मूला चेति ।** यत्र प्रमाणमस्ति तत्र क्लिष्टाऽप्यङ्गीकार्येति भावः । ननु प्रकृतेऽपि तदस्त्वित्याशङ्क्य किं तत्कल्पने श्रुतिरस्ति उत युक्तिरिति [1]विकल्प्य तदुभयमपि दूषयति—**श्रुत्येति** । तदभावादिति भावः । नन्वीश्वरस्य प्रयोजनाभावान्न कर्तृत्वमिति जैनोद्गारमनुसृत्य [2]जीव एक एव कारणं इति [3]युक्ति-

---

[1] विकल्प्याद्यं द्वितीयं च दू–**ग.** [2] जीवा एव कर्तार इति–**ग.** [3] युक्तिवशादे–**ग.**

तत्त्वमुक्ताकलापः

## स विश्वं क्रीडाकारुण्यतन्त्रः सृजति

सर्वार्थसिद्धिः

प्रयोजनादिविरहान्न कर्तेश इति ब्रुवन्।
तस्य सिद्धावसिद्धौ च व्याघातादिपराहतः॥

मा भूदनुमानम्, प्रसङ्गस्तु स्यादिति चेन्न; प्रयोजनशून्यत्वे कर्तृत्व न स्यात्। अस्ति च कर्तृत्वम्; अतः प्रयोजनवानिति [1]विपर्ययविश्रमात्। तथा सति नेश्वरस्य बाधः; प्रयोजनसाधकानुग्रहार्थत्वात्। अथ प्रयोजनवत्त्वे कर्मवश्यत्वप्रसक्तिः; तदभावात् प्रयोजनशून्य इति। एवमपि प्रयोजनशून्यविश्व[2]कर्तृत्ववादिनामिष्टप्रसङ्गः।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते।

इति चेत्, तर्हि प्रवृत्तिदर्शनात् प्रयोजनं किञ्चिदङ्गी[3]कुरुष्व। स्वार्थं परार्थं वा प्रवर्तत इत्यत्रोभयार्थमित्याह—स इति। विषमसृष्ट्या साम्यं

आनन्ददायिनी

बलादेकत्वश्रुतिः समुदायैकत्वपरेति शङ्कामनुवदति—**प्रयोजनादीति**। ईश्वरो न जगत्कर्ता प्रेक्षावत्त्वे सति तत्कृतिसाध्यप्रयोजनरहितत्वादित्यनुमाने पक्ष ईश्वरसिद्धौ, न वा; आद्ये कर्तृत्वेन सिद्धत्वाद्धर्मिग्राहकमानबाधः। द्वितीये त्वाश्रयासिद्धिरिति दूषणानुमानं व्याहतमित्यर्थः। **मा भूदनुमानमिति**। पक्षधर्मतायास्तर्काङ्गेषु परिगणनाभावात्तत्र नेदं दूषणमिति भावः। एवमप्यननुकूलत्वरूपतर्काङ्गशून्यत्वात् तर्काङ्गाभासत्वमित्याह—**नेति**। ननु प्रयोजनवत्त्वं कर्मवश्यताव्याप्तमिति कथमकर्मवश्ये प्रयोजनवत्त्वमिति शङ्कते—**अथेति**। प्रयोजनवत्त्वं कर्तृत्वव्यापकं न वा; द्वितीय आह—**एवमपीति**। प्रयोजनवत्त्वं माऽस्त्विति भावः। प्रथमं शङ्कते—**प्रयोजनेति**। परिहरति—**तर्हीति**। कर्मवश्यत्वं [4]तद्व्याप्य-

[1] विपर्यये—घ. [2] कर्तृवादि—घ. [3] कुरुष्व। किमसौ स्वार्थ—घ. [4] तद्व्याप्यत्वान्न—ख.

तत्त्वमुक्ताकलापः

## समतया जीवकर्मानुरूपम् ।

सर्वार्थसिद्धिः

दुःखसृष्ट्या कारुण्यं च भज्येतेत्यत्राह—**समतयेति** । साम्यकारुण्यवत् यथाकर्म फलदायित्वमपि [1] श्रुतिबलादङ्गीकार्यम् । [2] अतस्तदनुरोधेन गुणान्तरं व्यवस्थाप्यमिति भावः । दुःखनिवर्तनांशे कारुण्यसिद्धिः । ननु स्वसृष्टदुःखनिवर्तनेन कारुण्यलाभाद्वरं दुःखानुत्पादनमेव । अतः—

सुखैकतानं जनयेज्जगत् करुणया सृजन् ।

इति चेत्; किमयमीश्वरं प्रत्युपदेशः? अन्यान् प्रति वा? नाद्यः, तस्य परोपदेशाधीनप्रवृत्तित्वाभावात् । न द्वितीयः, ततत्प्रमाणसिद्धवस्तुस्वभावानामपर्यनुयोज्यत्वात् । स्मर्यते च—

शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ॥

इति । ननु दयावैकल्यपरिहारायानुग्रहांश एव भगवतः कर्तृत्वमङ्गीक्रियताम्; स्यादेतत्. एवं यदि वयमेव स्वेच्छया वस्तु व्यवस्थाप-

आनन्ददायिनी

कर्तृत्वाव्यापकत्वान्न तद्व्यापकमिति भावः । **तदनुरोधेन**—यथाकर्मफलदायित्वानुरोधेन कारुण्यसमत्वादिकं व्यवस्थाप्यमित्यर्थः । ननु यथाकर्म फलदाने किं करुणयेत्यत्राह—**दुःखेति** । प्रयोजननिरपेक्षदुःखनिरा-[3]चिकीर्षा कारुण्यमिति भावः । **नन्विति** । प्रक्षालनाद्धीति न्यायादिति भावः । द्वितीय आह—**तत्तदिति** । प्रमाणसिद्धतत्तत्स्वभावानां तत्तत्कार्य

[1] श्रुतस्वाद—घ. [2] अतस्तदविरोधेन—पा. [3] चिकीर्षैव का—ग.

## सर्वार्थसिद्धिः

[1] यामः, किंतु प्रमाणदृष्टयैव । अतो निग्रहांशेऽपि निरङ्कुशं [2] कर्तृत्वम् । अथ स्यात्—क्रोधो हि निग्रहहेतुः ; स च स्वाश्रयदुःखाविनाभूतः, "अरोषणो ह्यसौ देवः" इति प्रसिद्धस्य च कथं क्रोध इति चेन्न ; "एतौ द्वौ विबुधश्रेष्ठौ" इत्यादिषु कण्ठोक्तेः । भाक्तोऽयं क्रोधशब्द इति [3]चेत्तन्न ; प्रसादशब्दस्यापि तथात्वप्रसङ्गात् । अस्त्वेवमिति चेन्न ;

## आनन्ददायिनी

जननशक्तीनामित्यर्थः । 'ब्रह्मणस्तास्तु' इति दुःखजननसामर्थ्यमप्यपरिहार्यमित्यर्थः । ननु दुखनिवर्तनात् कारुण्यमित्युक्तं तदयुक्तम् ; यदि कर्मानुरोधेन दुःखं जनयेत् तदनुभवेनैव नाश्यं, अन्यथा कर्मफलत्वाभावप्रसङ्गात् । अथ भाविदुःखानुत्पादो निवर्तनशब्दार्थः ; तस्य कर्माधीनतया [4]तत्सत्त्वे तदुत्पादावश्यंभावात् । अत एव दशवर्षाद्यनुभाव्यदुःखस्य मासमात्रानुभवेन निवर्तनमित्यपि न संभवति । [5]तावत्कालिकानुभवस्य कर्मफलत्वेन कर्मानतिक्रमतः तदयोगादिति चेत्, अत्रोक्तमाचार्यैः—अनेकजन्मानुभाव्यकर्मणः क्षणकालादिसाध्यप्रायश्चित्तादिना निवर्तनमेव कारुण्यम् । नचैतदपि कर्माधीनमिति वाच्यम् । निवर्त्यसमानत्वाभावात् । नचैवं क्षणसाध्यदुष्कर्मणामप्यनेकजन्मानुभाव्यदुःखजनकत्वापादनाच्चैर्घृण्यमपि स्यादिति शङ्क्यम् । तच्छमनोपायस्यापि सुकरस्य [6]प्रदानादिति न दोष इति । परिहारमाशङ्कते—**अरोषण इति** । निग्रह[7]हेतुक्रोधाभावान्न सर्वकर्तृत्वमिति भावः । परिहारं खण्डयति—**एतौ द्वाविति** । अरोषणवचनमन्यपरमिति भावः । वैपरीत्यं शङ्कते—**भाक्तोऽयमिति** । **प्रसादशब्दस्यापीति** ।

---

[1] येम–घ [2] श तत्कर्तृ–घ. [3] चेन्न–घ. [4] तत्सिद्धे तदु–ग. [5] तावत्कालकर्मानु–ग. [6] प्रदर्शना–ग. [7] हेतुक्रोपाभावा–ग.

तत्त्वमुक्ताकलापः

## रोषोऽपि प्रीतये स्यात्सुनिरसविषयस्तस्य निस्सीमशक्तेः

सर्वार्थसिद्धिः

भिक्षुपादप्रसारणन्यायेन निरीश्वरवादावतारात् । अतः क्रोधावश्यं[1]भावादीश्वरस्यापि दुःखावश्यंभाव इत्यत्राह—**रोषोऽपीति** । क्रोधरोषादिशब्दार्थो हि परपीडेच्छामात्रम् । स तावन्न स्वरूपतो दुःखम्; दुःखहेतुत्व[2]मप्यस्याशक्यविषये, तथा दृष्टेः । स्मर्यते हि—

द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषणौ ।
यश्चाधनः कामयते [3]यश्च कुप्यत्यनीश्वरः ॥

इति । न सर्वशक्तेरीश्वरस्य चिकीर्षितमशक्यं किञ्चिदस्ति । अतोऽस्य न दुःखाय क्रोधः, प्रत्युत निग्रहविहारेण प्रीतये स्यादिति । नन्विह

आनन्ददायिनी

यद्यप्येकसमासपदोपात्तत्वेऽपि ' पिकद्विरेफावलिगीतशोभम् ' इत्यादौ [4]कस्याचिल्लक्षणायामपि नान्यस्य तथात्वं; तथाऽपि लोके पुमिच्छापरतन्त्रत्वाद्वैदिके [5]न्यायाधीनत्वान्न लोकसाम्यमिति भावः । **भिक्षुपादेति** । वेदान्तभागस्यैव भाक्तत्वप्रसङ्गादिति भावः । किं क्रोधस्य दुःखाविनाभावः तादाम्येन तदुत्पत्त्या वा; नाद्य इत्याह—**स तावदिति** । सः क्रोधशब्दार्थः । न द्वितीय इत्याह—**दुःखहेतुत्वमपीति** । न क्रोधमात्रं दुःखहेतुरिति भावः । स्मृतिमपि स्वोक्तार्थे प्रमाणयति—**स्मर्यते** हीति । यथा कामनामात्रस्य न दुःखकरत्वं तथा क्रोधमात्रस्यापीति भावः । शक्यविषयक्रोधस्य प्रीतिहेतुत्वमेवेत्याह—**प्रत्युतेति** ।

---

[1] भावादुःखा—घ. [2] मस्या—घ. [3] यश्चानीशः प्रकुप्यति—घ. [4] क्वचिद्ध—ग. [5] न्यायी—ग.

## सर्वार्थसिद्धिः

विहारः क्रीडा; सा चारतिपरिहारार्था लोके प्रसिद्धा। [1] जगतः स्रष्टारमधिकृत्य "स एकाकी न रमेत" इति श्रूयते। अतः क्रीडायोगादरतियोगः, तदभावाद्वा तदभावः स्यात्। नैवम्; क्रीडा हि प्रीतिविशेषप्रभवः स्वयंप्रियो व्यापारः। अन्यथा तल्लक्षणमव्यापकं स्यात्; अतो नारतिप्रसङ्गः। अरतिश्रुतिश्च 'तदानीमेकाकित्वमनिष्टमतो ब्रह्मादिसृष्टावुदयुङ्क्त' इत्यभिसन्धत्ते, न पुरुषान्तरवदप्रवृत्तिजन्य-

### आनन्ददायिनी

**अरतिर्दुःखम्।** **तदभावाद्वेति।** अरत्यभावे क्रीडाऽपि न स्यादिति भावः। **क्रीडा हीति।**

प्रीत्या प्रसूतव्यापारः क्रीडेत्याहुर्मनीषिणः।

इत्युक्तत्वादिति भावः। **अन्यथेति।** अरतिपरिहारव्यापारत्वं चेल्लक्षणं राजकुमारादिक्रीडायां प्रीतिविशेषप्रभवायामव्यापकमित्यर्थः। नन्वरतिविशेषपरिहारार्थत्वं क्वचिदिष्यते, न वा; नाद्यः। त्वदुक्तलक्षणस्याप्यव्याप्तेः। न द्वितीयः; तथा सति पूर्वपक्षिलक्षणस्यासम्भव एवेत्यव्याप्तिकथनमसङ्गतामिति [2] चेत्; अरतिविशेषपरिहारार्थस्यापि प्रीतिविशेषप्रभवत्वमस्त्येवातो न दोष इत्याहुः। ननु 'एकाकी न रमेत' इति श्रुतिबलादरतिरस्तीत्याशङ्क्य तत्र किं रतिरिच्छेति तद्विरोधिद्वेष उच्यते; उत दुखमेव; नाद्य इत्याह—**अरतिश्रुतिश्चेति।** तथाच सृष्ट्यनुकूल[3]त्वादिष्टापत्तिरिति भावः। द्वितीयं दूषयति—[4] **न पुनरिति।** दुःख-

---

[1] जगत्स्रष्टा—घ. [2] चेन्न। अरति—ग. [3] श्रुत्यनुकूल—ग. [4] मूले 'न पुरुषान्तरवदप्रवृत्ति' इत्यस्य स्थाने 'न पुनः पुरुषान्तरवदप्रवृत्ति' इति पाठाभिप्रायेणेदमिति भाति.

तत्त्वमुक्ताकलापः

## [1]स्वेच्छायां सर्वसिद्धिं वदति भगवतोऽवाप्त-कामत्ववादः ॥ १ ॥

सर्वार्थसिद्धिः

दुःखभयात् प्रावर्तेतेति ; अशास्त्रवश्यस्य दुःखानर्हत्वात् । तथाऽपि—

क्रीडार्थं सृजतो विश्वं विहन्येत कृतार्थता ।

इत्याह—**स्वेच्छायामिति** । अवाप्तसमस्तकामवादो हि न काम्य-निवृत्तिपरः, अवाचकत्वात्, सत्यकामत्वश्रुतिविरोधाच्च । नापि कामना-निषेधार्थः ; " सोऽकामयत " " सत्यसंकल्पः " इत्यादिबाधात् । अतो यथाकामं सर्वसिद्धिमभिसन्धत्त इति ।

सहकारिभिरारम्भे न स्वातन्त्र्यं विहन्यते ।

आनन्ददायिनी

कारणाभावादिति भावः। ननु यदि साध्यप्रयोजनं तर्ह्यवाप्तसमस्तकामत्व-वचनविरोधं **भट्टकारिकां** पठन् शङ्कते—**तथाऽपीति**। **कृतार्थता** अवाप्तसमस्तकामता । अवाप्तसमस्तकामवचनं किं शक्त्यैव कामान्तरं निराकरोति; उत तात्पर्यगत्येति विकल्पद्याद्यं दूषयति-**अवाचकत्वादिति**। द्वितीयं दूषयति—**नापीति**। अविरुद्धार्थे तात्पर्यं कल्प्यमिति भावः। तर्हि तस्य कोऽर्थ इत्यत्राह—**अत इति** । अवाप्तशब्दोऽवाप्तप्रायपर इति भावः। ननु चेतनकर्मानुरूपं सृजतीत्युक्तम् ; तथा सति कर्मादि-सापेक्षत्वे स्वातन्त्र्यं न स्यादिति शङ्कामनूद्य निराचष्टे—**सहका-रिभिरिति**। अन्ये तु यदीश्वरो जगत्कर्ताऽभ्युपगम्यते तस्य स्वातन्त्र्य-मपि वाच्यम् । तच्च प्रकृत्यादिसापेक्षस्य विरुद्धमतो न सोऽस्ति ;

[1] स्वेच्छातस्सर्व—पा.

## सर्वार्थसिद्धिः

तत्सद्भावप्रवृत्त्योश्च स्वाधीनत्वव्यवस्थितेः ॥
कारकान्तरवैधुर्ये किमपेक्ष्य स्वतन्त्रता ।
शरीरमप्यधिष्ठेयं सहकार्येव कुर्वतः ॥
निरपेक्षस्वतन्त्रस्य सहकारिमतस्सदा ।
अप्रवृत्तिः प्रवृत्तिर्वा नित्यं स्यादिति चेन्न तत् ॥
तत्तदिच्छाविशेषेण तत्क्रमस्योपपत्तितः ।
इच्छासन्तत्यनादित्वान्न च मूलक्षयः क्वचित् ॥

## आनन्ददायिनी

यद्वोदासीन इति **निरीश्वरसेश्वरसांख्ययोः** शङ्कां निराकरोति—**सहकारिभिरितीत्याहुः** । तत्र हेतुमाह—**तदिति** । सहकारिणामपि प्रकृत्यादीनामीश्वराधीनत्वेन स्वातन्त्र्यस्यैवोपबृंहणात् । [1]किं च स्वातन्त्र्यादेव सहकारिसापेक्षत्वं ; अन्यथा नियाम्याभावे नियामकत्वायोगादित्याह—**कारकान्तरेति** । किंचिल्लोके स्वातन्त्र्यं निरपेक्षं न दृष्टमिति तादृशशङ्काया बीजमपि [2]नास्तीत्याह—**शरीरमपीति** । निरपेक्षस्य स्वातन्त्र्याङ्गीकारे बाधकमाशङ्कते—**निरपेक्षेति** । सामग्र्याः पूर्णत्वात् कार्यविलम्बायोगादिति भावः । स्वसङ्कल्पाधीनसहकारिसम्पत्तिर्न[3] सर्वदा तत्क्रमाच्च कार्यक्रम इति परिहरति—**न तदिति** । ननु संकल्प इच्छा, सा च न सर्वदेति कथं स क्रम इत्यत आह—**तत्तदिच्छेति** । ननु तथा सति प्राथमिकेच्छा नेच्छाधीना, सा च सर्वदाऽस्तीति तन्मूलकेच्छाऽपि सर्वदेति न परंपरेत्यत्राह—**अनादित्वा-**

---

[1] किंचास्वा?—**ग.** [2] न दृष्टमित्याह—**ग.** [3] त्तिस्सर्वदा—**ख.**

## सर्वार्थसिद्धिः

गुणेतरविपर्यासमन्योन्यसहकारिताम् ।
विवक्षातः क्वचित् प्राहुः निस्समत्वान्निमित्तताम् ॥
प्राप्यः परमभोग्यत्वान्नित्येष्यः स्वामिभावतः ।
शक्तिकारुण्यभूम्ना च शरण्यस्सीदतां प्रभुः ॥
बहिरन्तश्च तद्व्याप्तिस्तत्र यत्रोभयं भवेत् ।
विभोरणोश्च न बहिर्नान्तस्तस्मान्न सा तयोः ॥
विभोर्न च्छिद्रमणुना नाणूनां विभुना च तत् ।

### आनन्ददायिनी

**दिति** । इच्छासन्तत्यनादित्वादिति भावः । नन्वेकस्यैव कथमुपादानत्वं कर्तृत्वं च गुणप्रधानभावादिविरोधादित्यत्राह—**गुणेतरेति** । गुणेतरविपर्यासः एकस्यैव [1]गुणप्रधानभावः परस्परोपकारकत्वं विवक्षितं किंचिदाकारभेदविवक्षयेत्यर्थः । **निमित्तताम्इति** । सर्वनियन्तृत्वेन कर्तृतामित्यर्थः । किं विवक्षाप्रयासेन ; कर्तृत्वमेव त्यज्यतामित्याशङ्क्यान्यार्थं विवक्षा कर्तव्येत्याह—**प्राप्य इति** । परमानन्दलक्षणतया प्राप्यत्वं शेषित्वात् सेव्यः कैंकर्यप्रतिसम्बन्धीत्यर्थः । सीदतामकिंचनानां निरतिशयदयादिशालित्वाच्छरण्यत्वं तस्येत्यर्थः । प्रसङ्गाद्धर्मान्तराण्यप्याह—**बहिरिति** । यत्र पदार्थे बहिरन्तःप्रदेशरूपोभयं भवेदित्यर्थः । **विभोरिति** । विभोर्बहिःप्रदेशाभावान्न बहिर्व्याप्तिः, अणोरन्तराभावान्नान्तर्व्याप्तिरित्यर्थः । ननु विभोरप्यभावप्रदेशोऽस्ति । अणोरप्यन्तःप्रदेशो विद्यते । अणुस्थले [2]विभोरभावेन वृत्त्यभावात् [3]तस्मिन्वा तदयोगादित्यत आह—**विभोरिति** । तत्र हेतुमाह—

---

[1] गुणः पर—**ख**. [2] विभोर्विरोधेन—**ग**. [3] तस्मिन्वा सति तद—**ग**. विभोर्भा—**पा**.

## सर्वार्थसिद्धिः

यथाप्रमाणं संबन्धमात्रमेव तयोर्भवेत् ॥
आकाशव्यतिभेदादेरसंभाव्यस्य चोदना ।
आकाशादिकमिच्छद्भिरनिच्छद्भिश्च दुर्वचा ॥
न विभज्येत गच्छद्भिर्न विहन्ति गतिं च यत् ।
अस्पर्शत्वात्तथाभूतं विभु वाऽविभु वाऽस्ति नः ॥
विभ्वणुप्रतिषेधेन मध्यमं च निषेधता ।
सर्वासत्त्वं च दुस्साधं सदसत्त्वविकल्पतः ॥
समस्तमूर्तसंयोगस्संभवेद्यस्य तद्विभु ।
तत्संभवोज्झितं द्रव्य महत्त्वाणुत्वचित्रितम् ॥

### आनन्ददायिनी

**यथेति** । स्पर्शवन्मूर्तयोरेव परस्परप्रतिघातकत्वेनात्र परस्परप्रतिघातकत्वाभावादित्यर्थः । आकाशव्यतिभेदः आकाशेन प्रतिघातः । **इच्छद्भिः** बौद्धव्यतिरिक्तैः । **अनिच्छद्भिः** चार्वाकादिभिः । सिद्धावप्रतिघातकत्वेन सिद्धिः असिद्धावापादनासम्भवादिति भावः । [1]तत्र युक्तिमाह—**न विभज्येतेति** । यत् गच्छद्भिर्न विभज्येत न भेद प्राप्नोति जला[2]दिवत्; नापि कुड्यादिवत् गतिरोधकं तादृशं विभ्वण्वादिकमस्त्येवेत्यर्थः । उक्तरीत्या [3]विभ्वणोः प्रतिषेधे सुतरां मध्यमं प्रतिषिद्धमिति सर्वासत्त्वं **माध्यमिको** वदति । तस्य सिद्ध्यसिद्धिव्याघातेनासत्त्वं दुःसाधमित्यर्थः । सत्त्वं सिद्धत्वमसत्त्वमसिद्धत्वम् । ननु सर्वत्र वृत्तिमत्त्वं विभुत्वमिति वक्तव्यम्; तथा चाधारदेशे वृत्त्यसम्भवात् कथ विभुत्वमित्यत्राह—**समस्तेति** । सर्वमूर्तयोगित्वं विभुत्वमित्यर्थः । **तत्संभवोज्झितमित्यादि** ।

[1] अत्र-ग. [2] कालादि-ग. [3] विभ्वणुप्र-ग.

**सर्वार्थसिद्धिः**

अणोरणीयान्महतो महीयानित्यनुश्रवः ।
विश्वव्यापित्वतात्पर्यान्न मिथो बाधमृच्छति ॥
यदल्पपरिमाणेन पृथूनां ग्रसनं श्रुतम् ।
अचिन्त्यमिदमित्येके चिन्तनश्रमभीरवः ॥ १ ॥

**इत्यागमिकेश्वरसिद्धिः.**

---

यद्यङ्कुराद्युत्पत्तौ कश्चित् कर्ता, स कथं न दृश्येत? अतो यूपादित्यैक्यमिव प्रत्यक्षबाधितं न श्रुतिः प्रतिपादयतीत्याह—

**आनन्ददायिनी**

विभुत्वरहितं द्रव्यं किंचिदणुत्वविशिष्टं किंचिन्महत्त्वविशिष्टमित्यर्थः । नन्विदं लक्षणमीश्वरेऽव्याप्तं, अणुत्वस्यापि श्रुत्याऽवगमादित्यत्राह— **अणोरणीयानित्यादि** । अस्याः श्रुतेरणुत्वपरत्वाभावादिति भावः । नन्वीश्वरेऽणुत्वमहत्त्वे न विरुद्धे, तस्याचिन्त्यस्वभावत्वादिति शङ्कामनूद्य परिहरति—**यदिति** । अल्पपरिमाणशरीरेणेश्वरेण ब्रह्माण्डादिग्रसनं कृष्णाद्यवतारादौ श्रुतमित्यर्थः । तत्राप्यधिकमेव शरीरं तदल्पपरिमाणतया दृश्यत इति न विरोध इति वक्ष्यत इत्यर्थः । पक्षान्तरमाह— **अचिन्त्यमिति** । हेतुभिरपनोद्यं न भवतीत्यर्थः । विस्तरस्तु स्वावसरे भविष्यतीति भावः ॥ १ ॥

**इत्यागमिकेश्वरसिद्धिः.**

---

आक्षेपसङ्गतिरित्यभिप्रायेणाह—**यद्यङ्कुरेति** । ईश्वरस्यापि स्वव्यतिरिक्तात्मत्वादप्रत्यक्षत्वमित्यर्थः । ननु तर्हि योग्यानुपलब्ध्यभावे सति नाहमीश्वर इति बुद्धेः प्रत्यक्षत्वोपपादन[1]मयुक्तं स्यादिति चेन्न । अन्योन्याभावप्रत्यक्षेऽधिकरणप्रत्यक्षस्यैव प्रयोजकत्वादिति भावः ।

[1] मव्यक्तं—ग.

तत्त्वमुक्ताकलापः

**अप्रत्यक्षः परात्मा तदिह न घटते धातु-रध्यक्षबाधो योग्यादृष्टेरभावान्न खलु न भवता**

सर्वार्थसिद्धिः

**अप्रत्यक्ष इति** । सर्वेषां स्वव्यतिरिक्तस्यात्मनः प्रत्यक्षत्वासिद्धेः; ईश्वरेऽपि योग्यानुपलब्ध्यभावान्नात्र प्रत्यक्षबाध इत्यर्थः । **इह**—दूर्वादिकार्योत्पत्तौ । कर्तुरदृष्टस्य कथं सिद्धिरिति चार्वाकवोधं वारयति—**न खल्विति** । अयं भावः—न तावदर्धलोकायतिकैरद्वैतिभिरिवात्मभेदोऽनङ्गीकृतः । भिन्नाश्चात्मानः परस्परमप्रत्यक्षाः । एवमीश्वरोऽपि स्वप्रत्यक्षोऽन्याप्रत्यक्षतया निषेद्धुं न शक्य इति । अनुमानादात्मान्तरस्वीकार इति चेत्, आगमादीश्वरोऽपि स्वीकर्तव्यः; प्रमाणत्वेन श्रद्धेयत्वाविशेषात् । परोक्षत्वेन न्यक्कारस्यानुमानेऽपि

आनन्ददायिनी

ननु देहातिरिक्तात्मनोऽनङ्गीकारात् कथं तन्निदर्शनेन परमात्मनः प्रत्यक्षत्वाभावकथनमित्यत्राह—**चार्वाकेति** । नन्वात्मभेदाङ्गीकार-[1]मात्रात् नात्मनि बाधकाभावः, घटभेदवदप्रयोजकत्वादित्यत्राह—**अयं भाव इति** । **अर्धलोकायतिकाः** [2]**मीमांसकाः** जगद्रूप-शरीरातिरिक्तपरमात्मानङ्गीकारात् । **स्वप्रत्यक्ष इति** । यथा जीवानां स्वान्य[3]प्रत्यक्षायोग्यतया योग्यानुपलब्धिराहित्यान्नाभावः, एवमीश्वरोऽपि योग्यानुपलब्धिराहित्यान्न निषेद्धुं शक्य इति भावः । ननु बाधकाभाव-मात्रं न साधकमतिप्रसङ्गात् । जीवे त्वनुमानं साधकमस्तीति शङ्कते—**अनुमानादिति** । ननु लोकायतिकं प्रति नेयं प्रतिबन्दी, तन्मते

---

1 मात्रेणानात्मनि—**ग.** 2 'मीमासका.' इति कोशान्तरे न दृश्यते. 3 प्रत्य-क्षत्वायो—**ग.**

### तत्त्वमुक्ताकलापः

## स्वीकृतः स्वेतरात्मा ।

### सर्वार्थसिद्धिः

प्रसङ्गात् । लोकायतिकानां तु यद्यपि भूतपरिणतिरूपः परात्माऽपि प्रत्यक्षः, तथापि चैतन्यावीशिष्टो न प्रत्यक्षेण गृह्यते । यद्यन्यतस्तु कुत-[1]श्चित् तद्विशिष्टतया गृहीतः, एवमीश्वरोऽपि किं न गृह्येत ? बाधानर्हत्वात्। शरीरतया परात्मग्रहणमिति चेत् ; आत्मनः शरीरत्वे सिद्धे हि तथा ग्रहणम् , [2]तदन्यत्वसिद्धौ तु परशरीरेऽपि तथैव स्यादिति । अस्तु तर्हि व्यापकानुलब्ध्या बाधः, कर्तुर्हि शरीरं व्यापकम् ; न चाङ्कुरा-द्युत्पत्तौ शरीरं दृश्यते । अतीन्द्रियं तत्र शरीरमस्त्विति चेन्न ; अङ्कुराद्युत्पादकतया तादृशशरीरानभ्युपगमात् । तदभ्युपगमेऽपि करण-

### आनन्ददायिनी

शरीरस्यैवात्मतया तस्य प्रत्यक्षप्रमाणगम्यत्वादिति शङ्कते—**लोकायतिकेति** । परिहरति—**चैतन्येति** । ननु यावद्धर्मविशिष्ट-तया ग्रहणं न वक्तव्यं, किंचिद्धर्मविशिष्टतयाऽपि ग्रहणे धर्मिसिद्धे-रित्याशङ्कते—**शरीरतयेति** । किं शरीरत्वमेवात्मत्वं, यद्वा ज्ञानाश्रय-त्वमिति विकल्प्याद्यं दूषयति—**आत्मन इति** । द्वितीयं दूषयति—**तदन्यत्व इति** । परशरीरे [3]ज्ञानस्य सिद्धिर्न स्यादनुपलम्भादिति भावः । [4]नन्वस्त्वनुमानमिति शङ्कते—**अस्तु तर्हीति** । अङ्कुरादि कर्तृजन्यं न भवति शरीराजन्यत्वादा[5]काशवदित्यनुमानेनाङ्कुरादि-स्थले कर्तुरभावेऽवगते नेश्वरसिद्धिरिति भावः । **अङ्कुरादीति** । दृष्ट-

---

[1] श्चिद्विशिष्ट—**घ.** [2] तद्दन्य—**च.** [3] ज्ञानत्वसिद्धि—**ग.** [4] अनुमानं शङ्कते—**ग.** [5] काशादिवदि—**ग.**

तत्त्वमुक्ताकलापः

## तस्मिन्देहानपेक्षे श्रुतिभिर[धिगते)वसिते देहबाधान्न बाधो वेदेभ्यो नानुमानं

सर्वार्थसिद्धिः

कलेवरसापेक्षस्य कर्तुः कथमीश्वरत्वम् ? तत्राह–**तस्मिन्निति** । **देहानपेक्ष** इत्युपलक्षणम्। श्रूयते हि —" पश्यत्यचक्षुस्स शृणोत्यकर्णः, अपाणिपादो जवनो ग्रहीता " इति। यदि सर्वशरीरत्वस्य श्रुतिस्मृतिसिद्धत्वात् सर्वेषु कार्येषु शरीरसापेक्षत्वमिति, तथा सति न व्यापकानुपलब्ध्या बाधः। सर्वकार्यानुगुणतत्तद्द्रव्यशरीरकतया शास्त्रैरुपलब्धेः। अथ विगीतमकर्तृकं कर्मवश्याजन्यत्वादित्याद्यनुमानैरीश्वरस्य बाध इत्युच्येत ; तत्राह–**वेदेभ्य** इति । अयं भावः–आप्तशास्त्रस्यानु-

आनन्ददायिनी

विपरीताङ्गीकारे निर्हेतुकैवोत्पत्तिरभ्युपगम्येतेति भावः। **सापेक्षस्येति** । परतन्त्रतया स्वातन्त्र्यलक्षणेश्वरत्वस्य विरोधादिति भावः । ननु दृष्टविपरीताङ्गीकारे निर्हेतुकैवोत्पत्तिरभ्युपगम्येतेत्यत्राह––**श्रूयते हीति** । प्रमाणाधीनत्वाद्व्यवस्थाया इति भावः। वस्तुतस्तु न व्यापकानुलब्धिरित्याह–**यदीति** । **केचित्तु** व्यापकानुपलब्धिरित्यनेन किं करचरणाद्यात्मकशरीरानुपलब्धिर्विवक्षिता ; किं वा शरीरमात्रानुपलब्धिरिति विकल्प्याद्यं दूषयति––**देहाद्यनपेक्ष** इति। द्वितीयं **दूषयति–यदीतीत्याहुः**। ननु ' उत्ताना वै देवगवा वहन्ति ' इत्यादीनामनुमानेन बाधो न स्यादित्यत्राह––**अयं भाव इति** । आप्तत्वमनन्य-

### तत्त्वमुक्ताकलापः

## न च पुरुषवचस्तिष्ठते बद्धवैरम् ॥ २ ॥

### सर्वार्थसिद्धिः

मानैर्विरोधे शास्त्रेणैव तेषां बाधोपपत्तिः ; अन्यथा स्वर्गनरकादीनामतीन्द्रियाणां कुतश्चिदनुमानाद् बाधप्रसङ्गात् । शक्यं हि विगीतं न दुःखासंभिन्नसुखसाधनम् ; साधनत्वात् किल्बिषवदिति । एवमन्यत्राप्यूह्यम् । किं चात्र नैयायिकादिसंमतैरीश्वरानुमानैर्बाधः प्रतिरोधो वा दुर्वारः ; विपक्षे बाधकसदसद्भावौ समचर्चौ । अस्तु तर्ह्यादिविदुषस्सिद्धस्य कपिलस्यागमेन ब्रह्मकारणवादभङ्ग इत्यत्राह— **न चेति** । नित्यनिर्दोषश्रुतिविरोधे हि स्मृतेरेव बाध्यत्वं विरोधाधिकरणसिद्धम् । अन्यथा बौद्धाद्यागमैरपि किं न कृत्स्नवेदबाधः । तेषां भ्रमादिमूलत्वसभावनयति चेत् ; सममेतत् । सर्वज्ञस्सांख्याचार्यः परमाप्त इति चेन्न ; समाधिजनितसार्वज्ञ्यानामपि कर्मभेदैः कदाचिद्भ्रमसंभवात् । न च सार्वज्ञ्ये प्रमाणमस्ति ; आहुश्च—

कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा ।
तावुभौ यदि सर्वज्ञौ मतभेदः कथं भवेत् ॥

### आनन्ददायिनी

परत्वम् । तथा चोत्तानादिवाक्यस्यान्यपरत्वान्न दोष इति भावः । **किल्बिषं**—निषिद्धम् । अनुमानस्याभासत्वाच्च न बाधशङ्केत्याह— **किंचेति** । **विरोधाधिकरणसिद्धमिति** । 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति पूर्वतन्त्राधिकरणसिद्धौदुम्बरीसर्ववेष्टनस्य बाध इत्यर्थः । नन्वीश्वरस्य भ्रमाभावात् कपिलस्य तदवतारत्वा-

## सर्वार्थसिद्धिः

इति। ननु—

दद्दशुः कपिलं तत्र वासुदेवं सनातनम्।

इत्यादिभिः स्वतस्सर्वज्ञपरमकारुणिकावतारतया सिद्धस्य कथमनाप्तत्वशङ्केति चेन्न। बुद्धेऽपि समत्वात्। आविष्टत्वमात्रं तत्रेति चेदत्रापि तथा, विरोधाभावात्। अन्यथा बुद्धादीन् प्रेरयत ईश्वरस्यासुरादिषु विप्रलिप्सा दुस्त्यजा। "मोहयिष्यामि मानवान्" इत्यादि च स्वयमेवाह। अतः पौरुषेयवाक्यमार्षमपि वेदाविरोधेन नेतव्यमिति। एवं निरीश्वरमीमांसका अपि निर्मूला निगमान्तविद्भिरनुग्राह्याः।

य [1]एवं स्यादसर्वज्ञः सर्वज्ञं न स बुध्यते।

### आनन्ददायिनी

तदुक्तौ कथमनाश्वासोऽन्यथातिप्रसङ्गादित्याशङ्कते—**नन्विति**। **अत्रापीति**। सत्यमीश्वरस्य भ्रमाभावः; तथाऽपि कपिलस्येश्वराधिष्ठेयत्वेन वस्तुतस्तदन्यत्वात् यदाऽधिष्ठानं नास्ति तदा भ्रमादिसंभवेन तन्मूलत्वसंभवादिति भावः। ननु तद्विशेषाधिष्ठानमाहात्म्यादेव भ्रमाभावात् कथं तन्मूलत्वमित्यत्राह—**अन्यथाऽपीति**। [2]विप्रलिप्सामूलत्वसंभवात्, न चान्यत्राप्यनाश्वासः, वैदिकविरोधरूपहेत्ववादिति भावः। नन्वीश्वरस्सर्वज्ञ इत्युच्यते; स केनचित् ज्ञायते चेत् सार्वज्ञ्यविशिष्टतया ज्ञानात् सोऽपि सर्वज्ञः स्यादित्यनन्तसर्वज्ञापत्तिः। यदि बोद्धा न सर्वज्ञः, तर्हि स नेश्वरं जानीयात्। तथा चाप्रमितस्य तस्य न सिद्धिरिति **चार्वाक[3]पुराणकथां** भिक्षित्वा जल्पन्तोऽर्धलोकायतिका भ्रमनिरासेनानुग्राह्या इत्याह—**एवं निरीश्वरेति**। निर्मूलाः भ्रमाभिमानाः। **य इति**। असर्वज्ञो जीवोऽङ्गीकृतः स सर्वज्ञं न बुध्यते न जानाति सार्वज्ञ्यविशिष्टेश्वरज्ञाने सर्वज्ञत्वप्रसङ्गेनासर्वज्ञत्वविरोधान्न बुध्यते चेत् ईश्वरो न सिध्ये-

[1] एव स्या—**च**. [2] विप्रलिप्सामूलत्वभावादिति भावः—**ख**. [3] प्रणालिका भिक्षित्वा—**ग**.

तत्त्वमुक्ताकलापः

## वाच्यत्वं वेद्यतां च स्वयमभिदधति ब्रह्मणोऽनुश्रवान्ताः

सर्वार्थसिद्धिः

इति ब्रुवाणाः सार्वज्ञ्यं लभन्तां तन्निषेधतः ॥ २ ॥

### इतीश्वरस्य निर्बाधत्वम्.

ननु श्रुतिभिरधिगत इत्याद्ययुक्तम्, स्वयंप्रकाशतया तत्सिद्धेः; अतो वेद्यत्वमेव न यत्र, तत्र कथं शब्दवेद्यत्वम्? 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' 'यद्वाचाऽनभ्युदितम्' इत्यादिभिश्च तदुभयं निषिध्यत इत्यत्राह—वाच्यत्वमिति। अयं

आनन्ददायिनी

दित्यर्थः। तदूषयति—इतीति। सर्वज्ञनिषेधवादी प्रष्टव्यः, स किं सर्वज्ञं जानाति न वा, उभयत्राप्याह—**निषेधत इति**। प्रतियोगिनो ज्ञानाभावे निषेधाभावात्, निषेधे च तज्ज्ञानस्यावश्यकत्वात् स्वस्य सार्वज्ञ्यं दुर्वारमिति भाव। क्वचित्तु **सर्वज्ञमिति** पाठः। तदा सिद्ध्यसिद्धिव्याघात इति भावः। तथा च नागमसिद्धेर्बाध इति ध्येयम्। वेदेभ्यस्तिष्ठतः इति मूलस्य वेदान् प्रति बद्धवैरं वैरं प्रकाशयत् स्थातु न समर्थमित्यर्थः। 'श्लाघह्नुङ्स्थाशपां ङीप्स्यमानः' इति चतुर्थी। 'प्रकाशन' इत्यादिना तङ्॥ २॥

### ईश्वरस्य मानबाध्यत्वायोगः.

आक्षेपिकीं संगतिमाह—**नन्वित्यादिना**। ननु स्वप्रकाशत्वविरोधाद्वेद्यत्वादिकं नोपपद्यत इति श्रुतिरन्यपरा स्यादित्यत्राह—**अयं भाव इति**। स्वप्रकाशत्वं नाम स्वेन प्रकाशमानत्वं विवक्षितमुत [1]स्वाधारकत्वात्मेश्वर-

[1] स्वाधारत्वमात्मे—**ख**.

## सर्वार्थसिद्धिः

भावः--स्वप्रकाशत्वं तावन्निगमवेद्यत्वेऽपि घटते; दर्शनस्पर्शनाभ्यामेकार्थग्रहणवदुपपत्तेः। अथानन्यवेद्यत्वमेव स्वयंप्रकाशत्वम्; तदा कथं ततस्तत्साध्यत्वम्? अवेद्यत्वग्राहकात्तत् साध्यत इति चेत्, किं तद्ग्राहकम्? न तावद्ब्रह्मस्वरूपम्, तस्य स्ववेद्यत्ववेद्यत्वयोरुदासीनत्वात्; अन्यथा तत्र [1]तत्संशयाद्यनुत्पत्तिप्रसङ्गात्। नापि वृत्तिज्ञानानि, तद्ग्राहकत्वे तदभावे च तदवेद्यत्वसाधनायोगात्।

## आनन्ददायिनी

त्वादिवदितरावेद्यत्वमिति विकल्प्याद्ये विरोधाभावमाह—**स्वप्रकाशत्वमिति**। न ह्येकेन प्रकाशोऽपरप्रकाशविरोधीति भावः। द्वितीयं दूषयति—**अथानन्यवेद्यत्वमिति**। तद्दूषयति—**तदेति**। ज्ञानाभावे न स्वसिद्धिरिति भावः। इदमुपलक्षणम्—[2]ब्रह्मणोऽपि स्वप्रकाशासिद्धिर्न स्यादिति द्रष्टव्यम्, अभावस्य प्रकाशरूपत्वाभावात्। नन्ववेद्यत्वं स्वेन सिध्यतीति न ब्रूमो येनैवमुपालम्भः स्यादिति शङ्कते—**अवेद्यत्वग्राहकादिति। तस्येति**। नन्ववेद्यत्वं स्वरूपमेव स्वव्यतिरिक्तधर्माप्रकाशेऽपि तत्प्रकाश उपपद्यते। किं च स्वव्यतिरिक्तत्वेऽपि साक्षिणाऽन्तःकरणादेरिव प्रकाश उपपद्यत इत्यत्राह—**अन्यथेति। तद्ग्राहकत्वे तदभावे चेति**। वृत्तिज्ञानस्य ग्राहकत्वे वेद्यत्वस्यैव सत्त्वेनावेद्यत्वस्याभावात् अग्रहणे च ग्राहकाभावादसिद्धिरित्यर्थः। नन्ववेद्यत्वस्य वृत्तिज्ञानवेद्यत्वेऽपि ब्रह्मणो वेद्यत्वाभावः कथं न स्यात्, भावाभावयोरेकत्र ग्रह एव विरोधादिति चेन्न। न तावद्वेद्यत्वं नास्तीति निरधिकरणाभावप्रतीतिः, तथात्वे [3]ब्रह्मणो वेद्यत्वं न स्यात्। न हि वह्निरस्तीति बुद्ध्या पर्वते वह्निसिद्धिः। एवं च [4]ब्रह्मावेद्यमिति धर्मिणि तद्धीरिति ब्रह्मणोऽपि [5]वेद्यत्वमिति विरोधो दुर्वार इत्यूह्यम्। ननु साक्षिणः स्वप्रकाशत्वमिवेदमुपपद्यते। परैरपि जीवस्य स्वप्र[6]काशत्वस्वीकारादित्य-

---

[1] तत्संयोगाद्य—घ. [2] ब्रह्मापि स्वप्रकाशसिद्ध न स्यादिति—ग. [3] ब्रह्मण्यवेद्यत्व—ग. [4] ब्रह्मवेद्यमिति—ग. [5] वेद्यत्वमपि—ग. [6] काशत्वाङ्गीकारा—ग.

तत्त्वमुक्ताकलापः

## वाक्चित्तागोचरत्वश्रुतिरपि हि परिच्छित्त्यभावप्रयुक्ता ;

सर्वार्थसिद्धिः

एवं साक्षिण्यप्यवेद्यत्वग्रहणा युक्तिर्भाव्या । ग्राहकान्तरैरग्राह्यं गृह्यत इत्यविरोध इति चेत्तर्हि घटादेरप्यवेद्यत्वं सिद्धम् ; स्वग्राहकेतराग्राह्यत्वात् । यैश्च त्रय्यन्तैरवाच्यत्वादिकं सिषाधयिषसि, त एव स्वयं वाच्यत्वादिकमभिदधति 'तस्योदिति नाम' 'अथ नामधेयं सत्यम्' इत्यादिषु तद्वाचकविधानात् । 'सर्वे वेदा यत्रैकं भवन्ति' 'यो वेद निहितं गुहायां परमे व्योमन्' 'यत्प्रयन्त्यभिसंविशन्ति 'तद्विजिज्ञासस्व' 'येनाक्षर पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इत्यादिषु वाक्यतोऽन्यतश्च वेद्यत्वप्रतिपादनादिति । तर्हि 'यतो वाचो निवर्तन्ते' इत्यादेर्निर्विषयत्वप्रसङ्ग इत्यत्राह—**वाक्चित्तेति** । 'सैषाऽऽनन्दस्य मीमांसा भवति' इत्यादिना ब्रह्मानन्दस्यापरिच्छेद्यताप्रतिपादने हि वाक्यतात्पर्यं गम्यते । अन्यथा 'ब्रह्मविदाप्नोति

आनन्ददायिनी

त्राह—**एवं साक्षिणीति**। तत्रापि नावेद्यत्वं स्वप्रकाशत्वमिति वक्तुं शक्यमिति भावः। **ग्राहकान्तरेति**। तथा च विरोध इति भावः। ननु वेदान्तबलादेवावाच्यत्वादिकं सिध्यतीत्यत्राह—**यैरिति**। **अवेद्यत्वमाद्यर्थः**। नामनामधेयशब्दौ वाचकत्वबोधकौ। यत्र ब्रह्मणि विषये मुख्यवृत्त्यैकार्थप्रतिपादका भवन्तीत्यर्थः। [1]नन्ववाच्यतादिश्रुतिबलादेव वाच्यवेद्यतादिश्रुतीनामन्यपरत्वं किं न स्यादित्यत्राह—**अन्यथेति**। ननु

[1] नन्ववाच्यतादि—ग.

तत्त्वमुक्ताकलापः

**नो चेत् पूर्वापरोक्तिस्ववचनकलहस्सर्ववेदान्तबाधः तत्सिद्धिर्हेतुभिश्चेत् प्रसजति**

सर्वार्थसिद्धिः

परम्' 'आनन्दं ब्रह्मणो विद्वान्' इत्यादिपूर्वापरविरोधः स्ववचनविरोधश्च स्यात्। तदिदमाह—**नो चेदिति**। ब्रह्मप्रतिपादकभागश्च सर्वो निर्विषयः [1]स्यादित्यत्राह—**सर्वेति**। उपलक्षणमेतत् वेदोपबृंहणशतबाधस्य। 'वेदैश्च सर्वैरहमेव वेद्यः' 'वचसां वाच्यमुत्तमम्' इत्यादिभिश्च 'यतो वाचो निवर्तन्ते' 'इत्यादेरान्यपर्यं ग्राह्यम्। माऽस्त्वत्र श्रुतिभिरवाच्यत्वादिसिद्धिः. अनुमानतस्तु स्यादिति शङ्कते—**तत्सिद्धिरिति**। श्रुतिवदेव विरोधप्रसक्त्या परिहरति—**प्रसजतीति**। ब्रह्म अवाच्यमवेद्यं वा एवत्वादिति हि प्रयोक्तव्यम्। तत्र ब्रह्मपदं साध्याधारं ब्रूते न वा? आद्ये कथं तद्विरुद्ध[2]साध्यधीः? द्वितीये तु निरर्थकता

आनन्ददायिनी

'ब्रह्म वेदेत्यस्य प्रपञ्चमिथ्यात्व वेदेत्यर्थस्यात्। तथा च न विरोधः। ब्रह्मैव भवति इतरशून्यो भवतीत्यर्थः। 'आनन्दं ब्रह्मणो विद्वान्' इत्यत्रापि तथा ब्रह्मानन्दव्यतिरिक्तं मिथ्यात्वेन जानन्नित्यर्थः किं न स्यादित्राह—**ब्रह्मप्रतिपादकभाग इति**। तथा सति [3]ब्रह्मणि प्रमाणाभावाद्वेदान्तानां मिथ्यात्वपरत्वात् स्वप्रकाशत्वस्य वेद्यत्वाभावरूपस्य किञ्चिद्वस्तुसाधकत्वाभावात् ब्रह्म शशशृङ्गप्राय स्यादिति [4]माध्यमिकागमप्रसरः यादीति भावः। नन्वनुमानस्या[5]शब्दात्मकत्वात् कथं 'श्रुतिवत्' इति स्वचनादिविरोध उच्यत इत्यत्राह—**ब्रह्मावाच्यमिति**। **आद्य इति**। साध्याधारस्य ब्रह्मपदवाच्यत्वात्तत्पदवेद्यत्वाच्च अयोग्यत्वेन पक्षपदं न साध्यपदेनान्वितं सद्बोधजनकमित्यर्थः। **द्वितीये त्विति**। [6]धर्मि-

[1] स्यादित्याह—घ. [2] साध्यविधि.—घ, साध्यसिद्धिः—च. [3] ब्रह्मण. प्रमाणभावा—ग. [4] मध्यमागम—ग. [5] शब्दार्थक—ग. [6] धर्मिबोधक—ग.

तत्त्वमुक्ताकलापः

## विहतिर्धर्मिसाध्यादिशब्दैः ॥ ३ ॥

सर्वार्थसिद्धिः

निराश्रयसाध्योक्तिश्च। एवं साध्यपदमपि धर्मिपदसमानाधिकरणं न वा। पूर्वत्र स्वस्य धर्मिणं ब्रूते, स्वव्यापारावरुद्धं च ब्रूत इति चित्रमेतत्। उत्तरत्रानन्वयः। हेतुपदे च स्वपक्षधर्मत्ववाचिनि प्रकृत्यंशो धर्मिविषयः। अन्यथा कथं प्रत्ययांशस्य तन्निष्ठभावाभिधायित्वम्? अतो धर्म्युल्लेखनतद्भाववाचकं हेतुपदं न स्वप्रवृत्तिविरुद्धं

आनन्ददायिनी

साधकत्वाभावादपार्थकं निग्रहस्थानमित्यर्थः। अर्थान्तरं चेत्याह— **निराश्रयेति। चित्रमेतदिति।** अवाच्यमवेद्यमिति साध्यपदं [1]स्वव्यापारेणैव वाच्यत्ववेद्यत्वरूपेण विरुद्धमवाच्यत्वमवेद्यत्वं च प्रतिपादयितुं न शक्नोतीति [2]स्वस्य स्वेन विरोधित्वमिति चित्रमित्यर्थः। **अनन्वय इति।** अनर्थको नाम निग्रह इत्यर्थः। **हेतुपदे त्वसपक्षधर्मवाचिनीति।** सपक्षो न भवतीत्यसपक्षः। पक्षधर्मवाचिनि हेतुपद इत्यर्थः। असपक्षधर्मवाचीति क्वचित्पाठः। तदा प्रकृत्यंश इत्यनेन समानाधिकृत[3]स्यासपक्षधर्मो हेतुस्तदवाचीत्यर्थः। केचित्तु—हेतुपदे पक्षधर्मवाचिनीति पाठमाहुः। **अन्यथेति।** प्रत्ययाना प्रकृत्यर्थान्वित[4]स्वार्थाभिधायित्वादिति भावः। ततः किमित्यत्राह—**अत इति।** तथा सति स्वव्यापाररूपवाच्यत्ववेद्यत्ववति धर्मिणि विषये प्रतिज्ञावाक्येन नान्वयं बोधयेत्। तथाचानर्थके निग्रहे प्रवेशः। तथा वाच्यत्वादिमति ज्ञाते हेतुवाक्यप्रतिपन्नो हेतुस्तद्विरुद्धतया न

[1] स्वव्यापारवाच्य—**ग.** [2] स्वस्यैव स्वेन—**ग.** [3] स्य सपक्ष—**ग.** [4] स्वार्थान्वितत्वादि—**ग.**

## सर्वार्थसिद्धिः

साध्यं साधयेत्। एवमनुग्राहकतर्केऽपि धर्मिप्रसञ्जकप्रसञ्जनीयपदेषु विहतिरवधार्या। प्रतिप्रयोगोऽपि—विगीतं वेद्यं वाच्यं च, भासमानत्वादिति। नात्र द्वितीयस्य व्यक्त्याऽनैकान्त्यम्; जातिवद्व्यक्तेरपि वाच्यत्वस्य वक्ष्यमाणत्वात्; युष्माकं च तत्र विमत्यभावात्। नन्वत्र धर्मिपदस्य धर्मिणि मुख्यवृत्तिरसिद्धा, सिषाधयिषितावस्थत्वात्। उपचाराभ्युपगमे तु विवक्षितविरोधः स्यात्। मैवम्;

## आनन्ददायिनी

साधयेदित्य[1]र्थाद्धेत्वाभासोऽपीत्यर्थः। **एवमिति**। यदि [2]ब्रह्म वाच्यं न स्यात् अवेद्यं न स्यात् जडं स्यादित्यत्रापि पक्षादिपदेषु द्रष्टव्यम्। ननु गवादिपदानां जातिवाचकतया व्यक्तेर्वाच्यत्वाभावाद्वाच्यत्वसाधने व्यभिचार इत्यत्राह—**नात्रेति**। **युष्माकमिति**। ब्रह्मणो वाच्यत्वे जडत्वं स्यात् घटादिवदिति वदता वाच्यत्वस्याङ्गीकारात्। अन्यथा [3]ब्रह्मवाच्यं यदि स्याज्जडं स्यात् घटादिवदित्यापादनस्यापि प्रसङ्गेन तुल्यदोषापत्तेरिति भावः। ननु ब्रह्म वाच्यं वेद्यं चेत्यनुमाने ब्रह्मपदेन पक्षनिर्देशो नोपपद्यते, तस्य तद्वाचकत्वसन्देहात्। ततस्तदप्रतीते-[4]राश्रयासिद्धिरपार्थकता च स्यादिति शङ्कते—**नान्विति**। **विवक्षितविरोध इति**। यद्यपि ब्रह्मपदलक्ष्यस्य पदान्तरवाच्यत्वेऽपि विरोधो नास्ति, तथाऽपि ब्रह्मपदवाच्यत्वं न सिध्येदित्यर्थः। पक्षनिर्देशो वृत्तिविशेषनिर्णयपूर्वक एवेति निर्बन्धो नास्तीत्यप्रयोजकत्वादित्याभिप्रायेणाह—**मैवमिति**। ननु पदानां प्रयोगो व्युत्पत्त्यधीनः; व्युत्पत्तिश्च शक्तिनिर्णयः, तन्मूलकवृत्त्यन्तरनिर्णयो वा, तथा च न दोषातिक्रम

---

[1] र्थात्तद्धेत्वा—ग. [2] ब्रह्मावाच्य—क. [3] ब्रह्मावाच्य—क. [4] रज्ञानासिद्धि—ग.

तत्त्वमुक्ताकलापः

## नित्यं ब्रह्मादिशब्दा निरुपधिकसतो लक्षका इत्ययुक्तं

सर्वार्थसिद्धिः

वृत्तिमात्रस्य स्वपरसंमतत्वेन वाच्यत्वा[1]निश्चयेऽपि प्रयोगोपपत्तेः।

दुस्साधं क्वचिदप्येवमवाच्यत्वादि कस्यचित्।
किं पुनस्सर्ववचसां प्रतिष्ठा यत्र तत्र तु ॥ ३ ॥

इत्यवाच्यत्वावेद्यत्वपरिहारः.

ननु लक्षणया धर्म्यादिपदानि प्रवर्तन्ताम्, मुख्यवृत्तिविषयत्वाभावस्तु साध्यत इति को विरोध इत्यत्राह—**नित्यमिति**। अयुक्तत्वं

आनन्ददायिनी

इत्यत्राह—**वृत्तिमात्रस्येति**। तथा च प्रयोक्तुः श्रोतुश्चेदमस्य बोधकमिति ज्ञानमेव प्रयोजक, न तु विशेषज्ञानमिति भाव.। वस्तुतस्तु—विशेषतोऽपि ज्ञानमस्त्येव प्रयोक्तुः शक्तत्वेन श्रोतुस्तदन्यवृत्तिमत्त्वेन। न चैवं सिद्धसाधनबाधादिदोषः; कथायामनुमानोच्छेदापत्तेः। **कस्य चित्** वचसः, प्रतिष्ठाभूतेऽपि क्वचित् वस्तुनि, एवं उक्तरीत्या वाच्यत्वादि, दुःसाधं साधयितुमशक्य, सर्ववचसां समस्तशब्दानां, प्रतिष्ठा वाचित्वं यत्र ब्रह्मणि, तत्र किं पुनः, दण्डापूपिकानयसिद्धमित्यर्थः॥ ३ ॥

अवाच्यत्वादिभङ्गः.

ननु लाक्षणिकशब्देन [2]पक्षादिनिर्देशे न मिथो विरोध इत्याक्षेपेण संगतिमभिप्रेत्याह—**नन्विति**। अत्र किं धर्मिविशेषे लक्षणा साध्यते

[1] निर्णयेऽपि—**घ.** [2] पक्षादिकमुच्यत इति नोक्तदोष इति शङ्कते—**नन्विति**। लक्ष्यं स्ववाचकपदबोध्य न वा इति विकल्प्याद्य आह—सामान्यत इति—**क. ख.**

तत्त्वमुक्ताकलापः

## मुख्यस्यान्यस्य

### सर्वार्थसिद्धिः

कुत इत्यत्राह—**मुख्यस्येति**। तीरं गङ्गापदलक्ष्यमितिवन्मुख्यवृत्त्यनर्हं किंचिन्न लाक्षणिकं दृष्टम्। सामान्यतो विशेषतो वा स्ववाचकपदान्तर-निर्दिष्टे हि पदान्तरस्य लक्षणा वाच्या। अन्यथा ब्रह्मादिशब्दा लक्षणया प्रवर्तन्त इत्युक्ते परेष्टमात्रोक्तिः स्यात्। व्यक्तिविशेषमनिष्कृष्य ब्रह्मशब्दवेद्ये लक्षणया प्रवर्तन्त इत्युक्तेऽपि प्रकृत्यादौ तथा प्रवृत्तेरुक्त-दोषो दुर्वारः। अथ सर्वकारणत्वादिलक्षिते लक्षणावृत्तिर्ब्रह्मादि-शब्दानां साध्येत, तदा तत्र मुख्यवृत्तौ न काचिदनुपपत्तिः; प्रवृत्ति-निमित्तपैष्कल्यादुपपत्तिरेव। अन्यस्य तु मुख्यस्य हानिः; तद्गुणलेश-योगात् प्रयोगोपपत्तेः। साध्यवाचकपदमप्यवाच्यसंबन्धिनि लक्षणया

### आनन्ददायिनी

उत लक्षणामात्रमिति विकल्प्याद्य आह—**तीरमिति**। तथा च व्याघात इति भावः। तदेवोपपादयति—**सामान्यत इति**। द्वितीय आह—**अन्यथेति**। ब्रह्मादिशब्दा लक्षणया प्रवर्तन्त इतीष्टापत्तिरिति भावः। किं च ब्रह्म शब्दवेद्यं इत्यत्रापि सामान्यतो लक्षणा; यद्वा व्यक्तिविशेषानिर्देशेनेति विकल्प्याद्यं दूषयति—**वृत्तिविशेषमनिष्कृ-ष्येति**। द्वितीयमाशङ्कते—**अथेति**। तत्र किं प्रवृत्तिनिमित्ताभावात् लक्षणा; यद्वाऽन्यत्र शक्तस्य नानार्थत्वभीत्येति विकल्प्य आद्य आह—**प्रवृत्तिनिमित्तेति**। बृहति बृहयतीति श्रुत्युक्तस्य प्रवृत्तिनिमि-त्तस्य पूर्णत्वादित्यर्थः। द्वितीयं प्रतिवक्ति—**अन्यस्य त्विति। साध्य-वाचकेति**। [1] ननु अवाच्यपदं शक्तं अवाक्यत्वात्तथा च तत्सम्बन्धिनि

[1] नन्ववाच्यपदं न शक्त वाक्यत्वात्तथा च तत्संबन्धिनि लक्षणेत्युक्तमिति चेत्—**क. ख.**

तत्त्वमुक्ताकलपः

**हानेर्न च निपुणधियो मुख्यमिच्छन्ति लक्ष्यम्।**

सर्वार्थसिद्धिः

वर्तत इति वक्तव्यम्। न चान्यत् किञ्चिदवाच्यं दृष्टमिष्टं वा। तदभ्युपगमेऽप्यत्र ब्रह्मणस्तत्संबन्धित्वं साधितं स्यात्; न त्ववाच्यत्वम्। स्वयंप्रकाशत्वादिति हेतु[1]पदं त्वत्र स्वयंप्रकाशसबन्धिपरं स्यात्। तथा सत्यन्यत् स्वयंप्रकाशम्, ब्रह्म तु तत्संबन्धिमात्रमिति साधु सिद्धान्तस्समर्थितं। अथ काल्पनिकं मुख्यवृत्तिविषयत्वं ब्रह्मणः स्यादित्यत्राह—**न चेति**। अयं भावः—त्वन्मतेऽन्येषामपि हि मुख्यत्वं काल्पनिकमेव। तथा सति यस्य पदस्य यन्मुख्यं तत्तस्य लक्ष्यमिति तवैवेदं शोभते।

आनन्ददायिनी

लक्षणेत्ययुक्तमिति चेत्। **अत्र वदन्ति**—समुदायेऽपि काचिच्छक्तिरस्त्येव, **तदनु[2]सृत्यैतस्याभिधानम्**। अत **एव महाभाष्ये समर्थसूत्रे**—

ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले।

इत्यादिना तदुक्तिरिति। **एतेन** स्वयंप्रकाशसम्बन्धीत्यादिकमपि व्याख्यातम्। ननु मुख्यस्य लक्ष्यत्वमनुपपन्नमिति मन्दम्, मुख्यशक्तेर्मिथ्यात्वादित्यत्राह—**अयं भाव इति**। **यस्य पदस्येति**। ननु घटपदस्य घट एव च्छिद्रेतरपरत्वे लक्षणाऽङ्गीकृता; तथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदस्य काकेष्विति चेत्—उच्यते। यत् पदं यत्प्रवृत्तिनिमित्तकं तत्पदं तद्धर्मान्याप्रकारेण न लाक्षणिकमिति नियमः। प्रकृते च ब्रह्म बृहत्त्वगुणयोगेन वाच्यमिति न तेन रूपेण लाक्षणिकं ब्रह्मपदम्। यदि स्वरूपेण लक्षणा तदा लक्ष्यतावच्छेदका-

[1] पद चात्र-घ. छ. [2] सृत्यैतदभि-ग.

तत्त्वमुक्ताकलापः

**मुख्यत्वे बाधकं च क्वचिदपि न वयं किञ्चिदा-**[1] **लोकयामो**

**मुख्यं लक्ष्यं च वाचः पदमिति न च तद्गो-चरत्वातिपातः ॥ ४ ॥**

सर्वार्थसिद्धिः

लक्षणानिमित्त चात्र नास्तीत्याह–**मुख्यत्व** इति। **क्वचिदपि**–सद्ब्रह्मादिशब्देषु कुत्रचिदपीत्यर्थः। किंच श्रुतिविरोधपरिहाराय मुख्य-वृत्तिबाध इष्टः; लक्षणावृत्त्यङ्गीकारेऽपि तद्विरोधस्ते स्थित एवेत्याह–**मुख्यमिमि**। विरोधशमनं त्वस्म[2]दुक्तमेव साधीय इति भावः ॥ ४ ॥

**इति सद्ब्रह्मादिशब्दानां नित्यलक्षकत्वानुपपत्तिः.**

आनन्ददायिनी

भावाल्लक्षणैव न स्यात्। भावे वा घटादिकमपि तथेति ब्रह्मणि को विशेषः। यदि धर्मान्तरवत्तया लक्ष्यता तदा निर्विशेषसिद्धिर्नास्तीति व्यर्थः प्रयास इति भावः। **तद्विरोधस्ते स्थित एवेति**। "यतो वाचो निवर्तन्ते" इति वाङ्मात्रनिवृत्तिः प्रतीयते; न तु सम्बन्धाविशेषेण। तथा च मुख्यवृत्तिनिवृत्तावुच्यमानायां मानाभावाल्लक्षणावृत्तिरेव [3]निवर्ततां, विनिगमकाभावात्। तस्मादविशेषेण [4]वृत्तिमात्रनिवृत्तिर्वाच्येति विरोधस्तदवस्थ इति भावः। तर्हि [5]श्रुतेः का गतिरित्यपेक्षायामाह—**अस्मदुक्तमेवेति**। ब्रह्मानन्दस्यापरिच्छेद्यताप्रतिपादने तात्पर्य-मित्युक्तगतिरित्यर्थः ॥ ४ ॥

**सद्ब्रह्मादिशब्दानां लक्षकत्वानुपपत्तिः.**

[1] लोचया–**पा.** [2] दिष्टमे–**पा.** [3] निवर्तिता विनि–**ग.** [4] वृत्तिर्वाच्येति–**क.** [5] श्रुतेस्तु–**ख. ग.**

तत्त्वमुक्ताकलापः

## निस्साधारण्यनारायणपदविषये निश्चयं यान्त्य-बाधे

सर्वार्थसिद्धिः

एवमीश्वरस्य त्रय्यन्तवेद्यत्वं शब्दवाच्यत्वं च स्थापितम्। स हिरण्यगर्भादिष्वन्यतम इति शङ्कायां **पुरुषनिर्णयादिसाधितं विशेष-निर्धारणं** संगृह्णाति–**निस्साधारण्येति**। साधकबाधकाभ्यामप्राप्ते शास्त्रमर्थवदित्यभिप्रायेणोक्तम्–**अबाध** इति॥

आनन्ददायिनी

पूर्वशेषत्वान्न पृथक्संगतिरित्यभिप्रायेणाह–**एवमिति। हिरण्य-गर्भादिष्विति**। ननु [1] विशेषनिर्धारणस्य न किञ्चित् प्रयोजनं दृश्यते। रुद्रादिपदचिह्नितोपनिषदामपि प्रमाणतया तदुक्तोपासना-नामप्यङ्गीकारात्। तथाच वेदान्ते प्रतिपाद्यं जगत्कारणमेकम्। तन्त्रेष्वन्य[2]तमादस्तु तद्विशेषनिर्णयोऽकिञ्चित्करः। तथाहि—दहरविद्या-यामङ्गुष्ठमात्र उपास्यः। अन्तरादित्यविद्यायां पुण्डरीकाक्षत्वादिविशिष्टः। क्वचित्त्र्यक्षशूलपाण्यादिविग्रहविशिष्ट उपास्यः। कारणवाक्यान्यपि 'एको ह वै नारायण आसीत्' 'यदा तमस्तन्न दिवा न रात्रिः' 'न सन्न चासच्छिव एव केवलः' 'प्रजापतिर्वा एक एवाग्र आसीत्' इत्यादीनि तान्येकार्थान्यास्थेयानि। तथा क्वचिल्लक्ष्मीशब्दवाच्यविशिष्टः, 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' इत्यादौ। क्वचिदुमाशब्दार्थविशिष्टः 'उमासहायं नीलकण्ठं प्रशान्तम्' इत्यादौ। स[3] सर्वोऽप्येक एवेति सिद्धान्तः। स

[1] विशेषणनि–क. [2] तरदस्तु–क. [3] स एक–ग.

## सर्वार्थसिद्धिः

सदादिशब्दानां कथं शङ्कितान्यार्थत्वम्? इत्थम्—सच्छब्दस्तावत् सत्ता-

### आनन्ददायिनी

चोमालक्ष्म्योरैक्यभेदयोरविशिष्टः। ननु तथा सति भस्मत्रिपुण्ड्ररुद्राक्षादिधारणप्रसङ्ग इति चेन्न। तेषां नित्यतया विद्याङ्गत्वेन वा प्रमाणसिद्धत्वे दुष्परिहरत्वात्। वैदिकागमबाह्यिष्कृतत्वे तु तत एव त्यागात्। अत एवार्थवशिरस्युक्तविद्याङ्गभस्मोद्धूलनास्वीकारः। न चैवं चक्राद्यूर्ध्वपुण्ड्रधारणं विप्राणां नियतं न स्यादिति वाच्यम्। तेषां प्रामाणिकत्वेन उपनयनादिवत्रैयत्यसिद्धेः। एतेन वैष्णवावैष्णवाद्याचारव्यवस्था न स्यादित्यपास्तम्। विष्ण्वादिनिष्ठ[1]त्वेनैव च तद्व्यवस्थोपपत्तेरिति चेत्। उच्यते—यद्यपि जगत्कारणादिवाक्यान्यप्येकनिष्ठान्येव। उपनिषदुक्तोपा[2]स्यमपि पुण्डरीकाक्षत्रयक्षलक्ष्मीगौर्युपेतं [3]वस्त्वप्येकमेव। तथाऽपि क्वचिज्जीवविशिष्टोपासनं, क्वचिदविशिष्टोपासनमिति भिदा विद्यते। [4]यत्र तु जीवलिङ्गं तत्र तद्विशिष्टोपासनमिति। तथाच परदेवतानिर्धारणाभावे अयं जीव इदं जीवलिङ्गमिति निर्णयाभावाद्यथावदुपासनं न स्यादिति महान्विशेषः। किं च परत्वनिर्णयाभावे मुमुक्षूणां विष्ण्वादिशरणागत्यनुष्ठानं न स्यात्। अपरदेवतायाः परिमितफलदत्वेन मोक्षदातृत्वायोगात्। एवं कर्मादावप्यपरदेवतायजन परिमितफलदं परदेवतायजनमपरिमितानन्तफलदमिति [5] तन्निर्णयसापेक्षत्वमिति भावः। विस्तरस्तु—**मदीयपरत्वदीपिकायां** द्रष्टव्यः **पुरुषानिर्णयो यामुनाचार्यकृतप्रबन्धविशेषः**। ननु सदादिशब्दा न नानार्थाः, नाना[6]शक्त्यभावादित्यभिप्रायेण शङ्कते—**सदादिशब्दानामिति**।

---

[1] त्वेन च त—**क.** [2] स्यं पु—**क.** [3] वस्त्वेक—**क.** [4] यत्र जी—**क.**
[5] ति निर्णयासापेक्षत्वमिति प्रयोजनमस्ति। विस्त—**क.** [6] शक्तिभा—**ग.**

तत्त्वमुक्ताकलापः

**सद्ब्रह्माद्यास्समानप्रकरणपठिताश्शङ्कितान्यार्थशब्दाः ।**

**अन्तर्यन्ता च नारायण इति कथितः**

सर्वार्थसिद्धिः

योगिषु सर्वेषु प्रवृत्ततया न विशेषनिर्धारणार्हः । ब्रह्मशब्द एकरूढोऽपि बहुषु रूढवत्प्रयुक्ततयाऽन्यार्थत्वशङ्कार्हः स्यात् । आत्मशब्दश्च जीवपरादिसाधारणप्रयोगः । एवं पुरुषप्राणाक्षरादिशब्दा अपि । नारायणशब्दस्तु न जात्युपाधिवचनो न वाऽनेकरूढः। अतस्तेनान्येषां विषयविशेषनिर्धारणं युक्तम् । तत्र च हेतुः समानप्रकरणपठितत्वम् ; अन्यथा पञ्चधिकरणादेरपि भङ्गः स्यात् । प्रकारान्तरेणापि निर्दिधारयिषुराह–**अन्तर्यन्तेति** । यथा **सुबालोपनिषदि** 'एष सर्वभूतान्तरात्माऽपहतपाप्मा

आनन्ददायिनी

**अन्यथेति** । 'पशुना यजेत' इत्यत्र पशुशब्दस्य 'छागस्य वपाया मेदसः' इति मन्त्रवर्णगतच्छागपरत्वं 'च्छागो वा मन्त्रवर्णात्' इति व्यवस्थापितं न स्यादित्यर्थः । अक्ताधिकरणादिरादिशब्दार्थः । यद्यप्यत्र न समानप्रकरणत्वं तथाऽपि सामान्यस्य विशेषशब्देन निर्णय इत्यत्र तात्पर्यम् । किं च सदादिशब्दाः सामान्यत्वाद्विशेषपराः । तथाऽन्तर्यामिणो विशेष्यत्वात्तदुप[1]स्थापकादपि तत्परा इत्याह–**प्रकारान्तरेणेति** । नन्वन्त-

[1] स्थापनादपि–क.

तत्त्वमुक्ताकलापः

**कारणं चान्तरात्मे-**

**त्यस्मादप्येककण्ठ्यं भवति निरुपधिस्तत्र शम्भ्वादिशब्दः ॥ ५ ॥**

सर्वार्थसिद्धिः

दिव्यो देव एको नारायणः' इति। एतेनान्तर्यामिब्राह्मणमप्येतद्विषयमिति निर्धारितम्। ततः किमित्यत्राह-**कारणमिति**। "तत् सृष्ट्वा तदेवानुप्राविशत्" इत्यादिना हि सर्वस्रष्टुस्सर्वान्तर्यामित्वमप्याम्नातम्। फलितमाह—**अस्मादिति**। नारायणशब्देन सदादिशब्दानामिति शेषः। ननु "कारणं तु ध्येयः" इत्यत्र "शम्भुराकाशमध्ये" इति समाख्यान्तरं दृष्टम्;

आनन्ददायिनी

र्यामिब्राह्मणे 'यः पृथिव्यां तिष्ठन्' इत्यादौ विशेषपदाभावादन्तर्यामिपरत्वमात्रेण न विशेषसिद्धिरि[1]त्यत्राह—**एतेनान्तर्यामिब्राह्मणमपीति**। सौबालेऽन्तर्यामित्वस्यैव नारायणैकनिष्ठत्वावगमात्तदैकार्थ्येन तदपि नारायणस्यैव प्रतिपादकमिति भावः। नन्वस्तु नारायणस्यान्तर्यामित्वं; कारणत्वमन्यस्यास्तित्वाशङ्क्याह—**तत्सृष्टेति**। कारणस्यान्तर्यामित्वावगमात् तस्य नारायणसाधारणतया कारणं नारायणमेवावगमयतीत्यर्थः। **समाख्यान्तरं दृष्टमिति**। ननु निरपेक्षः शब्दः श्रुतिरिति श्रुति-

[1] रित्याह—ग.

## आनन्ददायिनी

लक्षणमुक्तम्। तत्राभिधानश्रुतिः पदार्थोपस्थापिका व्रीह्यादिशब्दात्मिकेति मीमांसकमर्यादा। तथाच शक्तिमत्त्वमेव श्रुतित्वमिति पर्यवसितत्वात् शम्भुशब्दोऽपि श्रुतिरेवेति कथं समाख्या। किं च 'शब्दादेव प्रमितः' इत्यधिकरणे "शब्दश्रुतिः—ईशानो भूतभव्यस्य इतीशानशब्दः" इति भाष्याद्युक्तमपि विरुध्येतेति चेत्। अत्र वदन्ति-शम्भुशब्दो न रूढः। असंज्ञायामेव डुप्रत्ययस्य मुख्यत्वात्। यद्यपि मितद्वादिष्वविशेषेण विधानं व्याख्यातं; तथापि विध्वादिषु चरितार्थत्वेन **प्रोक्षणीन्यायेन** शक्त्यकल्पनात्। न च नामानुशासनबलाद्रूढिः। द्विरे[1]फाद्यनुशासने व्यभिचारात्। तत्रैव चन्द्रशेखरत्रिपुरान्तकगङ्गाधरादीनां केवलयौगिकानामनुशासनात्। तस्माद्व्याकरणानुसाराद्धौत्रौद्वात्राध्वर्यवादिसमाख्यावद्यौगिकार्थबलादर्थान्तरगमका इति समाख्येव समाख्या। न च शब्दादेवेत्यधिकरणभाष्यादिविरोधः। पदद्वयश्रुतिरित्यर्थत्वात्। प्रकृतिप्रत्ययोर्लिङ्गाद्यपेक्षया शीघ्रभावित्वात्। अत एव तृतीयाद्वितीयाश्रुत्या करणत्वकर्मत्वप्रतीतावपि परस्परशेषशेषिभावस्य वाक्यगम्यस्य शैघ्र्यात् लिङ्गस्य दुर्बलत्वम्, अत्र प्रकृतिप्रत्ययौथकत्वं, तत्र पदद्वयात्मकत्वमिति न विशेष इति। **केचित्तु**—'ईशानः' इत्यत्रेशानश्रुतिरेवाभिप्रेता। तेन कर्तृत्वमसंकुचितं भासमानं जीवासंभावितं झटिति प्रकृत्यर्थेनैवान्वितमैन्द्रीन्यायेन लिङ्गादि बाधते। न चैवमत्रापि तथा वक्तुं शक्यम्। कर्तृत्वमात्रस्य प्रकृत्यर्थान्वितस्य वा

---

[1] रेफादिष्वनु—ग.

सर्वार्थसिद्धिः

ततः किम्? कारणानुवादेन ध्येयत्वविधिपरं हीदं वाक्यम्। पुरोवादे च नारायणत्वनिर्णये तस्मिन्निरुपाधिकावयवार्थभूम्ना तद्वृत्ति-[1]रुपपन्ना। अत एव **नारायणानुवाकेऽपि** 'विश्वशम्भुवम्' 'इत्युच्यते, 'शाश्वतं शिवम्' इति च। अतोऽन्यपरवाक्यस्थसमाख्यामात्रमकिञ्चित्करमिति भावः ॥ ५ ॥

शिवशब्दस्य न केवलं शुभा[द्या]दिपौष्कल्यमात्रान्नारायणे

आनन्ददायिनी

साधारण्येन नारायणपरत्वविरोधाभावादिति वदंन्ति। समाख्यया न किंचिदित्याह—**ततः किमिति**। तदेवोपपादयति—**कारणानुवादेनेति। पुरोवादे चेति**। यथाप्राप्त्यनुवादस्य युक्तत्वात्। किं च योगार्थस्य पूर्वमुपस्थितत्वात् रूढ्यङ्गीकारेऽपि **वाजिनन्यायेन** तत्तिरस्कार इत्याह—**अवयवार्थभूम्नेति**। अवयवार्थपौष्कल्यमाह—**अत एवेति**। शिवशब्दो यद्यपि देवताविशेषे रूढः, तथाऽप्यर्थान्तरेऽपि रूढतया सैन्धवादिवदर्थप्रकरणाद्यपेक्षो न स्वयमेवार्थनिर्णये समर्थः। अन्यथा यववराहाद्यधिकरणवैयर्थ्यात्। तत्रापि व्यवहारद्वयबलादुभयत्र शक्तावपि निर्णयसंभवात्। यववराहादिवचोदनाया अप्रामाण्याभावात्। नारायणादिप्रकरणपर्यालोचनायां तत्परत्वं सिद्धमिति न देवतान्तरगन्ध इति ॥ ५ ॥

ननु यत्र नानार्थे प्रकरणाद्यपेक्षा तत्र नानार्थानां सामान्यविशेषभावाभावेनैकत्रोपसंहारा[2]सामर्थ्यम्। अत्र तु योगरूढिस्थल इव प्रवृत्तिनिमित्तद्वयेनापि विशेषणविशेष्यभावेन उभयार्थविशिष्टशिवोपासनविधिसंभवादित्याक्षेपेणाह—**शिवशब्दस्य न केवलमित्यादिना**।

[1] रुपपन्ना। तथा च नारा—पा. [2] सामर्थ्यात् अत्र—ग.

तत्त्वमुक्ताकलापः

**विष्णोरप्यस्त्यभिख्या शिव इति शुभतारूढि रत्रानुपाधि-**

सर्वार्थसिद्धिः

वृत्तिः, किंतु नामतयाऽपीत्याह–**विष्णोरिति**। "सर्वश्शर्वश्शिवः स्थाणुः" इति हि तन्नामसहस्रे पठ्यते। ननु शुभतया रुद्रेऽस्य रूढिः स्यादित्यत्राह–**शुभतेति**। शुभतया जनिता ह्यस्य रूढिः "मङ्गलानां च मङ्गलम्" इत्यादिभिर्निरुपाधिकशुभत्वशालिनि भगवत्येव युक्ता। अन्यत्र तु तद्गुणलेशयोगाद्वृत्तिः स्यात्। प्रसिद्धिप्रकर्षस्तु प्रणववेदादिषु ब्रह्मशब्दवत् प्रचुरप्रयोगमात्रात् स्यात्। यत्र तु शिवस्य ध्येयत्वोक्ति-

आनन्ददायिनी

तथा चात्रापि सैन्धवादिवत् विरुद्धत्वान्न स्वयं निर्णयाय प्रभवतीति भावः। रूढिशक्त्यङ्गीकारेऽपि लिङ्गाद्यनुगृहीतया रूढ्या नारायण एव वृत्तिः स्यादिति दर्शयति—**किं त्विति**। तत्र रूढिशक्तौ प्रमाणमाह—**सर्व इति**। ननु शुभतमत्वमेव प्रवृत्तिनिमित्तं, न तु निमित्तान्तरमनेकार्थत्वकल्पने गौरवात्। तथा च शिवादन्यत्र तत्प्रयोगस्य गुणयोगेनाप्युपपत्तेः। सहस्रनामपठनस्य च 'यानि नामानि गौणानि' इत्युक्त्या रूढिसाधकत्वाभावादिति–शङ्कते—**नन्विति**। तर्हि निरुपाधिकशुभत्वशालिनि भगवत्येव प्रवृत्तिनिमित्तपौष्क[1]ल्यात् प्रवृत्तिर्युक्ता, न तु रुद्रादाविति भावः। ननु शिवशब्दस्य रुद्रे प्रवृत्तिनिमित्त-[2] पौष्कल्याभावे प्रसिद्धिप्रकर्षो न स्यादित्यत्राह–**प्रसिद्धिप्रकर्षस्त्विति**। ब्रह्मशब्दस्य वेदादौ लाक्षणिकत्वादिति भावः। **यत्र त्विति**। 'सर्वानन-

---

[1] ल्याद्वृत्तिर्यु–ग. [2] पौष्कल्यप्रसिद्धि–ग.

तत्त्वमुक्ताकलापः

**स्तस्माद्ध्येयः श्रुतोऽसौ शिव इति शिव एवेति वाक्यं त्वनूक्तिः।**

सर्वार्थसिद्धिः

स्तत्रापि शाश्वतशिवानुवादेन ध्यानं विधीयते। नैतावता प्रसिद्धशिवस्य श्रुतिविरुद्धं कारणत्वं कल्पयितुं शक्यमित्याह–**तस्मादिति**। **असौ**–विष्णुरेव। महापुरुषवेदनस्य हि मुक्तिहेतुत्वं प्रतिपाद्य "नान्यः पन्था [अयनाय विद्यते]" इति नियम्यते। ननु "यदा तमस्तत्" इति वाक्ये शिव एव केवल इत्युच्यते, अतः प्रसिद्धशिवः कारणमित्यत्राह –**शिव एवेति**। इदं तावद्वाक्यं न कारणतमसः प्रतिपादकं, यदेति

आनन्ददायिनी

शिरोग्रीवं' इत्यारभ्य 'तस्मात् सर्वगतः शिवः' इत्यादावित्यर्थः। **नैतावतेति**। अन्यपरशिवशब्दमात्रादित्यर्थः। ननु रुद्रपरत्वाभावेऽपि भगवत्परत्वं कथमित्यत्राह—**असौ विष्णुरेवेति**। 'शाश्वतं शिवमच्युतं नारायणं महाज्ञेयम्' इत्याद्युक्तेरिति भावः। श्रुत्यन्तरं[1] चाह—**महापुरुषवेदनस्येति**। "तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते" इति निषेधान्मोक्षसाधनीभूतवेदन-विषयत्वात् स शिवो विष्णुरेवेति भावः। तत्र किं तमोविधिपरं वाक्यं, यद्वा शिवविधायकमिति विकल्पाद्यं दूषयति—**न कारणतमसः प्रतिपादकमिति**। ननु तद्वाक्येऽपि तमस एव कारणत्वं, न तु

[1] युक्तयन्तरं–ग.

सर्वार्थसिद्धिः

कालविशेषप्राप्तानुवादात् । "अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते" इति **सुबालोपनिषद्**वाक्येन तत्प्राप्तिः । सा चोपनिषन्नारायणस्यैव कारणत्वोपास्यत्वादिकं बहुधा वक्ति । अव्यक्ताक्षरक्रमेण तमःस्थाने "यस्य मृत्युश्शरीरम्" इति, पठ्यते । अतो नारायणाधिष्ठिततमोवाक्यमिह पुरोवादः । "नासदीसीन्नो सदासीत्तदानीं तम आसीत्" इत्यादि वाक्यमत्र पुरोवादः किं न स्यादिति चेत्, तथाऽपि तस्य **सौबाल**वाक्य-समानार्थत्वं ग्राह्यम् । अतः कारणतमोधिष्ठातृत्वेन प्रसिद्धो नारायण एवात्र शब्दान्तरपरामृष्टः । [1] अनन्तरं तु "तदक्षरम्," "तत्सवितुर्वरेण्यम्" इत्यादिना तत्प्रकारविशेषोपदेशः । **मानवे** च "आसीदिदं तमोभूतम-प्रज्ञातम्" इत्यारभ्य, "तेन नारायणः स्मृत" इत्यन्तेन स एव कारणतमो-

आनन्ददायिनी

नारायणस्य, तमश्शब्देन नारायणाभिधानायोगात् । तस्य शरीरत्वा-भिधानाभावादित्यत्राह—**अव्यक्ताक्षरक्रमेणेति** । शङ्कते—**नासदा-सीदिति** । तमोमात्रस्यैवात्र प्रतिपादनादिति भावः—**तथाऽपीति** । **सर्वशाखाप्रत्ययन्यायेनेति** भावः । **शब्दान्तरेति** । तमश्शब्दादिक-मित्यर्थः । द्वितीयं दूषयति—**अनन्तरं त्विति** । 'यदा तमः' इत्यारभ्य तदितिपर्यन्तस्यानुवादतावगमात्तदनूद्य गायत्रीप्रतिपाद्यादित्यान्तर्वर्ति-भगवतो विधेयान्तरस्यान्वयादित्यर्थः । ननु 'नासदासीत्' इति वाक्य-प्राप्तानुवादेन शिवत्वविधिरस्तु । न च तस्य सुबालोपनिषदाद्येकार्थतया नारायणपरत्वं; श्वेताश्वतरवाक्यैकार्थतया शिवपरत्वस्य वा भावाच्चेत्यत्राह—**मानवे चेति** ।

[1] अनन्तरं च—पा.

तत्त्वमुक्ताकलापः

## उक्तं नारायणाधिष्ठितमिति च तमोऽनेकबाधोऽन्यथा स्यात्

सर्वार्थसिद्धिः

धिष्ठातेति स्पष्टमुक्तम्। तदेतत्सर्वमभिप्रेत्याह—**उक्तमिति**। एवमनभ्युपगमे बहुश्रुतिस्मृतीतिहासादिबाधः स्यादित्याह—**अनेकबाध इति**।

आनन्ददायिनी

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम्।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः।
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तस्सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ।
सोऽभिध्याय शरीरात् स्वात्सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु वीर्यमवासृजत्।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥

इत्याद्युपबृंहणशतैस्तमसो नारायणाधिष्ठितत्वावगमात् [1]पुरोवादनिर्णीतार्थसापेक्षस्य तद्विरुद्धार्थविधानायोगाच्च। [2]तथाऽपि शिवशब्दो माङ्गल्यपरः सन् जगत्कारणताप्रयुक्तदोषाभावं सूचयतीति भावः। **वस्तुतस्तु**—एकवाक्यताविरोधाच्छिवत्व न विधेयमिति बोध्यम्। **बहुश्रुतीत्यादि**। महोपनिषन्मुण्डकतैत्तिरीयकविष्णुपुराणभारत-

[1] पुरोवादसा—क. [2] तदाऽपि—क.

तत्त्वमुक्ताकलापः

## ब्रह्मेशादेर्महत्यामुपनिषदि लयाद्युक्तमेवं तु नात्र ॥ ६ ॥

सर्वार्थसिद्धिः

अपि च नारायणकारणत्वप्रतिपादिकायां **महोपनिषदि** "न ब्रह्मा नेशानो नेमे द्यावापृथिवी" इत्यादिना नारायणात् ब्रह्मेशानयोरुत्पत्त्यादिकं श्रुतम्। "यदा तमः" इति वाक्ये, "न दिवा न रात्रिः" इत्येतावदुक्तम्। एतेन "हिरण्यगर्भस्समवर्तताग्रे" इति वाक्यमपि निरूढम्। "अद्भ्यस्संभूतो हिरण्यगर्भ इत्यष्टौ" इति तद्विषयानुवाकान्तरसमानार्थत्वसिद्धेश्चेति ॥ ६ ॥

आनन्ददायिनी

ज्योतिश्शास्त्रादिविरोधः स्यादित्यर्थः। किं च 'यदा तमः' इति वाक्यं महोपनिषदाद्येकार्थत्वेन नारायणपरं भवितुमर्हति। महोपनिषद्वाक्यं तु श्वेताश्वतराद्येकार्थतया रुद्रपरं भवितुं [1]नार्हति विरोधादित्याह—**अपि चेति**। श्वेताश्वतरादौ नारायणस्य निषेधरूपेण लयो वा रुद्रादुत्पत्तिर्वा[2] न श्रूयत इति महोपनिषदैकार्थ्यं संभवतीत्यर्थः। **एतेनेति**। नारायणादिनिषेधाभावात् तस्मादपि नारायणस्योत्पत्त्यप्रतिपादनाद्धिरण्यगर्भशब्दस्य रूढ्यङ्गीकारेऽपि 'हिरण्यगर्भो भूगर्भः' इति नारायणेऽपि रूढिसम्भवाच्चतुर्मुखपरत्वेऽपि सकलप्राणिवर्गापेक्षया प्राथम्यमादायाप्युपपत्तेर्नारायणकारणत्वाविरोध इत्यर्थः।

**वस्तुतस्तु**—नारायणानुवाकशेषत्वात्तदैकार्थ्येन योगवृत्त्यादिद्वारेण नारायणपरमित्याह—**अद्भ्यस्सम्भूत ति**। 'अद्भ्यः सम्भूतः'

---

[1] अर्हति—**ग** [2] र्वा श्रू—**ग**.

तत्त्वमुक्ताकलापः

## यः प्रोक्तस्सर्वकर्तुः परमखिलतनोर्नापरं किञ्चिदस्तीत्यस्यैव [1]स्यादनूक्तयोत्तरतरकथनं

सर्वार्थसिद्धिः

ननु "यस्मात् परं नापरमस्ति किञ्चित्" इत्यादिना "तेनेदं पूर्णं पुरुषेण सर्वम्" इत्यन्तेन पुरुषसूक्तादिप्रसिद्धं पुरुषमनूद्य "ततो यदुत्तरतरमिदम्" इत्यादिना तस्मात् परस्यैव वेदनममृतत्वादिसाधकमुक्तम्; स एव सर्वेश्वरः स्यादित्यत्राह—**यः प्रोक्त** इति। सर्वकर्तृत्वं पुरुषसूक्तार्थप्रत्यभिज्ञया सिद्धम्। अखिलतनुत्वं च "पुरुष एवेदं सर्वम्" इतिवत् "तेनेदं पूर्णं पुरुषेण सर्वम्" इत्यनेन व्यञ्जितम्। यस्मादपरं किञ्चित् परं नास्तीत्यन्वयः।

आनन्ददायिनी

इत्यारभ्य 'हिरण्यगर्भः' इत्येतदन्ता अष्टावनुवाका नारायणानुवाकान्तर्गता इत्यर्थः ॥ ६ ॥

नन्वस्तु नारायण एव जगत्कारणं, ततोऽतिरिक्तमेव मुमुक्षूपास्यं प्राप्यं चेत्याक्षेपसङ्गत्योच्चीर्णपक्षमाशङ्कते—**नन्वित्यादिना। ततो यदुत्तरतरमित्यादिनेति**। ततः जगत्कारणत्वेन पुरुषमूक्तप्रतिपाद्यादुत्तरतरमधिकमित्यर्थः। ननु 'यस्मात्परम्'इत्यत्र सर्वकर्तृत्वसर्वशरीरत्वाद्यप्रतीतेर्मूले सर्वकर्तुस्सर्वतनोरित्युक्तिः कथमित्यत्राह—**सर्वकर्तृत्वमित्यादिना**। ननु यस्मात् परमि[2]त्यस्मिन्वाक्ये प्रपञ्चमिथ्यात्वं प्रतीयत इत्यत्राह—**यस्मादपरमिति**। यस्मात् परमपि नास्ति,

[1] स्यादनूद्योत्तर—पा [2] मिति वाक्ये—ग.

## सर्वार्थसिद्धिः

तेन 'न तत्समश्चाभ्यधिकश्च दृश्यते" इत्ययमर्थोऽनूदितो भवति। एवं समाभ्यधिकदरिद्रस्य विश्वव्यापिनोऽस्यैव सहेतुकं "ततो यदुत्तरतरम्" इत्यनुवादः। अत एव "तदरूपमनामयम्" इत्यादिभिराकारान्तरोप-

## आनन्ददायिनी

अपरमपि नास्तीत्युच्यमाने वाक्यभेदोऽपिशब्दाध्याहारो नञ आवृत्तिश्चेति दोषाः स्युः। यदि च यस्मादन्यत्परं नास्तीत्युच्येत [1] तदाऽन्यन्नास्तीत्यनीनैव मिथ्यात्वस्य सिद्धेरपरशब्दो व्यर्थ इति। ननु सिद्धान्तेऽपि यस्मात् परं नास्तीत्येतावता सिद्धेः समो दोष इति चेन्न। अपरशब्दस्यान्यपरत्वे तस्मिन् [2] परत्वनिषेधे प्रपञ्चस्य ब्रह्मभेदबोधनेन प्रयोजनवत्त्वात्। किं च पक्षद्वयेऽपि तुल्यनिषेधाभावान्न सर्वमिथ्यात्वं चेति भावः। एवमन्वयानङ्गीकारे श्रुत्यन्तरविरोधोऽपीत्याह—तेनेति। यद्यपि परनिषेधोऽत्रास्ति, तथाऽपि तुल्यनिषेधोऽपि वचनान्तर[3]सिद्धोऽत्राभिप्रेत इति भावः। केचित्तु [4] यस्मात् परन्यत् अपरं [5] न्यूनमिति वाक्यार्थः। तेन ब्रह्मव्यतिरिक्तस्य सर्वस्यापि न्यूनत्वात् समाधिकनिषेधसिद्ध इत्याहुः। सहेतुकमिति। 'ततो यदुत्तरतरं' इत्यत्र तच्छब्दो 'यस्मात्परम्' इत्याद्युक्तमर्थं हेतुत्वेनाह। यस्मात् [6] निस्समाभ्यधिकादुत्तरतरं यत् पुरुषसूक्तप्रतिपाद्यं तदनूद्यारूपत्वादिविधिरित्यर्थः।

---

[1] तदन्यन्नास्ती—क. [2] परत्वे निषे—क. [3] सिद्धोऽभि—क. [4] अत्र 'यस्मात्पर न, अपरं' इति पाठः स्यात्। [5] न्यूनं नास्तीति वाक्यस्यार्थः ?—ग. [6] 'निस्समाभ्यधिकं तस्मादुत्तरतरं' इत्यत्र पाठः स्यात्.

तत्त्वमुक्ताकलापः

## न त्वितोऽन्यस्य बाधात् ।

सर्वार्थसिद्धिः

देशः । प्रकार्यन्तरस्यासिद्धत्वाद्यदुत्तरतरमित्यनुवादायोगमभिप्रेत्याह—**न त्वितोऽन्यस्येति**। अयं भावः—" य एतद्विदुरमृतास्ते भवन्ति, अथेतरे दुःखमेवापियन्ति " इति च तद्विषयमेव। अन्यथा " नान्यः पन्था अयनाय " इति पुंसूक्तवाक्येन व्याघातः। एकविषयत्व एव ह्युभयत्रान्यवेदनस्य मोक्षहेतुत्वाभावोक्तिस्संघटते। तत्र बहुधा विरोधमप्याह—**बाधादिति**। पूर्ववाक्ये तावत् परान्तरनिषेधादुपक्रमनयेन तद्विरुद्धमुत्तरमुदेतुं नालम्, उत्तरत्र सर्वाननशिरोग्रीवत्वादिना " सहस्रशीर्षा पुरुषः, सहस्रशीर्ष

आनन्ददायिनी

**प्रकार्यन्तरस्येति**। पुरुषसूक्तार्थादन्यस्यानेन वाक्येनानुवादो नोपपद्यते, तस्यासिद्धत्वात्। न चास्मादेव सिद्धिः, यच्छब्दानुविद्धस्यानुवादतया [1]प्रापकत्वायोगादिति भावः। ननु यच्छब्दयोगे सत्यप्याग्नेयादिवाक्यवदप्राप्तार्थकत्वाद्विधिरस्तु। तद्विशिष्टवेदनमेव वा विधीयतामित्यत आह—**अयं भाव इति**। वित्तिविषयस्सर्वथा [2]पुरुषसूक्तार्थ एव। तदन्यवेदनस्य मोक्षसाधनत्वनिषेधादिति भावः। बहुविरोधमेवोपपादयति—**पूर्ववाक्य** [3]**इत्यादिना। उपक्रमनयेनेति**। 'श्रुतेर्जाताधिकारस्स्यात्' इत्यधिकरणे " उच्चैः ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा " इत्यादेः 'त्रयो वेदा अजायन्त' इत्युपक्रमानुसारेणार्थो वर्णित इति भावः—**उत्तरत्रेति**। पुरुषसूक्तार्थबोधकत्वा-

---

[1] प्रापकत्वादिति—**क.** [2] पुसूक्तार्थ—**ग.** [3] इत्यादि।—**क.**

तत्त्वमुक्ताकलापः

**विश्वव्याप्तस्य तस्योचितमुपधिपरिच्छेदनादुन्मितत्वं**

**स्वस्यैव प्रापकत्वादशिथिलचिदचिद्धारणाच्चैष सेतुः ॥ ७ ॥**

सर्वार्थसिद्धिः

देवम्" इत्याद्युक्तमिह प्रत्यभिज्ञातम्। अतोऽपि न तदन्यस्योत्तरतरत्वोक्तिसंभवः। अन्यथा "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" इत्याद्युपबृंहणशतबाधश्चेति। ननु "पादोऽस्य विश्वा भूतानि" "एष त आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा" इत्यादिभिः कारणपुरुषस्य परिच्छिन्नत्वोक्त्या ततोऽन्यदपरिच्छिन्नं परतरमित्यत्राह—**विश्वव्याप्तस्येति**। अयं भावः—यत्रयत्र परिच्छेदोक्तिः तत्रतत्र विश्वव्याप्तत्वमप्युक्तम्। अतस्तथातथोपासनार्थमौपाधिकः परिच्छेद उच्यत इति। सेतुत्वश्रुत्या च तेनोपायेन कूलान्तरवत् प्राप्यान्तरं गम्यत इत्यत्राह—**स्वस्यैवेति**। "अमृतस्यैष

आनन्ददायिनी

दुत्तरवाक्यस्य तेनापि विरोध इति भावः। उपबृंहणानुगृहीतोऽयमर्थ इत्याह—**अन्यथेति**। ननु पुरुषसूक्तादेः प्रतिपाद्यस्य कारणस्य परिच्छिन्नत्वेन सर्वोत्तरत्वायोगादिति शङ्कते—**नन्विति**। ननु [1]परिच्छेद औपाधिक इत्यत्र न किंचित् प्रमाणमित्यत्राह—**अयं भाव इति**। व्याप्ते[2]रौपाधिकत्वासंभवात् परिच्छेद औपाधिक इति भावः। ननु 'अमृतस्यैष सेतुः' 'एष सेतुर्विधरणः' इत्यादौ जगत्कारणं सेतुत्वेन व्यपदिश्यते। सेतुश्च कूलान्तरप्राप्तिहेतुरिति मुक्तप्राप्यं सेतुभूतजगत्कारणादन्यत्परतरमस्तीत्यत्राह—**सेतुत्वश्रुत्या चेति**।

[1] परिच्छेदादौपाधिक—ग. [2] विश्वव्याप्ते—ग.

## सर्वार्थसिद्धिः

सेतुः "इत्यत्र तावदमृतशब्देन श्रुत्यन्तरवत् ब्रह्माभिधाने स्वप्राप्तेः स्वयमुपाय इत्येतावदेव सिध्येत्। मोक्षाभिधानेऽपि तदुपायतयाऽन्यः परतरो न कल्पयितुं शक्यते। "एष सेतुर्विधरण एषां लोकानामसंभेदाय" इत्यत्र तु 'षिञ् बन्धने' इति धातोः स्वस्मिन्नाधारे विश्वमसङ्कीर्णं बध्नातीति सेतुः। तत्रापि न ततः परसंभवः। "एतं सेतुं तीर्त्वा" इत्यत्रापि "अन्धस्सन्ननन्धो भवति" इत्यादिषूत्तरवाक्येषु पुरुषस्य प्राप्यान्तराभिधानात् तरतिः प्राप्तिवचनः। "एवं नैतं सेतुम्" इत्यादावप्यन्यथासिद्धसेतुव्यपदेशो न प्राप्यान्तरकल्पनक्षम इति॥ ७॥

अथ पुरुषसूक्तस्य विनियोगविशेषान्नारायणपरत्वे सिद्धेऽपि शब्दसाधारण्यात् सन्दिहानानां प्राकरणिकादनन्यथासिद्धलिङ्गाद्विशेष-

## आनन्ददायिनी

**श्रुत्यन्तरवदिति**। 'तदक्षरं तदमृतम्' इत्यादाविवेत्यर्थः। **मोक्षाभिधानेऽपीति**। बन्धमोचनस्यामृतस्य परतत्वायोगादिति भावः। 'एष सेतुर्विधरणः' इत्यत्र तु नियन्तृत्वमर्थ इति न तत्र शङ्कावकाश इत्याह—**एष सेतुरिति**। **तरतिः प्राप्तिवचन इति**। तरणफले प्राप्तौ तरतिरित्यर्थः। **अन्यथासिद्धेति**। [1]नियमनार्थः सेतुशब्द इति भावः। मूले **उन्मितत्वं** परिच्छिन्नत्वम्॥ ७॥

ननु पुरुषसूक्त एव [2]नारायणः कुतः प्रतिपाद्य इत्याक्षेपसंगतिमभिप्रेत्याह—**अथेति। विनियोगविशेषादिति।**

यजेत्पुरुषसूक्तेन पुरुषं विष्णुमव्ययम्।

इत्यादिविनियोगादित्यर्थः। **शब्दसाधारण्यादिति**। पुरुषशब्दसाधार-

---

[1] नियमार्थः—ग. [2] नारायणः प्रतिपाद्य इति कुत इत्याक्षेप—क.

तत्त्वमुक्ताकलापः

## पुंसूक्तं सर्ववेदप्रपठनमहितं यत्परत्वैकतानं
## तस्यैव श्रीपतित्वं विशदमभिदधे ह्युत्तरत्रानुवाके।

सर्वार्थसिद्धिः

निश्चयमुत्पादयति—**पुंसूक्तमिति**। **सर्ववेदप्रपठनमहितमित्यनेन** परतत्त्वविषयप्रमाणानां [1] मिथोविरोधस्फूर्त्तौ बलाबलचिन्तायां परिग्रहातिशयादेतस्य प्राबल्यं सूच्यते। उक्तं च तदभिप्रायेण **महाभारते**—

इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते।

इति। उत्तरानुवाकः पुरुषसूक्तोक्तमहापुरुषविषयः; सन्निध्यनुगुणशब्दार्थप्रत्यभिज्ञानात्। तत्र "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति **तैत्तिरीयास्समामनन्ति**। **वाजसनेयिनस्तु**—"श्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति। न चात्रानुवाकद्वये धातृप्रजापतिशब्दाभ्यामन्यविषयत्वमाशङ्कनीयम्; विश्वकर्मत्वष्टृशब्दाभ्यामपि प्रसङ्गात्। ततः [2]

आनन्ददायिनी

ण्यादित्यर्थः। **विरोधस्फूर्ताविति**। वस्तुतो विरोध एव नास्तीति भावः। **तदभिप्रायेण**—प्राबल्याभिप्रायेण। संनिधिश्चानुगुणशब्दार्थप्रत्यभिज्ञानं चेति समाहारद्वन्द्वः। पुरुषं महान्तं सहस्रशीर्षमिति शब्दार्थप्रत्यभिज्ञा। **धातृप्रजापतिशब्दाभ्यामिति**। 'धाता पुरस्ताद्यमुदाजहार' इत्यत्र धातृशब्दः 'प्रजापतिश्चरति गर्भे अन्तः' इत्यत्र प्रजापतिशब्दश्च। **विश्वकर्मेत्यादि**। 'विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति' इत्याभ्यां शब्दाभ्यामित्यर्थः। **तत इति**। यद्यपि श्रुतिरेव

[1] मिथोऽविरोधेऽपि मिथो—घ. [2] अतः—घ.

तत्त्वमुक्ताकलापः

**आम्नातश्चैष नारायण इति निखिलब्रह्मविद्यासु वेद्यस्तत्तद्विद्याप्रदेशश्रुतिविविधपदप्रत्यभिज्ञासिपूर्वम् ॥८**

सर्वार्थसिद्धिः

प्रसिद्धतमलिङ्गानुरोधेन धातृप्रभृतिशब्दानां योगत एव मुख्यत्वमेष्टव्यम्। किंच **नारायणानुवाके** "सहस्रशीर्षं देवं" इत्यादिभिः पुरुषसूक्तप्रभृतिसर्वपरविद्यावेद्यं पुरुषं प्रत्यभिज्ञाप्य तस्य नारायणत्वं बहुशोऽभ्यस्तम्। अतो यत्रयत्र परब्रह्मपरतत्त्वपरज्योतिःपरमात्मादिशब्दा [1]दृष्टास्तत्र नारायण एव प्रतिपाद्यत इति निश्चीयते। अतः परतत्त्वनिर्णयेऽयमेवानुवाकः पर्याप्त इत्यभिप्रायेणाह—**आम्नात** इति ॥ ८ ॥

तथाऽपि त्वाष्ट्रवधादिलिङ्गैः प्रसिद्धेन्द्रादिविषयासु मोक्षार्थविद्यासु

आनन्ददायिनी

धात्रादिशब्दः, शक्तत्वात्। तथाऽप्यन्यत्र प्रयुक्तत्वेन संदेहात् 'सन्दिग्धे तु वाक्यशेषात्' **इति न्यायेन** वाक्यशेषबलिङ्गं बलवादिति भावः। **केचित्तु-यववराहाधिकरणन्यायेन** वाक्यार्थनिर्णयेऽपि लिङ्गप्रयोजकामित्याहुः। **पराविद्येति**। पुरुषसूक्तप्रभृति 'शंभुराकाशमध्ये ध्येयस्तं देवा जोतिषां ज्योतिः' इत्यादिपरविद्या विवक्षिताः। यतः सर्वविद्यावेद्यमनूद्यैव नारायणत्वं विदधाति तस्मादित्यर्थः। 'आम्नातश्चैष नारायणः' इत्यत्र यतिभङ्गो नाशङ्क्यः; नारशब्दस्य पदत्वात् स्वरसन्धेश्च ॥ ८ ॥

ननु यदि लिङ्गबलाद्देवताविशेषपरत्वं, तर्हि लिङ्गबलादिन्द्रादि-[2]परत्व वा किं न स्यादित्याक्षेपसंगतिरित्याह — **तथाऽपीति**।

[1] दृष्टास्तत्र सर्वत्र-**घ**. [2] परत्वमपि किं-**ग**.

तत्त्वमुक्ताकलापः

**रुद्रेन्द्रादिश्चयत्र स्फुरति परतयाऽनन्यथासिद्ध[1]लिङ्गः**
**तत्तत्तत्त्वैर्विशिष्टो हरिरखिलतनुस्तासुविद्यासु वेद्यः।**
**पारम्यं त्वान्यपर्यान्न भवति न किरित्यादिभिः**
**स्तोत्रवाक्यै-**

सर्वार्थसिद्धिः

का गतिरित्यत्राह **रुद्रेन्द्रादिरिति**। प्रसिद्धेन्द्रादिलिङ्गानां परमात्मलिङ्गानां चानन्यथासिद्धावुभयानुरोधेन सद्वारकमद्वारकं च तत्तद्विशिष्टब्रह्मोपासनपरत्वं स्वीकर्तव्यमित्यर्थः। कर्मविधिप्रकरणेषु 'न किरिन्द्र त्वदुत्तरः'(ऋक्सं. ३-६-१९-१)[2]इत्यादिभिः प्राकरणिकदेवताप्रशंसापरैर्न तासां परत्वसिद्धिरित्याह—**पारम्यमिति**। "न किरिन्द्र" इत्यस्य

आनन्ददायिनी

**सद्वारकमद्वारकं चेति**। इन्द्रादीनां परत्वं न वचनान्तरसिद्धम्; अवरत्वस्यैव सिद्धेः[3]। न चानेन वाक्येन इन्द्रादेः परत्वसिद्धिः। वाक्यान्तरविरोधात्। न चानेन वाक्येन नारायणस्य परत्वे विरोधः, अस्यापीन्द्रादिशरीरकनारायणपरतयोपपत्तेः। न च तेषामेव वाक्यानां तत्तच्छरीरकेन्द्रादि[4]परत्वं वक्तुं शक्यम्, इन्द्रादीनां तच्छरीरकत्वासिद्धेः। ननु वाक्यान्तरेण परत्वसिद्धेः सर्वं कल्प्यत इत्यत्राह—**कर्मविधीति**। अनेनान्यथासिद्धिः सूच्यते। ननु श्रुत्यर्थत्वे श्रुतार्थबाधेनाप्रामाण्यं स्यादित्यत्राह—**न किरिन्द्र इत्यस्येति**। किः क इत्यर्थः। बहुलग्रहणात् कादेशाद्यभावे

[1] लिङ्गात्तत्त्व—**घ**. [2] आदिपदेन 'विश्वस्मादिन्द्र उत्तरः' (ऋक्सं ८, ४, ४, १—२३) 'इन्द्रो यातोऽवसितस्य राजा' (तै. ब्रा. २-८-४) 'अग्निरग्रे प्रथमो देवतानां' (तै. ब्रा. २-४-३) 'राजानौ वा एतौ देवतानां यदग्नीषोमौ' (तै. ब्रा. २-६-२) इत्यादयो ग्राह्याः. [3] परत्वस्यैवासिद्धेः—**ग**. [4] परत्वं युक्तं वक्तुमिन्द्रादीनां—**ग**.

तत्त्वमुक्ताकलापः

## रन्याकूतैर्नमस्यादिभिरपि न परः स्यादनैकान्त्यदुःस्थैः ॥ १ ॥

सर्वार्थसिद्धिः

वस्वादित्यादिषु त्वदुत्तरो नास्तीति याथार्थ्यसिद्धिः । "एक एव रुद्रो न द्वितीयाय तस्थे" इतीदमपि तत्रत्यपशुविशेषे द्वितीयानन्वयपरमिति मीमांसाभाष्यकारादिभिर्व्याख्यातम् । एवमीदृशवाक्यान्तराणि यथार्हं नेतव्यानि । यस्तु नमस्कारभूम्ना बहुप्रदेशबहुवाक्यप्रतिपन्नतया तत्तदपदानविशेषैश्चान्यत्र क्वचित्परत्वं शङ्कते ; तं प्रत्याह—अन्याकूतैरिति । नमस्कारस्तावद्बाधभीत्या सान्त्वनाभिप्रायेण लोकवद्वेदेऽपि दृष्टः ; "नमस्ते अस्तु मा मा हिꣳसीः" इति । तद्भूयस्त्वं च भीतिभूयस्त्वादेरपि स्यात् । अस्ति च तेषुतेषु [1] देवताविशेषेषु नमस्कारस्त-

आनन्ददायिनी

मस्य विसर्जनीयः । यस्त्विति । नमस्यत्वं परस्यैव ; तद्बाहुल्यं शतरुद्रीयादिषु रुद्रस्यापीति सुतरां परत्वं सिध्यतीत्यर्थः । किं च त्रिपुरान्धकासुरदक्षाध्वरविध्वंसनाद्यपदानविशेषैः रुद्रस्यैव परत्वम्, तषु विष्ण्वादिषु सत्स्वपि कुर्वतोऽवरत्वायोगादिति भावः । निरुपाधिकनमस्यत्वं हि परत्वप्रयोजकम् । न च रुद्रस्य निरुपाधिकं नमस्यत्वं, 'अस्तु मा मा हिꣳसीः' इत्युपाधिदर्शनात्, तद्बाहुल्यात्तद्बाहुल्यमिति नमस्कारबहुत्वमन्यथासिद्धं न परत्वसाधकमित्याह—नमस्कारस्तावदिति । व्यभिचारान्तरमप्याह—अस्ति चेति । इन्द्रयममृत्यूनामपि नमस्कार्यत्वस्य कर्मकाण्डादौ [2] बहुषु स्थलेषु दर्शनात् ;

[1] देवतादिविशेषे—घ. [2] बहुस्थले द—ग.

तत्त्वमुक्ताकलापः

## धर्माणां स्थापनार्थं स्वयमपि भजते शासिता शासनं स्वं

सर्वार्थसिद्धिः

द्भूमा बहुप्रदेशपाठादिकमतिशयितापदानं च। अतो नैतैरेकः परः स्यात्, सर्वेषां च सर्वस्मात्परत्वं व्याघातदुःस्थमिति भावः॥ ९॥

नन्ववतारेषु भगवतश्शास्त्रार्थानुष्ठानं तत्फलभोगश्च श्रुतिस्मृतिषु बहुधा दृश्यते। अतस्तस्यापि कर्मवश्यत्वं स्यादित्यत्राह—धर्माणामिति। तदेतत् "न मे पार्थास्ति कर्तव्यम्" "धर्मसंस्थापनार्थाय"

आनन्ददायिनी

अपदानादिकं च चण्डीन्द्रादेर्दृश्यत इति भावः। ननु देवतानामप्यस्ति चेत् किं कुर्मः; कर्मवश्यत्वस्य हि यथाप्रमाणमभ्युपगन्तव्यत्वा[1]दित्यत्राह—अत इति। सर्वेषां चेति। सर्वेषां परत्वे स्वव्यतिरिक्तपरत्वस्य परस्परविरुद्धत्वात् व्याहतार्थकतया प्रामाण्यं न स्यादिति भावः॥ ९॥

ननु भगवतः परत्वस्य कर्मवश्यत्वेन विरुद्धत्वात्[2]दन्यस्य परत्वं बलाद्वक्तव्यम्; तत्र बाधकाश्च कथंचित् परिहार्या इत्याक्षेपसङ्गत्याऽऽह—नन्विति। 'विष्णुर्वा अकामयत' इत्यादिश्रुतिः। 'अश्वमेधशतैरिष्ट्वा' इत्यादिस्मृतिः। तदेतदिति। कर्मवश्यत्वं हि न साक्षाच्छ्रूयते। अपि तु कर्मानुष्ठानजन्मादिभिः कल्प्यते। तत्रानुष्ठानेन कल्पयितुं न शक्यते, तदनुष्ठानप्रतिपादनप्रकरण एव शास्त्रवश्यत्वाभावोक्त्या कर्मवश्यत्वाभावावगमात् तदनुष्ठा[3]नस्यान्यहेतुकत्वादिति भावः।

1 दित्यत आह—ग. 2 तदन्यस्यैव पर—ग. 3 नस्य निर्हेतु—क.

तत्त्वमुक्ताकलापः

**स्वस्यापि प्रत्यवायानभिनयति नृणां पाप-भीतिं विधित्सुः।**

**शुद्धैस्स्वेच्छावतारैर्भजति सुलभतां तावतोत्पत्त्यनूक्तिः**

सर्वार्थसिद्धिः

इत्यादिभिस्सिद्धम्। यद्यपि "जनितेन्द्रस्य जनितोत विष्णोः" इत्येतत् प्रीणनद्रव्यप्रशंसनार्थं, तथाऽप्यथर्वशिखायां "ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते" इति ब्रह्मादेरिव भगवतोऽपि प्रसूतिः श्रूयते। अतस्तदतिरिक्तं कारणं तत्र ध्येयतयोच्यत इत्यत्राह—**शुद्धैरिति**। अकर्महेतुकैरप्राकृतैरित्यर्थः। सौलभ्यार्थावतारानुवादस्तस्यैव सर्व-

आनन्ददायिनी

द्वितीयं शङ्कते—**यद्यपीति**। 'सोमः पवते जनिता मतीनां जनितेन्द्रस्य जनितोत विष्णोः' इत्यादीनां देवताप्रीणनहेतुसोमद्रव्यप्रशंसार्थत्वं तस्य [1]प्रत्यक्षविरोधादिना सिद्धमित्यर्थः। **ब्रह्मादेरिवेति**। एकस्याख्यातस्य विरूपतयाऽर्थ[2]प्रतिपादकत्वायोगात् ब्रह्मादितुल्योत्पत्तिकत्वे कर्मवश्यत्वं सिध्यतीति भावः। **अत इति**। यतः कर्मवश्यस्य ध्येयत्वं कारणत्वं च ब्रह्मादेरिवायुक्तं तत इत्यर्थः। **अकर्महेतुकैरिति**। [3]यद्यप्याख्यात एकरूपेण स्वार्थं बोधयति, तथाऽपि कर्मकृतत्वादिरूपेण न बोधयति, तत्र सामर्थ्याभावात्। अपि तु उत्पत्तित्वेन सामान्यतोऽवगम्यते। तथा च ब्रह्मादिसमभिव्याहारादिलिङ्गेन कर्मवश्यत्वमनुमेयम्। तत्र च 'न कर्मणा वर्धते' इत्यादिश्रुतिबाधान्नानुमानमिति भावः। ननु तर्हि ब्रह्मादिमध्ये विष्णूत्पत्तिः किमर्थं कथ्यत इत्यत्राह—**सौलभ्यार्थेति**। कर्मवश्यैस्सह सजातीयतयाऽवतारकथनेन दुरधिगमत्वशङ्का-

[1] प्रत्यक्षादिविरो—क. [2] प्रत्यायक—ग. [3] यद्यप्यत्राख्यात—ग

तत्त्वमुक्ताकलापः

**प्रोक्तो विष्णुश्शिखायामपि हि स पुरुषः प्राप्ततारार्धमात्रः ॥ १० ॥**

सर्वार्थसिद्धिः

कारणस्य ध्येयत्वविधानार्थमिति भावः। तत्रैव प्रणवनिरूपणे स्वार्थस्थापनं व्यनक्ति—**प्रोक्त** इति। प्रणवस्य तिसृणां मात्राणां वर्णभेदांस्त्रिमूर्तिदेवताकत्वं चोक्त्वा तस्य चतुर्थ्या अर्धमात्रायास्सर्ववर्णत्वं पुरुषदेवताकत्वं चोक्तम्। स च पुरुषः "सृष्टिस्थित्यन्तकरणीम्" इत्यादावुक्त एव जनार्दनः। "तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासः

आनन्ददायिनी

निरासार्थं सौलभ्यं कथितं भवतीत्यर्थः। ननु विष्णोरेव परमकारणत्वे हि सौलभ्यार्थावतारपरता वक्तुं शक्यते। तदेव न संभवति। अनेन वाक्येन त्रितयकारणस्यान्यस्य प्रतीतेरित्याह—**तत्रैवेति**। **पुरुषदेवताकत्वमिति**। पुरुषप्रतिपाद्यकत्वमित्यर्थः। प्रति[1]पाद्यार्थस्यैव देवतात्वात्। तथा च पुरुषस्य जगत्कारणत्वात् अर्धमात्राप्रतिपाद्यात् पुरुषान्मूर्तित्रयमुत्पन्नमिति कथनेन स्वजन्मन्यपि स्वस्य कारणत्वोक्तेस्सर्वकारणत्वं दृढीकृतमिति नोत्तीर्णं किंचिदस्तीति भावः। ननु पुरुषशब्दस्य साधारणत्वात् कथं नारायणोऽर्धमात्रार्थ इत्यत्राह—**स च पुरुष इति**। जगत्कारणत्वमन्यस्य नोपपद्यत इत्यर्थः। लिङ्गं चाह—**तस्य हैतस्येति** ॥

---

[1] पाद्याया एव—**क.**

तत्त्वमुक्ताकलापः

## आद्यं रामायणं तत्स्य च निगमगणे पञ्चमः पञ्चरात्रं

सर्वार्थसिद्धिः

यथा पाण्ड्याविकं, यथेन्द्रगोपः" इत्यादिना च पुरुषस्य सर्ववर्ण[1]विग्रहः श्रुतः। भारतादौ च विश्वरूपादिविग्रहे व्यक्तमेतत्।

भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधौ च वर्तेते वासुदेवे सनातने॥

इति च स्मर्यत इति॥ १०॥

उक्तस्यार्थस्यानन्यथासिद्धस्थापकभूयस्त्वमाह—**आद्यमिति**। मानवादिभ्योऽपि पूर्वमित्यर्थः। तदिति परिग्रहप्रसिद्धिव्यञ्जनम्। स चेत्यपि तथैव। निगमगणे पञ्चमत्वं च "वेदानध्यापयामास महाभारत-पञ्चमान्" इति प्रदर्शितम्। पञ्चरात्रस्य कात्स्न्र्येन प्रामाण्यं च महाभारतादिप्रसिद्धम्, शारीरके स्थापितं च। सत्त्वेन गुणेनादिभूतेन उपज्ञाय-

आनन्ददायिनी

ननु नानारूपवत्त्वं [2]कथमित्यत्राह—**भारतादौ** चेति। नारायणस्य प्रतिपादनादिति भावः। किं च पुरुषशब्दादेव नारायणावगतिरित्याह—**भगवानिति**॥ १०॥

ननु यद्यपि पुरुषादिशब्दास्सन्ति तथाऽपि तदन्यत्वबोधकानामपि सत्त्वात्तदनुसारः किं न स्यादित्यत आह—**उक्तस्यार्थस्येति**। पूर्वशेषत्वान्न पृथक्सङ्गतिरिति भावः। रामायणद्वैविध्यभ्रमं वारयति—**मानवादिभ्य इति**। **तथैवेति**। प्रसिद्धिप्राचुर्यात् भारतमुपस्थाप-

[1] विग्रहश्च श्रु—**ग** [2] कथं लिङ्गमि—**ग**.

तत्त्वमुक्ताकलापः

**सत्त्वोपज्ञं पुराणं मनुमुखमुनिभिर्निर्मितं धर्मशास्त्रम् ।**

**त्यक्तान्यो मूलवेदः कठपरिपठिता वल्लिकास्तापनीयं**

सर्वार्थसिद्धिः

मानत्वात् सत्त्वोपज्ञं वैष्णवादिपुराणम् । तेन मात्स्यादिषु विभक्तराजसतामसेभ्यः प्राबल्यं सूच्यते । **मनुमुखमुनिभिरित्यनेन**—

मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते ।

इत्युक्तं मानवप्राबल्यं व्यज्यते । **त्यक्तान्यः**—परित्यक्तदेवतान्तरतद्धर्मः । **मूलवेदः**— अनन्यधर्ममूलभूतो वेदभागः । **कठवल्लीषु**—

विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥

इति प्राप्यविशेषदर्शनात्तासु पुरुषादिशब्दोक्त उपास्यो विष्णुरेवेति युक्तम् । **तापनीयोपनिषत्तु** [1] नृसिंहरूपभगवदवतारैकविषया ।

आनन्ददायिनी

यतीति भावः । **सत्त्वोपज्ञमिति** । अनेन कात्स्न्र्येन प्रमापूर्वकत्वात् प्रामाण्यं सूच्यते । **अनन्यधर्मेति** । भगवद्धर्ममूलभूत इत्यर्थः । **प्राप्यविशेषदर्शनादिति** । ननु विष्णोः पदं प्राप्यमिति ततोऽन्यदेव प्राप्यमुपास्यं चास्तीति चेत्, मैवम् । 'विष्णवास्यं परमं पदम्' इत्यादिबहुवचनानुरोधेन स्वरूपार्थकत्वात् । भेदपक्षेऽपि पद[2]शब्दस्य चरणार्थत्वं वा । कर्मार्थत्वस्याशाब्दत्वात् । भावे वा स्थानार्थत्वं रूढे र्योगात् बलीय-

[1] नरसिंह—घ. [2] शब्दस्य कर्मार्थस्याचरणार्थत्वं शाब्दत्वात्—ग.

तत्त्वमुक्ताकलापः

**सौवालब्रह्मबिन्दुप्रभृतिकमपि नस्तत्परं तत्परत्वे ॥ ११ ॥**

**मध्यस्थोक्तिर्विरुद्धे परमहिमपरे तत्र नत्रैतदुक्तिः**

सर्वार्थसिद्धिः

**सुबालोपनिषच्च** नारायणस्यैव परत्वं [1] बहुधा प्रपञ्चयति । **ब्रह्मबिन्दूप-** [2] **निषदपि** " अहं वासुदेवः " इत्यहंग्रहोपा [3]सनदर्शनाद्वासुदेवविषया । प्रभृतिशब्देन नारायणोपनिषदादिसंग्रहः । **तत्परत्वे तत्परं**— भगवत्पारम्ये प्रधानाभिप्रायवदित्यर्थः ॥ ११ ॥

अत्राभ्युच्चययुक्तिमाह—**मध्यस्थोक्तिरिति** । राजसादिपुराणान्यतमेन सात्त्विकपुराणे विरुद्धे तदुभयमध्यस्थपुराणान्तरोक्तिसंवादा-

आनन्ददायिनी

स्वादिति नातिरिक्तं विष्णोरुपास्यमिति **परतत्त्वनिर्णये** निर्णीतमिति भावः । 'अहं वासुदेव इति सततं मन्थयितव्यं मनसा मन्थानशैलेन' इत्यनेन विधीयमानोपासनस्याहंग्रहणरूपत्वात् 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इति विधीयत इत्यर्थः । मूले–निगमगणे पञ्चमः निगमगणने[4] पंचमत्वेन गणित इत्यर्थः । मुखशब्देन **याज्ञवल्क्यादिग्रहः । उपनिषदादीत्यनेन एकायनशाखाग्रहः** ॥ ११ ॥

पूर्वसंगतिरेव संगतिरित्यभिप्रायेणाह—**अत्रेति** । सात्विकपुराणस्य राजसेन विरोधे तामसं मध्यस्थम्, तथा तामसेन विरोधे राजस-

[1] बहुधा वक्ति–घ. [2] निषच्च–घ. [3] सनाद–घ. [4] वेदगणने–ग.

तत्त्वमुक्ताकलापः

## वृत्तान्तास्ते विचित्राः

सर्वार्थसिद्धिः

निर्णयः स्यात्। ब्रह्मरुद्राद्येकैकमहिमतत्परे च पुराणे बहुषु प्रदेशेषु भगवत्पारम्यं दृश्यते। तत्र रक्तरुष्टयोरपि [1]दोषगुणोक्तौ प्रत्यायितत्वमाहुः। **वृत्तान्ताः**—" क्रान्त्वा निगीर्य पुनरुद्गिरति " इत्यादिभिस्संगृहीताः।

आनन्ददायिनी

पुराणं मध्यस्थम्। तथा च राजसतामसयोरपि भगवत्परत्वस्य दर्शनात्सर्वानुगतं तदेव ग्राह्यमित्यर्थ इत्येके। अन्ये तु—पुराणं चतुर्विधं सात्विकराजसतामससंकीर्णभेदात्। संकीर्णं तु मध्यस्थं, तदनुरोधेनार्थो वर्णनीय इति वदन्ति। किं च ब्रह्मरुद्रप्रतिपादकपुराणेष्वपि भगवतः पारम्यं प्रतिपाद्यत इत्यरातिकरलिखितविजयपत्रन्यायेनानुवृत्तं भगवतः पारम्यमेव सत्यम्, अन्यत्तत्तत्प्राकरणिककार्यान्तरार्थमर्थवादमात्रमित्याभिप्रायेणाह—**ब्रह्मरुद्रेति**। तत्तत्पुराणेषु भगवत्पारम्यस्य वाऽर्थवादत्वं कुतो न स्यादित्यत्राह—**तत्रेति**। रक्तरुष्टयोरित्यस्य व्युत्क्रमेणान्वयः।

एवं तु मन्यमाना वै महत्त्वमपि यान्ति ते।
अत्र विद्विष्टमनसो निरयं त्वधिविन्दति।
तस्मान्मुनीश्वरा यूयं नारायणमनामयम्।
भजध्वं भवतापघ्नं

इत्यादिस्कान्दादिवचनैर्भगवत्पारम्यानुरक्तस्य महत्त्वरूपातिशयोक्तेः विद्विष्टेति च द्वेषरूपदोषोक्तेश्च तत्र भगवत्परत्वे [2]प्रत्ययितत्वं तात्पर्यवत्त्वं मुनयो वदन्तीत्यर्थः। तस्मिन्नर्थे विश्वसनीयत्वं व्याख्यातारो वदन्तीति केचित्। **क्रान्त्वा निगीर्येति**। अस्यार्थः स्तोत्रभाष्ये

[1] गुणदोषोक्तौ—घ. [2] प्रत्यधीतत्व ता—क.

तत्त्वमुक्ताकलापः

## स्वमतमभिहितं देवतातत्त्वविद्भिः ।

सर्वार्थसिद्धिः

**देवतातत्त्वविद्भिः**—पराशरपाराशर्यादिभिः "विष्णोस्सकाशादुद्भूतम्," "आलोड्य सर्वशास्त्राणि", "सत्यं सत्यं पुनस्सत्यम्" इत्यादिभिः **स्वमतमभिहितम्**। शिल्पशास्त्रे च परावरभावेन वैषम्यं दृश्यते। तत्र ह्युत्तममध्यमा[1]धमविमानान्यधिकृत्योक्तम्—

स्यान्नागर[2]द्राविलवेसरं च क्रमेण वै सत्त्वरजस्तमांसि ।
महीसुरोर्वीपतिवैश्यकास्ते हरिर्विधाता हर आदिदेवः ॥

इति ।

आनन्ददायिनी

स्पष्टः। पराशरोक्तिमाह—**विष्णोरिति**। तत्र हि—

विष्णोस्सकाशादुद्भूतं जगत्त्रै[3]व संस्थितम् ।
स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः ॥

इत्यादिभिर्विष्णुपरत्वमभिहितमित्यर्थः। व्यासवचनमुदाहरति—**आलोड्येति**।

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥
सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते ।
[4]वेदाच्छास्त्रं परं नास्ति न दैवं केशवात्परम् ॥

इत्यादिभिः प्रकटमभिहितमित्यर्थः। **शिल्पशास्त्रे चेति**। मरीचिसंहितायां देवालयप्रमाणान्युक्त्वाऽनन्तरमयं श्लोको विमानविषयः पठ्यते। तस्यैकत्र पक्षपाताभावात्तदुक्तं प्रमाणमित्यर्थः। **उत्तममध्यमाधमेति**।

---

[1] धमरूपवि—**घ** [2] द्रावल—**घ**. [3] त्रैव च स्थितम्—**ग**. [4] वेदशास्त्रात्परं—**ग**.

तत्त्वमुक्ताकलापः

## वैषम्यं शिल्पशास्त्रप्रभृतिषु विविधं वैदिक-स्वीकृतत्वं

सर्वार्थसिद्धिः

[1] विष्णोरन्ये राध्यमाना न साक्षाच्छ्रीकरास्सुराः ।
सर्वदेवास्पदे विष्णौ श्रिष्ण्यं संपत्सुखावहम् ॥

इति । प्रभृतिशब्देनायुर्वेदादिसंग्रहः । पठ्यते—[2]"हरिं हरीतकीं चैव" इत्यादि । ज्यौतिषे च "धन्यं तदेव लग्नम्" इत्यादि । **वैदिकस्वीकृतत्वं**—वेदविदुत्तमैः **सर्वैर्बोधायनटङ्क** [3] **द्रमिडगुहदेवकपर्दिभारुचि-**

आनन्ददायिनी

त्रेधा विमानं प्रवदन्ति तज्ज्ञा देवालये तद्विधिरुत्तमः स्यात् ।
यथाक्रमेणैव [4] विमानमेषां विपर्ययेऽनर्थकरः प्रजानाम् ॥

इत्यादिनेति शेषः । **सत्वरजस्तमांसि** सत्वादिगुणमयानीत्यर्थः । सत्वमयोत्तमविमानाधिदेवतात्वात् परत्वमित्यर्थः । शिल्पे **गार्ग्यसंहितायामपि** परत्वं सिद्धमित्याह—**विष्णोरिति** । अस्यार्थः—विष्णोरन्ये देवा आराध्यमाना न साक्षात् श्रीकराः फलप्रदा न भवन्ति, किं तु सर्वास्पदे विष्णौ श्रिष्ण्यं स्थानं तेषां सुखावहं [5]सुखप्रदानसामर्थ्यवत्त्वादित्यर्थः । 'येऽप्यन्यदेवताभक्ताः' इति न्यायात् । ननु वैद्यशास्त्रे मुमुक्षूपास्यत्वोक्तेः परत्वमस्तु । ज्योतिश्शास्त्रे तु 'धन्यं यशस्यमायुष्यं'

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते [6] रङ्घ्रियुगं स्मरामि ॥

इत्यादिना भगवदाङ्घ्रिस्मरणस्य सर्वमङ्गलकरत्वप्रतिपा[7]दनमात्रेण कथं

[1] विष्णोरन्ये न वा हर्म्यदेशस्थाश्श्री—घ. [2] 'गायत्री च दिनेदिने । मोक्षारोग्यतपःकामो भजेत्सेवेज्जपेदपि ॥' इति श्लोकशेषः [3] द्रविड—घ. [4] विधान—ग. [5] सुखसंप्रदानसामर्थ्याकृतीत्यर्थः—ग [6] ते तेऽङ्घ्रियुग—ग. [7] पादनात्कर्थ—ग.

तत्त्वमुक्ताकलापः

## प्रज्ञासंस्कारभाजां भवति भगवति स्वप्रधाने प्रमाणम् ॥ १२ ॥

सर्वार्थसिद्धिः

प्रभृतिभिर्भगवत एव परत्वेनाङ्गीकृतत्वम्। एतत्सर्वं सदाचार्यशिक्षाजनितप्रज्ञासंस्कारभाजाम् "आत्मेश्वरम्" इति स्वप्रधानतयाऽर्घीते भगवति प्रमाणं भवतीति ॥ १२ ॥

आनन्ददायिनी

परत्वसिद्धिरिति चेत्, तत्स्मरणस्य सकलमङ्गलकरत्वे मोक्षरूपमङ्गलकरत्व[1]स्यापि भावात् परत्वसिद्धिरिति भावः। ननु तर्ह्येतैः परिगृहीतत्वे सर्वे किमिति न गृह्णन्तीत्यत्राह—**एतत्सर्वमिति**। तादृशसुकृतालाभादिति भावः। '**आत्मेश्वरम्' इत्यनेन**—'उत्तीर्णं ब्रह्म धार्मि, [2]तद्धर्मः शक्तिर्द्विधा भिन्ना सती पार्वतीविष्णुरूपेणावतिष्ठते। तत्र विष्णुः प्रकृतितया जगत्कारणम्। तदेव ब्रह्माद्यपेक्षया परम्। यद्वा—परस्मादुत्पन्ना विष्ण्वादयः समाः. वर[3]गोष्ठिन्यायात्। कदाचिद्विष्णुः परः कदाचिद्रुद्रः, कदाचिद्ब्रह्मा च' इति नवीनशैवकल्पनं च निरस्तम्। तामसपुराणानां 'स्मृत्यनवकाशदोषप्रसङ्गात्' इति न्यायेन दुर्बलतयाऽन्यपरत्वात्तत्रैव कूर्मादिषु उपक्रमादिषु विष्णुपरत्वोक्त्या स्ववाक्यविरोधाच्च मन्वाद्य[4]नुस्मरणस्य विरोधप्रशमनकारणत्वाच्चेति भावः ॥ १२ ॥

---

[1] त्वसभवात्परत्व—**ग.** [2] तद्धर्मभूतशक्ति—**ग.** [3] पर—**क.** [4] नुसरणस्य—**ग.**

तत्त्वमुक्ताकलापः

## इन्द्रेशानाद्यभिख्या स्वयमिह महदाद्युक्तिभिर्वा विशिष्टा

सर्वार्थसिद्धिः

अत्र कश्चिदाह—ईश्वरशब्दो निर्विशेषणो महत्परमशब्दविशेषितश्च कस्यचित् समाख्या ; अन्यस्य त्वेवं त्रिविधः पुरुषशब्दः ; अतस्तयोरवसीयते परावरभाव इति। अत्रेन्द्रप्रतिबन्दिं सहोक्त्या सूचयन् प्रतिवक्ति—**इन्द्रेशानादीति**। अयं भाव —इन्द्रशब्दो हि परमैश्वर्यवाचिधातुनिष्पन्नः केवलोऽपि परमे[1]श्वरत्वं ब्रूते, किमुत महत्पूर्वः, तथाऽपि येन तत्र [2]समाख्यासङ्कोचः स रुद्रेऽपि समः, कार्यत्वकर्मवश्यत्वयोस्समचर्चत्वादिति। समाख्यातः श्रुत्यादेर्बलीयस्त्वं सूचयन्

आनन्ददायिनी

आक्षेपसङ्गत्यभिप्रायेणाह—**अत्र कश्चिदिति**। **एवं त्रिविध इति**। केवलपुरुषशब्दो महापुरुषशब्दः परमपुरुषशब्द इत्येवंप्रकारेणेत्यर्थः। **अतस्तयोरिति**। कल्पभेदेन परावरभावे विनिगमनाभावादिति भावः। यौगिकं नाम समाख्या। नन्विन्द्रादिसमाख्याया मानत्वं नास्तीत्ययुक्तं, धर्मि[3]मानस्येन्द्राद्युपस्थापकस्य परत्वविरोधित्वाभावात्; प्रत्युतानुगुण्यमेवेत्यत्राह—**अयं भाव इति**। केचित्तु—इन्द्रादिसमाख्यासाम्यमनुपपन्नं ; तत्समाख्यायाः[4] परत्वानवगमादित्यत आह—**अयं भाव इतीत्याहुः**। कार्यत्वकर्मवश्यत्वादिना हि धर्मिग्राहकेणोपस्थिते वस्तुनीन्द्रशब्दस्य समाख्यात्वग्रहः। तथा च प्राथमिकेन धर्म्युपस्थापकेन परत्वविरोध्युप[5]स्थापनेन बाधिता समाख्या न परत्व-

[1] श्वर्यं ब्रू—**घ**. [2] समाख्यार्थस—**घ**. [3] मानस्य ज्ञानाद्यु—**ग**. [4] यामपर—**ग**. [5] स्थापकेन—**ग**.

तत्त्वमुक्ताकलापः

**तत्तत्पारम्यमानं न भवति बलवद्धर्मिमानोपरोधात् ;**

**नो चेत्स्यान्नैक ईशो न भवति यदि वा कश्चिदन्योन्यबाधात्**

**लोकेऽप्यन्वर्थभावं न हि दधति महावृक्षमुख्यास्समाख्याः ॥ १३ ॥**

सर्वार्थसिद्धिः

हेतुमाह—बलवदिति। एवमनभ्युपगमे [1]बाधकप्रसङ्गद्वयमाह—नो चेदिति। समाख्यामात्रावलम्बने रुद्रेन्द्रादयो बहव ईश्वराः स्युः, न वा कश्चित्, तुल्ययोगक्षेमत्वादिति भावः। नाममात्रस्यासाधकत्वं सर्वसंप्रतिपत्त्या दर्शयति—लोकेऽपीति। महौषधमहानद्यादिसंग्रहाय मुख्यशब्दः ॥ १३ ॥

इति भगवत्पारम्यम्.

---

आनन्ददायिनी

मिन्द्रे बोधयितुमलम् ; तथा रुद्रेऽपीति भावः। ननु पुरुषोत्तमादिसमाख्यातो भगवतः परत्वं 'पुरुषोत्तमः कः' इत्यादिभिः कथं साध्यत इत्यत्राह—नाममात्रस्येति। समाख्यामात्रस्य न साधकत्वमपि त्वबाधितस्य. पुरुषोत्तमादन्यस्मिन् समाख्या बाधितेति भावः। मूलं—अन्वर्थभावं न हि दधति अवयवार्थो नास्ति, किं तु रूढिरेवेति भावः। महावृक्षोऽर्कगुल्मम् ॥ १३ ॥

भगवतः परत्वम्.

---

[1] बाधकं प्र–घ.

तत्त्वमुक्ताकलापः

## एकं त्रेधा विभक्तं त्रितयसमधिकं तत्त्वमीशास्त्रयस्ते

सर्वार्थसिद्धिः

अथात्र न्यायाभासमूलानि मतान्तराण्यनूद्य तेषां दत्तोत्तरत्वमाह—**एकमिति**। एकस्यैव रामकृष्णादिवत्साक्षादवतारे त्रिधा विभाग इति पक्षः "एकैव मूर्त्तिर्बिभिदे त्रिधास्य[सा]" इत्यादिषु विवक्षितः। तत्र मूलभूतान—

"विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते"

"सृष्टिस्थित्यन्तकरणीम्" इत्यादीनां

"तवान्तरात्मा मम च"

इत्यादिवाक्यान्तरानुविधानात् क्षेत्रज्ञव्यवधानेन द्वयोरेकत्राव्यवधानेन [1]च प्रतीतिं व्याचख्युः। त्रिमूर्त्युत्तीर्णं पुरुषान्तरं सच्चिन्मात्रं वा परतत्त्वमिति पक्षे—

[*]स संज्ञां याति भगवानेक एव जनार्दनः।

इत्यादिभिरपि बाधः। परस्परं भिन्ना ईश्वरास्त्रय इति पक्षः

आनन्ददायिनी

पूर्वसंगतिरेव संगतिरित्यभिप्रायेणाह—**अथेति**। **एकस्यैवेति**। एक आत्मा ब्रह्मविष्णुशिवरूपविग्रहवानिति तार्किकादय ऊचुरित्यर्थः। **एकैवेति**। [2]एक [3]एवात्मा ब्रह्मादिशरीरत्रयवानित्यर्थः। तत्र प्रमाणं नास्तीत्याह—**तत्रेति**। ननु वैष्णववचनैस्त्रैरूप्यं प्रतीयत इति चेत्; तत्राह—[4]**तवेति**। सत्यं त्रैरूप्यं प्रतीयत इति, तथापि सद्वारकाद्वारकभेदेन प्रतिपादयतीति न तत्र प्रमाणमित्यर्थः। त्रिमूर्त्युत्तीर्णपुरुषान्तरमिति **शैवैकदेशिन** आहुः। तदुत्तीर्णं सच्चिन्मात्रमपिति **मायिन** आहुः। मतद्वयमाह—**त्रिमूर्तीति**। **अपि**-शब्देन पुरुषसूक्तमहोपनिषदादिबाधोऽपि सूच्यते। परस्परं भिन्नास्त्रय

[1] च वृत्तिं—**पा**. [2] एक आत्मा—**ग**. [3] एवात्मा शरीरत्रय—**क**. [4] तत्राह तावतेति—**ग**.

तत्त्वमुक्ताकलापः

## विष्ण्वन्या मूर्तिरिष्टे प्रभवननियमः कल्पभेदा-त्त्रयाणाम् ।

सर्वार्थसिद्धिः

श्चैकस्य सर्वप्रशासितृत्वादिभिर्निरस्तः । विष्णोरन्य एव ब्रह्मा रुद्र आदित्यो वा कश्चिदीश्वर इति वादोऽपि विष्णोरेव सर्वेश्वरत्वस्थापनादपास्तः । त्रय ईश्वरास्सत्त्वादिगुणोन्मेषभिदुरकल्पभेदाच्चक्रनेमिनीत्या निम्नोन्नतैश्वर्या

आनन्ददायिनी

इति पौराणिकाः । तदूषयति–**एकस्येति** । 'एको देवः सर्वभूतेषु गूढः' 'एकमेव' 'नेह नानास्ति' इत्यादिभिरित्यर्थः । **विष्णोरन्य एवेति** । रुद्रयामले वामागमे च—

प्रकृतिर्विष्णुरीशान ईश्वरो जगतस्तथा ।

इति । अन्यत्र च—

'ईश्वरश्शंभुरादित्यः पर्जन्यश्च हुताशनः'

इति दर्शनाद्विष्णो[1]रन्यः पर इति कापालिका आहुरित्यर्थः ।

'यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा ।

तस्य तस्य तु माहात्म्यं'

इत्यारभ्य—

[2]सात्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।

अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम् ॥

राजसेषु तु कल्पेषु माहात्म्यं ब्रह्मणो विदुः ॥

[3]इत्यादिवचनार्थभ्रान्तिमूलकं शैवैकदेशिमतमाह—**त्रय इति** ।

---

[1] रन्य इति–क. [2] सात्विकेष्वेव कल्पेषु–ग. [3] इति वचनाद्भ्रान्ति–ग.

तत्त्वमुक्ताकलापः

**इन्द्रादीनामिव स्यान्निजसुकृतवशादीश्वराणां प्रवाहः**

**स्यादेकस्येश्वरत्वं प्रतिफलनवदित्यादि चैवं परास्तम् ॥ १४ ॥**

सर्वार्थसिद्धिः

इति कल्पनाऽपि निरस्ता । प्रवाहेश्वरपक्षश्च "न कर्मणा वर्धते नो कनीयान्" "स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्" इत्यादिश्रुतिभिरवधूतः । अस्त्वेक एवेश्वरः, तस्येश्वरत्वं नित्यसत्त्वविशेषसन्निधानानिबन्धनं प्रतिफलनकल्पमिति योगराद्धान्तश्च —

'पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च' इत्यादिभिरपोढः । **आदि**शब्देन नित्यचिकीर्षाप्रयत्नवांश्चिकीर्षारहितोऽपि वा ज्ञानप्रयत्नमात्रवानित्यादिमतभेदसंग्रहः । **एवं**—श्रुतिलिङ्गादिप्राबल्यस्थापनप्रकारेणेत्यर्थः ॥ १४ ॥

**इति त्रिमूर्त्यैक्यादिपक्षनिरासः.**

---

आनन्ददायिनी

**प्रवाहेश्वरेति** । इन्द्रादिप्रवाहवदुपचितपुण्यविशेषाणामीश्वराणामपि प्रवाह इति मीमांसकमतम् । **नित्यचिकीर्षेति** तार्किकमतम् । तदेकदेशिमतमाह—**ज्ञानप्रयत्नेति** । पूर्वं स्वरूपाभ्युपगमोऽत्र गुणे प्रकारविशेषाभ्युपगम इति भेदः । आदिशब्देनाध्यस्तगुणवत्त्वमनित्यकर्माधीनगुणवत्त्वमित्यादिसंग्रहः । **श्रुतिलिङ्गादीति** । श्रुतिलिङ्गादिभिर्नारायणपरत्वे सिद्ध एते पक्षा [1] निरस्ता इत्यर्थः ॥ १४ ॥

**त्रिमूर्त्यैक्यादिपक्षनिरासः.**

---

[1] निराकृता—ग.

तत्त्वमुक्ताकलापः

## सर्गादीनामसिद्धौ न हि निगमगिरां भज्यते संप्रदायः

सर्वार्थसिद्धिः

श्रुतिसिद्ध ईश्वर इत्युक्तम् । अनुमानतोऽपि सिद्ध इति वदन्तः प्रतिवक्तव्याः । तत्र तावदुपदेशलिङ्गं दूष्यते—**सर्गादीनामिति** । किमस्मदादीनां धर्मोपदेशार्थमीश्वरः कल्प्यते, उत कल्पादिसंभवानां पुरुषविशेषाणाम् । नाद्यः—पित्रादिक्रमेण संप्रदायप्रवृत्तेरीश्वरनैरपेक्ष्यात् । पित्रादिप्रेरणार्थमीश्वरोऽपेक्षित इति चेत्, न तर्हीदमुपदेशलिङ्गं, कार्यलिङ्गानुप्रवेशात् । न द्वितीयः—सर्गाद्यसिद्धाविदानीमिवानादि-संप्रदायाविच्छेदेन तत्प्रवर्तकानपेक्षणात्। सिद्धिस्तु सर्गादेरनुमानादा-

आनन्ददायिनी

ननु श्रुत्येश्वरसिद्धिरित्यनुपपन्नं ; प्रमाणान्तर[1]सिद्धे तात्पर्याभावादित्याक्षेपसंगतिमभिप्रेत्याह—**श्रुति[2]सिद्ध ईश्वर इति** । **केचित्तु** श्रुतिसिद्धः श्रुत्यैव सिद्ध इत्यर्थ इत्याहुः । उपदेशो द्विविधः स्वरूपख्यापनमनुष्ठानप्रदर्शनमिति ; तत्राद्यं दूषयति—**किमित्या[3]दिना** । **न तर्हीति** । प्रेरकत्वेन कारणानि प्रति कर्तृत्वात् कार्यं कर्तृजन्यमित्यत्रैव पर्यवसितम् । तच्चाग्रे दूष्यत इति भावः । **इदानीमेवेति** । पित्रादिक्रमेणैवेत्यर्थः । ननु नानुमानं प्रभवतीत्यनेन किं

---

[1] न्तरासिद्धे—**क.** [2] सिद्ध इति—**ग.** [3] दिना । तर्हीति—**ग.**

तत्त्वमुक्ताकलापः

## तत्सिद्धौ नानुमानं प्रभवति

सर्वार्थसिद्धिः

गमाद्वेति विकल्पे पूर्वं दूषयति—**तत्सिद्धाविति**। अयं भावः—विश्वसन्ततिरत्यन्तमुच्छिद्यते, सन्ततित्वात्, प्रदीपसन्ततिवदित्यनुमानं तावत्सर्वात्ममोक्षमिच्छतामन्त्यमुक्तिसमयभाविना सर्वकार्योच्छेदेन चरितार्थं स्यात्। वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः, नित्यत्वे सति तदारम्भकत्वात्, घटादिपरमाणुवदित्यत्राप्युपचयाप-

आनन्ददायिनी

नास्तीति विवक्षितम्, उत सत्यपि तस्मि[1]न्सामर्थ्यं नास्तीति, नाद्यः। विश्वसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वाद्दीपसंततिवत्, वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीयसन्तानकाः नित्यत्वे सति तदारम्भकत्वात् घटादिपरमाणुवदित्यनुमानसंभवात्। न द्वितीयः—व्याप्तिपक्षधर्म[2]तादिमतस्साधकत्वादित्यत आह—**अयं भाव इति**। विश्वसन्ततेः प्रतिदिनमुच्छेदात् सिद्धसाधनमित्यत आह—**अत्यन्तमिति**। सजातीयसमानकालीनोच्छेदवादित्यर्थः। **सर्वकार्योच्छेदेन** महाप्रलयेनेति। इत्थं परमाणुमात्रपक्षीकारेऽशतस्सिद्धसाधनमित्यत आह—**वर्तमानेति**। नित्यत्वे सतीति विशेषणं घटपटाद्यारम्भकतन्तुकपालादौ व्यभिचारवारणाय। आत्मादौ व्यभिचारवारणाय तदारम्भकत्वादिति। तच्छब्दो हि सन्तानान्तर्गतद्रव्यपरः। तथा च द्रव्यारम्भकत्वादित्यर्थः। **अत्रापीति**। [3] अवयविवादे प्रतिक्षणं परमाणुविभाग[4]संयोगाभ्यां पूर्वब्रह्माण्डनाशब्रह्माण्डान्तरोत्पत्त्यादिसंभवादिति भावः। अप्रयोज-

[1] न्सामान्यं नास्ती—**ग.** [2] तादीनामसा—**ग** [3] अवयववादे—**ग.** [4] संयोगसभवात्पूर्व—**ग.**

तत्त्वमुक्ताकलापः

## यदिदं बाधशून्यं विपक्षे ।

सर्वार्थसिद्धिः

चयभिदुरब्रह्माण्डभेदेन तत्तत्परमाणूनां प्रागपि ब्रह्माण्डसन्तत्यन्तरारम्भसंभवेनार्थान्तरत्वापातादिति । साधारणदोषमाह—**यदिदमिति** । न तावत्सर्गाद्यभावे काचिदनुपपत्तिः । यद्यप्यारब्धानां भावानां नश्वरत्वमात्रं गम्यते, तथापि तत्सन्ततीनामनुच्छेदोक्तौ न विरोधः । **यत्तूक्तम्**—

आनन्ददायिनी

कत्वदूषणमाह—**साधारणेति** । ननूत्पन्नस्य विनाशित्वनियमात् ब्रह्माण्डस्य विनाशे प्रलयः सिद्ध इत्यत्राह—**यद्यपीति** । सत्यं तथापि सजातीयासमानकालीनविनाशो नास्तीति न सन्ततिविच्छेद इति भावः । प्रमागुणजन्येतिवाक्यजन्यप्रमायां वक्तृवाक्यार्थयथार्थज्ञानस्य गुणत्वात् वेदशुकादिवाक्यजन्यप्रमायां वक्तृवाक्यार्थप्रमात्वेनेश्वरीया सिध्यतीतीश्वरसिद्धिः । किंच प्रलयानन्तरसर्गाद्युपदेशेऽध्यापकपरंपराया विच्छिन्नत्वादुपदेशलिङ्गादीश्वरसिद्धिः । किंच कस्यचित् सर्वज्ञस्येश्वरस्याभावे सर्वेषां भ्रमादि[1]सम्भवेनानाश्वाससम्भवाद्वेदवाक्यप्रमानुरोधेनेश्वरसिद्धिरितीदमेवोपदेशलिङ्गकमनुमानमीश्वरसाधकमित्युदयनोक्तमनुवदति—**यत्तूक्तमिति** । विधातुरीश्वरस्यासंभवोऽसिद्धिरे-

---

[1] सभवेन विश्वासासंभवा–**ग.**

## सर्वार्थसिद्धिः

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसंभवात् ।
तदन्यस्मिन्ननाश्वासान्न विधातुरसंभवः ॥

इति, तत्राद्यो हेतुर्बुद्धिसरे दूषयिष्यते । द्वितीयस्त्विदानीं दूषितः । तृतीयोस्तु विमतः । संभवन्ति हि सर्गादिकाले प्राचीनसुकृतसञ्चयविपाकवै [जात्या] विध्यात् प्रतिबुद्धवेदराशयो देवा महर्षयश्च । ते युष्माभिरपि वेदवक्तुरासिस्ख्यापनाय तदुपदेशग्रह[1]णप्रवचनाद्यर्थं च स्वीकृताः । ऋषित्वमपि सुप्तप्रबुद्धन्यायेन सुकृतवशात् प्रागधीतप्र-

## आनन्ददायिनी

वेत्यर्थः—**द्वितीयस्त्विति** । सर्गप्रलयसम्भव इत्येतदित्यर्थः । **तृतीयस्त्विति** । [2] योगिषु विश्वासासम्भवाद्वि[3]श्वसनीयस्तदन्यः सिध्यतीत्यपि वक्तव्यं, तन्नोपपद्यत इत्यर्थः । **विमतः**—असिद्धः । विमतिमेवोपपादयति—**संभवन्तीति** । तेष्वाश्वासाभावे बाधकमभिप्रेत्याह—**युष्माभिरपीति** । अन्यथेश्वरस्यासत्त्वमेव न सिध्येत्, तद्वचनानामप्रामाण्यशङ्काग्रासात् तदुपदेशग्रहणे चाश्वासाभावादन्यथाऽपि ग्रहणशङ्का स्यात् । तदुपदिष्टं विस्मृत्य तत्प्रच्छादनाय [5]तूपदिष्टादन्यदुपदिशतीति च शङ्का स्यादिति भावः । आदिशब्देन ग्रहणधारणादिसंभवेऽपि विप्रलिप्सयाऽन्यदेवोपदिशतीति शङ्कादि गृह्यते । ननु यदि कश्चिदृषिरासो वेदमुपदिशेत्, स त्वादिकर्तेश्वर एव स्यादित्यत आह—**ऋषित्वमपीति** । पूर्वजन्मन्यधीतिसापेक्षतया परतन्त्रत्वान्नेश्वरत्वं

---

1 णधारणग्र—**पा.** 2 योगिष्वविश्वासस—**ग.** 3 श्वसनस्तदन्य —**ग** 4 ति वक्त—**ग.** 5 य तदुपदि—**ग.**

तत्त्वमुक्ताकलापः

## शास्त्रेभ्यस्तत्प्रसिद्धौ सहपरिपठनाद्विश्वकर्तापि सिध्ये-

सर्वार्थसिद्धिः

स्मृतवेदभागप्रत्यक्षीकरणमेव। श्रूयते हि "अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत्, त ऋषयोऽभवन्तदृषीणामृषित्वम्" इति। अतस्तैरेव सर्गोपपत्तौ किमन्येन। एतेन बहुपरिग्रहगौरवं चापास्तम्। विजातीयक्लृप्तावेव हि गौरवम्। न च बहुष्वनाश्वासः; एकस्मिन्निव तेष्वपि तत्परिहारस्य समचर्चत्वादिति। आगमात्सर्गादिसिद्धौ सर्वकर्तुरपि तत एव सिद्धिमाह--**शास्त्रेभ्य** इति। सर्वकर्तारं पुरस्कृत्यैव हि सर्गादिकथनम्; अतोऽनुमेयं नावशिष्यत इति भावः। विमतं प्रति प्रयोगसंभवेऽप्यनुमानासामर्थ्यं दर्शितम्। सांख्यागमैः

आनन्ददायिनी

तस्येति भावः। तत्र प्रमाणमाह—**अजानिति**। पूर्वजन्मतपस्सिद्धान् पृश्नीन् पृश्निनाम्नः स्वयंभु नित्यं ब्रह्म वेदः अभ्यानर्षत् अभ्यगच्छत्, प्रत्यक्षी अभवदिति यावत्। ननु ऋषीणामुपदेष्टृत्वेनाभ्युपगमे प्रतिकल्पं [1]भेदेनाभ्युपगमात् गौरवं स्यादित्यत आह—**एतेनेत्यादिना**। जीवात्मनामेव क्लृप्तानामृषित्वात् न क्लृप्तिरिति भावः। **एकस्मिन्निति**। आश्वासकल्पकस्य तुल्यत्वादिति भावः। द्वितीयं दूषयति—**आगमादिति**। **सर्वकर्तारमिति**। 'यतो वा इमानि भूतानि जायन्ते' 'एतस्माज्जायते प्राणस्तस्मिन्नेव प्रलीयते' इति तत्पुरस्कारादिति भावः। **विमतं प्रतीति**। व्यासप्रयादिकमस्त्येव, तथाऽपि नाभिमतसाधकमिति भावः।

[1] भेदाभ्यु—ग.

तत्त्वमुक्ताकलापः

**धर्मानुष्ठापनार्थं तदनुमितिरतो नैव शक्या कदाचित् ॥ १५ ॥**

**साध्यं यादृक् सपक्षे**

सर्वार्थसिद्धिः

सर्गादिसिद्धिः स्यादिति चेन्न; श्रुतिविरोधे बाधात्। अन्यथा सेश्वर-[1]सांख्येऽनुमेयाभाव एवेति। अनुमानान्तरैरपि सर्गाद्यसिद्धिं तत एवोपदेशलिङ्गस्य निर्मूलतां चाभिप्रेत्य निगमयति—**धर्मेति** ॥ १५ ॥

इत्युपदेशानुमानभङ्गः.

---

यानि च बहून्यनुमानानि संजगृहुः—

कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात्संख्याविशेषाच्च साध्यो विश्व [सृड] विदव्ययः ॥

इति, तत्रान्वयिषु साधारणं[2] दूषणमाह—**साध्यमिति**। यादृक्

आनन्ददायिनी

**विरोध इति**। अनीश्वरात् सर्गादिकथन इत्यर्थः। आद्यद्वितीये दूषयति—**अनुमानान्तरैरिति**। अनुष्ठानप्रदर्शनलिङ्गैरित्यर्थः। **तत इति**। उभयविधोपदेशस्याप्यन्यथासिद्धेरित्यर्थः ॥ १५ ॥

उपदेशलिङ्गभङ्गः

---

पूर्वसंगतिरेव संगतिरित्यभिप्रायेणाह—**यानि चेति**। **कार्येति**। अङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत्, द्व्यणुकादिजनकपरमाण्वादिकं केनचित् प्रेर्यं कार्यजनकत्वात् वास्यादिवत्, पृथिव्यादिकं केनचिद्धृतं गुरुत्वे सति पतनरहितत्वात् वृक्षाग्रस्थफलवत्, क्षित्यादिकं कृतिजन्यं

[1] सांख्यैरनु—घ. [2] रणमा (रण्यमा)—पा.

तत्त्वमुक्ताकलापः

## नियतमवगतं स्याद्धि पक्षेऽपि तादृक्

सर्वार्थसिद्धिः

सपक्षे नियतमवगतम्—येनाकारेण व्याप्तं प्रमितमित्यर्थः। स्याद्धि पक्षेऽपि तादृक्—न हि पर्वते वह्निरनुमीयमान उष्णत्वमपहाय सिध्येदिति भावः। व्यवहितेऽपि पश्चादुष्णत्वदर्शनात्तत्सिद्धिरिति चेन्न; प्रालेय-मर्मरितैः पद्मपत्रादिभिः प्रालेयसान्निहितानुद्भूतरूपहुतवहानुमाने तद-सिद्धेः। न च तत्रानुष्णो वह्निरनुमीयेत; मर्मरीभावस्यैवासिद्धिसङ्गात्। यद्यनुष्णो वह्निः कश्चित्पचेत्। अन्वयव्यतिरेकवान्नीहार एव पाचकः किं न कल्प्येत; एवं सामान्यतश्शिक्षितया व्याप्तया प्रस्तुतेऽनिष्ट-

आनन्ददायिनी

कार्यत्वाद्घटवत्, घटादिपदानि केनचित्संकेतितानि पदत्वात् डित्थादि-पदवत्, वेदवाक्यजन्य[1]प्रमा गुणजप्रमात्वात् वक्तृप्रमाजन्या प्रमात्वात् गामानयेतिवाक्यजन्यप्रमावत्, वेदवाक्यं स्वार्थनित्यसर्वसाक्षात्कार-वत्पुरुषजन्यं वेदत्वात् व्यतिरेकेण गगनवत्, वेदवाक्यानि नकेचि-त्प्रणीतानि वाक्यत्वात् कालि[2]दासवाक्यवत्, परमाणुगतद्वित्वं कस्यचिदपेक्षाबुद्धिजन्यं द्वित्वसंख्यात्वात् घटगतद्वित्ववदिति। अत्र सर्वत्रापि पक्षधर्मतावलादीश्वरसिद्धिरिति भाव.॥

ननु धूमव्यापकभूतो वह्निस्तृणजन्यत्वेनावगतः, तथाऽपि तृणजन्यत्वेन न वह्निसिद्धिरित्यत्राह—**येनाकारेण व्याप्तमिति**। एवं च [3]व्यापकतया प्रतीतधर्मवत्त्वेन सिद्धिरित्यर्थः। नन्वनु-मितौ व्यापकतावच्छेदकावच्छिन्नमात्रस्य सिद्धिरन्यथाऽतिप्रसङ्गा-दित्यत्राह—**न हि पर्वत इति**। नन्वनुमितौ [4]नोष्णता विषया, अपि तु पश्चात्प्रत्यक्षेणावगम्यत—इत्याशङ्कते—**व्यवहितेऽपीति**। **प्रालेयेति**। तत्र पश्चात् प्रत्यक्षेणोष्ण्य[5]ग्रहणादिति भावः—**मर्मरीभावस्येति**।

[1] प्रमा गुणजन्या प्रमात्वात् कर्तृप्रमाजन्यप्रमा—**ग.** [2] दासादिवाक्य—**ग.** [3] व्याप-कतावच्छेदकव्यापकताप्रतीतधर्म—**ग.** [4] नोष्णो विषयः—**ग.** [5] ष्ण्यग्रहादिति—**क.**

तत्त्वमुक्ताकलापः

**तस्मात्कर्मादियुक्तः प्रसजति विमते कार्यता-द्यैस्तु कर्ता ।**

**एतत्तात्सिद्ध्यसिद्ध्योर्न घटत इति न क्ष्मादिपक्षे सपक्ष-**

सर्वार्थसिद्धि.

प्रसङ्गमाह—**तस्मादिति** । कार्यत्वादिभिरुर्वीदूर्वादौ कर्ता यदि सिध्येत् कर्तृव्यापककायकरणकर्मादिमान् स्यात्; तथा च नाभ्युपगम्यत इत्यनिष्टता, विपर्यये विश्रमश्च । नन्वनुमानवत्तर्कोऽपि धर्मिसिद्धिसापेक्षः. अन्यथा प्रसञ्जकं कुत्राहार्यम् । [1]अनिष्टं कुत्र वा प्रसञ्जनीयम् । तदिहेश्वरसिद्धौ विदेहतयैव तत्सिद्धेस्तद्विरुद्धप्रसङ्गानुत्थानम्, तदसिद्धौ निराश्रयस्तर्कः कुत्र किं प्रसञ्जयेदित्यभिप्रायेण चोदयति—**एतदिति** । परोक्तहेत्वाश्रय एव प्रतिकूलतर्काश्रय इत्यभिप्रायेण प्रतिवक्ति—**नेति** । विवृणोति—**क्ष्मादीति** ।

आनन्ददायिनी

मर्मरीभावो दग्धता, तस्योष्णस्पर्शसाध्यत्वादित्यर्थः । ननु मर्मरीभावहेतुतयोष्णताऽप्यनुमी[2]यतामिति चेत्तर्हि कर्तृतादेशशरीरवत्त्वादिव्याप्तया तदपि सिध्य[3]दित्याह—**कर्तृव्यापकेति** । यद्यपि—

व्याप्तिस्तर्कात्प्रतिहातिरवसानं विपर्यये ।

अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम् ॥

इत्यत्र पक्षधर्मता नोक्तेत्याश्रयवत्त्वं स्वरूपसत्त्ववन्नाङ्गम्; तथाप्यनिष्टत्वं पराभिमते वस्तुनि तदनभिमतापादनेन; तच्च [4]तद्वस्त्वभावे नोपपद्यत इत्य[5]निष्टत्वाङ्गातर्गतामिति भावः । **परोक्तेति** । क्षित्यादिकर्तरि नापादनं;

[1] अनिष्टं वा कुत्र च प्र—घ. [2] यत इति—ग. [3] दित्याह—ग. [4] तद्वस्तुभावेनोपपद्यते—क. [5] निष्टत्वान्तर्गत—क

तत्त्वमुक्ताकलापः

## व्याप्त्याकारप्रसङ्गात्तदनुपगमने न क्वचित्स्वात्प्रसङ्गः ॥ १६ ॥

सर्वार्थसिद्धिः

अयं भावः-यदि वयमीश्वरे धर्मिणि प्रसङ्गमवतारयामः, तदा सिद्ध्यसिद्धिविकल्पदौःस्थ्यं स्यात् ; यदि च पृथिव्यादावाश्रये कार्यत्वहेतुना कर्तारं देहादिमन्तमुपस्थापयेम, तदा दूर्वादौ व्यभिचारात् न प्रतिसाधनं न प्रतितर्कश्चेति स्यात्। किंतु संप्रतिपन्ने पृथिव्यादौ धर्मिणि साध्यधर्मस्वभावात्तद्व्यापकप्रसक्तिं ब्रूमः ; अतो न कश्चिद्विरोध इति। अथ साक्षात्परसाध्यमाश्रयीकृत्य प्रसङ्गः प्रयोक्तव्य इति मन्येत ; तदा प्रसङ्गस्यैवोच्छेद इति प्रसञ्जयति—**तदनुपगमन** इति। परेष्टसाध्यविशेषस्य स्वीकारे बहिष्कारे च व्याघातस्य दुष्परिहरत्वादिति शेषः ॥ १६ ॥

आनन्ददायिनी

येन सिद्ध्यसिद्ध्यद्ध्यादिदोषः स्यात्। अपितु क्षित्यादावेव। यदि क्षित्यादिकं सकर्तृकं स्यात् शरीरिकर्तृकं स्यात् इत्याद्यापद्यत इति न सिद्ध्यसिद्धिव्याघात इति भावः। ननु क्षित्यादिकं शरीरिकर्तृकं स्यात् कार्यत्वादिति [1] यद्यापद्यते तदाऽङ्कुरादौ व्यभिचार इति कथमापादनमिति चेत्-तत्राह-**अयं भाव इति**। यदि क्षित्यादौ कर्ता सिध्येत् स तु शरीर्यपि स्यात्। कर्तृनाथाः शरीरादिव्याप्तेरिति भावः। ननु पक्षे पराभिमतसाध्यं निश्चित्यैव तर्कप्रवृत्तिः। न तु साध्यसामान्यव्याप्तय। तत्प्रसञ्जनं ; तथा च सिद्ध्यसिद्धिव्याघात इत्यत आह-**अथ साक्षादिति**। तर्हि क्वचिदपि प्रसङ्गो न स्यादित्याह-**परेष्टेति**। निश्चिते बाधेन तदापादनायोगात्, अनिश्चिते त्वाश्रयासिद्धिरिति भावः ॥ १६ ॥

[1] यदाऽऽपा-**ग**.

तत्त्वमुक्ताकलापः

**यत्कार्यस्योपयुक्तं तदिह भवतु नः किं परेणेति चेन्न**

**ज्ञानादेरुद्भवे तद्विषयनियमनेऽप्यर्थनादिन्द्रियादेः ।**

सर्वार्थसिद्धिः

ननु कार्योत्पत्तौ कर्तुर्ज्ञानचिकीर्षाप्रयत्नमात्रमुपयुज्यते, देहादेः कार्यव्यापकत्वादर्शनात्; कार्यविशेषे तदुपयोगो दृष्ट इति चेत्, यत्र दृष्टस्तत्र तथाऽस्तु, न सर्वत्र; अतिप्रसङ्गादित्यभिप्रायेण शङ्कते—**यदिति** । **उपयुक्तं**—ज्ञानचिकीर्षादिकम् । **परेण**—कार्योत्पत्त्यनुपयुक्तेनेत्यर्थः । अनुपयोगो दुर्वच इत्यभिप्रायेणाह—**नेति** । तत्साधयति—**ज्ञानादेरिति** । सपक्षव्याप्तप्रकारेण पक्षेऽपि कर्तुर्ज्ञानादिना कार्येण भावितव्यम्; ततस्तत्कारणतया कायकरणकर्मादियोगोऽपि दुस्त्यजः । प्रयत्नस्य विषयनियमाश्चिकीर्षया; तस्याश्च प्रियाप्रियप्राप्तिपरिहारव्यापारकारणेन तावद्बुद्ध्या; सा च तत्तत्सामग्रीनियतविषयेति विषयनियमे

आनन्ददायिनी

ननु शरीरादिमत्त्व न कर्तृत्वव्यापकमप्रयोजकत्वादित्याक्षेपसंगतिरित्याभिप्रायेणाह—**नन्विति** । परशब्दोऽन्यार्थ इत्याह—**कार्योत्पत्तीति** । **तत्साधयतीति** । दुर्वचत्वमेवेत्यर्थ । **सपक्षव्याप्तप्रकारेणेति** । ज्ञानत्वावच्छेदेन कार्यत्वाववारणादित्यर्थः । **आदिशब्देन** यत्नादिग्रहः । **ततस्तत्कारणतयेति** । ज्ञानादिकारणतयेत्यर्थः । **आदिशब्देन** प्रवृत्त्यादिग्रहः । किं च ज्ञानं सविषयं निर्विषयं वेति विकल्पं [1]मनसि कृत्वाद्य आह—**प्रयत्नस्येति** । प्रियाप्रियप्राप्तिपरिहारहेतुयत्नस्य चिकीर्षाद्वारा ज्ञानसाध्यत्वादिति भावः । **सा चेति** । नियत-

[1] मनसि कृत्या—क.

तत्त्वमुक्ताकलापः

**नित्यं ज्ञानं विभोस्तन्न नियतविषयं तेन नान्यार्थनं चे-**

**न्नानित्यस्यैव दृष्टेस्तव कथमजसंयोगभङ्गोऽ-न्यथा स्यात् ॥ १७ ॥**

सर्वार्थसिद्धिः

स्थिते सामग्रीशून्यं ज्ञानं कथं सविषयम्? निर्विषये च तस्मिन् किं चिकीर्षेत? अचिकीर्षुश्च कुतः प्रयतते। ननु कार्यस्यैव सामग्र्य-पेक्षणम्, नित्यस्य तु स्वतस्सर्वविषयस्योत्पत्तिविषयनियत्योरभावात् किं सामग्र्येति शङ्कते—**नित्यमिति**। त्रय्यन्तिनामिव नित्य-ज्ञानसिद्धावेतद्वक्तव्यं नान्यथेति स्थापयितुमाह—**नेति**। अहेतुकं ज्ञानं किं दृष्टमुत कल्पितम्? नाद्यः, असिद्धेः; न द्वितीयः, दृष्टविजातीयकल्प्त्ययोगादित्यभिप्रायेणाह—**अनित्यस्येति**। तादृश-ज्ञानकल्प्तौ परस्येष्टविरोधमाह—**तवेति**। मूर्तवद्द्रव्यत्वादिना विभूनां

आनन्ददायिनी

विषयज्ञानस्य कारणाधीनत्वात् तत्कारणतया शरीरादिकमावश्यकमिति भावः। द्वितीय आह—**निर्विषये चेति**। चिकीर्षाप्रयत्नयोः ज्ञान[1]विषय-विषयकत्वनियमात्, अन्यथाऽन्यज्ञानादन्याचिकीर्षाप्रसङ्गः। वस्तुतस्सर्व-गोचरयोस्तयोः प्रसङ्ग इति भावः। **त्रय्यन्तिनामिवेति**। नित्यज्ञान-सिद्धावेव वक्तुं शक्यं, तत्सिद्धिश्च किं वेदान्तात्, उतानुमानात्, नाद्यः—अनुमेयत्वाभावप्रसङ्गात्। न द्वितीयः—उक्तरीत्या जन्यस्यैव सिद्धिप्रसङ्गा-दिति भावः। **तादृशज्ञानकल्प्ताविति**। कारणानपेक्षज्ञानकल्प्ताविति्यर्थः।

[1] विषयक—क.

## सर्वार्थसिद्धिः

विभुना संयोगे कल्प्यमाने संयोगकारणानामन्यतरकर्मोभयकर्मसंयोगानामसंभवात्तन्निषेधः कृतः, तथेहापि विज्ञानकारणानामिन्द्रियलिङ्गादीनामभावात्तदभावः स्यात्। नित्यत्वान्नैरपेक्ष्यमजसंयोगेऽपि सुवचम्। विभूनां मिथस्संयोगाभावे न किंचिद्बाधकमिति चेन्नित्यज्ञानाभावेऽपि किम्? अस्मदाद्यशक्यकार्यानुत्पत्तिप्रसङ्ग इति चेत्; न, कारणान्तरैरेव तदुत्पत्त्युपपत्तेः। कर्तृनिरपेक्षैः कारणान्तरैः कार्योत्पत्तिर्न दृष्टेति चेत्, अन्यत्रादृष्टाऽप्यत्र तथा स्यात्, प्रध्वंसस्येव निमित्तमात्रजन्यत्वम्। वरं हि कल्पितस्य ज्ञानादेः कारणनैरपेक्ष्यकल्पनात् सिद्धस्य हेतुवर्गस्य क्वचित् कर्तृनैरपेक्ष्याङ्गीकारः, अजसंयोगस्वीकारो वेति; स्वीक्रियतां का हानिरिति चेत्, सिद्धान्तहानिरिति ॥ १७ ॥

## आनन्ददायिनी

ननु कारणाभावे हि कार्यं ज्ञानं निवर्तेत; न तु[1] नित्यत्वमपीत्यत आह—**नित्यत्वादिति**। ननु नित्यसंयोगोऽङ्गीकर्तुं शक्यते, यदि प्रमाणमस्ति। न चासति तत्कल्पनमित्याह—**विभूनामिति**। तर्हि नित्यज्ञानेऽपि न प्रमाणं कल्पकमित्याह—**नित्यज्ञानाभावेऽपि किमिति**। अन्यत्र साहचर्यमात्रमप्रयोजकं कर्तृनिरपेक्षमेव कारकं जनक[2]मस्त्विति नान्यथानुपपत्तिरित्याह—**अन्यत्रेति**। किं च कार्यान्यथानुपपत्तिपरिहाराय ज्ञानकल्पनेऽपि ज्ञाने कारणाभावादनुपपत्तिस्तदवस्था; तथेच्छादावपीति शान्तिकर्मणि वेतालोदयः स्यात्। यदि च ज्ञानादि कारणनिरपेक्षमिति कल्प्यते तदा कार्य एव कर्तृनिरपेक्षत्वं वक्तुमुचितं लाघवादित्याह—**वरं हीति**। **अजसंयोगस्वीकारो वेति** वाशब्दश्चार्थः ॥ १७ ॥

---

[1] नित्यमपीत्यत्र साह?—**क**. [2] मस्तीति—**ग**.

तत्त्वमुक्ताकलापः

## किं वा धीच्छे गृहीते विषयनियतये ते हि यत्नोऽत्र नेच्छेत्

सर्वार्थसिद्धिः

नन्वहेतुकसंयोगमिच्छद्भिरहेतुकज्ञानं न दूष्यम्, तद्दूषणे वा सिद्धान्तहानिः स्यादित्यत्राह—किं वेति। कर्तुरनुमानेऽपि प्रयत्नमात्राधारत्वमनुमीयताम्, प्रयत्नव्यापकतया ते अपि सिध्येतामिति चेन्न; जीवनपूर्वकप्रयत्नमन्विच्छतां तत्र व्याप्तिभङ्गात्। अतः प्रयत्नकल्पावपि ज्ञानचिकीर्षानैरपेक्ष्यमाह—विषयेति। सर्वकार्यविषयस्य हि प्रयत्नस्य विषयनियमाभावादेव न तदर्थं चिकीर्षाद्यपेक्षा। उक्तमर्थं प्रतिबन्दिगतं

आनन्ददायिनी

[1] आक्षेपिकी सङ्गतिरित्याह—नन्विति।

नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम।

'सर्वव्यापी सर्वभूतान्तरात्मा' 'व्याप्य नारायणः स्थितः' इत्यादिप्रमाणबलादजसंयोगोऽस्तु। न च नित्यज्ञानेच्छयोः प्रमाणमस्ति। न च कार्यत्वानुमानं प्रमाणं, प्रयत्नमात्रेण चरितार्थत्वादित्याह—कर्तुरनुमानेऽपीति। ननु कार्यत्वहेतुना यथा प्रयत्नसिद्धिः तथा प्रयत्नवत्त्वहेतुना ज्ञानादिसिद्धिं शङ्कते—प्रयत्नात्। ते—ज्ञानचिकीर्षे। जीवनेति। सुषुप्ता[2]वपि प्रयत्नाङ्गीकारादिति भावः। सर्वकार्येति। जीवनयोनिप्रयत्ननियमेऽपि न तदपेक्षेति चिकीर्षायोनौ तदपेक्षेति वक्तव्यं; तथा च सर्वविषयकस्य नित्यत्वादेव न

[1] आक्षेपसगति—क. [2] वपि ज्ञानाङ्गीकारा—क.

तत्त्वमुक्ताकलापः

**निर्हेतुस्तत्प्रमेष्टा भवतु विषयवानेष तद्वत्स्वतस्ते ।**

सर्वार्थसिद्धिः

विवृणोति—**निर्हेतुरिति**। अयं भावः—अन्यत्र ज्ञानं सर्वं सकारणकं तत्प्रामाण्यं च कारणगुणाधीनमिति स्थापयद्भिरीश्वरज्ञानं तत्प्रामाण्यं च निष्कारणकमिति दृष्टविपरीतं कल्प्यते । अत्र ज्ञानचिकीर्षाख्यधर्म्यन्तरक्लृप्तिमपहाय प्रयत्नमात्रेऽन्यनिरपेक्षं विषयित्वमङ्गीकर्तुं युक्तम् ।

नित्या चेश्वरबुद्धिस्ते नानुभूतिर्न च स्मृतिः ।
न प्रमा न भ्रमश्च स्यात्तत्तत्कारणवर्जनात् ॥
अनुभूत्यादिहेतूनामभावेऽपि तथा यदि ।
स्मृतिहेतोरभावेऽपि स्मृतिरेषा न किं भवेत् ॥

आनन्ददायिनी

तदपेक्षेति भावः । ननु ज्ञानवदेव प्रयत्नस्यापि निर्हेतुकत्वाङ्गीकारात्तद्दृष्टान्तेन तदापा[1]दनमयुक्तमनिष्टत्वाभावादित्यत्राह—**अयं भाव** इति । यद्यपि प्रयत्नो नित्य एव, तथाऽपि तद्धर्मो [2]विषयित्वं ज्ञानाधीनमिति वदन्तं प्रति नित्यज्ञानप्रामाण्यमिव तदपि तन्निरपेक्षमस्त्विति न तर्काङ्गहानिरिति भावः । प्रत्युत बाधमप्याह—**नित्येत्यादिना** । यावद्विशेषबाधे सामान्यबाध इति भावः । ज्ञानं द्विविधं स्मृत्यनुभवभेदात् प्रमाभ्रमभेदाच्च । एतेष्वन्तर्भावाभावे ज्ञानत्वमेव न स्यात् । न चात्रान्तर्भावः, तत्कारणाजन्यत्वादित्याह—**तत्तत्कारणेति** । अनुभूत्यादिकारणेत्यर्थः । माऽस्त्वनुभूत्यादिकारणमित्यत्राह—**अनुभूत्यादिहेतूनामिति** । **स्मृतिहेतोरिति** । [3]तथा च विनिगमक-

[1] दनं युक्त—**ग.** [2] विषयत्व—**ग.** [3] तव च—**ग.**

तत्त्वमुक्ताकलापः

## प्रोक्ते यत्ने स्वभावाद्विषयवति सधीः स्यादि [1]तीदं क्व दृष्टं

सर्वार्थसिद्धिः

कुतश्चित् प्रमात्वादिकल्पनेऽपि तद्वदेव यत्नस्य विषयित्वेऽन्य-नैरपेक्ष्यमपरिहार्यमिति। अत्र परोक्तं प्रसङ्गमनूद्य प्रतिषेधति—**प्रोक्त इति**। ज्ञानस्य स्वत एव सविषयत्वमित्येतदेव क्व दृष्टम्? सर्वत्र ज्ञाने सामग्रीनियतविषयत्वदर्शनात्। नित्यस्य चेश्वरयत्नस्य कार्य-विशेषानुगुणसहकारिलाभमन्तरेण कार्यविषयत्वं नाम न किञ्चित् संभवति। न च विषयित्वमेव ज्ञानलक्षणम्, शक्त्यादीनामपि

आनन्ददायिनी

भावे विरोधात् ज्ञानमेव न स्यादिति भावः। किं च ज्ञानादिकं प्रमाणेन नित्यतया सिध्येत्; तर्हि तत एव सविषयकः प्रयत्नोऽपि सिध्येदिति किं ज्ञानेनेत्याह—**कुतश्चिदिति**। ननु ज्ञानं स्वतोविषयि, इच्छाकृत्योस्तदधीनं विषयित्वमिति तदभावे तयोस्तन्न स्यादिति परोक्तप्रसङ्गं परिहरति—**ज्ञानस्येति**। ज्ञानवदेव यत्नस्यापि स्वत एव विषयित्व, यदि ज्ञानानुविधानदर्शनात् न तथा तदा ज्ञानस्यापि [2]सामग्र्यनुविधानदर्शनात्तन्न स्यादिति भावः। किं च ईश्वरयत्नस्य विषयित्वं हि तत्तत्कार्यसामग्र्यायत्तं, न तु ज्ञानाधीनमित्याह—**नित्यस्येति**। ननु विषयित्वं स्वभावतोऽन्यतो वाऽस्तु; ज्ञानस्यैव विषयित्वमसाधारणम्, तदन्येषां तदधीनं गौणमित्याशङ्क्य परिहरति—**न च विषयित्वमेवेति**। शक्त्यादीनामपि विषयित्वमस्त्येव, घट-

[1] तीद त्वदृष्ट—पा [2] सामग्र्यधीनविधान—क.

## सर्वार्थसिद्धिः

विषयधर्माणां धीत्वप्रसङ्गात् । यस्त्विच्छामनङ्गीकृत्य बुद्धियत्नावीश्वरस्य ब्रूते, सोऽपि प्रत्युत्पन्नवादी ; नित्ययत्नमात्रेणापि सर्वकार्यसिद्धेरुक्तत्वात् । अबुद्धिपूर्वप्रवृत्तस्य कथं 'स्वतन्त्रः कर्ता' इति लक्षणयोगः, कथंतरामीश्वरत्वयोग इति चेत्, अनिच्छापूर्वप्रवृत्तस्यापि समेतत् । अत एव कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोक्तृत्वरूपं कर्तृत्वं कथमचेतनस्येत्यपि प्रत्युक्तम्, प्रयत्नवत एव प्रयोक्तृत्वसंभवात् तन्नित्यतया प्रयोज्यत्वाभावाच्च । ननु चेतनत्वमात्मलक्षणम्, तदभावे तत्त्वं न स्यादिति चेत्, मैवम् ; यत्नवत्त्वेन तल्लक्षणसिद्धेः ; अन्यथेच्छाविरहेऽपि तदसिद्धिप्रसङ्गः । "इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्म-

## आनन्ददायिनी

विषयशक्तिरिति व्यवहारादिति भावः । **विषयिधर्माणामिति** । विषयिणो ज्ञानस्य धर्म इव धर्मो यस्य विषयित्वधर्माणामित्यर्थः । **यस्त्विति** । [1]विषयिनियमार्थं हि ज्ञानाद्यङ्गीकारः । तत्र स्वतो विषयिणो ज्ञानस्य यत्नविषयनियमार्थमङ्गीकारोऽस्तु, किमिच्छया [2]स्वतो विषयित्वरहितयेति भावः । **प्रत्युत्पन्नवादी**—पूर्ववृत्तानभिज्ञ इत्यर्थः । तत्र हेतुमाह—**नित्ययत्नमात्रेणेति** । ननु यत्नस्य विषयितासिद्ध्यर्थं न ज्ञानं, अपि तु कर्तृतासिद्ध्यर्थमिति शङ्कते—**अबुद्धीति** । स्वातन्त्र्यं हि प्रेरणहेतुज्ञानवत्त्वं दण्डादिव्यावृत्तं वक्तव्यमिति भावः । **अनिच्छापूर्वेति** । इच्छापरित्यागस्तर्हि न स्यादिति भावः । **अत एवेति** । यतोऽन्यप्रयोक्तुर्बुद्ध्य[3]पेक्षाऽत इत्यर्थः । अन्यथासिद्धत्वान्नेदं युक्तमित्याह—**प्रयत्नवत एवेति** । एतेन

[1] विषयनियमार्थ—ग. [2] स्वतोऽन्यतो विषयित्व—क. [3] प्रेक्षा तत—क.

तत्त्वमुक्ताकलापः

**यद्वा धीस्तं हि नित्यं न तु जनयति ते मा कथं तन्नियन्त्री ॥ १८ ॥**

सर्वार्थसिद्धिः

लिङ्गम्" **इत्याक्षपादी** सहपठितिः 'क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणम्' इति **काणभक्षीय** कथंचिन्नेया, ज्ञानाद्यत्यन्तायोग-व्यच्छेदवन्निष्ठद्रव्यत्वावान्तरजात्याधार आत्मेति। अस्तु तर्हि यत्न-मात्रवानीश्वरः, तथाप्यनुमानं न प्रतिक्षिप्तमिति चेन्न, "यस्सर्वज्ञ-स्सर्ववित्' 'तदैक्षत बहु स्यां प्रजायेय,' 'सोऽकामयत बहु स्यां प्रजायेय' इत्यादिश्रुतिशताविरोधादिति। दूषणान्तरमाह—**यद्वेति**।

आनन्ददायिनी

[1] कर्तृत्वचेतनत्वार्थं त्रितयं भवत्वितीष्टापत्तिरपि परास्ता, यत्नमात्रादेवोप-पत्तेरिति द्रष्टव्यम्। **क्रियावद्गुणवदिति**। यथा सर्वद्रव्याणां क्रिया-वत्त्वाभावेऽपि सहपाठस्तथा सर्वात्मनां ज्ञानाभावेऽपि सहपाठः स्यात्। अन्यथा ज्ञानेच्छादिवद्द्वेषसुखदुःखादिप्रसङ्ग इति भावः। ननु लिङ्गं ह्यसाधारणो धर्मः, स च लक्षणमेवेति यदि निर्बन्धः, तत्राह—**ज्ञानेति**। ज्ञानसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं तदर्थ इत्यर्थः। द्रव्यत्वव्याप्यत्वं ज्ञानसमानाधिकरणत्वं च घटत्वसत्तादिकमादाय घटगुणादौ चातिव्याप्तिवारकम्। तादृशोपाधिमादाय घटादावेव तद्वारकं जातिपदमिति बोध्यम्। यद्यपि कारणनिरपेक्षत्वं यत्नस्य चेदङ्गीक्रियते तर्हि कस्यचित् कार्यस्य कर्तृनिरपेक्षत्वं वक्तुं शक्यं लाघवादित्युक्तमेव, तथाऽपि दूषणान्तरमप्यस्तित्यभिप्रायेणाह—**यस्सर्वज्ञ इति**। किं च

[1] कर्तृत्वचेतनार्थं तृतीय—**ग**.

तत्त्वमुक्ताकलापः

## निःश्वासादिप्रयत्नक्रम इह भवतां जीव एवास्त्वदृष्टे-

सर्वार्थसिद्धिः

धीर्हि जनयित्री चिकीर्षाया विषयं नियच्छेत्; सापि तादृशी यत्नस्य। इह तु जनकत्वाभावान्न ततस्तद्विषयनियमः, सामानाधिकरण्यमात्रात्तन्नियमे जीवेश्वरगुणान्तराणामपि सविषयत्वप्रसङ्ग इति भावः॥ १८॥

अस्तु नित्ययत्नवानीश्वरोऽनुमेयः संप्लवाभ्युपगमादवशिष्टमागमिकं स्यादित्यत्राह—**निश्वासेति**। जीवनपूर्वकप्रयत्नन्यायादृष्टविशेषजनितयत्नवद्भिर्जीवैः क्षित्यादेः सकर्तृकत्वसंभवे किं नित्ययत्नतदाधारकल्पनागौरवेण? यादृशैरेवादृष्टैः शरीरादिनिरपेक्षैस्सहकृत ईश्वर-

आनन्ददायिनी

ज्ञानस्य स्वतो विषयिता; तदधीना चिकर्षायत्नयोरिति तदङ्गीकारस्तथाऽपि प्रकृते न तदधीनविषयिता वक्तुं शक्येति तदङ्गीकारो व्यर्थ इत्याह—**धीर्हीति**। तदधीनविषयितायां तज्जन्यताया एव नियामकत्वादिति भावः। **जीवेश्वरेति**। क्रियागुणादीनामपि तत्सामानाधिकरण्याविशेषादिति भावः॥ १८॥

ननु श्रुतिविरोधो [1]नास्त्येवेत्याक्षेपिकी सङ्गतिरित्यभिप्रायेणाह—**अस्त्विति**। **संप्लवः**—प्रमाणसंवादः। ननु श्रुतेरनुवादकता स्यादित्यत्राह—**अवशिष्टेति**। ज्ञानानन्दादिगुणविषयतया [2]प्रमाणं स्यादिति भावः। अनुमानेनेश्वरसिद्धौ हि प्रमाणसंप्लवः स्यात्, तत्सिद्धिरेव नास्तीत्याह—**जीवनपूर्वकप्रयत्नन्यायादिति**। **यादृशैरेवेति**। यद्यपि नित्ययत्नस्योत्पत्तौ नादृष्टापेक्षा, तथापि कार्यजनने

[1] नास्तीत्या–**ग**. [2] प्रामाण्य स्या–**ग**.

तत्त्वमुक्ताकलापः

## यद्वा तैरेव सर्वं घटत इति भवेत्तत्कृता सिद्ध-साध्यम् ।

सर्वार्थसिद्धिः

स्रष्टेति मन्यसे, तादृशैरेव तत्फलभोक्तृष्वेव यत्नक्लृप्तेर्लघुत्वात् । एतेन मन·करणकागन्तुकज्ञानादिमानीश्वर इति मतान्तरमपि निरस्तम्, तत्रापि देहादिनिरपेक्षमन·प्रवृत्तिक्लृप्तेर्गुरुत्वात् । अथवा कल्पनीये हि यत्न सर्वमिदं चिन्त्यं, तत्कल्पनैव न युक्तेत्याह—**यद्वेति** । व्यवस्थापकैरदृष्टैरेव यत्नादिनिरपेक्षैरित्यर्थ· । **सर्वं**—द्व्यणुकादि पर्वतादि च । **घटते**—उत्पत्तुमर्हति । एतेनानुमानस्य किमायातमित्यत्राह—**भवेदिति** । **तत्कृता**—चोदितमनुतिष्ठता । तत एव फलद्वारभूतादृष्टकर्त्रा जीवेनेत्यर्थः । न च क्रियाहेतुगुणेष्वन्यतमेन कार्यसंभवे तत्र गुणान्तरमपि हेतुतया कल्प्यम् ; अदृष्टस्य च सर्वकार्यनिमित्तत्वेऽपि विशेषतः क्वचित् क्रियाहेतुगुणत्वं ब्रूथ 'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमन-

आनन्ददायिनी

तदपेक्षाऽस्तीति भावः । ईश्वरस्य ज्ञानं जन्यमेव, अशरीरस्यापि मनस्सहकारिवशादुत्पद्यते, मनश्चास्मदादिसम्बन्ध्येव मनोन्तरं वेति सर्वदा ज्ञानचिकीर्षाकृतिमत्त्वान्न सर्वदा सृष्ट्यादिप्रसङ्ग इति **वार्तिकटीकोक्त-पक्षान्तरमपि** निरस्तमित्याह—**एतेनेति** । एतच्छब्दार्थमाह—**तत्रापीति** । **देहादीति** । लाघवात् [1] कार्यविशेषस्यैव कर्तृनैरपेक्ष्यं कल्प्यतामिति भावः । ननु क्रियाहेतुगुणानामन्यतमेनैव कार्यसम्भव इति सत्यं, तथाऽपि स गुणः साक्षात् क्रियाजनको विवक्षित इत्यत्राह—**अदृष्टस्य चेति** । निमित्तत्वं दृष्टद्वारा क्रियाजनकत्वं क्वचित्क्रिया-

[1] विशेष एव—ग.

## सर्वार्थसिद्धिः

सोश्वाद्यं कर्मेत्येतान्यदृष्टकारितानि' इति, तत्कस्य हेतोः? नूनं क्रियाहेतुगुणान्तरनिवृत्त्यै स्यात्। एवं सति यत्रादृष्टप्रागलभ्यं, तत्र मुधा तत्पूर्वक्षणवर्तिज्ञानचिकीर्षाप्रयत्नक्लृप्तिः, प्राचीनैरेव तैर्जीवस्य तत्कर्तृत्वोपपत्तेः। अन्यथा शराभिचारकृष्यादिप्रयोगे वेधपीडादिकर्तृत्वं प्रयोक्तुर्न स्यात्। भा भूदिति चेत्तन्न, लौकिकवैदिकचित्तविसंवादात्।

## आनन्ददायिनी

[1]हेतुगुणत्वमद्वारकं क्रियाहेतुत्वम्। [2]तत् कस्य हेतोरिति। एतान्यदृष्टकारितानीति कल्पनं कस्मै प्रयोजनायेत्यर्थः। **नूनमिति**। अन्यथा विशेषोक्तेः प्रयोजनभावाद्यत्नमन्तरेण क्रियाजनकमिति तत एव द्व्यणुकादिप्रक्रमेण जगत्सृष्टिरस्त्वित्यर्थः। ननु क्रियासिद्धये न यत्नादिक्लृप्तिः। किं तु सकर्तृकत्वव्याप्तया कर्तृसिद्धौ ज्ञानादिमतः कर्तृत्वात्तत्सिद्धिरित्यत आह—**प्राचीनैरेवेति**। अदृष्टजनकैः ज्ञानचिकीर्षादिभिरेवेत्यर्थः। **तत्कृत्त्वोपपत्तेरिति** क्वचि[3]त्पाठः। तदा तत् जगत् करोतीति तत्कृत् तस्य भावः, जगत्कर्तृत्वमिति यावत्। नन्वद्वारकक्रियाजनकत्वे कर्तृत्वमन्यथा कुलाल इव तदभोक्तुरपि कर्तृत्वं स्यादित्यत्राह—**अन्यथेति**। **लौकिकेत्यादि**। कृष्यादौ लौकिकैः कर्तृताव्यवहारात्, अभिचरतो हिंसा[4]कर्तृत्वस्य वैदिकैर्व्यवहारादित्यर्थः। अन्यथा हिंसकप्रायश्चित्तोपदेशस्तस्य न स्यादिति भावः। नन्वदृष्टद्वाराऽपि कर्तृत्वेऽतिप्रसङ्ग इति चेत्तर्हि सद्वारक[5]कर्तृत्वेऽप्यतिप्रसङ्गः स्यात्। ननु यत्र कर्तृताग्राहकमस्ति [6]तत्र हि मध्यवर्तिनां द्वारत्वं, यत्र तु तन्नास्ति तत्र न सद्वारकमपि कर्तृत्वं, यथा कुलाल-

---

1 हेतुत्वगुणत्व—**क**. 2 तत्कार्यस्य—**ग**. 3 त्पाटे तदा—**ग**. 4 कर्तृत्वादिवैदिकं—**क**. 5 कर्तृत्वेऽति—**ग**. 6 तत्र मध्यवर्तिनो द्वार—**ग**.

## सर्वार्थसिद्धिः

नन्वदृष्टमचेतनं चेतनानधिष्ठितं कथं प्रवर्तेत ? इत्थम्—स्वकारणोपनीतसहकारिसंपन्नतातिरिक्ततत्प्रवृत्त्यभावात्कारणानामपि तत्तत्कारणोपनेयत्वात् । तान्यप्यचेतनानि चेतनाधिष्ठेयानीति चेन्न, ईश्वरप्रयत्ने तदभावात् । चैतन्यायोगव्यवच्छेदवन्निष्ठतामात्रेण तस्यापि तदधिष्ठितत्वमिति चेन्न, तावतोऽधिष्ठानशब्दार्थतया कैश्चिदप्यनङ्गीकारात् । मयैवमङ्गीकृतमिति चेत्, अन्यैरपि तर्हि चैतन्यात्यन्तायोगव्यवच्छेदवन्निष्ठत्वमेव चेतना-

## आनन्ददायिनी

पितुरिति चेत्तर्ह्यत्रापि समानम् । कृष्यादावभिचारे च तत्सत्त्वाददृष्टद्वाराऽपि कर्तृत्वं, [1] यत्र तन्नास्ति तत्र न तद्द्वारा कर्तृत्वं, यथा भोक्तुर्घटादाविति ध्येयम् । **नन्विति** । तदानीं तदर्थं तज्ज्ञानादिमता भवितव्यमिति भावः । **स्वकारणेति** । अन्यथासिद्धत्वान्न ज्ञानादिकल्पनमिति भावः । ननु प्रवृत्त्यन्यथाऽनुपपत्त्या न कल्पनम्, अपि तु व्याप्त्येत्याह—**तान्यपीति** । व्याप्तिर्नेति प्रतिवक्ति—**ईश्वरेति** । नन्वीश्वरश्चेतनः प्रयत्नमप्यधितिष्ठतु, सर्वविषयकत्वेन ज्ञानस्य प्रयत्नविषयत्वस्यापि संभवादिति चेत्, न, तदधिष्ठानं हि न तत् गोचरज्ञानमात्रेण, तथा सति पर्वताधिष्ठानस्यापि दर्शनमात्रेण प्रसङ्गात्, अपि तु तद्व्यापारहेतुयत्नजनकत्वेन । न चात्र तद्गोचरव्यापारजनकयत्नजनकत्वं, यत्नस्य नित्यत्वात् । ननु तद्गोचरयत्नवत्त्वमेव तत्त्वमस्तु, तच्च तत्राप्यस्त्येव, तद्यत्नस्य सर्वविषयकत्वादिति चेत्तर्हि स्वस्य स्वप्रेर्यत्वप्रसङ्गेनात्माश्रयात्, सर्वदा प्रेरणप्रसङ्गाच्च । किं च ज्ञानस्य तदधिष्ठाने किमायातं यत्नमात्रेण चरितार्थत्वादिति भावः । **चैतन्यायोगेति** । तथा च न व्यभिचार इति भावः । **अन्यैरपीति** । [2] तथा च परार्थ-

[1] यत्र तु तन्नास्ति—**ग.** [2] तथा च प्राक्तनज्ञानादि—**ग.**

## सर्वार्थसिद्धिः

धिष्ठितत्वमदृष्टानामित्यङ्गीक्रियेत । ईश्वरधीविशेषमदृष्टमिच्छता त्वया नैवमङ्गीकार्यमिति चेन्न, तथाविधादृष्टे त्वयापि चेतनाधिष्ठेयत्वस्यासाध्यत्वात् । त्वन्मतेऽपि कारणवर्गानुप्रवेशिनो नित्यस्येश्वरज्ञानस्याचेतनस्य चेतनाधिष्ठितत्वकल्पने तादृशचेतनान्तरक्लृप्तिप्रसङ्गः ।

ईश्वराकूतभेदं च श्रौतादृष्टं यदीच्छसि ।
नृगुणापूर्वक्लृप्तिस्ते निष्फलैव तदा भवेत् ॥

नन्वीश्वरप्रयत्नादेरसिद्धौ न त्वयाऽत्र व्यभिचार उदाहार्यः । तत्सिद्धौ तद्व्यतिरिक्ताचेतनेषु चेतनाधिष्ठाननियमसिद्धिरिति चेदन्येषामपि तर्ह्यदृष्टादिव्यतिरिक्तविषये तन्नियमः स्यात् । अतोऽदृष्टवद्भिर्जीवै-

## आनन्ददायिनी

ज्ञानादिमद्भिश्चेतनैरर्थान्तरमिति भावः । **ईश्वरेति** । तथा च [1]ज्ञानादिमत ईश्वरस्य सिद्धिरिति भावः । **तथाविधेति** । यद्यपीश्वरस्सिद्धः, तथाऽपि व्याप्तेरभावात् परोक्तिर्भग्ना । वस्तुतस्तादृशो वेदान्तादेवास्माभिः सिद्ध इति नानुमानप्रवृत्तिरिति ध्येयम् । त्वया व्याप्तिर्वक्तुं न शक्येत्याह—**त्वन्मतेऽपीति** । चेतनाधिष्ठितत्वं विना प्रवृत्तिर्न स्यादित्यनुपपत्तिपरिहारार्थं कल्प्यते, तत्कल्पनेऽपि तादवस्थ्ये किं तत्कल्पनयेति भावः । किं च मदभिमतादृष्टमादाय चेत् ज्ञानादिमानीश्वरोऽस्तीत्युच्यते, तददृष्टस्य चेतनगुणत्वं त्वदभिमतं भज्येतेत्याह—**ईश्वरेति** । **आकूतं-अभिप्रायं**। **श्रौतं**-श्रुतिसिद्धम् । 'स ए[2]नं पिप्रीषति प्रीणाति'इति श्रुतिः । **नृगुणः**—आत्मगुणः । **अपूर्वं**—अदृष्टम् । सिद्ध्यसिद्धिव्याघातं शङ्कते—नन्विति । **अन्येषामपीति** । क्वचि[3]च्चेतनानधिष्ठितत्वस्यावश्यकत्वे लाघवाददृष्ट एव तथाऽस्त्विति भावः । यदि विपक्षे बाधकाभावेऽपि साहच-

[1] ज्ञानवत—**ग.** [2] एनं प्रीणातीति—**ग.** [3] चेतनाधिष्ठितत्वस्यावश्यकत्वात्—**क.**

तत्त्वमुक्ताकलापः

**कल्पनावन्यस्य कर्तृद्वयमुपनमति त्वत्सपक्षे तथा स्यात्**

सर्वार्थसिद्धिः

रेव जगदुत्पत्तिसिद्धिरिति सिद्धसाधनता दुर्वारा । जीवातिरिक्तकर्तृकल्पनेऽनिष्टं प्रसज्जयति—**कल्पनावेति** । एककर्तृकतया प्रसिद्धे सपक्षे कर्तृद्वयं स्यात्, अनेककर्तृकेऽपि संप्रतिपन्नातिरिक्तकर्तृकत्वम् । कल्प्यमानो हि न केवलं क्षित्यादिमात्रकर्तृत्वेन कल्प्यते. तत्प्रयत्नस्य परिच्छेदकाभावेन सर्वविषयत्वात् । ततः किमित्यत्राह—**तथेति** । अयं भावः—क्षित्यादिकर्तरि साध्यमाने विश्वकर्त्रा तेन घटादेर्द्विकर्तृकत्वमायातम्, ततस्तद्दृष्टान्तेन पक्षस्य द्विकर्तृकत्वमापतेत्; ततस्सपक्षस्य त्रिकर्तृकत्वं स्यात्; एवं क्रमेणोपर्युपर्यपि कल्पनावनन्तेश्वरापत्त्या 'द्यावापृथिवी जनयन् देव एकः' 'एकश्शास्ता न द्वितीयः' इति

आनन्ददायिनी

र्यदर्शनमात्रात्कर्तृसाधनं तदाऽतिप्रसङ्गमाह —**जीवातिरिक्तेति**। **अनेककर्तृकेऽपीति**। गोपुरादावित्यर्थः। ननु क्षित्यादिमात्रं प्रतिकर्तृत्वात् घटादौ द्विकर्तृत्वाभावेन व्याप्त्यभावात् कथं घटादिदृष्टान्तेन द्विकर्तृकत्वसिद्धिः, कथं वाऽनवस्थेत्यत्राह— **तत्प्रयत्नस्येति** । परिच्छेदकस्य कारणविशेषस्याभावादित्यर्थः। ननु सकर्तृकत्वसिद्धिमात्रेण कथमनवस्था स्यात्, तथात्वे वा वह्न्याद्यनुमानेऽपि प्रसङ्गादित्यत्राह—**अयं भाव इति** । नन्वस्तूत्पत्ति[1]ज्ञप्त्योरविरोधित्वादि[2]त्यत आह—**द्यावापृथिवीति**। ननु

---

[1] ज्ञप्तिविरोधि—**ग**. [2] दिव्यत्राह—**ग**.

तत्त्वमुक्ताकलापः

**पक्षेऽपीत्यव्यवस्था यदि विफलतया त्यक्ति-**
**राद्येऽपि सा स्यात् ॥ १९ ॥**

**साध्यो हेत्वादिवेदी मत इह कलया सर्वथा**
**वा तवासौ**
**पूर्वत्रेशो न सिध्येत्**

सर्वार्थसिद्धिः

व्यवस्था भज्येतेति । अत्र परोक्तं कल्पनागौरवं शङ्कते—**यदीति** । एकेनेश्वरेण विश्वकार्यसिद्धौ द्वितीयकल्पेर्निष्फलत्वात् तत्परित्याग इति । तत्र गौरवभिया त्याग एकस्मिन्नपि स्यादित्याह—**आद्येऽपीति** । उक्तं हि जीवैरेव कर्तृभिरदृष्टद्वारा सर्वकार्यं सिध्येदिति ॥ १९ ॥

पुनरपि विकल्पमुखेनानिष्टमाह—**साध्य** इति । किमत्रोपादानादिज्ञानवन्मात्रं सिषाधयिषितम्, उतोपादानादिकृत्स्नगोचरज्ञानवानिति विकल्पः । तत्राद्यं दूषयति—**पूर्वत्रेति** । जानन्ति हि जीवा जगदुपादानं पृथिव्यादिद्रव्यम्, कुम्भाद्युपयोगिपरमाणुद्व्यणुकादिज्ञाना-

आनन्ददायिनी

प्रतिकूलतर्कपराहतत्वात् न द्वितीयादिसिद्धिरिति चेत्, तस्मादेव क्षित्यादौ कर्तृसिद्धिरपि न स्यादित्याह—**एकेनेत्यादिना** ॥ १९ ॥

प्रसङ्ग एव सङ्गतिरित्याह-**पुनरपीति**। उपादानादीत्यादि शब्देन निमित्तादिग्रहः । **जानन्ति हीति** । जगतां देवतिर्यङ्मनुष्यस्थावरादीनामुपादानं पृथिव्यादि जानन्तीत्यर्थः । ननु द्व्यणुकादिज्ञानाभावात् कथं जीवस्य कर्तृत्वमित्यत्राह—**कुम्भाद्युपयोगीति**।

## सर्वार्थसिद्धिः

भावेऽपि कुम्भादिकर्तृत्वं सर्वानुमतम्। द्व्यणुकप्रभृतिजगदुपकरणं च यागादि जानन्त्येव जीवाः। तच्छक्तेर्द्वारस्य वा साक्षात्काराभावेऽपि कुम्भादिन्यायाद्यागादिप्रवृत्तिरिष्टा। संप्रदानं च भोक्तारं स्वात्मानमात्मीयान् वा प्रयोजनं चेष्टप्राप्तिमनिष्टानिवृत्तिं वा न हि ते न जानीयुः।

## आनन्ददायिनी

द्व्यणुकादि यद्यपि न कारणं, तथाऽपि प्रयोजकत्वमत्र विवक्षितमिति भावः। ननु यत्किंचिदुपकरणज्ञानमेव विवक्षितं लाघवात्, तच्च घटकर्तरि विद्यत एव। [1] द्व्यणुकादौ तु तदभावात् जीवस्य कथं कर्तृत्वमित्यत्राह—**द्व्यणुकेति**। यागादेस्सर्वकार्योपकरणत्वादिति भावः। ननु फलज्ञानं तत्साधने प्रवर्तकम्, तज्जन्यादृष्टस्य ज्ञानाभावे कथं तस्य प्रवृत्तिः, अप्रवृत्तस्य वा कथं कर्तृत्वमित्यत्राह—[2] **द्वारस्य वेति**। अदृष्टस्य तज्जन्यत्वेऽप्यफलत्वात् तदज्ञानेऽपि प्रवृत्तिस्संभवत्येवेति भावः। अत्र **कुम्भादिज्ञानान्मृदादिप्रवृत्तिर्दृष्टेत्येव** पाठः। यागादिप्रवृत्तिरिति लेखकप्रमादकृत इत्याहुः। केचित्तु [3] यागादेरदृष्टद्वारा कुम्भादिप्रयोजकत्वमभिप्रेत्येदमित्याहुः। कार्यप्रयोजकत्वाविशेषाद्यत्किंचि[4]त्तदानुकूल्यज्ञानं सर्वमुलभमित्यर्थान्तरं सुलभमित्याह-**संप्रदानं चेति**। यद्यपि [5] सम्प्रदाने न घटप्रयोजकत्वं, तथाऽपि तत्फलत्वनिर्वाहकमिति फलेऽन्तर्भाव इति भावः। **प्रयोजनं चेति**। [6] घटस्य प्रयोजनमित्यर्थः। ननु कार्योपादानज्ञानवत्त्वमेव कर्तृत्वं जीवानां,

---

[1] द्व्यणुके त—**ग**. [2] द्वारस्य चेति—**क**. [3] यागादेर्दृष्टद्वारा—**ग**. [4] त्तदनुकूलज्ञानं—**ग**. [5] दानादेर्न—**ग**. [6] घटप्रयोजनं—**ग**.

तत्त्वमुक्ताकलापः

**न कथमपि भवेद्व्याप्तिसिद्धिः परत्र ।**

**पक्षस्पर्शाद्विशेषान्न खलु समधिकं पक्षधर्मत्वलभ्यं**

सर्वार्थसिद्धिः

अतस्तेषामेव क्षित्यादिकर्तृत्वमविरुद्धम् । उत्तरं दूषयति—**न कथमपीति** । न हि कुम्भादिसामग्र्यन्तर्गतं सर्वं कुम्भकारादयो जानन्ति । योगिनां स्वकार्यसामग्रीसाकल्यज्ञानमस्तीति चेत्, किमतः ? योगसिद्धसार्वज्ञ्या अपि हि न कुतश्चित् कल्पयितुं शक्यन्ते ; अतो न तत्कार्यैस्सपक्षसिद्धिः ; आगमतस्सिद्धौ तु तद्वदीश्वरोऽपि तदनुविधेयास्सिद्ध इति नानुमेयं किञ्चित् । अस्तु व्याप्त्या कर्तृमात्रमुपस्थाप्यम्, पक्षधर्मताबलात् सार्वज्ञ्यादिविशेषसिद्धिरित्यत्राह—**पक्षेति** । व्याप्यस्य

आनन्ददायिनी

द्व्यणुकादिकार्योपादानज्ञानं नास्त्येवेत्यत्राह—**अत इति** । अयं भावः—अत्र किं लोकव्यवहारसिद्धस्साध्यते, उत पारिभाषिकः । नाद्यः—कार्यानुकूलज्ञानवत एव कर्तृत्वात् । न द्वितीयः—शब्दादौ व्यभिचारात्, [1]गायतो गानकर्तृत्वव्यवहारात्तदतिरिक्तकर्तृत्वे [2]चाप्रयोजकत्वात् । **न हि कुम्भादीति** । तथा च व्याप्यत्वासिद्धिरिति भावः । ननु योगिजन्यकार्यं सपक्षः, तदन्यत् सर्वं पक्ष इति न व्याप्यत्वासिद्धिरिति शङ्कते—**योगिनामिति** । **एवमप्यसिद्धिदूषणं** न परित्यक्तमित्याह—**किमत इति** । अत्र किमनुमानासिद्धं योगिनं मत्वा आशङ्कोतागमसिद्धमिति विकल्प्याद्य आह—**योगसिद्धेति** । तत्रापि व्याप्तिग्रहेऽनवस्थापातादिति भावः । द्वितीयं दूषयति—**आगमत इति** । तथा च

[1] यावतो पानकर्तृत्वव्यव—क [2] चप्रयोजकाभावात्—क.

## सर्वार्थसिद्धिः

पक्षधर्मतया हि व्यापकस्य प्रागविदितो धर्मिविशेषसंबन्धोसिध्येत् ; न तु सदपि सपक्षदृष्टवैजात्यम्, अन्यथा धूमानुमिते वह्नौ तार्णतादिविशयविलोपप्रसङ्गात् । सपक्षदृष्टान्यतामात्रमपि नानुमेयनियतम्, जातिव्याप्यैर्जात्यनुमाने तदनभ्युपगमात् । अतो नात्र व्याप्यपक्षधर्मतया विवक्षितविशेषसिद्धिः । परिशेषात्तर्हि तत्सिद्धिरिति चेन्न, परिशेषानुमानमपि हि क्षित्यादिकं सामान्यतस्सिद्धं तत्कर्तारं वा पक्षीकृत्य स्यात् ? आद्ये किञ्चिज्ज्ञकर्तृकत्वनिषेधो वा ? स्वतस्सर्वज्ञकर्तृकत्वं वा साध्यम् ? नाद्यः—तत्संभवस्य स्थापितत्वात् । न द्वितीयः—तद्धि कृत्स्नं कार्यं पक्षीकृत्य कार्यत्वलिङ्गेन वा साध्यम् ? प्रकृतपक्षमात्रनिष्ठेन वा केनचित् । पूर्वत्र किमन्वयिपुरस्कारेण, व्यतिरेकिण एवास्य युष्माभिः पृथगुपन्यासात् । अत एव कार्यविशेषतोऽपि सर्वज्ञानुमाने तेनैवालं किमन्वयिना कार्यलिङ्गेन ? क्षित्यादिकर्तृपक्षीकारेण जीवासंभावित-

### आनन्ददायिनी

पक्षाभावादाश्रयासिद्धिरिति भावः । **धर्मिविशेषसम्बन्धः** पक्षीयत्वम् । **अन्यथेति** । पक्षीयत्वातिरिक्तमपि सिध्यति [1]चेदित्यर्थः । सपक्षदृष्टव्यक्तिभेदोऽपि नानुमानेन सिध्यति, दूरे तद्वैजात्यमित्याह—**सपक्षदृष्टेति** । क्वचित्तत्सिद्धिर्मानान्तरादिति भावः । नन्वल्पज्ञानां कर्तृत्वबाधे परिशेषात् सिद्धिरिति शङ्कते—**परिशेषादिति** । **आद्ये**—क्षित्यादिसकर्तृकानुमाने । **तत्सम्भवस्येति** । अनुपपत्तिघटितलिङ्गस्यासिद्धेरित्यर्थः । बाधो दोष इत्यपरे । **व्यतिरेकिण इति** । कार्यमात्रस्य पक्षत्वेन सपक्षाभावाद्व्यतिरेकित्वम् । [2]अनेन कर्तृसिद्धेराद्यमन्वय्यनुमानं व्यर्थमिति भावः । द्वितीयं दूषयति—**अत एवेति** । [3]**किमन्वयिनेति** । एकदैव विशिष्टकर्तृत्वसिद्धेरिति भावः । प्रथमविकल्पे द्वितीयं शिरो दूषयति—**क्षित्यादिकर्तृपक्षीकारेणेति** । जीवासम्भावितनित्यज्ञानादिम-

[1] चेत्यर्थः—**क.** [2] अनेनैव—**ग.** [3] किमन्वयिनैवेति—**ग,**

तत्त्वमुक्ताकलापः

## कल्प्योऽन्यस्ते

### सर्वार्थसिद्धिः

त्त्वविशेषसाधनं तु दुश्शकम्, तादृशविशेषासंभवेऽपि जीवानामेव तत्कर्तृत्वस्य दर्शितत्वात्, तेषामेव तद्विरुद्धविशेषानुमानायोगाच्च । ननु घटादिकर्तृव्यावृत्तौ विशेषः क्षित्यादिकर्तृणां स्वीकार्यः, तदुत्पत्त्यासन्नपूर्वकाले तेषां तदनुगुणबुद्ध्यादिरहितत्वात् । अतो दृष्टविपरीतकल्प्त्यविशेषे किमीश्वरकल्पसिप्रद्वेषेणेत्यत्राह—**कल्प्य** इति । अयं भावः—निश्वासादावधीपूर्वयत्नेनापि कर्तृत्वं त्वयेष्टव्यम्, कालविप्रकृष्टबुद्ध्याऽपि कर्तृत्वमाभिचारिकपरपीडादौ लोकवेदसिद्धम् । कुम्भाद्युत्पत्तावपि कुम्भकारादेश्चक्रचीवरदण्डसूत्रादिव्यापारहेतुभूतस्वदेहादिव्यापारे ह्यव्यवहितप्रवृत्त्युपयोगः, नान्यथा; समवायिनिष्पत्तौ वयं

### आनन्ददायिनी

त्त्वसाधनमिति भावः। किं च जीवभिन्ने कर्तरि विशेषसाध्यते, उत जीव एव कर्तरीति विकल्प्य आद्य आह—**तादृशेति**। सामान्यानुमाने जीवस्यैव कर्तृत्वेनार्थान्तरस्य दर्शितत्वादाश्रयासिद्धिरिति भावः। द्वितीय आह—**तेषामेवेति**। जीवानां स्वभावविरुद्धनित्यज्ञानानुमानायोगात् बाध इति भावः। ननु कल्प्यत्वं भवतामप्यविशिष्टमिति चेत्तत्राह—**अयं भाव इति**। नास्माभिर्दृष्टविरुद्धं कल्प्यते, किं तु दृष्टसजातीयमेव सद्वारककर्तृत्वं ज्ञानादिरहितजन्ययत्नवत्त्वं चेति भावः। **अव्यवहितप्रवृत्तिः**—अव्यवहितयत्नः। **नान्यसमवायीति**। अन्यसमवेतघटाद्यवयविनि न साक्षादुपयोग इत्यर्थः। तथा च व्यवहितयत्नवतोऽपि कुलालादेः कर्तृत्वं घटादौ दृष्टम्। [1]न चादृष्टाद्वारकत्वं

[1] न च दृष्ट—गा.

तत्त्वमुक्ताकलापः

**विशेषस्सुकृतविषमिता जीवशक्तिस्तु सिद्धा ॥२०॥**

सर्वार्थसिद्धिः

दृष्टान्तानुरोधेन व्यवहितव्यापारादपि [1] कर्तृत्वं ब्रूमः ; भवद्भिस्त्वदृष्टचरमेव वैषम्यं कल्प्यत इति । अथ स्यात्, कुम्भादिकृदसंभावितो गोपुरादिकर्तृषु बुद्धिशक्तिप्रकर्षो दृष्टः ; मनुष्यासंभावितश्च शकुन्तलूतादिजन्त्वन्तरेषु ; मनुष्येषु च विश्वामित्रादिषु ; एवं देवासुरसिद्धादिषु पितामहपर्यन्तेषु, इति स्थिते बुद्धिशक्तिप्रकर्षतारतम्यस्य क्वचिद्विश्रमाद्यत्रासौ स ईश्वरस्सेद्धुमर्हतीति तत्राह —**सुकृतेति** । कर्मभेदतन्त्रमेव तारतम्यं त्वया निदर्शितम् । जन्मौषधिमन्त्रतपस्समाधिजाश्च सर्वासिद्धयस्तत्तददृष्टेष्वायतन्ते । एवं सत्यदृष्टाधीनधीशक्तिप्रकर्षतारतम्यं कालभेदेन कर्मवश्येष्वेव केषुचिद्भवतु ; न विश्रमस्थानान्तरं मृग्यमिति भावः ॥ २० ॥

आनन्ददायिनी

विशेष इति वाच्यम् ; भृत्याद्यव्यापारवदप्रयोजकत्वादिति भावः । **अदृष्टचरमिति** । क्वचिदपि नित्यज्ञानादेरभावात् ज्ञानत्वाद्यवच्छेदेन जन्यत्वावधारणादिति भावः । **शकुन्ते** नभसि गतिः, **लूते** स्वोदराक्तन्तुसृष्टिः तन्निगरणं च, **आदि**शब्देन गजकपित्थादि गृह्यते । **विश्वामित्रादिष्वित्यादि**शब्देन वसिष्ठादिग्रहः । **बुद्धिशक्तिप्रकर्षतारतम्यस्येति** । उक्तप्रकर्षतारतम्यं क्वचिद्विश्रान्तं तारतम्यत्वात्तेजःप्रकर्षतारतम्यवदित्यनुमानेनेति शेषः । **कर्मभेदेति** । तथा च सपक्षदृष्टवैजात्यं न साधयितुं शक्यमिति भावः । **अत इति** । विश्रमस्थानं यत्रास्य हि जगत्कर्तृत्वं वाच्यम् ; स हि कर्मवश्येषु कश्चिज्जीव इति न नियत एकस्तत्कर्ता सिध्यति । एतेन—यो जगत्कर्ता स एवेश्वर इति निरस्तम्, तस्यैकत्वासिद्धेरिति भावः ॥ २० ॥

[1] निमित्तत्व—**ग.**

तत्त्वमुक्ताकलापः

**कार्यं स्यात् कर्त्रभावेऽप्यवधिभिरितरैः काल-वत्स ह्यसिद्धः**

सर्वार्थसिद्धिः

अथात्र परेष्टं विपक्षे बाधं दूषयति—**कार्यमिति**। एवं हि मन्यते—कारणाभावे कार्याभाव उभयाभ्युपेतः; कारणान्तराणि च कर्त्रुपहितमर्यादानि कथं कर्त्रभावे व्याप्रियेरन्[1] अतः कार्यस्य **सांख्यसौगतचार्वाकवर्तन्या** नित्यत्वमसत्त्वमाकस्मिकत्वं वा स्यादिति, तत्रेदमुत्तरम्—**कार्यमिति**। अयं प्रतिविधिः—कारणाभावे कार्यं न स्यान्न तु कारणविशेषाभावे; अन्यथा क्वचिद्दृष्टस्य कर्मकारकादेरभावेऽपि क्रियानुत्पत्तिप्रसङ्गात्; अत कर्त्रभावेऽपि कारणान्तरैः कार्यसिद्ध्युपपत्तिरिति। ननु कालो यथा सर्वकार्यनिमित्तं तथेश्वरोऽपि; तत्परित्याग समानन्याय कालोऽपि त्यज्यतामित्यत्राह—**कालवदिति**। [1] कालो ह्युपाधिविशेषातिरिक्तो न वेति यथामनमन्तु; स तावल्लोकशास्त्रसिद्धः, कालप्रतीक्षया कर्षकादिप्रवृत्तेः. काले कर्मचोदनात्, शुभाशुभकालविभागे च कस्यचिद्वेदाङ्गस्य व्यापारात्।

आनन्ददायिनी

आक्षेपसङ्गतिमाह—**अथेति। कथं कर्त्रभावे व्याप्रियेरन्निति**। अव्यापृतानां जनकत्वाभावादिति भावः। **नित्यत्वं सांख्यानां, असत्त्वं बौद्धस्य। आकस्मिकत्वमहेतुकत्वं, तच्चार्वाकस्य। कालो हीति**। नन्वत्रापीश्वरशब्दवाच्यः प्रसिद्ध इति चेत्, न, जीवानामेवेश्वरशब्दवाच्यत्वेनोपपत्ते। किञ्च यत्किंचित्प्रसिद्धिमात्रेण न [2] निमित्तकारणत्वं, आकाशादेरपि प्रसङ्गात्। किन्तु तत्कारणताग्राहकप्रमाणेन, न चात्र तदस्तीत्याह—**कालप्रतीक्षयेति**। अनेनान्वयव्यतिरेकौ श्रुति-

[1] कालोऽप्युपाधि—**पा.** [2] निमित्तत्वं—**ग.**

### तत्त्वमुक्ताकलापः

## ते चादृष्टप्रयुक्तास्तदपि यतनवत्स्यात्तु यत्नानपेक्षम् ।

### सर्वार्थसिद्धिः

नन्ववधीनामप्यचेतनानां चेतनानाधिष्ठितत्वे प्रवृत्तिर्न स्यादित्यत्राह—ते चेति। अदृष्टप्रेरितानामेव प्रवृत्त्युपपत्तौ किं तत्र प्रयत्नगवेषणेन? अदृष्टस्याप्यचेतनस्य प्रवृत्तौ चेतनाधिष्ठानमपेक्षितमित्यत्राह-तदपीति। ईश्वरप्रयत्नो ह्यचेतनोऽपि जगत्सृष्टौ न प्रयोजकप्रयत्नाधिष्ठितः; न च कुम्भारम्भ इव जीवप्रयत्नसहकृतः; अतस्तत्र व्याप्तिसङ्कोचावश्यंभावादत्रादृष्टेऽपि क्वचित्सङ्कोचः स्यात्; अन्यथा गौरवात्। ईश्वरप्रयत्नस्य नित्यत्वात् प्रयत्नानाधिष्ठितत्वमिति चेन्न, नित्यानामपि परमाण्वादीनां तदपेक्षाङ्गीकारात्। अन्यत्रान्वयव्यतिरेकनियमवता-

### आनन्ददायिनी

स्मृत्यादयश्च प्रमाणमिति भावः। यदुक्तं कारणान्तराणीत्यादिना तदाशङ्कते—नन्विति। [1]तदुपहितमर्यादैव कारणान्तरमिति नियमो नेत्याह—अदृष्टेति। नियमोस्तीऽत्याशङ्कते—अदृष्टस्यापीति। एवमपि न नियम इत्याह—ईश्वरेति। ननु प्रयत्नस्य न प्रयत्नान्तरमपेक्षितमिति चेत् तत्राह—न चेति। न जन्यप्रयत्नातिरिक्तस्य प्रयत्नाधिष्ठितत्वं दृष्टमित्यर्थः। अतस्तत्रेति। [2]तथा च नियमसंकोचस्यावश्यकत्वे अदृष्ट एव तथाऽस्त्वित्यर्थः। अन्यथेति। अदृष्टातिरिक्तस्यापि कस्य चित् कल्पनीयत्वादित्यर्थः। अन्यत्रान्वयव्यतिरेकेति। अन्यत्र कर्तुरन्वय-

---

[1] कर्त्रोपहित—क. [2] तथा नियम—ग.

तत्त्वमुक्ताकलापः

**एकत्यागेऽन्यहेतुत्यजनमिति च न ध्वंसवत्त्वावधित्वात्**

**तस्माद्धेतोरभावे न फलमिति गतिस्तद्विशेषे विशेषः ॥ २१ ॥**

सर्वार्थसिद्धिः

मन्यतमस्य त्यागे सर्वहेतुत्यागोऽपि स्यादिति शङ्कते—**एकेति**। सर्वहेतुत्यागे कादाचित्कत्वविरोधं प्रकृते तदभावं चाभिप्रेत्याह— **नेति**। प्रतिबन्दिं सूचयन् अन्यहेत्वपरित्यागे हेतुमाह—**ध्वंसवदिति**। ध्वंसो ह्यभूत्वा भवन् हेतुमपेक्षमाणस्समवाय्यसमवायिनोरसंभवान्निमित्तमात्रनिष्पाद्यस्त्वया स्वीकृतः ; तथा पक्षेऽपि जीवातिरिक्तस्य कर्तुः कल्पयितुमशक्यत्वात् कथंचिज्जीवकर्तृकत्वं कर्तृनिरपेक्षत्वं वा स्वीक्रियतामिति भावः। विपक्षे बाधकाभावं निगमयति—**तस्मादिति**। हेत्वभावे कार्यं न स्यात्, न तु कार्यमात्रानपेक्षितहेतुविशेषाभावे ; तत्र तु कार्यविशेषनिवृत्तिर्वा, यथा कलमबीजाभावे कलमाङ्कुरस्य।

हेत्वभावे फलाभावो विशेषस्तु विशेषवान्।

आनन्ददायिनी

व्यतिरेकदर्शनादिति भावः। ननु ध्वंसस्य भावत्वाभावात् [1] समवायानपेक्षाऽस्तु ; प्रकृते तु कर्तुरभावे कार्यं न स्यादित्यत आह—**कथंचिदिति**। तथा व्याप्तिसिद्धावपि न विवक्षितसिद्धिरिति भावः। **न तु कार्यमात्रेति**। कर्तुः कार्यत्वावच्छेदेन हेतुत्वासिद्धेः ; क्वचिद्दर्शनमप्रयोजकं, शरीरहेतुकत्ववदिति भावः। मीमांसकसंमतिमाह—**हेत्वभाव इति**। कारणमात्राभावे फलस्य कार्यमात्रस्याभाव इत्यर्थः। **विशेषः**

[1] समवाय्यनपेक्षा—क.

तत्त्वमुक्ताकलापः

**धर्मो यावत्सपक्षानुगत उपाधिरित्यभ्युपेतस्त्वयाऽपि**

सर्वार्थसिद्धिः

इति न्यायात् । अथवा कारणान्तरैरेव कार्यसिद्धिः यथा प्रध्वंसस्येति विशेषः ॥ २१ ॥

---

सोपाधिकत्वमपि दर्शयितुमाह—**धर्म इति** । यावत्सपक्षानुगतः—पक्षे विपक्षे चावर्तमानस्सपक्षाभिव्याप्त इत्यर्थः । अस्ति चात्र तादृशो धर्मः शरीरजन्यत्वम् । यद्यप्यसौ पक्षीकृते शरीरगुणादिविशेषे वर्तते, तथाऽपि साधनव्यापकत्वाभावात् स्वनिवृत्त्या साध्यनिवर्तन-

आनन्ददायिनी

कार्यविशेषः, विशेषवान्—कारणविशेषवान्, अन्वयमुखेन । कारणविशेषाभावे कार्यविशेषाभावोऽभिप्रेतः । केचित्तु—विशेषः कारणविशेषाभावः कार्यविशेषाभाववानित्यर्थ इत्याहुः । ननु पक्षातिरिक्ते सर्वत्र हेतुतया सिद्धस्य कार्यमात्रे कथं हेतुत्वं न [1]स्यात् कल्पकस्य त्वस्य सत्त्वादित्यत्राह—**अथवेति** । अन्यथासिद्धत्वादिति भावः ॥ २१ ॥

---

दूषणप्रसङ्गादाह—**सोपाधिकत्वमपीति** । पक्षे विपक्षे चेति । **पक्षग्रहणेन** [2]साधनव्यापकत्वमभिमतं, **विपक्षावृत्तिवचनेन** समव्याप्तिरभिमता, **सपक्षाभिव्याप्त** इत्यनेन साध्यव्यापकत्वं बोध्यम् । **शरीरगुण विशेषा**—शरीरजन्यरूपादयः । **तथाऽपीति** । पक्षावृत्तित्वस्य

---

[1] स्यात् तत्कल्पितस्य कार्यत्वस्य—**ग.** [2] साधनाव्याप—**क.**

तत्त्वमुक्ताकलापः

**त्यागे तस्यात्र तद्वच्छिथिलितनियमाः क्वापि नोपाधयः स्युः ।**
**तादृग्धर्मात्ययाच्च प्रकरणसमता**

सर्वार्थसिद्धिः

शक्तेश्चोपाधिः स्यादेव । तादृशस्य धर्मस्यात्रोपाधित्वानङ्गीकारेऽतिप्रसङ्गमाह—**त्याग** इति । न हि निषिद्धत्वादीनामेतस्य च विशेषोऽस्ति, येन त एव तत्रतत्रोपाधयः स्युः, नासावत्रेति नियम्येत । एवं सोपाधिकत्वे मतभेदेन व्याप्यत्वासिद्धिः, व्यापकनिवृत्त्या व्याप्यनिवृत्तिर्वा स्यादिति भावः । शरीराजन्यत्वसमबलत्वाभिमाने प्रतिरोधमाह—**तादृगिति** । ननूपाधौ [1] प्रतिसाधने शरीरोपादानं व्यर्थम् ; आत्मादिषु जन्यत्वनिवृत्तिमात्रेण सकर्तृकत्वनिवृत्तावुपपन्नायां विशिष्टनिवृत्त्यनपेक्षणात् । अतो निरुपाधिकं निष्प्रतिसाधनं च विश्वकृदनुमानम् ।

आनन्ददायिनी

साधनाव्यापकत्वासिद्ध्यर्थत्वादेकदेशावृत्तित्वमात्रेणापि . . . . भावादिति भावः । **तादृशस्येति** । साधनाव्यापकत्वे सति साध्यसमव्याप्तस्येत्यर्थः । **न हीति** । उपाधितापादकस्यैतदन्यत्वघटितत्वाभावादित्यर्थः । **मतभेदेनेति** । असिद्ध्यापादकत्वं सत्प्रतिपक्षोत्थापकत्वमिति मतभेद इति भावः । असिद्ध्यापादकत्वमुपाधेरुपपादयति—**व्यापकेति** । **केचित्तु** बाधमाह—**व्यापकेतीत्याहुः** । **अपरे** त्वनौपाधिकत्वं व्याप्तिरिति तदभावतया [2] व्याप्यत्वासिद्धिमाहुः । सत्प्रतिपक्षोत्थापकत्वमाह—**शरीराजन्यत्वेति** । **ननूपाधौ प्रतिसाधन इति** ।

[1] प्रतिसाधने च शरी—**पा.** [2] व्यापकत्वासिद्धि—**क.**

## सर्वार्थसिद्धिः

मैवम् ; क्षित्यादिकं सकर्तृकमित्यत्र न हि कर्तृसंबन्धमात्रं साध्यम्, सिद्धसाधनत्वात् ; सन्ति हि त्वत्पक्षे कुम्भादिकर्तारश्चेतनाः स्वरूपतस्सर्वत्र संबद्धाश्च तैः क्षित्यादयः। अस्मत्पक्षेऽपि—

अङ्कुलस्याष्टभागोऽपि न सोऽस्ति द्विजसत्तम ।
न सन्ति प्राणिनो यत्र कर्मबन्धनिबन्धनाः ॥
दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि ।

इत्यादिभिस्सर्वमचेतनं पुण्यपापक[1]र्तृचेतनामिश्रम्। अतस्सकर्तृकमिति चेतनव्यापारपूर्वकत्वं साध्यम् । तत्र व्यापारपूर्वकत्वनिवृत्तिमात्रेण कादाचित्कत्वनिवृत्त्युपपत्तौ तद्विशेषणवैयर्थ्यं स्यात्। व्याप्त्युप-

## आनन्ददायिनी

उपाधौ सति यत्प्रतिसाधनं उपाधिप्रयुक्तप्रतिसाधनं उपाध्यभाव इति यावत्। **केचित्तु**—उपाधौ प्रतिसाधने चेति चकारमपि पठित्वोभयत्र वैयर्थ्यमाहुः। युक्तं च तथा; अतो निरुपाधिकमित्याद्यपि युज्यते। अनुकूलतर्कसाहित्य एव व्याप्तिर्न साहचर्यमात्रात्। तथा च कर्तृव्यापारजन्यत्वाभावे कार्यत्वं न स्यादिति तर्कानुग्रहादेव व्याप्त्यादिसिद्धिरिति वक्तव्यं, तदेव न [2]संभवति, शरीराजन्यत्व उक्तदूषणप्रासादित्याह—**मैवमित्यादिना। सन्ति हीति।** विभुत्वादिति भावः। ननु [3]त्वत्पक्षे जीवानामणुत्वमित्यत्राह—**अस्मत्पक्ष इति।** विष्णुपुराणादिषु व्याप्त्यभिधानादिति भावः। [4]**कर्तृव्यापारपूर्वकत्वं** कर्तृव्यापारजन्यत्वम्। **विशेषणवैयर्थ्यमिति।** कर्तृभागवैयर्थ्यम्। उदयनोक्त-

---

[1] कृच्चेतन—**पा.** [2] संभवतीति—**गा.** [3] तत्पक्षे—**गा.** [4] मूले चेतनव्यापारेत्यत्र कर्तृव्यापारेति पाठाभिप्रायेणेदं स्यात्.

## सर्वार्थसिद्धिः

योगा[1]भावेऽपि सिद्धसाधनत्वनिवृत्त्यै तदुपादानमिति चेत्तर्हि शरीराजन्यत्वेऽप्यसिद्धिपरिहारे विशेषणं समर्थमाशङ्क्य एकामसिद्धिं परिहरतो द्वितीयापत्तेरित्युक्तं वितथं स्यात्। ननु ज्ञानादित्रिकवान् कर्ता, तत्पूर्वकत्वे साध्ये व्यापारगर्भतया न पृथग्व्यापारपदोपादानं, येन विशेषणवैयर्थ्यापत्तिरिति चेन्न, अन्यतमनिवृत्तिमात्रेण कार्यत्वनिवृत्त्युपपत्तौ त्रिकोपादानवैयर्थ्यात्। अन्यतम[2]साधने त्वदिष्टमसाधितं स्यात्। शेषं शास्त्रतः सेत्स्यतीति चेन्न, कार्यत्वनिवृत्तेर्हेतुपूर्वकनिवृत्तिप्रयुक्ततया प्रयत्नादिनिवृत्तेरप्रयोजकतापातात्। तदिह तत्तद्विशेषव्यतिरेकस्यापि व्याप्तिनिवेशाङ्गीकारे शरीरजन्यत्वव्यतिरेकेऽपि न वैयर्थ्यं वाच्यमिति।

### आनन्ददायिनी

विरोधमाह—**तर्हीत्यादिना**। क्षित्यादिकमकर्तृकं अजन्यत्वादित्युक्ते पक्षेऽसिद्धिः स्यात्; तामेकामसिद्धिं परिहर्तुं शरीरविशेषणोपादाने शरीराजन्यत्वं पक्षे वर्तत इत्यसिद्धिः परिहृता भवति। तथाऽपि जन्यत्वाभावेनैवाकर्तृकत्वव्याप्तिग्रहसंभवे शरीरविशेषणविशिष्टे व्याप्तेर्नीलधूम[3]इवाभावाद्व्याप्यत्वासिद्धिः स्यादिति स्वरूपासिद्धिं परिहरतो व्याप्यत्वासिद्धिः स्यादिति भावः। **वस्तुतस्तु**—शरीरजन्यत्वाभावोऽन्य एव; तथा च यन्निष्ठा व्याप्तिरिति न्यायेन न वैयर्थ्यमिति ध्येयम्। **नन्विति**। अव्यवधानेन ज्ञानादीनां पूर्वसत्त्वस्य विवक्षितत्वा[4]न्न सिद्धसाधनमपीति भावः। **अन्यतमेति**। यद्यपि विनिगमकाभावात्त्रयाणामपि सिद्धिः स्यात्; अन्यथैकस्यापि सिद्धिर्न स्यात्; तथाऽपि त्रयाणा[5]मपि सिद्धिर्नास्ति, अप्रयोजकत्वात्; तदाह—**न कार्यत्वनिवृत्तेरिति**। **तत्तद्विशेषेति**। हेतुविशेषव्यतिरेकस्येत्यर्थः।

---

[1] गाभावे सिद्ध—**पा.** [2] साधने न त्वदिष्ट साधितं—**पा.** [3] इव व्याप्तग्रभावा—**क.** [4] न साधन—**क.** [5] मपि नास्त्यप्रयो—**ग.**

तत्त्वमुक्ताकलापः

## स्यान्न चातिप्रसङ्गः

## पक्षादिस्थित्यबाधा-

सर्वार्थसिद्धिः

नन्वेवमदृष्टचरसौधादिदर्शने सावयवत्वात् कार्यत्वमनुमाय तत एव तदुचितकर्तृमत्त्वानुमानं कुलालादिपूर्वकत्वनिवृत्त्या बाध्येत प्रतिरुध्येत वेति मन्दशङ्कां वारयति—**न चेति**। व्याप्तितदभावाभ्यां विशेषादिति शेषः। यद्यव्यापकधर्मस्य निवर्त्यतया प्रत्यवस्थीयेत, तदा सर्वत्र तस्याः सुलभत्वात् क्वचिदप्यनुमाने पक्षो न स्यात्। साध्यवत्तया वर्ण्यमानो हि पक्षः। तदभावे तत्सापेक्षौ सपक्षविपक्षावपि न स्याताम्; ततोऽनुमानकथैवोत्सीदेत्। प्रस्तुतेऽपि नैवं प्रसङ्गः, तद्व्याप्तेरुक्तत्वादित्याभिप्रायेणाह—**पक्षादीति**। यद्वा --शरीरजन्यत्वमुपाधिरित्यत्र पक्षव्यव-

आनन्ददायिनी

**मन्दशङ्कामिति**।[1] दृष्टसाजात्यात्तत्रैव किंचिदुत्कर्षमात्रे तद्विरोधाभावात् क्षित्यादौ तु दृष्टकारणत्यागो ज्ञानादीनां दृष्टविरुद्धनित्यत्वकल्पनं चेति मन्दतेति भावः। अन्यत्रापि गोपुरादौ कर्तृसिद्धिर्न स्यादित्यत आह—**यदीति**। कुलालत्वस्य शरीरादिवत् कर्तृताप्रयोजकत्वाभावात् तद्व्यावृत्तेर्न कर्तृतानिवृत्तिरिति भावः। ननु साध्यव्या[2]वृत्त्या पक्षतानिवृत्तिरित्यत्राह—**साध्यवत्तयेति**। सिसाधयिषितसाध्यवतः पक्षत्वादिति भावः। **तदभाव इति**। सर्वस्यापि तदर्थत्वादिति भावः। उपाध्युद्भावनप्रसङ्गे उपाध्युद्भावनमेवोचितमित्यभिप्रायेणाह—**यद्वेति**।

---

[1] मन्दसाजात्या—क [2] व्यावृत्त्या कथं पक्षता—क.

### तत्त्वमुक्ताकलापः

## निरुपाधिकतया स्यात्परात्मानुमा तु ॥ २२ ॥

### सर्वार्थसिद्धिः

च्छेदार्थं हि विशेषणम्, तथा सति पक्षेतरत्वमप्युपाधिः स्यादित्यत्रोक्तं—**न चेति**। नात्र पक्षान्यत्वेऽतिप्रसङ्गः, उपाधेस्साध्यसमव्याप्तिस्वीकारपक्षे अन्वयव्यतिरेकिणि पक्षेतरत्वस्य साध्याति[1]व्याप्तत्वात्, केवलान्वयिनि साध्यसमव्याप्तत्वेऽपि पक्षेतरत्वान्यत्वेनाप्युपाधेर्विशेषणात्, अन्यथाऽनुमानोऽच्छेदप्रसङ्गात्। इयमेव साध्यव्यापित्वमात्रमुपाधेरपेक्षितमिति पक्षेऽपि गतिः। ईदृशं चेद शरीरजन्यत्वमिहोपाधिः स्यादेवेति। पक्षेतरत्वे तूपाधौ पूर्ववदेव [1]पक्षादिव्यवस्था भज्येत, इह तु न तथेत्याह—**पक्षादीति**। ईश्वरानुमानाभावे तद्वत्स्वेतरात्मानुमानमपि न स्यात्, स्वात्मसाध्येष्वेव व्याप्तिनियमप्रसक्तेरित्यत्राह—**निरुपाधिकतयेति**। यदि परशरीरस्थलिङ्गैः कर्तुर्भोक्तुश्चानुमाने स्वशरीरस्थतया स्व-

### आनन्ददायिनी

**साध्याति[1]व्याप्तत्वात्** साध्यापेक्षया व्याप्यत्वाभावादित्यर्थः। **केवलान्वयिनीति**। यद्यपि तत्रापि पक्षेतरत्वस्य [2]पक्षे साध्याव्यापकं तथापि पक्षादन्यत्र साध्यसमव्याप्तिनिश्चयादनुमानप्रतिबन्धः स्यात्; अन्यथा निषिद्धत्वादावपि पक्षे साध्यसंदेहेनोपाधेर्दूषक[3]ता स्यादिति भावः। **अन्यथेति**। ननु [4]बाधोन्नीतस्य पक्षेतरत्वस्योपाधित्वाविरोध इति चेत्तदितरपक्षेतरत्वस्योपाध्याभासत्वे तात्पर्यादिति भावः। [5]ननु स्वेतरानुमानवदीश्वरानुमानमपि स्यादित्यभिप्रायेण शङ्कते—**ईश्वरेति**।

---

[1] पक्षादिस्थव्य—**पा.** [2] पक्षे साध्यव्यापन—**क.** [3] ता न स्यादिति—**क.** [4] बाधोन्नीतस्योपाधित्वाविरोध—**क** [5] नन्वस्येतरानु—**क.**

## सर्वार्थसिद्धिः

कर्तृकतया वा व्याप्तिरवच्छिद्येत, तदा हृदयविसंवादः ; चेतनान्तरानुमानाभावे व्युत्पत्तिरेव न स्यात् ; कुतश्शिष्याचार्यवादिप्रतिवादिशत्रुमित्रादिसंव्यवहारः ?

न च स्वेनान्यदेहादेरधिष्ठानादिसंभवः ।
सौभरिन्यायतस्तत्तत्प्रतिसन्धिप्रसङ्गतः ॥
न च स्वान्यानुमानेऽपि विजातीयत्वकल्पना ।
निरुपाधिकता तत्र भवेदनुमितेस्ततः ॥

तुशब्दः कल्पनागौरवनिवृत्त्यर्थः, उक्तबाधकतर्कसूचनार्थो वा ।

## आनन्ददायिनी

**हृदयविसंवाद इति।** स्वानुभवविरोध इत्यर्थः । तथा च स्वशरीरचेष्टायां चेष्टात्वेन सात्मकत्वेन प्रयोज्यप्रयोजकत्वग्रहो दण्डघटादिवत्, तथा च परशरीरेऽप्यात्मानुमानं तस्मिंश्च पर्वतीयवह्हाविव भेदश्च सिध्यतीत्याह—**चेतनान्तरेति।** ननु स्वान्यानुमानमयुक्तं, तथा व्याप्त्यभावादित्याशङ्क्य स्वेनात्मवत्त्वानुमानमप्ययुक्तं, तथा व्याप्तिविरहादित्याह—**न चेति** । यद्यपि नोभयथाऽपि व्याप्तिः । तथाऽप्यन्यथानुपपत्त्या भेदसिद्धिरिति भावः । ननु तर्हि क्षित्यादावपि जीवविलक्षणानुमानप्रसङ्ग इत्यत्राह—**न चेति** । यद्यपि भेदस्सिध्यति, न तु शरीरादिनिरपेक्षत्वा[1]दिवैलक्षण्यं व्याप्त्यभावात् दृश्यमानव्याप्तिविरोधाच्चेति भावः । बाधकाभावमात्रं स्वयं न साधक[2]मित्यभिप्रायेणाह—**उक्तबाधकेति।** **केचित्तु**—सूचनार्थो वेत्यत्र वाशब्दश्चार्थ इत्याहुः । ननु देहादिव्यापारश्शरीरप्राणादिभिरेवान्यथासिद्ध इति न परदेहेनात्मसाधन-

---

[1] दिति वैल—क, [2] मित्याशयेनाह—ग,

तत्त्वमुक्ताकलापः

## सर्वस्यावीतहेतोरपि च निरसनं द्रक्ष्यसि स्व-प्रसङ्गे

सर्वार्थसिद्धिः

किंच—

परदेहस्थलिङ्गानामन्यथासिद्धिकल्पने ।
स्वदेहेऽपि तथैवेति नैरात्म्यमवशिष्यते ॥
आगमादात्मनां सिद्धावीश्वरस्य तु किं पुनः ।
परात्मनिश्चयाभावे त्वागमोऽपि न सेत्स्यति ॥ २२ ॥

**अथ स्यात्**—अन्वयिनि हेतौ यावत्सपक्षान्वयिधर्मसंभवेन सोपाधिकता शङ्क्येत । केवलव्यतिरेकिणि तु सपक्षाभावान्न तच्छङ्केति, अत आह—**सर्वस्येति** । स्वप्रसङ्गे—हेतुचिन्तावसरे । अयं भावः—

आनन्ददायिनी

[1] मित्यत्राह—**किं च परदेहेति**। [2] स्वस्मिन्नपि देहप्राणादिभेदस्यास्फुटत्वात् ; यदि [3] स्फुटत्वं तादृशस्य परत्राप्यनुमातुं शक्यत्वादिति भावः । यदि वेदात् जीवात्मनिश्चयः तर्हीश्वरोऽपि तत एव निश्चेतुं शक्य इति नानुमेयता । यदि परो वेदान्न सिध्येत् [4] तुल्यन्यायाज्जीवोऽपि ततो न सिध्येदित्याह—**आगमेति । कोचित्तु**—आगमोऽपि न सेत्स्यति—आगमः कुत्रापि प्रमाणं न स्यात्, तुल्यत्वादित्याहुः ॥ २२ ॥

आक्षेपसंगतिमभिप्रेत्याह—**अथेति । हेतुचिन्तावसर इति ।** बुद्धिसरेऽनुमानचिन्तावसर इत्यर्थः । **ननु** तत्र केवलव्यतिरेकिमात्रं दूषितं न त्वीश्वरसाधकव्यतिरेकीत्यत्राह—**अयं भाव इति ।** सामान्य-

[1] मित्याह—**ग.** [2] स्वस्मिन्नपि भेदप्राणादि [3] स्फुटत्वं तदा तादृ—**ग.**
[4] तुल्यन्यायतया जीवोऽपि—**ग.**

## सर्वार्थसिद्धिः

व्यर्थविशेषणत्वमर्थान्तरत्वं च केवलव्यतिरेकिणां सर्वेषां द्योत्यते। तथाहि ; सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वादित्यत्र व्यतिरेके कर्तृपूर्वकत्वनिवृत्त्यैव कादाचित्कत्वनिवृत्तावुपपन्नायां किं सर्वविद्विशेषणेन ? सिद्धसाधनत्वनिवृत्त्यै तद्ग्रह इति चेन्न। शरीराजन्यत्वहेतावसिद्धिपरिहारे विशेषणं समर्थमिति वदन्तं प्रति एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति युष्मदुक्तस्यात्र दुर्वारत्वात्। तर्हि कर्तृ[1]पदं हित्वा सर्ववित्पूर्वकमित्येतावदुक्तौ न वैयर्थ्यमिति चेत्, तथाऽपि वित्पूर्वकत्वनिवृत्त्या व्याप्तिसिद्धौ सर्वविशेषणवैयर्थ्यमेव। एवं नित्यज्ञानपूर्वकत्वादिनिर्देशेऽपि द्रष्टव्यम्। न च विशेषणेऽपि सिद्धसाधनतापरिहारः, सर्वेषां चेतनानां सर्वशब्दार्थवेदिनामसर्ववित्त्वायोगात् ; अन्यथा सर्ववित्साधनस्यापि दुश्शकत्वात्। विशेषतस्सर्वं न सर्वे विजानन्तीति चेन्न ; विशेषाणामपि सर्वशब्दसंग्रहात्। सर्वसाक्षात्कर्तृपूर्वकत्वं साध-

## आनन्ददायिनी

दूषणमेव विशेषस्यापि दूषणमिति भावः। कथमत्र व्यर्थविशेषणत्वमित्यत्राह—**तथा हीति**। सर्ववित्त्वेनेश्वरसिद्धिरिति भावः। **तथाऽपीति**। तथा च नेश्वरसिद्धिरिति भावः। ननु नित्यज्ञानवत्पूर्वकं कादाचित्कत्वादिति व्यतिरेकप्रयोगेन जीवेनान्यथासिद्धिरित्यत्राह—**एवमिति**। नित्यत्वादेर्व्यर्थत्वादिति भावः। सर्ववित्पूर्वमित्यत्रैव पक्षे सिद्धसाधनमित्याह—**न च विशेषणेऽपीति**। सर्वशब्दस्य समस्तवस्तूपस्थापकत्वादिति भावः। **अन्यथेति**। साध्यज्ञानस्य तद्विशेषज्ञानाभावादसंभवेन[2] व्याप्तिग्रहायोगादिति भावः। ननु विशेषेण सर्ववित्पूर्वकत्वे साध्ये न सामान्येन सर्ववेदमादाय सिद्धसाधनमिति शङ्कते—**विशेषत इति**। **विशेषाणामपीति**। ननु सर्वत्वेन सर्वविशेषज्ञानेऽपि

[1] पदं त्यक्त्वा—**पा.** [2] भवे तद्व्याप्ति—**क.**

## सर्वार्थसिद्धिः

याम इति चेन्न ; योगिभिरर्थान्तरतापातात् । नित्यसाक्षात्कारिपूर्वकत्वं साध्यमिति चेत्, एवमपि व्याप्तौ नित्यविशेषणवैयर्थ्यमेव । अन्यतो विशेषणसाफल्ये शरीराजन्यत्वेऽपि साफल्यं सिध्येदेव । वेदास्सर्वज्ञप्रणीताः वेदत्वादित्यत्राप्येवमर्थान्तरत्वविशेषणवैयर्थ्ये बोद्धव्ये, प्रणीतत्वनिवृत्तिमात्रेण सर्वज्ञप्रणीतत्वनिवृत्तिमात्रेण वा व्याप्तिग्रहोपपत्तेः । अपि च केवलव्यतिरेकिणस्सपक्षे सत्याभासत्वं संगिरध्वे । सन्ति चानन्तानि सर्वज्ञप्रणीतानि वेदेतरवाक्यानि भारतादिमध्यपातीनि स्मृतितन्त्ररूपाणि [1] कल्पादिषु लोकवेदसंव्यवहारप्रवर्त्तनौपयिकानि च । न च

### आनन्ददायिनी

तत्तद्विशेषप्रकारकसर्वज्ञानस्य विवक्षितस्याभावात् कथं सिद्धसाधनमिति चेन्न ; प्रमेयवत् सर्वमित्यादौ तथाऽपि सत्त्वात् । ननु तत्तद्विशेषप्रकारकसंशय[2]विरोधिविशेषप्रकारकत्वं विवक्षितमिति चेन्न । तथाऽपि तादृशसंशयविरोधित्वेन तत्प्रसङ्गस्य दुर्वारत्वात् । ननु यावत्संशयविरोधितादृशज्ञानवत्त्वं [3] विवक्षितम्, उक्तज्ञानं तु प्रमेयवन्न वेति संशयविरोधि, न तु तत्तद्विशेषप्रकारकसंशयविरोधि, न च प्रमेयत्वेन तत्कोटिकस्संशयो वा प्रसिद्धः, येन तद्विरोधितामादायातिप्रसङ्गस्स्यादिति चेत् । अत्राहुः—किमत्र संशयमात्रविरोधित्वं विवक्षितम् ; उत समानाधिकरणसंशयविरोधित्वम् ; नाद्यः असिद्धेः । अन्यथा संशयमात्रोच्छेदापत्तेः । न द्वितीयः—ईश्वरस्य दोषाभावेन संशयाभावात् बाधापत्तेः । न समानकालेन संशयासामानाधिकरणज्ञानपूर्वकत्वं साध्यं, तथात्वेऽप्यप्रसिद्धेस्तादवस्थ्यात् सर्वविशेषणवैयर्थ्याच्चेति । **योगिभिरिति** । योगजधर्मजन्यसाक्षात्कारसत्त्वादिति भावः । **स्मृतीति** । **स्मृतिर्विष्णुस्मृतिरित्येके**। स्मृतीतितन्त्रविशेषणम्। **पञ्चरात्रादीत्यपरे**। **कल्पादाविति**। घटादिशब्दव्युत्पादनार्थं प्रयोज्यप्रयोजकभावेन प्रयुक्तानि

[1] कल्पादौ लोक—**पा**. [2] विरोधविशेष—**ग**. [3] विवक्षितम्, उत प्राज्ञाना तु प्रमेयवन्न वेति संशयविरोधितत्तद्विशेषप्रकारकसंशयविरोधित्व, नाद्यः—**क**.

## सर्वार्थसिद्धिः

तेषु वेदत्वम्, प्रसिद्धिविरोधात्, अवेदत्वेनैव महर्षिप्रभृतिभिर्व्यपदेशाच्च। अतस्तेषां न वेदत्वेन पक्षीकरणं शक्यम्। संग्राहकान्तरं च दुर्वचम्। [1]जीवेतरवाक्यत्वमीश्वरप्रोक्तत्वं वा नान्यतस्सिद्धम्। इत एव तत्साधनेऽन्योन्याश्रयः; तदिह तेषां पक्षीकारे तदभावे वा वेदत्वहेतुस्तेष्वसिध्यन् हेत्वा[2]भासकक्षां नातिक्रामेत्। एवं वक्ष्यमाणैश्च वेदनित्यत्वसाधकैर्बाधोऽप्यत्र मन्तव्यः। एवं घटः सर्वज्ञकर्तृकः घटत्वात्, यजुः [3]सर्वज्ञकर्तृकं यजुष्ट्वादित्यादिविशेषपक्षीकारेण प्रयोगाश्च निरस्ता वेदितव्याः। ननु कार्याणां सर्वेषां सर्वज्ञपूर्वकत्वव्याप्तिः श्रुत्या सिध्यति। अविदितनिगमवृत्तान्तानां नालिकेरद्वीपवासिनामिव वह्नौ महेश्वरे मा भूदनुमानम्, अन्येषां तु तत्प्रवृत्तिसंभव

### आनन्ददायिनी

घटमानयेत्यादीनीत्यर्थः। नन्वीश्वरसिद्धेः [4]पूर्वं पूर्वज्ञप्रणीतत्वमसिद्धमिति कथमसाधारण्यमिति चेन्न। तर्हि तद्वदेव सर्वज्ञाप्रणीतत्वेऽप्युपपत्तेरप्रयोजकत्वात् साध्याप्रसिद्धेश्चेति भावः। **संग्राहकान्तरं चेति**। नन्वीश्वरप्रणीतत्वादिकं संग्राहकमिति चेत्, न। तत्सिद्धेः पूर्वं तदसिद्धेः; तदाह—**जीवेतरेति**। आश्रयासिद्धिमुक्त्वा स्वरूपासिद्धिमाह—**तदिहेति**। अत्र किं सर्वज्ञप्रणीतत्वं हेतुरुत वेदत्वं स्वरूपासिद्धेः। न द्वितीयः—भागासिद्धेरसाधारण्यवदाभासत्वं दुर्लङ्घमित्यर्थः। **वक्ष्यमाणैरिति**। बुद्धिसर इति शेषः। ननु निगमजन्यज्ञानरहितानां व्याप्तिज्ञानाभावात्कथमीश्वरानुमानमित्यत्राह—**अविदितेति**। **नालिकेरद्वीपे वह्नेरप्रसिद्धेः न तत्र वह्न्यनुमानमिति भावः**[5]।

---

[1] जीवप्रणीतेतर-**पा.** [2] भासत्व नाति-**पा.** [3] सर्वज्ञप्रणीतं यजु—**पा.** [4] पूर्व सर्वज्ञप्रणीत सिद्ध कथ—**क.** [5] सर्वार्थसिद्धिगत इवशब्दो 'वह्नौ' इत्यनन्तर योज्य इत्याशयः.

तत्त्वमुक्ताकलापः

**श्रुत्याऽत्र व्याप्तिसिद्धावलमनुमितिभिर्निष्फलः संप्लवोऽपि ।**

**तस्मादुल्लोकभूमा स कथमनुमया विश्वकर्ता प्रसिध्येत्**

सर्वार्थसिद्धिः

इत्यत्राह—**श्रुत्येति** । व्याप्तिग्राहकेणैव साध्यसिद्धौ किमत्रानुमिति-साध्यमित्यर्थः । संप्लववादे सिद्धेऽपि मानान्तरस्य प्रवृत्तिः स्यादित्यत्राह—**निष्फल** इति । मानान्तरसिद्धे वस्तुन्याकारान्तरसमर्पणे हि संप्लवश्शोभेत । अन्यथा सिद्धसाधनत्वं वा, सर्वत्र सिद्धसाधनत्वदोषोच्छेदो वा स्यादिति भावः । अत्र—

"कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥

इति **न्यायाचार्य**संगृहीतानां सर्वेषां हेतूनां स्थालीपुलाकन्यायेन निरस्तप्रायत्वं निगमनव्याजेन नियमयति—**तस्मा**दिति । नन्वनिरस्तेऽपि जगत्कर्तुरनुमाने परतत्त्वपरमहितपरमपुरुषार्थेषु शारीरकं निष्प्रतिघातम् ।

आनन्ददायिनी

**संप्लववादे** संवादपक्षे । **मानान्तरेति** । संप्लवेऽप्यविदिताकारो वक्तव्य इत्यर्थः । ननु 'कार्यायोजन' इत्यादिना संगृहीतानि सर्वानुमानानि न दूषितानीत्यत्राह—**अत्रेत्यादिना** । ननु सिद्धपरवाक्यानामपि कार्यत्वभ्रान्तिनिरासश्चेत् प्रयोजनं तर्हि पुरुषाभ्रान्त्यनुसारेण सूत्रं कर्तव्यमिति न व्यवस्था स्यादित्य-

तत्त्वमुक्ताकलापः

## शास्त्रानुक्तत्वबाधद्वयपरिहृतये शास्त्रयोनित्वसूत्रम् ॥ २३ ॥

सर्वार्थसिद्धिः

अतः किमत्र तन्निरासप्रयासेनेत्यत्राह—**शास्त्रेति**। यदि जगत्कर्तुरनुमानं न प्रतिषिध्येत तदा मतान्तरप्रामाण्यव्यवसायिनः कस्यचित् 'इदं सर्वमसृजत' 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्यानामनुमानसिद्धानुवादित्वं मन्यमानस्य जगत्कर्तृवादिवाक्यानामनुमानविरुद्धोपस्थापकत्वे मूलघातित्वात्, तत्सिद्धमात्रबोधने नैरपेक्ष्यात्, सिद्धांशेऽनुमानानाघ्रातापभवाच्च, सिद्धपरवाक्यविमर्शो न कार्य इति मोह स्यात्; अतस्तदनुजिघृक्षयाऽनुमानं निरसनीयम्। किं च विश्वकर्तुरनुमेयत्वं मन्यमानस्य तत्तद्वादिकल्पितैर्हेतुभिर्बाधद्वयमापद्येत. 'ब्रह्मण आनन्दः' इत्याद्युक्तप्रामाणिकत्वागात्, अप्रामाणिकायथापूर्ववेदकल्पनस्वीकाराच्च। यद्वा प्रागुक्ताभ्यां प्रतिप्रमाणतर्काभ्यां बाधद्वयम्। अथवा अनुमितेस्सोपाधिकत्वादिकारणदोषात् साक्षादकर्तृकत्वानुमानेन साध्यप्रतिषेधाच्च। अपि वा विश्वकर्तर्यनुमानं प्रवर्तमानं स्वयं तावन्नित्यप्रयत्न समानन्या-

आनन्ददायिनी

त्राह—**किं चेति**। निरतिशयानन्दबाधो वेदनित्यत्वबाधश्चेति द्वयमापद्येत। ईश्वरसाधकस्य तदुपजीविनो वा बलवत्त्वादिति भावः। ननु कर्तृमात्रानुमानेऽपि नोक्तबाधद्वयं, श्रुतिविरोधादित्यनुमान एव बाधद्वयमित्यभिप्रायेणाह—**यद्वेति**। तथा चानुमानमेव न संभवतीत्यर्थः। [1] अव्यवधानकारकाप्रकृतपरित्यागेन हेतुरित्यभिप्रायेणाह—**अथ वेति**। किं चानुमानाङ्गीकारे श्रुतेर्बाधः स्यादित्याह—**अपि वेति**।

[1] व्यवधानकारकाप्रकृत—क.

## सर्वार्थसिद्धिः

यतया स्वोपस्थापितानुमानेन नित्यशरीरादिरहितत्वं चोपस्थाप्यागमाविषयमपहरेत् ।

तस्मादेवंविधा[1]नेकबाधशङ्कापनुत्तये ।
नित्यनिर्दोषशास्त्रैकवेद्यत्वमिह सूचितम् ॥
शब्दप्रमाणके तस्मिन् यथाशब्दं व्यवस्थितिः ।
सर्वैरनतिलङ्घ्येति न शङ्कातङ्कसंभवः ॥

नन्वीश्वरानुमानदूषणे—

विद्याचोरो गुरुद्रोही वेदेश्वरविदूषकः ।
त एते बहुपाप्मानस्सद्यो दण्ड्या इति श्रुतिः ॥

इति शास्त्राविरोधः स्यादिति चेन्न । अनुमानदूषणेऽप्यागमात् तत्सिद्धेः । अन्यथाऽस्मदादिप्रत्यक्षवेद्यत्वानिषेधेन[2] तवापि तद्दूषकत्वप्रसङ्गः ।

आगमेनानुमानेन ध्याना[3]भ्यासवशेन च ।
त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम् ॥

## आनन्ददायिनी

**नित्यशरीरादिरहितत्वं** सर्वदा शरीरशून्यत्वमित्यर्थः । शास्त्रैकवेद्यत्वे नैते दोषा इत्याह—**तस्मादिति** । कथमेते दोषा न सन्तीत्यत्राह—**शब्देति** । नन्वीश्वरानुमानदूषणमीश्वराभाववादे पर्यवस्यतीति नास्तिकत्वदोषः स्यादित्याशङ्क्य परिहरति—**नन्वित्यादिना । आगमादिति** । नास्तिकत्वं नास्तीति भावः । ननु 'आगमेनानुमानेन' इत्यनुमानवेद्यत्वं योग[4]शास्त्रसिद्धं विरुध्येतेति शङ्कामनूद्य परिहरति—**आगमेनेति** । अनुमानशब्दप्रयोगे निमित्तमाह—

[1] नेकशङ्कानामप—**पा.** [2] तवापि दूष—**पा.** [3] भ्यासरसेन—**पा.** [4] शास्त्रे स्थितं विरु—**ग.**

तत्त्वमुक्ताकलापः

## प्राज्ञाधिष्ठानशून्यं न तु [1]परिणमितुं शक्तमव्यक्तत्त्वं

सर्वार्थसिद्धिः

इत्याप्तोक्तिः कथम्? इत्थम्–श्रवणमननध्यानानां योगहेतुत्वस्य विवक्षितत्वात्। मननं चात्रानुग्राहकयुक्तिभिः स्थिरीकरणम्; तदेवात्र श्रवणानन्तरभावितयाऽनुमानशब्देन ग्रहीतुमुचितम्; अनुग्राहकयुक्तय एव वा; "यस्तर्केणानुसन्धत्ते" इति स्मरणात्। तर्कानुमानयोरदूरविप्रकर्षात्समाख्याविपर्यासश्च दृष्ट इति॥ २३॥

### इति ईश्वरानुमानभङ्गः.

---

तथाऽपि सांख्याधिकरणविरोधः स्यात्। तत्र हि परोक्तानां पक्षदृष्टान्तभूतानामचेतनानां संप्रतिपन्नवत् प्राज्ञाधिष्ठितत्वं सूत्रभाष्याभ्यां साध्यते। अतश्शास्त्रयोनित्वसूत्रमन्यपरं नेतव्यमिति शङ्कायां तावद्विरुद्धोक्तिमनुवदति–**प्राज्ञेति**। [2]तात्पर्यवृत्त्या विरोध शमयति–

आनन्ददायिनी

**तर्केति**। 'अनुमानानुगृहीतं च प्रमाणं प्रगल्भते' इति **न्यायभाष्यदर्शनादित्यर्थः**। यद्वा—अदूराविप्रकर्षमात्रेण नाच्छब्द्यमित्याह—**समाख्याविपर्यासश्चेति**। गङ्गायां घोष इत्यादाविव्यर्थः। तस्मादुलोकभूमेतिमूलस्य लोकविलक्षणमित्यर्थः॥ २३॥

### ईश्वरानुमानभङ्गः.

---

आक्षेपसंगतिं दर्शयति—**तथाहीति**। मूलं—

---

[1] परिणमने शक्त–**पा.** [2] तात्पर्यगत्या–**पा.**

तत्त्वमुक्ताकलापः

**वास्यादौ व्याप्तिसिद्धेरिति यदभिहितं सांख्यसिद्धान्तभङ्गे।**

**सोऽपि प्राज्ञव्युदासेऽप्यनुमितिशरणान् प्रत्युपात्तः प्रसङ्गो**

**नेष्टे तत्सिद्ध्यसिद्ध्योरनुमितिरिति खल्वाशयस्सूत्रकर्तुः ॥ २४ ॥**

सर्वार्थसिद्धिः

सोऽपीति। तात्पर्यभेदं विवृणोति—नेति। प्राज्ञानधिष्ठितत्वमनुमातुं न शक्यमिति सांख्याधिकरणतात्पर्यम्। शास्त्रयोन्यधिकरणस्य त्वधिष्ठितत्वं नानुमातुं शक्यमिति। अतस्साधकबाधकाभावे शास्त्रं निरङ्कुशप्रसरमिति सूत्रकाराभिप्राय एव भाष्ये दर्शित इति ॥ २४ ॥

**इति शास्त्रयोन्यधिकरणसांख्याधिकरणविरोधपरिहारः.**

---

आनन्ददायिनी

नेष्टे तत्सिद्ध्यसिद्ध्योरित्यादि। प्राज्ञव्युदासे प्राज्ञानधिष्ठितत्वेऽनुमानेन साध्यमाने अनुमितिर्नेष्टे न [1]सिध्यति। [2]प्राज्ञः सिध्यति नेति प्राज्ञसिद्ध्यसिद्धिभ्यां व्याघातात् प्राज्ञानधिष्ठितत्वसाधने प्राज्ञाधिष्ठितत्वं साहचर्यादेव साधयितुं शक्यमिति सत्प्रतिपक्षः स्यादित्यर्थः। सूत्रकर्तुरिति 'जनिकर्तुः' इति ज्ञापकात् समासः ॥ २४ ॥

**शास्त्रयोन्यधिकरणसांख्याधिकरणविरोधपरिहारः.**

---

1 सिध्यतीत्यर्थः—ग. 2 'प्राज्ञ. सिध्यति नेति' इति ग—कोशे न दृश्यते.

तत्त्वमुक्ताकलापः

**अस्यैवाचिन्त्यशक्तेरखिलजनयितुस्स्यादुपादानभावः**

**सूक्ष्माव्यक्तादिदेहः परिणमति यतोऽनेकधा स्थूलवृत्त्या ।**

सर्वार्थसिद्धिः

श्रुतिसिद्धस्य विश्वकर्तुः श्रौतमुपादानत्वमपि प्रस्तौति—**अस्येति** । अखिलजनयितुरस्यैवेति विरोधशङ्कासूचनम्, अचिन्त्यशक्तेरिति परिहारनिदानगर्भम् । विकारापुरुषार्थनिषेधकशास्त्रविरोधशान्त्यै सर्वोपादानत्वं बालयुवपरिणतिवत् सद्वारकमित्याह—**सूक्ष्मेति** । सूक्ष्मत्वस्थूलत्वोक्तिर्हेतुकार्यभावघटनार्था । अनेकधेत्युक्त्या "तम एकीभवति" इत्यादिप्रसिद्धप्राच्यावस्थातो वैषम्यं व्यज्यते । उपादानतया

आनन्ददायिनी

प्रसङ्गसङ्गतिमाह—**श्रुतिसिद्धस्येति । विरोधशङ्केति ।** कर्तुरुपादानत्वविरोधशङ्केत्यर्थः । **परिहारेति** । अचिन्त्यशक्तित्वादेव कर्तृत्वमुपादानत्वं च युज्यते । लोके [1]कर्तुरनुपादानत्वं शक्त्यभावनिबन्धनमिति भावः । [2]निष्कलं निष्क्रियमिति विकारनिषेधशास्त्र ; कृत्स्नो रसघन एवेति कृत्स्नरसघनशब्दाभ्यां पुरुषार्थानंदतायोगव्यवच्छेदकाभ्यां तदन्य[3]तद्विरोधिनिषेधलाभात् पुरुषार्थनिषेधकं शास्त्रम् । **प्राच्यावस्थात इति** । च्विप्रत्ययेन भूतपूर्वैकत्वावस्थावगमादिति भावः । ननु सद्वारकत्वेनोपादानत्वे भूतलस्य घटाद्युपादानत्वप्रसङ्गः । न च बालस्थ-

---

[1] कर्तुरुपादान—**ग.** [2] निष्कल निर्विकारमिति—**ग** [3] तद्विरुद्धनि—**ग.**

तत्त्वमुक्ताकलापः

निष्कृष्टेऽस्मिन् [1]शरीरिण्यखिलगुणगणालङ्कृतानन्दरूपे
संपद्यन्ते समस्तास्समुचितगतयो निर्विकारादिवादाः ॥ २५ ॥

सर्वार्थसिद्धिः

[2]विकाराद्याश्रयस्य कथं तदभावोपदेश इत्यत्राह–निष्कृष्ट इति ॥ २५ ॥

आनन्ददायिनी

विरादौ कथमिति वाच्यम् । तत्रापि शरीरस्यैव उपादानोपादेयभावादिति चेन्न । यदि साक्षात्तदाधारत्वेनोपादानत्वं तदाऽपि भूतलस्य घटाद्युपादानत्वप्रसङ्गः । न च समवायसंबन्धेन तदाश्रयत्वं विवक्षितमिति न दोष इति वाच्यम् । तथाऽप्यपृथक्सिद्धयोरेव समवाय इति कार्यकारणयोरपृथक्सिद्धयोरुपादानोपादेयभावोऽस्तु । यद्यत्राप्यतिप्रसक्तिशङ्का सा समवायेऽपीति तथैव परिहार्या । साक्षात्त्वविशेषणं तु व्यर्थम् । यच्च शरीरस्यैवोपादानत्वमिति तद्व्यवहारविरोधान्निरस्तम् । बालो देवदत्तः स्थविरोऽभूदिति हि विशिष्टे व्यवहारः । 'निष्कृष्टेऽस्मिन् शरीरिणि' इत्यादिमूलस्य प्रकृतिगतत्वाद्विकारस्य नात्मस्वरूपे साक्षाद्विकार इति भावः । आदिशब्देनानन्दाद्युपदेशपरिग्रहः ॥ २५ ॥

[1] शरीरिण्यमल–पा. [2] विकाराश्रयस्य–पा.

तत्त्वमुक्ताकलापः

**कर्तोपादानमेव स्वसुखमुखगुणे स्वप्रयत्न-प्रसूते**

**संयोगं स्वस्य मूर्तैस्स्वयमुपजनयन्नीश्वरोऽप्येवमिष्टः ।**

**सर्वोपादानभावस्तन इह घटते सर्वकर्तर्यमुष्मिन्**

सर्वार्थसिद्धिः

ननु यद्यस्य निमित्तं न तत्तस्योपादानमिति स्थिते साक्षात्सद्वारकं वा कथमुपादानत्वमित्यत्र परप्रक्रिययैव विरोधं परिहरति—**कर्तेति**। **जीवस्तावत्तैन्ते**[1]**रुपायैः** स्वसुखादीनुत्पादयति, तेषां समवायिकारणं च भवतीति मन्यसे ; तावदेव च निमित्तोपादानत्वम् । ईश्वरेऽपि तदुभयं क्वचिदङ्गीकरोषीत्याह—**संयोगमिति**। नचात्रोपादानत्वं भाक्तम् , विपरिवर्तस्य सुवचत्वात् । अतः प्रकृत्यधि[2]करणसाधितं न प्रतिक्षेप्तुं शक्यमित्याह—**सर्वेति**। तर्हि 'सोऽकामयत' 'तदात्मानं स्वयमकुरुत' इत्यादिकं स्वरूपपरिणामवादि**ब्रह्मदत्तभास्करादि**मतभेदैरव्यवहितमेव

आनन्ददायिनी

आक्षेपसंगतिमाह— **नन्विति**। **विपरिवर्तस्येति**। निमित्तत्वमेव भाक्त कुतो न स्यादित्यर्थः । **आदिशब्देन** मायिमतादिसंग्रहः। **अव्यवहितमेवेति**। तत्रैव स्वारस्यादिति भावः ।

---

[1] रुपायैस्सुखादी–**पा.** [2] करणे साधितं–**पा.**

तत्त्वमुक्ताकलापः

**सर्वश्रुत्यैकरस्यप्रणयिभिरुचितं द्वारमत्राभ्युपेतम् ॥ २६ ॥**

सर्वार्थसिद्धिः

किं न [1]निरुह्यत इत्यत्राह—सर्वश्रुतीति। अन्यथा जीवानां प्रतिकल्पमुत्पत्तिप्रलयौ स्याताम्। अकृताभ्यागमः कृतविप्रणाशो विषमसृष्ट्यादिभङ्गश्च भवेयुः। ब्रह्मण[2]स्तदशस्य वा सर्वेश्वरस्य "बहु स्याम्" इति सङ्कल्पयतोऽनादिजीवद्वारा क्लेशाद्यन्वयः, त्रिगुणांशद्वारा विकारान्वय इति पक्षेऽपि सर्वदोषाकरत्वं विरुद्धधर्माध्यासश्च दुस्त्यजः। अतश्चिदचिच्छरीरद्वारा बहुभवनादिकमिति कृत्स्नविद्भिर्निरुह्यत इति ॥२६॥

**इति ईश्वरस्य जगन्निमित्तोपादानत्वोपपत्तिः.**

---

आनन्ददायिनी

निरुह्यत इति निपूर्वो रुहिः कल्पनार्थः। तेषां पक्षे विरोधमाह—**अन्यथेति। जीवानामिति।** 'न जायते' 'नित्यो नित्याना' इत्यादिजीवविषयश्रुतिविरोध इत्यर्थः। **विषमेति।** तद्धेतुकर्माभावादिति भावः। **ब्रह्मणस्तदंशस्य वेति** मतभेदेन बोध्यम्; जीवाभिन्नत्वादिति भावः। **त्रिगुणांशद्वारेति।** यादवभास्करमते त्रिगुणस्य ब्रह्मांशत्वादिति भावः। **अत इति।** तथा च स्वरूप उक्तदोषाभावादिति भावः ॥ २६ ॥

**ईश्वरस्य जगन्निमित्तोपादनत्वम्**

---

[1] निरुह्येतेत्यत्राह—पा. [2] तदशस्य सर्वेश्वरस्य वा बहु—पा.

तत्त्वमुक्ताकलापः

**साविद्यं केऽपि सोपाधिकमथ कतिचिच्छक्ति-भिर्जुष्टमन्ये**

**स्वीकृत्यैकाद्वितीयश्रुतिमपि जगदुस्तादृशिष्टै-क्यनिष्ठाम् ।**

सर्वार्थसिद्धिः

एवं वैशिष्ट्यादुपादानमपि कर्तैव । अन्यैरपि त्रय्यन्तवादिभिर्यत्किंचिद्वैशिष्ट्यमङ्गीकृतमित्याह—साविद्यामिति । अद्वैतव्याख्यायिनः खल्वाहुः—" अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो

विवर्ता यस्यैते वियदनिलतेजोभवनयः ।"

इति । **भास्करीयास्तु**-चिदचिदंशविभक्तं ब्रह्मद्रव्यमचिदंशेन विक्रियते, तद्विकारोपहितेन चिदंशेन संसरतीति । **यादवप्रकाशीयास्तु-**

आनन्ददायिनी

ननूपादनत्वसिद्ध्यर्थं वैशिष्ट्यं जगत्कर्तुरङ्गीक्रियते चेत् ' एकमेवाद्वितीयं ' इत्यादिश्रुतिविरोध इत्याशङ्क्य परिहरति—**एवमिति** । [1]प्रसङ्ग एव सङ्गतिरित्यन्ये । कर्तैवोपादानमपीत्यर्थः । **अविद्याद्वितयं** मूलाविद्यातूलाविद्यारूपेणाविद्याद्वितयम् । मायाविद्यारूपेण द्वितयामिति केचित् । **प्रभवतः** उत्पद्यमानस्य । **चिदचिदंशविभक्तमिति** । चैतन्यमुपाधिश्च द्वितयं ब्रह्म, उपाधिपरिणामविशिष्टतया चिदंशस्य

[1] प्रसङ्गस्संगतिरित्यन्ये—क.

तत्त्वमुक्ताकलापः

**नित्यत्वं विग्रहत्वं प्रकृतिपुरुषयोर्हेतुतां विश्वकर्तु**

**स्तद्वैशिष्ट्यं च शास्त्रप्रथितमजहतां कोऽपराधोऽतिरिक्तः ॥ २७ ॥**

सर्वार्थसिद्धिः

—सर्वात्मकं सद्रूपं ब्रह्म चिदचिदीश्वररूपांशत्रयशक्तिविशिष्टं समुद्र इव फेनबुद्बुदतरङ्गप्रभेदेन सावान्तर[1]भेदत्रिविधव्याष्टिभावेन परिणमत इति। एवमाद्वितीयश्रुत्याविरुद्धान्यविद्योपाधिशक्तिरूपविशेषणानि चेद्विचित्राचिदचिदुपा[2]दानतोपयोगीनि स्वीक्रियन्ते, तदा श्रुतिस्मृतिशत-[3]सिद्धशरीरविशेषणाभ्युपगमे कः प्रद्वेषः? । स्वपक्षस्य प्रमाणतस्सिद्धिं विरोधाभावादौचित्यातिशयं च प्रपञ्चयति —**नित्यत्वमिति**। कोऽपराधोऽतिरिक्त इत्यनेन विशेषणपरिग्रहमात्रमपराधश्चेत् सर्वेषामपि समानदोषत्वम्, अतिरिक्तापराधोऽपि तेषामेवेति व्यज्यते ॥ २७ ॥

**इति जगत्कारणवैशिष्ट्यावश्यंभावः.**

---

आनन्ददायिनी

जीवादिभाव इत्यर्थः। **अतिरिक्तापराधोऽपीति**। साविद्यत्वविकारत्वाद्यपराध इत्यर्थः। मूले प्रकृतिजीवयोर्नित्यत्वं शरीरत्वं चेश्वरापेक्षयेत्यर्थः। **शास्त्रप्रथितं**—शास्त्रे 'यस्य पृथिवी शरीरं' 'यस्याव्यक्तं शरीरं' 'यस्यात्मा शरीरं' इत्यादिना प्रतिपादितमित्यर्थः ॥ २७ ॥

**जगत्कारणवैशिष्ट्यम्**

---

[1] मेद त्रिविध—पा. [2] दानत्वोप—पा. [3] सिद्धस्वरूपविशेष—पा.

तत्त्वमुक्ताकलापः

## ब्रह्मोपात्तान् विकारान् कतिचिदभिदधुश्चेतनाचेतनेशान्

सर्वार्थसिद्धिः

नन्वेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृत्तत्कार्यदृष्टान्तैस्तदुपपादनात् ,

ईश्वराव्याकृतप्राणैर्विराट्सिन्धुरिवोर्मिभिः ।
यत्प्रनृत्यादिवाभाति तस्मै सद्ब्रह्मणे नमः ॥

इति **कात्यायनकारिकया** च सद्ब्रह्मोदन्वदूर्मिभेदाश्चिदचिदीश्वरा इति निर्धार्यते, तदेतदनुवक्ति—**ब्रह्मेति** । अत्र प्रतिज्ञाया अनन्यथासिद्धबहुश्रुत्यविरोधाद्विशिष्टैकानेकविषयज्ञानार्थत्वात् दृष्टान्ता-

आनन्ददायिनी

ननु 'यथैकस्मिन् [1] मृण्मये पिण्डे विज्ञाते सर्वं मृण्मयं विज्ञातं स्यात्' इत्यादि दृष्टान्तानुरोधाच्चिदचितो [2]ब्रह्मणाऽत्यन्तभेदो नास्त्येव, दोषस्तु कथंचित्परिहार्य इति शङ्कया संगतिरित्याह—**नन्विति** । विराट्छब्देन जीव उच्यते। अव्याकृतप्राणशब्दाभ्यां प्रकृतिस्तद्विकाराश्च । ततश्च ब्रह्मण एव त ऊर्मय इव ऊर्मयः परिणामा इति । **निर्धार्यत इति** । **यादवभास्करीयैरिति** शेषः । **अत्र प्रतिज्ञाया इति** । एकविज्ञानप्रतिज्ञाया इत्यर्थः । **अविरोधात्**–अविरोधायेत्यर्थः । अन्यथा भेदनिर्विकारनित्यनिर्दोषत्वादिश्रुतिविरोधः स्यादित्यर्थः । यथैकेनेत्यादि [3]दृष्टान्तविरोधं परिहरति—**दृष्टान्तानामपीति** । न हि

---

[1] मृण्मये विज्ञाते–**ग**. [2] ब्रह्मात्यन्त–**ग**. [3] दृष्टान्तान्तरविरोध–**क**.

तत्त्वमुक्ताकलापः

**नैतद्युक्तं यदीशादनधिकमनघं निर्विकारं श्रुतं तत् ।**

सर्वार्थसिद्धिः

नामप्युपादानोपादेयैक्यसंभवार्थत्वाद्दृषिवचनस्यापि 'न चानृषेर्दर्शनमस्ति किंचित्' इति न्यायेन विरोधाधिकरणनीत्या चानपेक्ष्यत्वात् 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'अजामेकाम्' 'न त्वेवाहं जातु नासम्' 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इत्यादि-श्रुतिस्मृतिशतदृष्टेश्चापन्यायमूलमेतदित्यभिप्रायेणाह—**नैतद्युक्तमिति** । त्रिष्वपि विकारतयाऽभिमतेषु श्रुतिविरोधादयुक्तिमुपपादयति—**यदीति** । 'नारायण. परं ब्रह्म' इत्यादिभिरीश्वरस्यैव परब्रह्मत्वं सिद्धम् । अतो न तत्तदुपादानम्; अवतारपरिणत्याऽपि नेश्वरस्योपादेयत्वम् ।

आनन्ददायिनी

दृष्टान्तेन न यावत्साम्यं वक्तव्यं, अपि तु सिसाधयिषिततद्धर्मवत्तया । तथा-चैककारणविज्ञानात्तदुपात्तसर्वकार्यविज्ञानस्य विवक्षितस्य साधने स्वरूप-परिणामो दार्ष्टान्तिके नापादनीय इति भावः । **कात्यायनवचनस्या-न्यथासिद्धिमाह—ऋषीति । न चानृषेर्दर्शनमस्तीति** । किंचित् श्रुत्या विरुद्धं ऋषयो यदि वदन्ति तस्य 'विरोधे त्वनपेक्षं [1] स्यादसति ह्यनुमानम्' इत्यादिभिरप्रामाण्यं सिद्धमित्यर्थः । श्रुतिविरोधमेव दर्श-यति—**नित्येति । अपन्यायमूलमेतदिति** । एतत् मतमित्यर्थ इत्यन्ये । **कात्यायनवचनमित्यपरे । अवतारेति** । अवतारस्य 'सोऽकामयत इत्याद्युक्तजगदुपादानावस्थेश्वरावस्थान्तरत्वादिति भावः । ननु 'स एव सृज्यः स्रष्टा च" इत्यादिवचनानां का गतिरिति चेत्-

[1] स्यादित्यादिभिरप्रामाण्यमित्यर्थः—ग.

तत्त्वमुक्ताकलापः

**भिन्नाया ब्रह्मशक्तेर्विकृतय इति चेद् ब्रह्मजन्यत्वभङ्गो**

**भेदाभेदोपपाद्यं सकलमिति मते सप्तभङ्गी न दूष्या ॥ २८ ॥**

सर्वार्थसिद्धिः

'स एव सृज्यः' इत्यादिकमपि [1]विशिष्टविषयम्। 'स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान् न कर्मणा वर्धते नो कनीयान्' इत्यादिभिरकर्मवश्यतया प्रसिद्धस्य न खलु निरयनिपातादि[2]दुरत्ययदुःख, कारणदुरितपराधीनानन्तजीवभावेन परिणामः। 'नास्य जरयैतज्जीर्यति' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिभिर्विकारजाड्या[3]दिविधुरतया श्रुतस्य कथं तद्विपरीतविकारागमः ?। [4]तत्र परोक्तं परिहाराभासं शङ्कते - **भिन्नाया** इति। अभिन्नत्वे परिहारगन्धाभावात् भिन्नत्वानुवादः। यदि ब्रह्मव्यतिरिक्ता तच्छक्तिर्विक्रियते तदा ब्रह्मण उपादानत्व न स्यात्। अनादितया श्रुतस्य त्रिकस्य जन्यत्वायोगश्च न परिहृत इत्यभिप्रायेणाह—**ब्रह्मजन्यत्वभङ्ग** इति। अथ शक्तिशक्तिमतोरभेदाद्ब्रह्मण उपादानत्वनिर्विकारत्वादिकमिति परेष्ट[5]मनुवक्ति—**भेदाभेदेति**। अत्रानिष्टमाह—**सप्तभङ्गीति**। स्यादस्ति स्यान्नास्तीत्यादीनां विरोध-

आनन्ददायिनी

त्राह—**स एवेति**। जीवभावेन परिणामे दोषमाह—**स न साधुनेत्यादिना**। अचिद्रूपेण परिणामे दोषमाह—**नास्येत्यादिना**। स्वव्याघातं चाह—**अनादितयेति**। नन्वस्मिन्नपि पक्षे निर्विका-

[1] विश्वसृष्टिवि—**पा.** [2] दुरन्वय—**पा.** [3] दिभिर्विधुर—**पा.** [4] अत्र—**पा.** [5] मनुवदति—**पा.**

तत्त्वमुक्ताकलापः

## विश्वं चित्तद्रुणानुद्भव इह घटते रत्न-गन्धादिनीत्या

सर्वार्थसिद्धिः

स्फौट्यात्तदुक्तिः । सर्वोऽपि परपक्षा न दूष्यः ; कथंचिदभेदात् स्वपक्षस्य परपक्षत्वेऽपि विरोधस्य दुर्वचत्वादिति तात्पर्यम् ॥ २८ ॥

इति ब्रह्मणश्चिदीश्वरविकारवत्त्वभङ्गः.

---

अथ सच्चि[1]त्सुखस्वरूपं ब्रह्म सर्वत्र तादात्म्येनानुवृत्तमित्येतदनूद्य प्रत्याह-विश्वमिति । [2]चिच्छब्देन स्वप्रकाशत्वं चेतनत्वं च तन्त्रेण गृह्यते । उपलम्भविरोधानिवृत्त्यर्थमाह--तद्गुणानुद्भव इति । रत्ने गन्धस्य नित्यानुपलम्भात्तन्निदर्शनम् । न हि नित्यगन्धानुपलम्भेऽपि रत्नस्य पृथिवीत्वं

आनन्ददायिनी

रादिपूर्वोक्तदोषाणां सत्त्वेऽपि तदुपेक्ष्य दूषणान्तरकथनस्याभिप्रायमाह-स्यादस्तीत्यादि ॥ २८ ॥

ब्रह्मणश्चिदचिदीश्वरविकारवत्त्वभङ्गः.

---

पूर्वसङ्गत्या यादवमतं विशिष्य दूषयति—अथेति । ननु स्वप्रकाशज्ञानानन्दतादात्म्ये सर्वस्य तदात्मकतया सर्वत्रोपलम्भप्रसङ्ग ।

---

[1] सुखरूपं–पा. [2] चिच्छब्देन प्रकाशत्व–पा.

तत्त्वमुक्ताकलापः

**सर्वं ब्रह्मेत्यधीतं त्रिविधमिति च तद्दाशताद्यस्य चोक्तम् ।**

सर्वार्थसिद्धिः

नाङ्गीकृतम् ; एवमिहापि । अयं भावः—विश्वस्य स्वप्रकाशत्वं तावन्न निषेद्धुं शक्यम् ; प्रत्यात्मं स्वप्रकाशस्य परैरनुपलम्भेऽप्यङ्गीकारात् । चेतनत्वमपि घटादेर्न प्रत्यक्षतः प्रतिक्षेप्तुं युक्तम् ; परचैतन्ये सर्वत्र योग्यानुपलम्भाभावात् । कार्याभावादपि न तत्प्रतिक्षेपः. सुषुप्त्यादिनयेन कार्याभावोपपत्तेः ; स्वभावभेदाच्च नित्यानुद्भवोपपत्तिरिति । चिद्रूपत्वे सिद्धे हि चैतन्यानुद्भवः कल्प्यः ; तदेव तु कथमित्यत्राह—**सर्वमिति** । 'सर्वं खलु' इति श्रुत्या सर्वस्य ब्रह्मत्वं विधीयते । तच्च ज्ञानादि-

आनन्ददायिनी

नचानुद्भवादनुपलम्भः ; क्वचिदप्युपलम्भाभावप्रसङ्गादत आह—**अयं भाव इति**। किं स्वप्रकाशस्योपलम्भमात्रमापाद्यते ; उत सर्वैरिति विकल्प्य नाद्य इत्याह—**प्रत्यात्मामिति**। चेतनत्वनिषेधासभवप्रतिपादनेनैव द्वितीयं प्रत्याचष्टे—**चेतनत्वमपीति**। अयोग्यत्वान्न सर्वैरुपलम्भ इति भावः । ननु परचैतन्यस्य प्रत्यक्षानुपलम्भो भवतु न बाधकः ; तथाऽपि कार्याभावात्तन्निषेधः सिध्यतीत्यत आह—**कार्याभावादपीति**। ननु तर्हि सुप्त इव कदाचित्कार्यं स्यादित्यत्राह—**स्वभावेति**। उपलम्भानुरोधेन कल्प्यत्वादिति भावः । ननु ब्रह्मत्वविधाने विज्ञानत्वं कथमित्यत्राह—**तच्चेति**। 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिवाक्या-

तत्त्वमुक्ताकलापः

**तस्मात् सर्वानुवृत्तं सदनवधिदशाचित्रमित्यप्ययुक्तं प्रत्यक्षागोचरत्वप्रभृतिबहुभिदावादिसर्वोक्तिबाधात् ॥ २९ ॥**

सर्वार्थसिद्धिः

स्वभावगर्भम् । भोक्तृभोग्यादीन् प्रक्रम्य 'सर्वं प्रोक्तं त्रिविधं ब्रह्मैतत्' [1]इति श्रूयते । अत्र हि स्वरूपत्रैविध्यं स्वारसिकम् । 'ब्रह्म दाशा ब्रह्म दासा' इत्यादौ च ब्रह्मण एव दाशत्वादिकमाम्नातम् । तत्र व्यवधानक्लृप्तिस्तु गुर्वी । तस्मात् स्वरूपतादात्म्येन चिदचिदीश्वरानुवृत्तं सद् ब्रह्मैकम् ; तदेव त्रितयपूर्वावान्तरव्यष्टिभिरनन्तविषमावस्थाविशिष्टमिति भावः । त्र्यात्मके ब्रह्मणि चित्रपटन्यायसूचनार्थः चित्रशब्दः । एतदपि दूषयति—**इत्यप्ययुक्तमिति** । श्रुतस्य कथमयुक्तिरित्यत्राह—**प्रत्यक्षेति** । 'अदृश्यमग्राह्यं' 'निष्कलं निष्क्रियं शान्तम्' इत्यादिभिः श्रुतिभिस्तावद्बाधसिद्धः । भेदश्रुतयश्च नाभेदं सहन्ते । शरीरात्मभावश्रुतयश्च भेद-

आनन्ददायिनी

दिति भावः । **अत्र हीति** । विशिष्टैक्यविषयत्वस्य स्वारस्यादिति भावः । अस्मिन्नर्थेऽनुग्राहकं चाह—**ब्रह्म दाशा इति** । ननु ब्रह्मदाशत्वादिकं तच्छरीरत्वेनाप्युपपद्यत [2]इत्यत आह—**तत्र व्यवधानेति** । **चित्रपटन्यायेति** । चिदचिदीश्वरात्मकत्वादिति भावः । **बाधस्तावदिति** । अदृश्यमिति प्रत्यक्षत्वनिषेधात् निष्कलमित्यवयवरूपविभागनिषेधात् निष्क्रियमिति विकारनिषेधात् बाध इत्यर्थः । **भेदश्रुतयश्चेति** । 'निरञ्जनः परमं साम्यं' 'सर्वान्कामान् ब्रह्मणा विपश्चिता' 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादिनिरुपाधिकभेदश्रुतय इत्यर्थः । **शरीरात्मेति** ।

[1] इति च श्रू—पा. [2] इत्याह—ग.

## सर्वार्थसिद्धिः

गर्भाः। अत एवाभेदश्रुतयोऽपि विशिष्टैक्यविषयाः स्थापनीयाः। किञ्चाचेतनस्य चेतनस्य वा कस्यचिद्ब्रह्मत्वविधौ किमत्रेदं विधेयम्? सत्त्वमिति चेत्तन्न; सर्वत्र सर्वेषां सुप्रसिद्धत्वेन तदुपदेशायोगात्। कारणत्वमिति चेत्, तत्प्रातिस्विककार्यं प्रति प्रसिद्धमेव। आदिकारणत्वं तु कार्यस्य विरुद्धम्। कार्यस्य कारणद्रव्यतादात्म्यमुपदिश्यत इति चेन्न, श्रुतिसिद्धविशिष्टकारणतादात्म्ये त्वदिष्टासिद्धेः। प्रदर्शित च विशिष्ट-परिणामस्य युष्माभिरपि दुस्त्यजत्वम्। ईश्वरत्वमंशान्तरयोरुपदिश्यत इति चेन्न; प्रत्यक्षाद्यशेषप्रमाणविरोधात्। न च परागादेः पर्वतत्वं शरावादेर्वा मणिकत्वं संव्यवहरन्ति। साजात्यविवक्षया तथा संव्यवहारः स्यादिति चेत्तर्ह्यत्र सत्ताजात्यैवेश्वरसाजात्यमुपदिष्ट स्यात्। तत्र चानुपदेश्यत्वमुक्तमेव। एवं सर्वश्रुतिबाधाद्ब्रह्मसामानाधि[1]करण्यत्रैविध्य-

## आनन्ददायिनी

उपाध्यनिर्देशेन सार्वकालिकत्वावगमादित्यर्थः। अभेदश्रुतिनिर्वाहमाह—**अत एवेति**। नन्वभेदश्रुतिवशात् भेदश्रुतिरेव किमर्थमन्यथा न नेतव्या; तथात्वेऽपि भेदनिर्देशस्य स्वारस्याहानेरित्यत्राह—**किं चेति**। **ब्रह्मत्व[2] विधाविति**। 'सदेव' इत्यादिना सत्ता ब्रह्मत्वमिति गम्यते। 'यतो वा' इत्यादिना कारणत्वम्, अन्तर्यामिब्राह्मणानुरोधेन ईश्वरत्वमिति सन्देह इति भावः। [3] तस्मात् भेदश्रुत्यनुसार एव न्याय्य इत्याह—**एव-मिति**। ब्रह्मदत्तो ह्येवमाह—'ईश्वरस्य मनोमयवाङ्मयप्राणमयभेदेन प्रथमो विभागः। अनन्तरं ब्रह्मविष्णुरुद्ररूपेणापरो विभागः। मनोमयादय-स्त्रयो मनोवाक्प्राणानामधिष्ठातारः। अधिष्ठानकाले च आदित्याग्निचन्द्र-तेजस्त्रयमधिष्ठायाधितिष्ठन्ति। मनोवाक्प्राणाः सत्त्वतमोरजःपरिणाम-

[1] करण्य त्रै—**पा.** [2] विधायीति—**ग.** [3] 'तस्माद्भेद' इति ग-कोशे न दृश्यते.

## सर्वार्थसिद्धिः

श्रुतिश्चाविरुद्धविषयतया नीयेतेति। **यदपि कल्पयन्ति**—जीवव्यष्टिवदीश्वरव्यष्टयोऽप्यनन्ताः, तत्र प्राणमयमनोमयवाङ्मयरूपः प्रथमो विभागः, तिस्रश्च ब्रह्मादिमूर्त्तयस्तद्व्यष्टय इति। इदमप्येकस्यैव चैतन्यस्य स्वमायाकल्पितविचित्रान्तःकरणदर्पणप्रतिबिम्बिततया विश्वतैजसप्राज्ञरूपविभाग [1]इति क्लान्तिवदनादर्तव्यम् ॥ २९ ॥

**इति सर्वानुवृत्तसन्मात्रब्रह्मत्वभङ्गः.**

---

### आनन्ददायिनी

[विशेषाः' इत्यादि ; तदाह—**यदपीति**। जीवविभागवदीश्वरविभागोऽपीत्यर्थः। **अनादर्तव्यमिति**। मायिकक्लान्तिवत् प्रमाणशून्यत्वात् परित्याज्यमित्यर्थः। मायिभिरुक्तं 'अहमर्थो द्विविधो जीवरूप ईश्वररूपश्च ईश्वराहं[2]कारस्त्रिविधः सत्वरजस्तमोमयत्वभेदेन। [3]तथा च तत्प्रतिबिम्ब ईश्वरोऽपि प्राज्ञतैजसविश्वरूपेण। ते च जाग्रत्स्वप्नसुषुप्तिप्रवर्तकाः' इति॥

**सर्वानुवृत्तसन्मात्रब्रह्मत्वभङ्गः.**

---

[1] इतिवद—पा. [2] कारोऽपि त्रिविधः—क. [3] तथा च प्रतिबिम्ब—क.

तत्त्वमुक्ताकलापः

**अव्यक्तं त्वन्मतेऽपि ह्यनवयवमथाप्येतदंशा विकाराः**

**ते चान्योन्यं विचित्राः पुनरपि विलयं तत्र तत्त्वेन यान्ति ।**

सर्वार्थसिद्धिः

अन्ये तु भेदाभे[1]दवादिन आहुः—निष्कलचिदानन्दजलनिधिरपारस्वानन्दानुभवप्रीतिजनितनानाविकार एव स्वल्पमंशं जडरूपं संकल्प्य तमेवाजडेन चिदंशान्तरेण संयोज्यानन्तविचित्रसुखदुःखानुभवभागिनं कृत्वा तद्दर्शनेन प्रीयत इति । यथोक्तम्—"त्वं चिन्महोदधिरणुं तव बिन्दुमेकं कृत्वा जडं तमजडेन नियोज्य" इत्यादि । दृश्यन्ते च जगति कतिचिदात्मपीडावहां क्रीडां सादरमनुतिष्ठन्तः । अन्यथा कथमवतारेषु तादृशा विहाराः, कथं च स्वेच्छया कर्मफलान्यनुभवेदिति । एतदनुभाषते—**अव्यक्तमिति** । तदिदसमञ्जसवृत्तान्तादप्यधिकं जुगुप्स-

आनन्ददायिनी

तदेकदेशिनस्तु—ईश्वर एव ब्रह्म, न तु [2]ततोऽतिरिक्तं सन्मात्रम् । [3]तत्तु स्वसङ्कल्पादेव चिदचिदीश्वररूपं विभाग लीलार्थं करोतीति वदन्ति ; तन्मतमाह—**अन्ये त्विति । यथोक्तमिति** । शिलालिग्रन्थ इत्यर्थः । तेन नानाविकारजनितानि सुखानि दुःखान्यालम्ब्य सर्वजगदेकतया प्रतीत [4]इति भावान्तरम् । नन्वीश्वरस्य सर्वज्ञस्य कथं स्वानर्थे प्रवृत्तिरित्यत्राह—**दृश्यन्ते चेति । असमंजसः** सगरस्य ज्येष्ठपुत्रो

[1] मेदिन—**पा.** [2] तदतिरिक्तं—**ग.** [3] स स्व—**ग.** [4] इति विभागान्तर—**क.**

तत्त्वमुक्ताकलापः

**इत्थं ब्रह्मापि जीवः परिणमति विहृत्यर्थमित्यप्यसारं**

**स्वानर्थैकप्रवृत्तेः प्रसजति च तदा सर्वज्ञशास्त्रो-[1]परोधः ॥ ३० ॥**

सर्वार्थसिद्धिः

[2]नीयतमित्याह—**असारमिति**। अव्यक्तनिदर्शनमिह मन्दप्रलोभनमिति कृत्वा तद्दूषयितुं परोक्तप्रक्रियामेव हेतुमाह—**स्वानर्थेति**। अयं भावः—यद्यपि दुःखप्रायेषूपायेषु प्रभूतसुखार्थिनः प्रवर्तन्ते। यद्यपि

भ्रान्तिज्ञानवतां पुंसां प्रहारोऽपि सुखायते।

इत्यादिन्यायेन बालिशैस्ताडनादिभिः क्रीडारस उपादीयते। तथाऽपि सर्वज्ञस्य सर्वशक्तेः स्वदुःखलवोत्पादनमपि न युक्तम्, किं पुनरनन्तजीवात्मभावेन दुर्विषहदुःखोत्पादनम्?। अतः क्रीडा[3]रसकाकणिका सत्यपि निरवधिकस्वानर्थनिमित्तानिर्मितेत्यत्र स्वानर्थै-

आनन्ददायिनी

भ्रान्तबुद्धिः। ननु स्वानर्थे प्रवृत्तिरपि दृश्यत इत्यादि प्रतिपादितमेवेति कथमिदं दूषणमित्यत्राह—**अयं भाव इति**। **सर्वज्ञस्येति**। तथा चाज्ञानाशक्त्यादि[4]प्रयुक्तदुःखासम्भवात् कथं [5]स्वेच्छया जीवभाव इति भावः। ननु जीवभावेन क्रीडायामीश्वरस्य कश्चिद्रसविशेषोऽस्तीति तदर्थं दुःखमपि सत्यमिति न सर्वज्ञत्वविरोध इत्यत्राह—**क्रीडारसेति**। **काकणिका** वराटिका किंचित् क्षुद्रं वस्तु। तथा च सर्वज्ञताविरोध

[1] पधात —पा. [2] नीयमि—पा. [3] रसकणिका—पा. [4] प्रयुक्तयसं—ग. [5] स्वेच्छाया—क.

तत्त्वमुक्ताकलापः

## ब्रह्मैवोपाधिभिन्नं भजति बहुविधां संसृतिं

सर्वार्थसिद्धिः

कप्रवृत्त ईश्वरः स्यात्। अवतारवृत्तान्ताः शैलूषन्यायेन निरूढा इति। अस्मन्मते तु विशेषणगता दोषा न विशेष्यं स्पृशन्ति, ऐक्यभेदाभेदानङ्गीकारात्, अकर्मवश्ये संसर्गजदोषाणामसंभवाच्चेति ॥ ३० ॥

इति ब्रह्मणः स्वलीलार्थजीवादिपरिणामवादभङ्गः.

---

उक्तपक्षासन्नं भास्करपक्षमुपालभते—ब्रह्मैवेति। एवकारो विरोधं व्यनक्ति। महाकाशघटाकाशादिनयादीश्वरान्मिथश्च जीवानां

आनन्ददायिनी

इति भावः। अभिनयमात्रत्वान्नावतारवृत्तान्तोदाहरणं युक्तमित्याह—अवतारेति। ननु सिद्धान्तेऽपि सर्वाधारत्वादीश्वरस्य स दोषस्तदवस्थ इत्यत्राह—अस्मन्मते त्विति। जीवगतानां दोषाणां साक्षात्सम्बन्धाभावादिति भावः। तत्र [1] हेतुः ऐक्येति। ननु शरीरसम्बन्धस्य जीववदीश्वरेऽपि तुल्यत्वात्तत्प्रयुक्ता दोषाः किमिति न स्युरित्यत्राह—अकर्मवश्य इति। मूले—सर्वशास्त्रोपरोधः—'न कर्मणा वर्धते नो कनीयान्' 'निर्विकार निरञ्जनं निरवद्यम्' इत्यादिश्रुतिविरोध इत्यर्थः॥ ॥ ३० ॥

ब्रह्मणः स्वलीलार्थजीवादिपरिणामवादभङ्गः.

---

प्रसङ्गसङ्गतिमाह—उक्तेति। ब्रह्मण एव विभागाङ्गीकारादासन्नत्वं बोध्यम्। पुंस्त्वं संसृतिपरत्वे न स्यादित्यत आह—

[1] हेतुमाह—ऐक्येति—ग.

तत्त्वमुक्ताकलापः

**सोऽप्यनादि-**

**स्तस्मान्नात्यन्तभिन्नो जड इति तु मते दुःखम-**

**द्वारकं स्यात् ।**

सर्वार्थसिद्धिः

भेदेन गुणदोषसकरपरिजिहीर्षया उपाधिभिन्नत्वे स्वीकृतेऽपि प्रलयदशायामुपाधिविलयेन भेदाभावे मुक्तिप्रसङ्गः। ततश्च प्राग्वदकृताभ्यागमादिः स्यादित्यत्राह—**सोऽपीति**। उपाधिभेद इत्यर्थः। प्रलयेऽपि प्रतिजीवमुपाधयस्सूक्ष्मरूपेण तिष्ठन्ति ; ततस्तदवच्छिन्नजीवभेदस्थितिरुपपद्यत इति भावः। अनाद्युपा[1]धिभेदस्वीकारे ब्रह्मव्यतिरिक्ताङ्गीकारः स्यादित्यत्राह—**तस्मा**दिति। बहुधा भिन्नोऽपि ह्युपाधिर्ब्रह्माभिन्नः ; तस्मान्नाब्रह्मतत्त्वाङ्गीकृतिरिति भावः। ब्रह्मतादात्म्याविशेषेऽपि उपाधेस्तद्वतो वैषम्यमाह—**जड इति**। पूर्वापरदृष्टेभ्यो विशेषं व्यनक्ति—**इति तु मत इति**। **दुःखमद्वारकं स्यात्**—न ह्यस्मन्मतवद्विशेषणद्वा-

आनन्ददायिनी

**उपाधिभेद इत्यर्थ इति**। प्रलयेऽनुपपत्तिमाशङ्क्याह—**सूक्ष्मरूपेणेति**। **अनादीति**। 'एकमेवाद्वितीयं' इत्यादिना ब्रह्मान्यस्य निषेधादिति भावः। **बहुधा भिन्नोऽपीति**। ननु तर्हि भेदाभेदस्वीकारे **यादवपक्षात्** को भेद इत्यत्राह—**उपाधेस्तद्वत इति**। अनाद्युपाधिविभागाङ्गीकारादौपाधिकत्वेन भेद इति भावः। **पूर्वापरेति**। ननु यद्यपि [2]परस्माद्दृष्या-

---

1 धिस्वीकारे—**पा.** 2 परस्मा. दृष्टया वैषम्य मिथ्यात्वातत्त्वाभ्यामस्तु—**गा.**

तत्त्वमुक्ताकलापः

## सौभर्यादौ व्यवस्था न कथमुपधिभिः स्वावतारेषु चैषा

सर्वार्थसिद्धिः

रकम्, न च त्वन्मते विकारवदुपाध्यंशद्वारकमित्यर्थः। औपाधिक्यां व्यवस्थितावतिप्रसङ्गमाह—**सौभर्यादाविति**। अस्ति हि योगिनां युगपदनेकदेहभृतां तत्तद्देहोपा[1]धिकृतभोगप्रतिसन्धानम्। स्मर्यते हि—

आत्मनो वै शरीराणि बहूनि मनुजेश्वर।
प्राप्य योगबलं कुर्यात्, इत्यादि।

आनन्ददायिनी

द्वैषम्य सत्यत्वमिथ्यात्वाभ्यामस्तु ; पूर्वस्मात् कथं वैषम्यमद्वारकत्वाविशेषादिति चेत्, **अत्राहुः**—पूर्व[2]त्राभेदोऽपि स्वाभाविक इति स्वाभाविकाभेदात् प्रसक्तो दोषः स्वाभाविकभेदादप्रसक्तः किं न स्यादिति वचनमात्र वक्तुं शक्यमत्र तदपि न संभवतीति वैषम्यमिति। ननु विकारवदंशपरिणतान्तःकरणवृत्तित्वेन सद्वारकत्वाद्दोषाणां सिद्धान्ततुल्यतेत्यत्राह-**न चेति**। औपाधिकजीवगतत्वाङ्गीकारात्, अन्यथौपाधिकजीवकल्पनावैयर्थ्यादिति भावः। वस्तुतस्तु—उपाधेरप्यभेदस्य स्वाभाविकत्वात् भेदस्य त्वौपाधिकत्वादुपाधिगतत्वेऽपि दोषस्तदवस्थ इति न सिद्धान्तसाम्यमिति भावः। ननूपाधिवशा[3]देवाननुसन्धानं सेत्स्यतीत्यत आह—**औपाधिक्यामिति**। [4]ननु योगिनां देहान्तरावच्छिन्नसुखानुसन्धाने किं मानमित्यत्राह—**स्मर्यते हीति**। तत्र प्रतिसन्धानाभावे त्वन्मते शरीर-

---

[1] धिकभोग—पा. [2] त्र भेदोऽपि स्वभाव इति—ग. [3] देवानुस—ग
[4] ननु देहिनां—क.

तत्त्वमुक्ताकलापः

## सर्वज्ञः स्वैक्यवेदी कथमनवधिभिर्जीवदुःखैर्न दुःख्येत् ॥ ३१ ॥

सर्वार्थसिद्धिः

अवतारेषु त्रैकालिकावतारान्तरवृत्तान्तव्यवहारास्तत्रतत्र दृश्यन्ते। तथाऽपि कर्मोपरोधादप्रतिसन्धानमित्यत्राह—सर्वज्ञ इति। न हि नित्यसर्वज्ञतयाऽभ्युपगत ईश्वरांशः [1]स्वात्मगतमुपाधिं तत्परिच्छिन्नं स्वांशं च स्वेनाभिन्नं न वेत्ति, ततश्चाहमेवोपाधिपरवशतयाऽनन्तदुःखमनुभवामीति न कथं दुःख्येत् ॥ ३१ ॥

अपि चात्रोपाध्यवच्छिन्नं ब्रह्म जीव इति परोक्ते किमुपाधि-[2]संयोगमात्रविशेषितं ब्रह्मस्वरूपमेव जीवः? उत घटाकाशवदवच्छेदेन विभक्तो भागः? अथ घटोदकवद्विच्छेदेन? यद्वा विदारिताग्रदारुनयात् किञ्चिद्विदलनेन? यद्वा उपाधिसयोगव्यञ्जितविभागः कश्चित्सहजोंऽशः?

आनन्ददायिनी

बाहुल्यकल्पनं योगिनो व्यर्थम्; देवदत्तयज्ञदत्तादिन्यायेनौपाधिकभेदे [3]लोकशरीराणामिव स्वभोगसाधनत्वायोगादिति भावः। **अवतारवृत्तान्ताः**—प्रतिसंधीयमाना इति शेषः। **न हि नित्यसर्वज्ञतयेति**। अन्यथा सर्वज्ञत्वाभावप्रसङ्गादिति भावः ॥ ३१ ॥

पूर्वसङ्गतिरेव सङ्गतिरित्यभिप्रायेणाह—**अपि चेति**। **उपाधिसंयोगमात्रादित्यनेन** सूचितं विकल्पमाह—**किमुपाधिसंयोगेति**। सादेश्याच्चेदित्यनेन सूचितमाह—**उत घटावकाशावदिति**। छेदनादिर्विहित इत्यनेन सूचितमाह—**अथ घटोदकवदिति**। **यद्वा विदारिताग्रेति**। न स्वतोंऽश इत्यनेन सूचितमाह—**यद्वोपाधिसंयोगव्यञ्जितेति**।

[1] स्वात्मकमुपाधिं—पा. [2] सयोगविशेषित—पा. [3] लोके शरीराणा जीवस्य भोग—ग.

तत्त्वमुक्ताकलापः

**बन्धो ब्रह्मण्यशेषे प्रसजति स यदोपाधिसंयोग-मात्रात्**

**सादेश्याच्चेदुपाधौ व्यभिचरति भवेद्बन्धमोक्षा-व्यवस्था ।**

सर्वार्थसिद्धिः

घटाद्यवच्छिन्नपृथिव्यंशवदुपाधिभावेन परिच्छन्न एव वा कश्चिद् ब्रह्मांशः ? इति विकल्पं विभाव्य प्रथमे दोषमाह—बन्ध इति । अत्र नित्यमुक्त ईश्वरांशो निष्कृष्टुं न शक्यः, बद्धमुक्तविभागश्च न स्यादिति भावः । द्वितीयमनुवक्ति—सादेश्याच्चेदिति । तत्रोपाधिसञ्चारदशायां घटाकाशनीत्यैव नियतजीवांशासंभवात् बद्धमुक्तप्रदेशनियमाभावमाह—उपाधाविति । कर्मनिरपेक्षो बन्धः तत्कालसमुचितविद्यानिरपेक्षो मोक्षश्च [1]स्यादित्याकूतम् । एव सति—

आकाशमेक हि यथा घटादिषु पृथग्भवेत् ।
तथाऽऽत्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमान् ॥

इति स्मृतिः कथमिति चेत्; इत्थम्—आकाशोऽपि पृथिव्यादिवत् सभाग., पञ्चीकरणप्रक्रियया तत्सिद्धेः । तद्भागानां त्वेकरूपाणामपि यथा घटादिसयोग[2]भेदैरेव मिथो वैषम्यम्, एवमात्मनां देवादिपिण्डसंयो-

आनन्ददायिनी

नोपाधिरित्यनेन सूचितमाह—**घटाद्यवच्छिन्न इति** । किं जीवविषयमुत ब्रह्मविषयमिति विकल्प्य उभयथाऽपि तव न प्रमाण-मित्याह—**आकाशोऽपीति** । एतादृशवचनानि यथा घटकरकादिषु वृद्धि-

[1] स्यातामित्या—पा. [2] भेदादेव—पा.

तत्त्वमुक्ताकलापः

## अच्छेद्ये च्छेदनादिर्विहत उपाधिभिर्न स्वतोऽशस्तवास्मिन्

सर्वार्थसिद्धिः

गमेदैरिति जीवविषयत्वे निर्वाहः। परमात्मविषयत्वेऽपि ब्रूमः। अत्र तत्तत्संसर्गप्रयुक्तविकारादिराहित्ये तात्पर्यम्। एतच्च वृद्धिह्रासादिसूत्र-भाष्ये व्यक्तमनुसंधेयमिति।

एक एव हि भूतात्मा भूतेभूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥

इत्यपि गतार्थम्।

घटध्वंसे घटाकाशो न भिन्नो नभसो यथा॥

इति मुक्तविषयस्मृतिरप्यौपाधिकविशेषनिवृत्तिपरा। न ह्यत्र घटाकाशस्य नभस्तत्त्वतादात्म्यं [1]निर्दिश्यते; तस्य घटसंयोग-दशायामप्यवस्थानात्। नापि बहिर्भूतमहाकाशादितादात्म्यम्; तस्य घटध्वंसदशायामप्यसंभवात्। तत्समानतापत्तिस्त्वैक्यविरोधिन्येव। तृतीयचतुर्थौ दूषयति—**अच्छेद्य** इति। पञ्चमेऽपसिद्धान्तमाह—**न स्वत**

आनन्ददायिनी

ह्रासभाक्षु पृथक्पृथक् संयुज्यमानमप्याकाशं वृद्धिह्रासादिदोषैर्न स्पृश्यते तथाऽय परमात्मेत्यादिना 'वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्या-देवं दर्शनाच्च' इत्यत्र भाष्येण भाष्यकारो निरूह इत्याह—**एतच्चेति**। **भूतात्मेत्यत्र** भूतानां प्राणिनामन्तरात्मेतश्चिरविषयतया गतार्थमि-त्याह—**एक एव हीत्यादि**। तत्र हेतुमाह— **न हीति**। **घटध्वं-स इति** विशेषोक्ति[2] वैयर्थ्यादित्यर्थः। **असंभवादिति**। तत्प्रदेशस्य

[1] निदर्श्यते—पा. [2] वैयर्थ्यमित्यर्थः—ग.

तत्त्वमुक्ताकलापः

**नोपाधिर्जीवतामप्यनुभवितुमलं ब्रह्मरूपोऽप्यचित्त्वात् ॥ ३२ ॥**

**नापि ब्रह्मण्यविद्यास्थगितनिजतनौ विश्वमेतद्विवृत्तं**

सर्वार्थसिद्धिः

इति । षष्ठे त्वचि[1]दंशविभागक्लांसिव्याघातमाह—**नोपाधिरिति**। भूतेन्द्रियचैतन्यवादसमोऽयं पक्ष [2]इति भावः ॥ ३२ ॥

इति ब्रह्मण औपाधिकजीवभावभङ्गः.

---

एवमिह जैनगन्धिनां जल्पितानि निराकारिषत । अथ सौगतगन्धिनां निराक्रियन्ते । तत्र प्रत्यस्तमितसमस्तभेदकूटस्थविज्ञानैकरसं ब्रह्मानाद्यनिर्वचनीयाविद्यातिरो[3]हितस्वस्वरूपमनन्तभेदप्रपञ्चात्मना विवर्तत इति मृषावादस्तावदपोह्यते—**नापीति**। आस्तां तिरोधानम्, आलो-

आनन्ददायिनी

प्रदेशान्तरत्वायोगादिति भावः । नन्वौपा[4]धिको भेद इत्यस्योपाधिनिष्ठो भेद इत्यर्थः । तथा चोपाधेरेव बहुधा भिन्नस्य केचिदंशा[5]श्चेतयन्तां? तथा च न पूर्वोक्त[6]दोषा इत्यत्राह—**भूतेन्द्रियेति**। तथा सति देहातिरिक्तात्मा नैव स्यादिति भावः ॥ ३२ ॥

औपाधिकजीवभाववादभङ्गः.

---

प्रसङ्गसंगतिमाह—**एवमिति**। अवसरसंगतिरित्यन्ये। प्रत्यस्तो निरस्तो मितो ज्ञातो भेदो यस्येति तथोक्तः । यद्वा प्रत्यस्तमितः निरस्त इत्यर्थः । विवर्तो विकारः । **आस्तामिति** । तद्विचारो वन्ध्या-

[1] दशकुसि–पा. [2] इति च भावः–पा. [3] हितस्वरूप–पा. [4] भिकोऽस्य धत्युपाधि–क. ख. [5] श्चेति कथंता–ग. [6] दोष इत्य–ग.

तत्त्वमुक्ताकलापः

**तस्मिन् सा स्वप्रकाशे कथमिव विलगेत्तत्प्रकाशैकबाध्या ।**

**न ह्येतस्मिन्नविद्याविलयकृदधिको वृत्तिवेद्यो विशेषो**

सर्वार्थसिद्धिः

क्रमनिषेधान्धकारस्येवानादिस्वप्रकाशब्रह्मसंनिधौ तदज्ञानस्य स्वरूपलब्धिरेव न स्यादित्यभिप्रायेणाह —तस्मिन्निति । प्रदीपकज्जलन्यायशङ्कापनुत्त्यै विरोधं व्यनक्ति —तत्प्रकाशैकबाध्येति । ननु ब्रह्मस्वरूपप्रकाशो नाज्ञान बाधते, किंतु साक्षित्वेनावस्थाय साधयत्येव। तत्त्वावेदकवाक्यजन्य तु वृत्तिज्ञानं तद्बाधकमित्यत्र वृत्तेर्बाधकत्व विषयस्थविशेषप्रकाशनशक्त्या स्वरूपशक्त्या वेति विकल्प सङ्कल्प्य प्रथमं प्रतिक्षिपति—न हीति । अधिकः— स्वरूपादन्यः । विशेषस्याविद्याविलयहेतुत्व स्वधीद्वारा । यदि तु वृत्तिः कल्पितविशेषविषयतया ब्रह्माज्ञानं बाधेत तर्हि तत्त्वधीबाध्यत्वं तस्य न स्यात् । द्वितीयमनुवदति

आनन्ददायिनी

सुतस्योद्वाहविचारतुल्य इत्यर्थः । प्रदीपेति । कज्जलस्य प्रदीपजन्यत्वमेव न तु निवर्त्यत्वम् । तथाऽत्राङ्गीकारेऽनिर्मोक्षप्रसङ्ग इति भावः । स्वरूपशक्त्या वृत्तित्वेन विशेषस्य स्वरूपातिरिक्तस्य सत्यत्वे द्वैतप्रसङ्गेन [1]कल्पितं तद्वक्तव्यमिति तत्राह— यदि त्विति । ननु माऽस्तु तत्त्वधीबाध्यत्वं, तावताऽविद्यानिवृत्तौ विशेषाभावादिति चेत्, न । तथात्वे

[1] कल्पनं तद्वक्तुमिति—ग.

तत्त्वमुक्ताकलापः

## बाधो वृत्तिस्वरूपाद्यदि भवति तदा ज्ञानबाध्यत्वभङ्गः ॥ ३३ ॥

सर्वार्थसिद्धिः

— बाध इति। वृत्तिस्वरूपात् प्रदीपवह्निमुद्गरादिवत् किञ्चित्प्र[1]काशननिरपेक्षादिति यावत्। दूषयति—तदेति। अज्ञानस्य ज्ञाननिवर्त्यत्वं न स्यात्; तत एव मिथ्यात्वलक्षणातिक्रम इति भावः ॥ ३३ ॥

इति साविद्यब्रह्मविवर्तवादभङ्गः.

---

आनन्ददायिनी

तद्विषयस्यापि विशे[2]षस्याध्यासहेतुत्वेनाविद्यास्थित्या भाव्यमिति शुक्त्यज्ञानवदेकदेशेन निवृत्तिः स्यात्, न तु कात्स्न्र्येन। ननु मूलाज्ञानेन विशेषोऽप्यध्यस्त एव स्वगोचरज्ञानेन तद्बाधताम्, तस्मिन् बाधिते उपादाननिवृत्त्या विशेषो निवर्तत इति सर्वनिवृत्तिलक्षणो मोक्षः संगच्छत इति चेत्, न। तथा सति तस्य मिथ्यात्वं न [3]स्यात्; ज्ञाननिवर्त्यत्वाभावात्। न च यथाकथंचित् ज्ञानाधीननिवृत्तिमत्त्वं विवक्षितामिति वाच्यम्। तथा सति पुरुषोत्तमादिदर्शनजन्यनिवृत्तिमत्पापादेरिव सत्यत्वे बाधकाभावात्। न च ज्ञानानिवर्त्यत्वेऽपि मिथ्योपादानकत्वात् मिथ्यात्वमिति वाच्यम्। असत्यात् सत्योत्पत्तिं वदतस्तव तदयोगात्। उपादानत्वनिमित्तत्ववैषम्यस्याकिंचित्करत्वादित्याह—वृत्तिस्वरूपादिति। तथा सति निर्विशेषज्ञानार्थं अखण्डार्थ[4]कल्पनादिवैयर्थ्यमिति भावः। अज्ञानस्येति। निवर्तकस्य किंचित्प्रकाशरूपत्वाभावे ज्ञानत्वाभावादिति भावः। तर्हि को दोष इत्यत्राह—तत एवेति ॥ ३३ ॥

साविद्यब्रह्मविवर्तवादभङ्गः.

---

[1] काशनिर—पा. [2] षाध्यास—क. [3] स्यात्, अज्ञान?—क. [4] र्थादिकल्पना-वैयर्थ्यादिति—क.

तत्त्वमुक्ताकलापः

**छन्नत्वे स्वप्रकाशादनधिकवपुषो ब्रह्मणः स्याद-भावो**

**भावानां छादनं हि स्फुरणविलयनं तस्य वोत्पत्तिरोधः।**

सर्वार्थसिद्धिः

तिरोधिमपि दूषयति—**छन्नत्व** इति। घटादीनां स्वस्वरूपातिरिक्तप्रकाशवत्त्वात्तन्निवर्तकैस्तिरोधान युक्तम्, ब्रह्मणस्तु न तथेत्याशयः। अभावापत्तिं तिरोधानविकल्पेन व्यनक्ति—**भावानामिति**। **स्फुरणविलयनं**—सिद्धस्य प्रकाशस्य नाशः। **तस्य**—स्फुरणस्येत्यर्थः, असिद्धस्येत्यर्थापन्नम्। ननु वृत्त्यधीनप्रकाशान्तरापेक्षया तिरोधानं सिध्येत्, तन्न; तस्यापि ह्यनुत्पन्नस्य नाश्यत्वायोगादुत्प-

आनन्ददायिनी

दूषणप्रसङ्ग एव सङ्गतिरिति सूचयति—**तिरोधिमपीति**। व्यवहारसामग्र्यां सत्यां व्यवहाराभावो नास्ति न प्रकाशत इति व्यवहारयोग्यत्वमित्यादेरतिरोहितेऽपि सम्भवात्तिरोधाननिवृत्तावपि अतिप्रसक्तेरप्रकाशमानेऽपि दुःखादौ[1] तिरोधानाद्यभावात्तिरोधानाभावे च विप्रलम्भादिव्यवहारवैपरीत्या[2]दतिव्याप्तयव्याप्तयोश्च प्रसङ्गात्तिरोधानशब्दार्थ[3]सम्भवे लोकसिद्धतिरोधानशब्दार्थाभिप्रायेणाह—**तिरोधानविकल्पेनेति**। विलयनपरत्वभ्रान्तिं वारयति—**स्फुरणस्येत्यर्थ इति**। **अर्थापन्नमिति**। अर्थादापन्नमित्यर्थः। उत्पन्नस्यो-

[1] मुखादौ—क [2] लम्भकादि—क. [3] दतिव्याप्तयाश्च—क. [4] र्थत्वासभवे—क.

तत्त्वमुक्ताकलापः

**मिथ्यादोषाद्भ्रमोक्तौ कथमधिकरणं सत्य-मित्येव वाच्यं**

**नाधिष्ठानानवस्था भवतु तव यथा नास्त्य-विद्यानवस्था ॥ ३४ ॥**

सर्वार्थसिद्धिः

त्तिरोध इत्येष्टव्यम् । ततश्च सत्यामविद्यायां कथ तद्बाधिका वृत्तिरुत्प-द्यते ? अन्यतस्तन्निवृत्तौ किं पुनरेषा वृत्तिस्साधयेत् ? स्वयमेवाविद्यां निवर्त्योत्पद्यत इति चेन्न ; परस्पराश्रयापत्तेः, स्वोत्पत्त्या प्रतिबन्धक-निवृत्तिः तया च सेति । एवं तिरोधानं दूषितम् । तदधीनं विक्षेपमपि विक्षिपति—**मिथ्येति** । सर्वासु भ्रान्तिष्वधिष्ठानदोषयोस्सत्यत्वमारोप्यस्य

आनन्ददायिनी

त्पत्तिप्रतिबन्धासम्भवादिति भावः । **ततश्चेति** । उत्पत्तिप्रतिबन्धक-तिरोधायकसत्त्वे प्रतिबन्धकाभावरूपकारणाभावाद्वृत्तिरेव नोदियादि-त्यर्थः । ननु रजतमिति धियि सत्यामेव नेदं रजतमिति धीरुत्पद्यते । ततश्च तत्र विशेषददर्शनादिविशिष्टैव प्रतिबन्धिकेति विशेषदर्शने सति प्रतिबन्धका[1]भावात्तिरोधायकस्यापि प्रत्यक्षशब्दादिविशेषवृत्ति-सामग्र्यसमवहितस्यैव प्रतिबन्धकत्वमिति कथ वृत्त्यनुत्पत्तिरिति चेत्त-त्राह—**एवं तिरोधानमिति** । अय भावः—नित्य हि ज्ञानं व्यव-हारहेतुश्चेत्कल्पितं तिरोधानमकिंचित्करम् । वृत्तिज्ञानस्य व्यवहार-हेतुत्वे च वृत्तिसामग्रीभूतप्रत्यक्षादेस्सत्त्वे वृत्तिरुत्पद्यत एवेत्यस्मिन् पक्षेऽपि तिरोधानमकिंचित्करमेवेति । **विक्षिपति**—निरस्यतीत्यर्थः ।

[1] भाववत्ति रो—क.

## सर्वार्थसिद्धिः

च मिथ्यात्वं दृष्टम्। ततश्च माध्यमिकं प्रति निरधिष्ठानभ्रमानुपपत्तिं वदन् भ्रममूलस्य दोषस्य कथं मिथ्यात्वं ब्रवीषि? यद्यधिष्ठानं मिथ्या तदा तदध्यासस्याधिष्ठानान्तरं वाच्यम्। एवं चानवस्था स्यादिति चेत्, दोषमिथ्यात्वेऽपि तदध्यासार्थं दोषान्तरापेक्षयाऽनवस्था स्यादेव; यदि दोषस्य स्वरूपतः प्रवाहतो वाऽनादित्वान्नानवस्थादोष इति मन्यसे, एवमधिष्ठानमिथ्यात्वेऽप्यधिष्ठानस्य दोषवदुभयथाऽनादित्वान्न दोषः स्यात्। अथ स्यात् —न वयं निरधिष्ठानभ्रमभीत्याऽधिष्ठानस्य सत्यत्वं ब्रूमः; अपि तु "सत्यं ज्ञानमनन्तं ब्रह्म" [1] इत्यादिश्रुतिसिद्धमङ्गीकुर्म इति चेत्, तर्हि दोषनयाऽभिमताया जगत्प्रकृतेरपि—

गौरनाद्यन्तवती सा जनित्री भूत[2]भावनी।
अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम्॥

इत्यादिभि[3]रनश्वरत्ववचनात् सर्वकालानुवृत्त्या सत्यत्वमङ्गीकार्यम्। "भूयश्चान्ते विश्वमायानिवृत्तिः" इति तद्विनाशः श्रुत इति चेन्न; पुरुषस्य मायासबन्धनिवृत्तौ तत्र तात्पर्यात्। मायाशब्द एव मिथ्यात्व बोधयतीति चेन्न, आश्चर्यसृष्टिहेतुतया तदुपपत्तेः; अन्यथा "देवमायेव निर्मिता" "तेन मायासयस्तं तत्" इत्यादिविरोधात्।

### आनन्ददायिनी

**उभयथा**—स्वरूपतः प्रवाहतश्चेत्यर्थः। **अथेति**। तथा च कस्यापि सत्यत्वमनपेक्षितमिति भावः। **सर्वकालानुवृत्त्येति**। मिथ्याभूतस्य ज्ञाननिवर्त्यत्वानुरोधेन सर्वकालानुवृत्त्ययोगात्तदनुवृत्ता[4]वपि तस्य मिथ्यात्वे तस्य पारिभा[5]षिकत्वप्रसङ्गात् अनिर्मोक्षापत्तेश्चेति भावः। **भूयश्चान्त**

[1] इति श्रुतिसिद्ध—पा [2] भाविनी—पा. [3] रनवयवत्व—पा [4] वपि मिथ्यात्वे तस्य पारि—ग. [5] भाषिकसर्वप्रसङ्गा—ग.

## सर्वार्थसिद्धिः

न च शुक्ति[1]रूप्यादौ क्वचिदपि मायाशब्दो दृष्टः। नापि मिथ्याशब्द-पर्यायतया मायाशब्दं लोकवेदनिघण्टुकाराः पठन्ति। "अनृतेन हि प्रत्यूढाः" इत्यत्रानृतशब्दो न जगत्प्रकृतिविषयः, किंतु ऋतेतर-दुष्कर्मपरः; ऋतं चात्र फलाभिसन्धिरहितं कर्म स्यात्। कारणविषय-त्वेऽपि ब्रह्मविषयासच्छब्दवदान्यपर्यमवसेयम्। एतेन "नासदासीन्नो

## आनन्ददायिनी

इति। तथा च न नित्यत्वं श्रुतमिति भावः। **न च शुक्तिरूप्या-दाविति**। तथा च क्वचित् प्रयोगोऽस्ति चेदुक्तरीत्याऽन्यथा नेय इति भाव। ननु 'अनृतेन हि प्रत्यूढाः' इति जगत्कारणप्रकृतेरनृतत्वा-भिधानान्मिथ्यात्वं सिध्यतीत्यत्राह—**अनृतेन हीति**। प्रत्यूढिस्तिरो-धानम्। नन्वनृतशब्दस्य दुष्कर्मपरत्वं कथमित्यत्राह—**ऋतं चेति**। 'ऋत पिबन्तौ सुकृतस्य लोके' इत्यादौ सत्कर्मणि ऋतशब्ददर्शना-त्तदन्यदुष्कर्मपर इत्यर्थः। **कारणविषयत्वेऽपीति**। प्रकृतिपरत्वेऽप्य-नित्यभोगप्रदत्वादिरूपान्यपर्यमित्यर्थः। ननु 'नासदासीन्नो सदासी-त्तदानीं नासीदजो नो व्योमापरोधम्, इति नासदासीयसूक्तोपक्रमस्थेन वाक्येन 'न सत्तन्नासदुच्यते' इति स्मृत्या च जगत्कारणप्रकृतेर-निर्वचनीयत्वमुच्यते। 'नासदासीन्नो सदासीत्' इति प्रलये विद्यमानस्य प्रधानद्रव्यस्य सदसद्विलक्षणत्वप्रतिपादनात् तदेवानिर्वचनीयत्वं मिथ्यात्व-मिति चेत् तत्राह—**एतेनेति**। अयं भावः—'यदन्यद्वायोरन्तरिक्षाच्च तत्सत् वायुरन्तरिक्ष चात्येति' इति सदसच्छब्दयोः प्रत्यक्षपरोक्षभूत-वाचकत्वदर्शनात् 'न सत्तन्नासदुच्यते' इति स्मृतेश्च भूतपञ्चक-विषयत्वाच्च प्रलयकाले पृथिव्यादिभूतपञ्चकाभावपरतयाऽनिर्वचनीयप्रति-

[1] रूप्यादिषु क–पा.

तत्त्वमुक्ताकलापः

## दोषाभावेऽप्यविद्या स्फुरति यदि ततः किं न विश्वं तथा स्यात्

सर्वार्थसिद्धिः

सदासीत्तदानीं" "न सत्तन्नासदुच्यते" [1]इत्याद्यपि सदसच्छब्दाभिप्रेतव्यष्टिभेदप्रलयपरतया न तद्वैलक्षण्याय योज्यमिति ॥ ३४ ॥

### तिरोधानाद्यनुपपत्तिः.

अथाविद्यास्वरूपसिद्धिरूपब्रह्मणस्तत्साक्षित्वं दोषनिरपेक्षं तत्सापेक्षं वेति विकल्पे पूर्वानुवादेनानिष्टमाह—**दोषेति**। मिथ्याभूतस्य कस्यचिद्दोषनिरपेक्षप्रकाशत्वे वियदादिप्रपञ्चस्यापि तथात्वं लाघवात् स्वीकार्यमेव। न चासौ प्रपञ्चप्रतिभासहेतुर्दृष्टः, येन लोकसिद्धदोष-

आनन्ददायिनी

पादनपरत्वाभावात्, अन्यथा सर्वदा सदसद्विलक्षणरूपप्रपञ्चस्य सत्त्वेन तदानीमिति प्रलयकालमात्रोपादानायोगात्; तदाह—**सदसच्छब्दाभिप्रेतव्यष्टिभेदेति**। व्यष्टीनामेव सदसच्छब्दवाच्यत्वमिति भावः ॥ ३४ ॥

### तिरोधानानुपपत्तिः.

अविद्याध्यास एव न संभवति कुतस्तरां तदधीनाध्यास इति पूर्वसंगत्याऽऽह—**अथेति**। **मिथ्याभूतस्येति**। तदर्थमविद्या व्यर्थेति भावः। ननु रूप्याध्यासे चाकचक्यादेरिवान्वयव्यतिरेकसहकृतप्रत्यक्षसिद्धत्वादविद्या स्वीकार्येत्यत्राह—**न चेति**। ननु विमतं प्रमाणज्ञान-

[1] इति च स.—पा.

तत्त्वमुक्ताकलापः

**सा चान्यां कल्पिकां चेदभिलषति तदा साऽपि चेत्यव्यवस्था।**

**नापेक्षा चेदनादेरकलुषधिषणागोचरत्वात् सती स्यात्**

सर्वार्थसिद्धिः

वन्न त्यज्येतेति भावः। अनुमानं तु निरसिष्यते। उत्तरानुवादेनानवस्थामाह—**सेति**। अनवस्थापरिहारं शङ्कते—**नापेक्षेति**। स्वरूपानादेस्तावदविद्याया न कल्पकापेक्षा, प्रवाहानादेर्नानवस्था दोषः स्वकारणातिरिक्तानपेक्षणादिति भावः। पक्षद्वयेऽप्यनिष्टमाह—**अकलुषेति**। स्वरूपानादिरविद्या निर्दोषया संविदा भाति; अन्यथा अनवस्थानात्। तथा च सत्यत्वं दुस्त्यजम्। अविद्या स्वप्रकाशे स्वकार्यप्रकाशे च स्वयमेव दोष इति मन्यसे, तर्हि सर्वमप्यनिर्वचनीयं दोषान्तरमन[1]पेक्ष्यावभासेत, अविशेषात्। अन्यदनिर्वचनीयं कादचित्कत्वात् कारणमपेक्षत इति चेत्,

आनन्ददायिनी

मिति वक्ष्यमाणानुमानात् सिद्धिरित्यत्राह—**अनुमानं त्विति**। उत्तरपद्य इति शेषः। **स्वकारणातिरिक्तेति**। मूलक्षयकृत्त्वाभावादित्यर्थः। **अन्यथेति**। तस्य दोषाङ्गीकारे तस्यापि तथेत्यनवस्थेत्यर्थः। **तथा चेति**। निर्दोषसंविद एव विषयसत्यत्वापादकत्वा[2]दिति भावः। **अन्यदिति**। यद्यप्यन्यस्य दोषत्वं वक्तुं शक्यते, तथाऽपि स्वप्रकाशेन तस्य दोषत्वं तदध्यासपूर्वभावित्वाभावात्। [3] तथा च अनिर्वच-

[1] पेक्ष्य भासे—**पा.** [2] दित्यर्थः—**ग.** [4] तथा च न निर्वच—**ग.**

## सर्वार्थसिद्धिः

किमतः ? न हि मृदादयो घटादीनां हेतवोऽपि दोषा इति व्यवहियन्ते। न च स्वेष्टमुक्तिहेतोर्दोषत्वं ब्रूषे। भवन्तु वा हेतवो दोषाः। अविद्याप्रवाहवादिभिः पूर्वनिवृत्तावप्युत्तरस्य स्थैर्यमङ्गीकृतम्, चिरप्रकाशश्च। तत्र दोषनिवृत्तावपि सिध्यता प्रकाशेन [1]प्राग्वाद्विषयस्य सत्यत्वं प्रसज्येत। सामग्र्यवस्थपूर्वदोषचरमक्षणजनितावुत्तरप्रकाशौ चिरमनुवर्तेते इति चेन्न; विषयस्थैर्येऽपि वृत्तिप्रकाशानामाशुतरविनाशित्वाभ्युप-

## आनन्ददायिनी

नीयान्तरस्य कारणतया सिध्यन् दोषोऽविद्येति भावः। **किमत इति**। अस्तु कारणं, स तु न दोषः किं तु दण्डादिरेव, न तु तदतिरिक्ताविद्याख्यं दोषान्तरमित्यर्थः। यदि कारणानामेव दोषत्वं तदा दोषमाह —**स्वेष्टेति**। तथा सति मुक्तेर्मिथ्यात्वमापद्यत इति भावः। **पूर्वनिवृत्तावपीति**। उत्तराविद्यां सम्पाद्य पूर्वस्यनिवृत्तौ उत्तरमविद्योपादानकं न स्यात्; तत्सत्त्वे तु तयैवोपपत्तावविद्यान्तरं व्यर्थमित्येकाविद्यापक्ष एव स्यात्तथोत्तरप्रकाशश्च ब्रह्मप्र[2]काशवच्चिरप्रकाश एवेति दोषसहितप्रकाशत्वाभावात्[3]सत्यत्वमापद्येतेति भावः। ननु पूर्वदोष[4]जनितत्वादुत्तरस्य दोषस्य तत्प्रकाशस्य च न दोषनिरपेक्षप्रकाशत्वेन सत्यतेति शङ्कते—**सामग्र्यवस्थेति**। उत्तरं च प्रकाशश्च उत्तराविद्या प्रकाशश्चेत्यर्थः। **विषयस्थैर्येऽपीति**। विषयनिवृत्तावपि ज्ञानसत्त्वाशंसा गगनकुसुममकरन्दाशंसातुल्येत्यर्थः। ननु धारास्थले स्थैर्यावगमात् विषयापगमेऽ-

---

[1] प्राग्विषय—**पा.** [2] काशश्चिरप्रकाश—**ग.** [3] सत्त्वमापाद्येतेति—**क.**
[4] जन्यत्वा—**ग.**

तत्त्वमुक्ताकलापः

## ब्रह्मैवास्यास्तु दोषो यदि न तु विरमेद्ब्रह्मणो नित्यभावात् ॥ ३५ ॥

सर्वार्थसिद्धिः

गमात्, सामग्रीसन्तत्या धारावाहिकदृष्टेश्च। न चाध्यासकाल एवाविद्या भाति, पश्चात्तु स्वरूपेणैवावतिष्ठत इति वाच्यम्, संविदधीनस्वसिद्धेस्तस्या अप्रकाशमानक्षणावस्थानायोगात्। ईश्वरस्य भातीति [1]चेन्न ; ईश्वरस्य बुद्धेरप्यदोषायत्तप्रकाशत्वे तद्विषयस्य सत्यत्वं सिध्येत् ; दोषायत्तत्वे तु तद्दोषप्रकाशो निर्दोषस्य सदोषस्य वेति विकल्पदौःस्थ्यं प्राग्वत्। अथान्यनिरपेक्षं ब्रह्मैवाविद्याप्रकाशप्रयोजको दोष इति शङ्कते—**ब्रह्मेति**। एवं सति स्वरूपतः प्रवाहतो वाऽनादिरविद्या नोच्छिद्यत इत्याह—**न त्विति**। तत्र निरपेक्षदोषानुवृत्तिं हेतुमाह—**ब्रह्मण** इति। तत्त्वधीप्रागभावविशिष्टस्य दोषत्वात् तदभावे कथम-

आनन्ददायिनी

पि स्थैर्यमस्त्वित्यत आह—**सामग्रीति**। सामग्रीभेदस्य कार्यभेदकत्वादिति भावः। [2]नन्वविद्या प्रकाशकत्वाभावेऽप्यनुवर्ततां, न तु तन्निवृत्त्या निवृत्तिरित्यत्राह—**न चाध्यासकाल इति**। **संविदधीनेति**। तथा च तत्सिद्धिर्न स्यादिति भावः। ननु स्वगोचरसंविन्मात्रसत्त्वं विवक्षितं, न त्वस्मदादिसंवित्सत्त्वमित्याशङ्कते—**ईश्वरस्येति**। **अथेति**। तथा च नानवस्थेति भावः। तत्त्वधीरपि यदि

---

[1] चेन्न : बुद्धे.—पा. [2] नन्वविद्याभावे—ग.

तत्त्वमुक्ताकलापः

## ज्ञातेऽज्ञातेऽप्यभावः

सर्वार्थसिद्धिः

विद्या भासेतेति चेत्, हन्तैवं प्राप्ताप्राप्तविवेकेन तत्त्वधीप्रागभावस्यैव दोषत्वमायातम्; अलं भावरूपाविद्यादोहलेनेति ॥ ३५ ॥

## इत्यविद्यादर्शनानुपपत्तिः.

---

ननु यदज्ञानमात्मसाक्षिकं भाति, तद्भावरूपमेव स्यात् ज्ञानप्रागभावस्य दुर्ग्रहत्वादिति शङ्कते—ज्ञात इति। अय भावः—अभावो ह्याश्रयप्रतियोगिनिरूप्यः; प्रतियोगि च ज्ञानम्, तत्र सर्वज्ञानाभाव. स्तावन्न कदाचिदपि ग्राह्यः; अभावज्ञानस्य तदाश्रयप्रतियोगिज्ञानस्य

आनन्ददायिनी

चैतन्यं तदा प्रागभावस्यैवासिद्धेरध्यास एव कदाऽपि न स्यादिति जन्य[1]वृत्तिरूपधीरेव वाच्येत्यभिप्रायेणाह—हन्तेति ॥ ३५ ॥

## अविद्यादर्शनानुपपत्तिः.

---

नन्वहमज्ञ इति प्रत्यक्षेणैव भावरूपाज्ञानसिद्धिरित्युत्थितेः सङ्गतिरित्याह—नन्विति। आत्मसाक्षिकं—प्रत्यक्षमित्यर्थः। ननु ज्ञातेऽज्ञाते वा कथं दुरधिगमोऽभावः तत्त्वे वा कथं तस्याभावत्वं विरोधादित्यत आह—अयं भाव इति। अहमज्ञो न जानामीति किं ज्ञानसामान्याभावो विषयः, आहोस्वित् तद्विशेषाभाव इति विकल्पमभिप्रेत्याद्यं दूषयति—तत्रेति। अभावेति। सामान्याभावस्य यत्किंचित्-

[1] वृत्तिर्धीरे—ग.

तत्त्वमुक्ताकलापः

**खलु दुरवगमस्संविदस्ते[1]न भावः**
**स्यादज्ञानं यदीहाप्यपरिहृतामिदं**

सर्वार्थसिद्धिः

च विद्यमानत्वात् । अथ विषयविशेषज्ञानावच्छिन्नस्य ज्ञानान्तरस्य प्रागभावः सुग्रह इत्युच्येत; तदपि न. विषयविशेषज्ञानसदसद्भावयोस्तज्ज्ञानाभावस्य दुर्ग्रहत्वात् । षष्ठप्रमाणवेद्यश्चाभावः कथमपरोक्षधीविषयः स्यात् ? भावरूपाज्ञाने तु न तावद्भावाभावरूपत्वविरोधः; न चान्यत् किंचिदिह स्यादिति । अतः स्वेष्टस्य फलितत्वमाह—तेनेति । ईदृशं दुर्ग्रहत्वं त्वदिष्टेऽपि स्यादिति प्रत्याह—इहापीति । तत्र तदुक्तमेव

आनन्ददायिनी

प्रतियोगिनाऽपि विरोधादिति भावः । द्वितीयं शङ्कते—**अथेति**। **विषयविशेषज्ञानेति** । तज्ज्ञानसत्त्वे प्रतियोगिन एव सत्त्वेनाभावस्याभावात् तद[2]सत्त्वे तद्विशिष्टप्रतियोगिज्ञानाभावेनाभावग्रहणासम्भवादित्यर्थः । ननु विषयविशेषज्ञानस्य कस्यचित् सत्त्वेऽपि कस्यचित् प्रागभावसम्भवात् तद्ग्रहः स्यादिति चेन्न । तथाऽपि प्रतियोगिसजातीयस्याप्रतियोगिनोऽपि सत्त्वं तज्ज्ञानप्रतिबन्धकमेव, येनाकारेणाभावज्ञाने प्रतियोगी भासते तदाकारेण ज्ञायमानस्यान्यस्यापि प्रतिबन्धकत्वात् । अन्यथा घटे ज्ञायमान एव घटं न जानामीत्यनुभवापातादिति भावः । अभावमात्रस्यैवाप्रत्यक्षत्वान्नज्ञानाभावः प्रत्यक्षाविषय इत्याह—**षष्ठेति**। ननु तदभावव्याप्यत्वं विरोधोऽस्त्वित्यत्राह—**न चान्य इति** । [3]स्वविषयज्ञानेन सह तादृशस्यापि विरोधस्याभावादित्यर्थः । अत

[1] न वेद्य स्या—**पा.** [2] सत्त्वेन विशिष्ट-**क.** [3] स्वविषयकाज्ञा—**क.**

तत्त्वमुक्ताकलापः

**तद्विरोधादिसाम्यात् ।**

सर्वार्थसिद्धिः

हेतुमाह—**तद्विरोधेति** । भावरूपस्यापि ह्यज्ञानस्य ज्ञानविरोधित्वं समानम् ; तस्य तद्बाध्यत्वाभ्युपगमात् । आदिशब्देन विषयविशेषनिरूप्यप्रतिसंबन्ध्यादिसापेक्ष[1]त्वसंग्रहः । अपरोक्षधीविषयत्वं च मतान्तरेणाभावस्याप्यस्ति । षष्ठप्रमाणवेद्यत्वेऽपि विरोधस्समः । तत्रापि प्रमाणतयाऽभिमत उपलब्ध्यभावः केनचित् प्रमाणेन [2]निर्धार्यः । तेन च ज्ञानप्रागभावोऽपि गृह्यमाण आश्रयप्रतियोगिस्वधीसद्भावे कथं सिध्येत् ? । मा भूत्ततोऽपि ज्ञानाभावग्रह इति चेत्तन्न ; ज्ञानाभावस्य दुर्ग्रहत्वं साधयताऽपि हि गृहीत एव ज्ञानाभावः । अन्यथा कथं

आनन्ददायिनी

**इति** । न जानाम्यहमज्ञ इत्यादि प्रत्यक्षविषयस्या[3]भावरूपत्वानुपपत्तेर्भावत्वं वाच्यमित्यर्थः । न चान्य इत्यत्रोत्तरमाह—**भावरूपस्यापीति** । नस्वस्तु विरोधस्तथाऽपि न ज्ञानमात्रेण ; अपि तु समानविषयकेणे-[4]त्यत आह—**आदिशब्देनेति । षष्ठेति** । अधिकरणज्ञानं प्रतियोगिज्ञानं च स्वयमपि प्रतियोगिनाविति प्रतियोग्युपलम्भेनानुपलम्भस्याभावात् कथमनुपलब्ध्याऽप्यभावग्रह इति भावः । किंचानुपलब्धिरपि ज्ञातैवाभावधीहेतुरन्य[5]था परोक्षत्वानुपपत्तेः । उपलम्भसंस्कारप्रमोषस्थलेऽनुपलब्धिभ्रमादभावभ्रमानुपपत्तेश्च । तथा च तत्प्रतियोगिज्ञानसत्त्वेऽनुपलम्भायोगात् अनुपलब्धिर्ज्ञानाभावस्य ग्राहिकेत्यनुपलब्धिवादिनोऽपि ज्ञानाभावः [6]प्रत्यक्ष एष्टव्य इत्याह—**तत्रापीति** । अनुपलब्धिरज्ञातैवाभावधीहेतुः, परोक्षता चेन्द्रियाजन्यतयेति शङ्कते—**मा भूदिति । गृहीत एव ज्ञानाभाव इति** । [7]नन्वज्ञातयैव ज्ञानानुपलब्ध्या ज्ञानाभावो

[1] त्वग्रहः—पा. [2] निर्धार्यते । तेन—पा. [3] भावत्वा—क. [4] त्वताह—क. [5] थाप्यपरोक्ष—क. [6] प्रत्यक्षेणेष्टव्य—ग. [7] नन्वज्ञानानुपलब्ध्या—क.

तत्त्वमुक्ताकलापः

## तुल्यैवाकारभेदात् परिहृतिरुभयोः कल्पितिरत्राधिका ते

सर्वार्थसिद्धिः

प्रमाणज्ञानं पक्षीकृत्य स्वप्रागभावव्यतिरिक्तेत्यादि वक्ष्यसि, देवदत्तप्रमापक्षीकारेण तत्स्थप्रमाभावातिरेकिण इत्यादि च। ननु भावरूपाज्ञानग्रहणे किं तदितरज्ञानेन प्रतियोग्यादिनिरपेक्षत्वादिति चेन्न ; अज्ञानमिति गृह्यमाणस्य तदन्यतया तद्विरोधितया तदभावतया वा प्रतीतौ प्रतियोग्यादिभिर्नैरपेक्ष्यायोगात्। नन्वज्ञानावच्छेदकतया सामान्यतः किंचिद्विषयं प्रतियोगिसाक्षिचैतन्येन ज्ञात्ताज्ञातसर्वग्राहिणा विषयीक्रियते ; विशेषतस्तु गृह्णत् प्रमाणज्ञानं चानादिभावरूपाज्ञानबाधकमिति तत्राह—**तुल्येति**। अभावरूपेऽप्यज्ञाने तथैव प्रतियोगिधीर्व्यवस्थितेति न विरोध इत्यर्थः। तुल्यत्वे कथमितरप्रद्वेष इत्यत्राह—**कल्पितिरिति**। लाघवादभावपक्ष एव ग्राह्य इति भावः। स्यादेतत्-प्रति-

आनन्ददायिनी

[1]गृह्यत इति चेन्न। तथासत्यघटं भूतलमितिवत् अहमज्ञ इत्याद्यनुभवस्याप्यनुपलब्धित्वापत्तेः न प्रत्यक्षेण भावरूपाज्ञानसिद्धिरिति ध्येयम्। **अज्ञानमिति**। अन्यथा [2]ज्ञानभावेऽपि तन्निरपेक्षग्रहोऽस्त्विति भावः। **ज्ञाताज्ञातेति**। ज्ञातत्वेनाज्ञातत्वेन च सर्वं साक्षिवेद्यामित्यभ्युपगादिति भावः। **विशेषतश्च गृह्णत्** साक्षिज्ञानमिति शेषः। **प्रमाणज्ञानम्**—वृत्तिज्ञानम् **इतरत्** भावरूपाज्ञानम्।

---

[1] गृह्यतामिति चेत्तन्न—क. [2] ज्ञानाभावोऽपि—क.

तत्त्वमुक्ताकलापः

**मुग्धोऽस्मीत्यादिसाक्षात्कृतिरपि नियतं तत्प्रतिद्वन्द्विगर्भा ॥ ३६ ॥**

**स्वाजन्मान्यस्वदेश्यस्वविषयवृतिकृत्स्वव्यपोह्यार्थपूर्वा**

सर्वार्थसिद्धिः

संबन्ध्यपेक्षानियमे हि प्रतिबन्ध्यवतारः, स्वरूपेण तु मुग्धोऽस्मि मूढोऽस्मीत्यज्ञानं साक्षिणा प्रकाश्यते; अतो न विरोध इति; तत्राह—**मुग्ध** इति। अयं भाव.—मोहादिशब्दाः खल्वत्र बुद्ध्यभावरूढास्स्वविषयप्रतियोग्यवच्छिन्नमेव स्वार्थमुपस्थापयन्ति, प्रलयादिशब्दवत्, नञ्प्रयोगाभावमात्रान्नैरपेक्ष्याभिमान इति ॥ ३६ ॥

**इति भावरूपाज्ञानप्रत्यक्षभङ्गः.**

---

[1] अत्र **पञ्चपादिकाविवरणोक्तमनुमानमनुभाषते—स्वाजन्मेति।** विप्रतिपन्नं मानज्ञानं स्वप्रागभावव्यतिरिक्तस्वदेशगतस्वविषयावरणस्व-

आनन्ददायिनी

ननु मुग्धोस्मीत्यत्र प्रतियोग्यादिनैरपेक्ष्यव्यवहारात् कथं तदन्तर्भाव इत्यत्राह—**अयं भाव इति।**

**भावरूपाज्ञानप्रत्यक्षभङ्गः.**

---

नन्वस्त्वनुमानं प्रमाणमित्याक्षेपसङ्गत्याऽऽह—**अत्र पञ्चेति। विप्रतिपन्नमिति** पक्षनिर्देशः। **स्वप्रागभावेति।** स्वस्य प्रमाणज्ञानस्य

---

[1] अथ पञ्च—**पा.**

तत्त्वमुक्ताकलापः

**ध्वान्तोत्थाद्यप्रभावद्वि[1]मतमितिरिहापूर्वनिर्भासनाच्चेत् ।**

**अज्ञानाज्ञानभेत्त्री किमियमनुमितिः स्वेष्टभङ्गोऽन्यथा तु**

सर्वार्थसिद्धिः

निवर्त्यवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति प्रयोगः। अत्रैतदनुमानज्ञानं स्वविषयावरणनिवर्तकं न वेति विकल्पे प्रथममनुयुङ्क्ते—**अज्ञानेति**। तदभ्युपगमेऽनिष्टमाह—**स्वेष्टभङ्ग** इति। अज्ञानस्य ह्यज्ञानान्तरावृतत्वे तदपि तथेत्यनन्ताविद्याकल्पितगौरवं स्यात्, आवृता च साक्षिणा न दृश्येत। तत्कटाक्षविरहादलब्धस्वरूपा वन्ध्यासुतेव न प्रजाः प्रजनयेदिति भावः। द्वितीयमनूद्य दूषयति—**अन्यथा त्विति**। यद्यज्ञानविषया-

आनन्ददायिनी

प्रागभावात् भिन्नं च स्वविषयावरणं च स्वनिवर्त्यं च यत् वस्त्वन्तरं तत्पूर्वकमित्यर्थः। स्वप्रागभावस्य वेद्यगतवित्त्यभिव्यक्तिप्रागभावस्वोत्पादकादृष्टस्वोत्पत्तिप्रतिबन्धकादृष्टानि साध्यविशेषणव्यवच्छेद्यानि। वस्त्वन्तरशब्दो वैशद्यार्थः। धारादितीयज्ञाने व्यभिचारवारणायाप्रकाशितशब्दः। आलोकमध्यारोपितदीपव्यवच्छेदार्थोऽन्धकारशब्दः। द्वितीयादिप्रमाव्यवच्छेदक प्रथमोत्पन्नशब्दः। इन्द्रनीलप्रभाव्यावृत्तये प्रदीपग्रहणमिति विशेषणप्रयोजन द्रष्टव्यम्। **अनुमानज्ञानं**–अज्ञानविषयकानुमितिरित्यर्थः। नन्वज्ञानविषयकाज्ञानतप्यन्त्येव, तन्निवर्तन चानुमित्याऽस्त्वित्यत्राह—**अज्ञानस्येति**। किं चाज्ञानस्याप्यावृतत्वेऽज्ञानस्याध्यास एव न स्यादित्याह—**आवृता चेति**। ननु सर्वं ज्ञाततयाऽज्ञाततया

[1] मतमिति–पा.

तत्त्वमुक्ताकलापः

## व्यर्थाऽ[1]सावित्यादिष्वतिचरणमसिद्ध्यादि च स्याद्विकल्पे ॥ ३७ ॥

सर्वार्थसिद्धिः

ज्ञानमनयाऽनुमित्या न निरस्येत, निष्फलैवासौ प्रसज्येत; निरसनीयाभावात्, प्रकाशितमात्रप्रकाशकत्वाद्वा। अपि चेयमनुमितिः पक्षकोटिस्तदन्या वा? आद्येऽशतो बाधः; द्वितीये तस्यामतिचारः। हेतुविकल्पे च दोषानाह—**इन्द्रियादिष्विति**। अयं भावः—प्रकाशहेतुत्वमिह-ज्ञानहेतुत्वम्, ज्ञानकरणत्वम्, तदनुग्राहकत्वम्, ज्ञानत्वम्, विषयविस्फुरणरूपत्वम्, स्वविषयावरणनिरासकत्वमन्यद्वा किञ्चित्?

आनन्ददायिनी

वा साक्षिविषयत्वात् कथं न दृश्यते; कथतरां स्वरूपालाभ इति चेत्। **अत्र वदन्ति**—मिथ्याभूतस्याध्यासेनैव स्वरूपलाभः। अध्यासो हि ज्ञाततयैव, अन्यथाप्रतिभासमानकालत्वायोगनानादितापातात्। तथा च ज्ञानाधीनसत्ताकस्य ज्ञानविषयत्वाभावे स्वरूपालाभ एवेति नाज्ञाततयाऽपि प्रकाश इति। नन्वज्ञानानिवर्तकत्वेऽपि प्रका[2]शकत्वात् सार्थक्यमिति चेत्तत्राह—**प्रकाशितमात्रेति**। तद्गोचराज्ञाने सति तत्प्रकाशायोगात् ज्ञानान्तरेण[3] तन्निवृत्तौ तत एव तत्प्रकाश इति वैयर्थ्यम्। स्वत एवाज्ञानशून्यत्वे सुतरां वैयर्थ्यमिति भावः। **अतिचारः**—व्यभिचारः। नन्विन्द्रियादिष्वतिचरणमित्यनुपपन्न स्वार्थिककप्रत्ययान्तस्य प्रकाशकशब्दस्येन्द्रियादिबोधकत्वाभावादित्यत्राह—**अयं भाव इति**। तस्य कप्रत्ययान्ताकप्रत्ययान्तसाधारण्यादिति

[1] साऽपीन्द्रिया—**पा.** [2] शत्वा—**क.** [3] ण निवृत्तौ—**क.**

## सर्वार्थसिद्धिः

नाद्यः–आत्मादृष्टादिभिरनैकान्त्यात्, ज्ञानस्य च ज्ञानहेतुत्वनियमाभावात्। अत एव न द्वितीयतृतीयौ–इन्द्रियादिष्वतिचाराच्च। नापि चतुर्थः–दृष्टान्तस्य साधनविकलत्वात्, साक्षिज्ञाने च विपक्षे हेतुवृत्तेस्सपक्षवृत्त्यभावाच्च विरुद्धत्वापत्तेः। नापि पञ्चम –पक्षसपक्षयोर्हेतुवृत्त्यभावादेव। नापि षष्ठः–तस्य साध्यानुप्रविष्टत्वात्। सप्तमस्तु–कश्चिन्न

### आनन्ददायिनी

भावः। असिद्धि[1]मप्याह—**ज्ञानस्य चेति।** परामर्शादेस्तद्धेतुत्वादाह—**नियमाभावादिति।** सव्यापारत्वं करणत्वं, तच्चात्मादावप्यस्तीति व्यभिचार इत्यभिप्रायेणाह–**अत एवेति।** यदीन्द्रियादेरेव करणत्वमिति नियमः, तदा तत्रैव व्यभिचार इत्याह—**इन्द्रियादिष्विति। दृष्टान्तस्येति।** प्रदीपस्य ज्ञानत्वाभावेन व्याप्यत्वासिद्धिरिति भावः। **साक्षिज्ञाने चेति।** ननु साक्षिप्रकाशस्याप्रकाशितार्थप्रका[2]शत्वेनैव [3]हेतुत्वं वाच्यम्। तथा[4]च ज्ञाननिवर्तकत्वमप्यस्त्येवेति कथं विपक्षवृत्तित्वमिति चेत्। अत्र वदन्ति—साक्षिज्ञानं न स्वत एवाज्ञाननिवर्तकम्। तथासति ज्ञानस्यानादिनिवृत्तिप्रसङ्गात्। एवं च प्रमाणज्ञानसाहित्ये सति निवर्तकत्वम्। तथाच न साध्यवत्त्वं, अप्रकाशितार्थप्रकाशकत्वं तु रूप्यादिप्रकाशकत्वेनाप्युपपद्यते। रूप्यादेरध्यासात् प्रागप्रकाशितत्वाद्वस्तुतः प्रागभावाभावात् तद्घटितं साध्यं नेति बोध्यमिति। विषयगतं यत् घटः स्फुरतीति स्फुरणं तत्त्वमिति पञ्चमं पक्षमाह—**नापि पञ्चम इति।** प्रमाणज्ञानस्य विषयगतस्फुरणत्वाभावादिति भावः। **तस्येति।** ननु स्वविषयावरणानिवर्तकत्वं साध्यानुप्रविष्टं भवतु; न तावताऽपि साध्याविशेषो विशिष्टस्यान्य-

[1] द्धिमाह–**ग.** [2] काशकत्वे–**क.** [3] हेतुमत्तु–**ग.** [4] चाज्ञान–**क.**

सर्वार्थसिद्धिः

श्यत एवेति। चकारात् दोषान्तराण्यपि द्योत्यन्ते। तथा हि—वप्रागभावव्यतिरिक्तेति स्वदेशगतेति च पृथगुपादानं निरर्थकम्; अभावव्यतिरिक्तेत्येतावतैव वेद्यगतवित्त्यभिव्यक्तिप्रागभावस्यापि व्यवच्छेत्तेः। स्वविषयावरणे च स्थिते स्वोत्पत्तिरेव न संभवतीत्युक्तम्। ब्रह्माश्रयतया चाभ्युपगतस्य विश्वप्रकृतेः तदज्ञानस्य च न घटाद्यज्ञानवत् प्रमाणज्ञानदेशगतत्वं युक्तमिति ॥ ३७ ॥

**इति पञ्चपादिकाविवरणोक्तभावरूपाज्ञानानुमानभङ्गः.**

---

अनन्ददायिनी

त्वादिति चेत्। **अत्राहुः**—स्वविषयावरणनिवर्तकत्वं हि प्रागभावादिनिवर्तकत्वेप्यस्तीति[1]वक्तव्यम्, अन्यथा तदादाय सिद्धसाधनादिवारणाय विशेषणवैयर्थ्यात्। तथाच धारादिद्वितीयादिज्ञानेऽपि व्यभिचार इति तद्व्यवच्छेदार्थं विशिष्टमेव हेतुभाव भजते। भावरूपमेव चावरणं सिसाधयिषितमिति साध्याविशेष इति। आश्रयासिद्धिरित्याह—**स्वविषयावरणे चेति**। आवरणं नाम तज्ज्ञानोत्पत्तिज्ञानप्रतिबन्धः; तस्मिन् सति कथं तदुत्पत्तिः। न च नवीनोक्तरीत्या नास्ति न प्रकाशत इति व्यवहारजनकत्वाद्व्यवहारसामग्र्यां सत्यामिति वक्तुं शक्यं; व्यवहारसामग्र्यन्तर्गतस्य स्वविषयनिश्चयस्य सत्त्वेऽपि यदि नास्तीत्याद्यावरणसत्त्वं तथा सत्यावरणनिवृत्तिरेव न स्यादविरोधात्; न चाविद्यानिवृत्तिरस्तु तन्निवृत्त्याऽऽवरणाभाव इति शक्यशङ्कम्। अविद्याया एव विरोधेन समकालत्वाभावे तत्कार्यावरणादेः सुतरां तत्कालत्वायोगादिति भावः। किंच बाधोऽनिष्ट चेत्याह—**विश्वप्रकृतेरिति**। अन्यथा जीवस्य विश्वोपादानत्वप्रसङ्ग इति भावः ॥ ३७ ॥

**विवरणोक्ताभावरूपाज्ञानानुमानभङ्गः.**

---

[1] वक्तव्यं, तदादा—क.

तत्त्वमुक्ताकलापः

**यच्चोक्तं दैवदत्ती मिति[1]रितरामितिन्यायतो हन्त्यनादिं**

**मात्वात्त[2]न्मित्यभावाधिकमिति तदपि स्याद-बाधं विपक्षे ।**

सर्वार्थसिद्धिः

यत्तु कश्चिदाह—

देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः ।
अनादेर्ध्वंसिनी मात्वाद्यज्ञदत्तप्रमा यथा ॥

इति, तदनुभाषते—**यच्चेति** । दूषयति—**तदिति** । अपिना पूर्वानुमानेऽप्ययं दोषोऽस्तीति ख्याप्यते । विपक्षे बाधकमेव हि प्रतिबन्धरहस्यमाहुः, न चेह तदस्ति ; अतो नेदं साधकमिति भावः ।

आनन्ददायिनी

प्रसङ्गसङ्गतिरित्याह—**यच्चेति** । **चित्सुखोक्तकारिकां पठति-देवदत्तेति** । देवदत्तप्रमा [3]तत्स्थप्रमाभावव्यतिरिक्तानादिनिवर्तिका प्रमात्वात् यज्ञदत्तप्रमावदिति प्रयोगो द्रष्टव्यः । सिद्धसाधनवारणाय देवदत्तेति पक्षविशेषणम्। प्रागभावनिवर्तकत्वेन सिद्धसाधनवारणाय [4]प्रमाभावव्यतिरिक्तेति। तावत्युक्ते दृष्टान्ते साध्यवैकल्यम् ; तत्परिहाराय तत्स्थेति। पूर्वज्ञानादिनिवर्तकत्वेन सिद्धसाधनपरिहारायानादीति। **प्रतिबन्धः**

---

[1] मति—**पा** [2] त्तन्मत्य—**पा.** [3] तदीयप्रमा—**क.** [4] प्रमाभावव्यतिरेकीति—**क.**

तत्त्वमुक्ताकलापः

## नाभावो भावतोऽन्यो न च पुरुषभिदाऽस्त्येकजीवत्ववादे

सर्वार्थसिद्धिः

भावान्तराभावनयेन दूषणमाह— **नाभाव इति**। यद्यभावो भावातिरिक्तः स्यात्तदा ह्यत्राभावव्यवच्छेदार्थं विशेषणं स्यात्। न च भावातिरिक्तोऽभाव इति वक्ष्यते। मा भूत्तर्हि विशेषणमिति चेन्न; परसंमतमात्रसाधने सिद्धसाधनात्। तावदुक्त्या च त्वदिष्टासिद्धेः, तदतिरिक्तस्य चानुपस्थापनात्। परस्य पक्षदृष्टान्तविभागायोगमप्याह— **न चेति**। ये ह्यद्वैतिनो जीवमप्येकमेवेच्छन्ति तन्मते देवदत्त एव यज्ञदत्त [1] इत्यपि कल्प्यते। लोकव्यवहारमात्रात् परसंमत्या वा पक्षादि-

आनन्ददायिनी

व्यासिः। **परसम्मतमात्रेति**। अनादिनिवर्तकत्वस्य प्रागभावनिवर्तकत्वेन सिद्धसाधनादिति भावः। [2]नन्वभावान्तरं यन्मते नास्ति तन्मतेऽपि यन्निवर्तते भावरूप न तदनादि। तथाच कथं सिद्धसाधन[3]मित्यत्राह—**तावदुक्त्येति**। तदेवोपपादयति—**तदतिरिक्तेति**। तथाचेदमेवा[4]भावरूपमिति सिद्धसाधनम्। **अन्ये तु**—अभावान्तराभावेऽपि न जानामीति प्रतीति[5]र्दुर्निवारा। तद्विषयश्चभाव एव ज्ञानविरोधी वर्तत इति सिद्धान्ति[6]सम्मते सिद्धसाधनमित्याहुः। **ये ह्यद्वैतिन इति**। तथाच व्याप्यत्वासिद्धिरिति भावः।

---

[1] इतिकल्प्य—**ग**. [2]ननु भावान्तर यतो नास्ति तन्मतेऽपि—**क**. [3] मित्याह—**ग**. [4] नेवाभावसाधक स्यादिति न भावरूपसिद्धिः। अन्ये तु भावा—**क** [5] र्दुर्वारा—**ग**. [6] सम्मतेः—**ग**.

## सर्वार्थसिद्धिः

[1]भेदक्लृप्तिरिति चेन्न ; स्वानभ्युपगतस्य साधनाङ्गत्वेनोपादानायोगात् । अस्तु नानाजीवमतेन दृष्टान्तोक्तिरिति चेन्न : तन्मतेऽपि जीवानां प्रमाधारत्वासिद्धेः । न हि स्वरूपचैतन्यं वा साक्षिचैतन्यं वा जीवतया कल्पितं वा जीवाश्रितमिति युष्माभिः कल्प्यते । वृत्तिरूपा प्रमाऽन्तः-करणनिष्ठा कथ्यते । अतः पुरुषस्थतया प्रमानिर्देशो न युक्तः । कृपाणादिप्रतिफलितमुखमलिनिमादिन्यायेन प्रातीतिकतया पुरुषस्थ-त्वोक्तिरिति चेन्न ; प्रातीतिकस[2]तामर्थक्रियाकारित्वानभ्युपगमात् । अन्तःकरणवृत्तिद्वयमेव पक्षदृष्टान्ताविति चेन्न ; तस्य परसंमत्यभावेन

### आनन्ददायिनी

**स्वानभ्युपगतस्येति** । अप[3]सिद्धान्तदूषणं न स्यादिति भावः । अत्र किं देवदत्तादि[4]शब्देन जीवचैतन्यं विवक्षितं, उतान्तःकरणं, देवदत्तप्रमेत्यत्र समासान्तर्गतषष्ठ्यर्थः किमाधाराधेय-भावसम्बन्धः, उत यः कश्चिद्वैद्वज्ञानिक इति, तथा प्रमाशब्देनापि चैतन्यमेव उत वृत्तिज्ञानमिति विकल्पमभिप्रेत्याद्ये दोषमाह—**न हि स्वरूपेति**। चैतन्यं हि परमते त्रिधा भिद्यते। शुद्धचैतन्यं ब्रह्म, अन्तः-[5]करणवृत्त्युपहितचैतन्यं साक्षि, अन्तःकरणाद्युपाधिविशिष्टचैतन्यं जीव इति इदं चैतन्यरूपप्रमाणाश्रयमित्यर्थः । प्रमेत्यत्र विकल्पे द्वितीय-मपाकरोति—**वृत्तिरूपेति**। सम्बन्धे द्वितीयमाशङ्कते—**कृपाणेति**। सम्बन्धाभावेऽपि प्रातीतिकसम्बन्धेन साधयति चेत् सर्वं सर्वत्र साधयेदिति सर्वं केवलान्वयि स्यादित्याह—**नेति**। द्वितीयमाशङ्कते—**अन्तःकरणेति**। **तस्य परसम्मत्यभावेनेति**। तथाचाश्रयासिद्धिरिति भावः। किंच

[1] भेदसिद्धिरिति—**पा.** [2] सत्तायामर्थ—**पा.** [3] सिद्धान्तासिद्धान्ताभ्यनुज्ञानादिदू—**ग.** [4] शब्दे चै—**ग.** [5] करणाद्युपहित—**क.**

## सर्वार्थसिद्धिः

परान् प्रति प्रयोगायोगात्। किंच देवदत्तनिष्ठधारावाहिकद्वितीयादिज्ञानेषु देवदत्तप्रमाभावातिरिक्तानादिनिवर्तकत्वाभावेऽपि प्रमात्वं दृष्टम्, तद्व्यवच्छेदाय पूर्ववदप्रकाशितार्थप्रमात्वादिविशेषणेऽपि देवदत्तप्रमान्तराभावातिरिक्तानादित्वप्रागभावध्वंसनात् सिद्धसाधनत्वम्। देवदत्तप्रमाभावत्वात्यन्ताभाववदनादिध्वंसकत्व साध्यमिति चेत्, इदमपि स्वजन्यसंस्कारप्रागभावध्वंसनेन दत्तोत्तरमेव। किंच, अनादेर्ध्वंसिनीत्यत्र ध्वंसरूपत्वमात्रं वा ध्वंससबन्धित्वं वा ध्वसहेतुत्वं वा विवक्षितम्। नाद्यः—अनभ्युपगमात्। न च ध्वंसो घातक इति युज्यते। न द्वितीयः—विवक्षितस्याज्ञाननिवर्तकत्वस्यानुक्तेः। अस्ति हि स्वजन्यसंस्कारप्रागभावोऽनादिः, तस्य च ध्वंसरूपस्संस्कार एकाश्रयत्वादिना स्वसंबन्धी च। दृष्टान्ते चानादिप्रतियोगिकध्वंससंबन्धित्वासिद्धेः। अतस्तृतीयः परिशिष्यते। अत्रापि दृष्टान्तस्य साध्यविकलत्वमाह—

## आनन्ददायिनी

किं प्रमात्वमात्रं हेतुः, उत विशेषितमिति विकल्पमभिप्रेत्याद्य आह—**किं च देवदत्त इति।** द्वितीय आह—**तद्व्यवच्छेदेति।** तत्र किं यत्किंचित्प्रमाभावातिरिक्तत्वं विवक्षितं, उत तत्स्थप्रमाभावत्वावच्छिन्नातिरिक्तत्वरूपसामान्याभाव इति विकल्प्याद्य आह—**देवदत्तप्रमान्तरेति।** द्वितीय शङ्कते— **देवदत्तेति। स्वजन्येति।** तत्रैव निवर्तकत्वस्य मुख्यत्वादिति भावः। कृत्तद्धितसन्देहादाह—**किं चानादेरिति।** अनभ्युपगमे हेतुमाह—**न चेति।** नन्वन्यस्य संबन्धस्यासम्भवात् परिशेषान्निवर्त्यनिवर्तकभावसिद्धिरित्यत्राह—अस्ति हीति। **दृष्टान्ते चेति।** यज्ञदत्तप्रमाया अपि पक्ष[1]तुल्यत्वान्निवृत्ति[2]रूपत्वे

[1] तुल्यत्वेन निवृ—**ग.** [2] रूपत्वेन निव—**क.**

तत्त्वमुक्ताकलापः

## दृष्टान्ते ध्वंसकत्वं न च विदितमिदं ध्वंसता-मात्रसिद्धेः ॥ ३८ ॥

सर्वार्थसिद्धिः

दृष्टान्त इति। उक्त हि पूर्वमेव प्रागभावस्य कार्यस्य चैकक्षणसंपाता-योगात्तयोर्वध्यघातकभावो न संभवतीति। एतदेवाभिप्रेत्याह—**ध्वंस-तामात्रसिद्धेरिति**। अपि चात्र स्वप्रागभावातिरिक्तानादिध्वंसकत्व-साधने तद्ध्वंसनीयमनादि किंचिद्भावरूपमिति कुतस्सिद्धम्? न तावद्व्यासया, दृष्टान्ते तदसिद्धेः। नापि पक्षधर्मताबलात्, पक्षस्थस्य हेतोस्तादृशबलादृष्टेः; दृष्टस्य [1]च पक्षधर्म-संबन्धमात्ररूपस्य पक्षसाध्यसंबन्धमात्रार्थत्वात्। न च परिशेषात्;

आनन्ददायिनी

निवर्तकत्वासिद्धेरिति भावः। ननु कथं दृष्टान्तासिद्धिः; प्रागभाव-निवर्तकत्वं प्रतियोगिनोऽस्त्वित्यत्राह—**प्रागभावस्येति**। निवर्तकत्वं हि निवृत्तिजनकत्वं। तच्च तत्पूर्वक्षण[2]सत्त्वं तत्प्रागभावनिवृत्तिश्च प्रतियोगी वा तदन्यो वा; नाद्यः—स्वस्य स्वजनकत्वायोगात्। न द्वितीयः—निवर्त्य-निवर्तकयोस्समान[3]कालत्वस्य वक्तव्यत्वात् प्रागभावप्रतियोगिनोर्नै-तदुभयमिति भावः। **अपि चेति**। निवर्तनीयस्य स्वप्रागभावातिरिक्त-त्वसिद्धावप्यभावान्तरं भवत् [4]कथमिव वार्यमिति भावः। पारिशेष्यं

---

[1] च तादृशपक्ष—**पा.** [2] सत्त्व प्राग—**क.** [3] कालीनत्वस्य—**ग.**
[4] कथ वार्य—**ग.**

तत्त्वमुक्ताकलापः

## अस्पृष्टावद्यतोक्ते–

सर्वार्थसिद्धिः

अभावान्तरनिवर्तकत्वेऽपि विरोधाभावात् । दण्डचक्रादयो हि स्वाभावातिरिक्तं घटाभावं निवर्तयन्ति । तद्वद्देवदत्तप्रमाऽपि सस्कारोत्पत्तिहेतुभूता स्वसंस्कारप्रागभावं ध्वंसयत्येव । एतत्परिहाराय अभावव्यतिरिक्तानादिध्वंसिनीत्येतावन्मात्रमुपाददीमहीति चेत् ; हन्त तर्हि सिद्धसाधनत्वं परिजिहीर्षता दृष्टान्तस्य साध्यविकलत्वापत्तौ न दृष्टिर्दीयते ॥ ३८ ॥

### इति चित्सुखोक्तभावरूपाज्ञानानुमानभङ्गः.

---

अथ ब्रह्माज्ञानकल्पनां श्रुतिविरोधेन निर्मूलयति—**अस्पृष्टेति** । न तावन्निरवद्यत्वश्रुतिरनादर्तव्या ; सर्वश्रुत्यनादरप्रसङ्गेन निष्कञ्चुक-

आनन्ददायिनी

दूषयति–**अभावान्तरेति** । **हन्त तर्हीति** । ननु देवदत्तस्थाभावातिरिक्तत्वेन विशेषणे नैष दोष इति चेत् , मैवं ; घटादिजनकस्योपादानज्ञानस्य तत्प्रागभावनिवर्तकत्वात् वेद्यगताभिव्यक्तिप्रागभावनिवर्तकत्वाच्च न स्वाभिमतसिद्धिरिति भावः ॥ ३८ ॥

### चित्सुखोक्तभावरूपाज्ञानानुमानभङ्गः.

---

निरवद्यत्वश्रुतिबाधितान्यनुमानानीति पूर्वसङ्गत्याऽऽह–**अथेति** । अनुमानेना[1]विद्या यतः ब्रह्मणो जीवस्य वा साध्या उभयथाऽपि ब्रह्मणस्सावद्यत्वप्रसङ्ग इति भावः । **सर्वश्रुतीति** । अविशेषादिति

[1] विद्याबीतब्र–**ग.**

तत्त्वमुक्ताकलापः

**न खलु विषयतामभ्युपेयादविद्या**

**न क्षेत्रज्ञोऽपि तापत्रयपरितपनात्रापि तद्ब्रह्म मौग्ध्यात् ।**

सर्वार्थसिद्धिः

बाह्यत्वापातात् । न चासौ स्तोभवन्निरर्थिका ; स्वबोधितेऽर्थे स्वतः प्रामाण्यात् । अतस्सविषयत्वे केवलमविद्यैव वा तद्विषयः, तत्कल्पितो जीवो वा, तदवरुद्ध ब्रह्म वेति विकल्प विभाव्य प्रथमं प्रतिक्षिपति — **न खल्विति** । 'निरवद्यम्' इति श्रुतिर्ब्रह्मैव विशिनष्टि, न त्वविद्याम् ; त्वत्पक्षे ह्यविद्यान्तराभावात् निरवद्यत्वश्रुतिस्तद्विषया स्यादित्युपालम्भका कूक्तिरियम् । अतो नाभागिप्रतिषेधः । द्वितीयं दूषयति—**न क्षेत्रज्ञ** इति । न हि त्वन्मते प्रतिबिम्बप्रायस्य जीवस्यावस्थान्तरेणापि निर्दोषत्वमिति भावः । तथैव तृतीयमपि निरस्यति—**नापीति** । तच्छब्देन सर्वाध्यासाधिष्ठानत्वादिसूचनम् । **मौग्ध्यात्**—अविद्यातिरोहितस्वप्रकाशत्वादित्याशयः । ननु कल्पिते जीवे कल्पनाधिष्ठाने ब्रह्मणि वा [1]निरवद्यत्वादिश्रुतिस्सबोभवीति, अविद्यातत्कार्याणामसत्यतया दोषत्वा-

आनन्ददायिनी

भावः । **न चेति** । सामभागपूरणा[2]र्थाह्यादिशब्दरूपस्तोभवन्निरर्थकत्वाभावादिति भावः । **अभागिप्रतिषेधः**—अप्रसक्तप्रतिषेधः । अविद्याविषयत्वे अविद्यान्तराभावेनाप्रसक्तप्रतिषेधो वक्तव्यो भवतीति भावः । ननु मौग्ध्यमप्यविद्याश्रयत्वमेव, न च तन्मात्रदोषः, तथात्वे सिद्धान्तेऽपि ज्ञानविरोधिकर्माश्रयत्वेन ब्रह्मणो दोषापत्तेरित्यत्राह— **अविद्यातिरोहितेति** । नान्वेतरं प्रति तिरोधायिकर्माश्रयत्वं ब्रह्मणो-

[1] निरवद्यत्वश्रु—**पा.** [2] णार्थाबादि—**ग.**

तत्त्वमुक्ताकलापः

**मिथ्यात्वादोषभावो न भवति यदि किं तन्निरासप्रयासै-**

**रुच्छेत्तव्यापुमर्थान्वयत इह परः कोऽभिलष्येत दोषः ॥ ३९ ॥**

सर्वार्थसिद्धिः

भावादिति शङ्कते—**मिथ्यात्वादिति** । परिहरति—**किमिति** । यद्यविद्यादीनां स्वकालसत्त्वं दोषत्व च न स्यात् तर्हि किं तन्निरासार्थसाधनचतुष्टयसंपत्तिपूर्वकश्रवणमननिदिध्यासनप्रयासैः ? अविद्यानिरासकदर्शनार्थमेव हि तद्विधिमातिष्ठध्वे । नन्वसत्यस्य दोषत्वमप्यसत्यं, तादृशदोषवत्त्वेऽपि तात्त्विकदोषात्यन्ताभावान्निर्दोषत्वश्रुतिरर्थवती[1] स्यादित्यत्राह—**उच्छेत्तव्येति** । असत्योऽपि दोष उच्छेत्तव्यो न वा? पूर्वत्र तादृशापुरुषार्थान्व[2]यादतिरिक्तः को नाम दोषशब्दार्थः ? उत्तरत्र

आनन्ददायिनी

ऽस्तिवति चेत् न, स्वस्यैवेतरत्वेनाभिमतजीवानन्यत्वात् कल्पिताधिष्ठानत्वविशिष्टं काल्पिताधिष्ठानमिति **शुद्धं** [3]ब्रह्म, यद्वा कल्पिताधिष्ठानत्वविशिष्टं जगत्कारणं ब्रह्मशब्दवाच्यमिति वा बोध्यम्। [4] मोक्षार्थं श्रवणादिप्रयास इत्यत्राह—**अविद्यानिरासकेति**। तन्निवृत्तेरेव मोक्षत्वादिति भावः। **पूर्वत्रेति**। उच्छेत्तव्यस्य दोषत्वादिति भावः। **उत्तरत्रेति**। नन्वनुच्छेद्यत्वपक्षे कथं तदर्थप्रवृत्तिनैरर्थक्यमापाद्यते

[1] तीत्यत्राह—**पा.** [2] यातिरिक्त.—**पा.** [3] ब्रह्म तद्वा—**ग.** [4] ननु मोक्षा—**ग.**

## सर्वार्थसिद्धिः

तन्निरासप्रयासनैरर्थक्यमेवेति भावः । अनिर्वचनीयस्य नित्यनिवृत्त-स्वरूपस्य किं निवर्तनेन ? अत्यन्ताभावस्यासंपाद्यत्वात्तत्प्रतिभासोऽ-प्यनिर्वचनीय एवेति सोऽपि नित्यनिवृत्तित्वान्न संपाद्यनिवृत्तिः । किंच तात्त्विकदोषः श्रुत्या निरस्यत इति वदता स दोषः किं ब्रह्म-स्वरूपमेवेत्यभिमतम् ? अन्यद्वा किञ्चित् । पूर्वत्र किं तदधीनसत्ता-कयाऽविद्यया ? तेन च सर्वोपपत्तेः दोषभूतस्वाधीनप्रकाशतया ब्रह्मापि मिथ्या स्यात् । उत्तरत्र द्वैतापत्तिः ; यत्र क्वचिद्विद्यमानत्वाभावे तात्त्वि-

## आनन्ददायिनी

तत्प्रयत्नस्यैवानङ्गीकारादिति चेत् । तथा सति तत्र प्रवर्तकश्रोतव्यादि-विधिवैयर्थ्यमिति भावः । इदं दूषणमुच्छेत्तव्यपक्षेऽपि सममित्याह— **अनिर्वचनीयस्येति । पूर्वत्रेति ।** तात्त्विकब्रह्मरूपदोषादेव प्रपञ्च-भ्रमोपपत्तेरिति भावः । ननु प्रपञ्चस्य मिथ्याभूतोपादानकत्वेन मिथ्यात्व-सिद्ध्यर्थमविद्येति चेदत्राह—**दोषभूतेति । कैमुत्यन्यायेन** प्रपञ्च-मिथ्यात्वं सिध्यतीति न तदर्थमविद्येति भावः । ननु दोषरूपत्वेऽपि प्रकाशस्य दोषजन्यत्वाभावान्न तत्प्रकाशस्य मिथ्यात्वं वस्तुतः प्रकाश-कर्मत्वरूपप्रकाश्यत्वं च नास्तीति चेत् ; **अत्र वदन्ति**—ब्रह्मणो दोषत्वं तदधीनप्रकाशस्य मिथ्यात्वं विना नोपपद्यते, अन्यथा परिभाषा-पत्तेः । तथाच तद्व्यतिरिक्ताविद्यया प्रपञ्चभ्रममिथ्यात्वयोरुपपत्तौ स्वस्यैव ब्रह्मस्वरूपदोषाधीनप्रकाशत्वादिकं वक्तव्यमिति दोषतादव-स्थ्यमिति । [1]ननु क्वचित् तत्स्वरूपसत्त्वे अद्वैतविरोधः । तदेव नास्ती-त्यत्राह—**यत्र क्वचिदिति ।** शशशृङ्गवदिति भावः । नन्वन्यत्र

[1] न क–क.

सर्वार्थसिद्धिः

कत्वविरोधात्। भावा[1]द्वैतिनो ब्रह्मस्वरूपातिरिक्तात्त्विकाभावरूपदोष-संभवात् तन्निषेधिका श्रुतिरियमिति चेन्न; अभावनिषेधे तत्प्रतियोगि-भावसंबन्धापातात्। ततश्चाद्वैतवादो निरुध्येत। दोषस्य परमार्थत्वं नास्तीति निरवद्यत्वश्रुत्यर्थ इति चेन्न; दोषस्वरूपनिषेधके तदनुज्ञया तत्सत्यत्वनिषेधकशब्दाभावात्, तत्परत्वकल्पनेश्च गुरुत्वात्। अतो भावमभावं वा सत्यमसत्यं वा ब्रह्मणि निरसनीयं किञ्चिदिच्छता निर्विषयैव निरवद्यत्व[2]श्रुतिरापादितैवेति॥

इति ब्रह्माज्ञानानुमानानां नित्यनिर्दोषश्रुतिबाध्यत्वम्.

---

आनन्ददायिनी

सत्त्वेऽपि नाद्वैतविरोध इति शङ्कते—**भावाद्वैतिन इति**। **ततश्चेति**। ननु प्रतियोगिनो मिथ्यात्वान्न दोष इति चेन्न। अभावस्य निषेधोऽप्यभाव-समसत्ताको वाच्योऽन्यथा दोषभूताभावसत्तया श्रुतिविरोधतादवस्थ्या-दिति भावः। **दोषस्वरूपेति**। निरवद्यमिति श्रुतावद्यं तत्त्वं च भासते। तत्र च विशिष्टनिषेधे विशेष्ये बाध इति स्वर्गिध्वंसवद्दोष-त्वनिषेधो वाक्यार्थो वाच्यो न तु श्रुतपरित्यागेनाश्रुतपारमार्थिकत्व-निषेध इति भावः। ननु गुरुत्वेऽप्यन्यथानुपपत्त्याऽङ्गी[3]कर्तव्येत्यत्राह—**अत इति**। तथा सति दोषे सत्यतानिषेध उक्तो न तु ब्रह्मणीति ब्रह्मणि दोषनिषेधश्रुतेरर्थशून्यता स्यादिति भावः॥ ३९॥

ब्रह्माज्ञानानुमानभङ्गः.

---

[1] द्वैतिनस्स्वरू—**पा.** [2] श्रुतिरुपपादितेति—**पा.** [3] कार्य इत्याह—**ग.**

तत्त्वमुक्ताकलापः

**शुद्धे ब्रह्मण्यविद्या न यदि न घटते तस्य जीवैक्यवाद-**

**स्तस्मान्निर्दोषतोक्तिर्निरुपधिदृशया निर्वहेदित्ययुक्तम् ।**

सर्वार्थसिद्धिः

यदि निरवद्यत्वश्रुतिविषये ब्रह्मणि अविद्या कदाचिदपि न स्यादित्युच्येत, तर्हि तस्य जीवैक्योपदेशो न घटेत ; तस्मान्निर्दोषत्वश्रुतिस्त्वदभिमतजीववन्निवृत्ताविद्यस्वरूपपरतया निरुह्येतेति शङ्कते—**शुद्ध** इति । अत्र—

स [1]एव देवः कृतभूतभावनः
स्वयं विशुद्धो विरजाः प्रकाशते ।

इत्यादिभिर्बद्धमुक्तावस्थाद्वयभागिनः कर्मवश्यादन्यत्वेन प्रमितस्य परस्य ब्रह्मणस्सदोषनिर्दोषावस्थाद्वयकल्पितस्साहसमित्यभिप्रायेणाह—**इत्ययुक्तमिति** । "तत्त्वमस्ययमात्मा ब्रह्म" इत्युपदेशो भेदनिषेधश्च

आनन्ददायिनी

ननु निरवद्यत्वश्रुतिः कथंचिन्नेतव्या ; तथा च न श्रुतिबाधोऽनुमानस्येत्याक्षेपसङ्गत्याऽऽह—यदीति । **जीवैक्योपदेश इति** । अविद्याश्रयत्वाभावे भेदस्याविद्यकत्वाभावेन स्वाभाविकत्वे ऐक्यस्यासम्भवादिति भावः । ननु भेदश्रुतीनामेव कथंचिन्नयनं कुतो न

---

[1] एष देव.—पा.

तत्त्वमुक्ताकलापः

**प्रत्यक्षादिप्रमाणानुगुणबहुविधश्रुत्यवाधेन नेतुं शक्येऽप्यैक्यादिवाक्ये बहुगुणनिधये ब्रह्मणेऽसूयसि त्वम् ॥ ४० ॥**

सर्वार्थसिद्धिः

कथमित्यत्राह—**प्रत्यक्षादीति**। अयं भावः—यद्यपि जीवपरभेदश्रुति-[1]मात्रमवस्थाद्वयविषयमिति शङ्कितुं शक्येत, तथाऽप्येकैकस्यामेवावस्थायां जीवादन्यः परः प्रतिपाद्यते। जागरे तावत्—

"तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति"।

इति। तथा च सूत्रं 'स्थित्यदनाभ्यां च' इति।

समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥

इति चोच्यते। स्वप्ने च—

'य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः'

आनन्ददायिनी

स्यादित्यत्राह—**अयं भाव इति**। तदेव दर्शयति—जागर इति। एकशरीरसम्बन्धे सति एकस्यैव तस्मिन्नेव तत्कालावच्छेदेन भेदः कर्मफलभोक्तृत्वं तदभावश्चेति विप्रतिषिद्धमिति भावः। स्थितिः **अनश्नत्तया** कर्मफलानि दीप्यमानस्यावस्थितिः। अदनं पिप्पलं स्वाद्वत्तीति कर्मफलानुभवः। उक्तश्रुतिसमानार्थं श्रुत्यन्तरमाह—**समान इति**। विस्तरस्तु भेदधिक्कारन्यक्कारे द्रष्टव्यः। एकस्मिन्काले स्वापजागरणे विरुद्धे ऐक्ये नोपपद्येते इत्यत्राह—**स्वप्ने चेति**।

[1] मात्रादवस्थाद्वयमिति—**पा.**

## सर्वार्थसिद्धिः

इति। तत्र च स्वतन्त्रपरतन्त्रविभागव्यञ्जकं सूत्रं—"पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" इति। सुषुप्तिप्रायणयोश्च—

"प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"

इति "प्राज्ञेनात्मनाऽन्वारूढः उत्सर्जन् याति" इति च। तत्रापि सूत्रं "सुषुप्त्युत्क्रान्त्योर्भेदेन" इति। मुक्तावस्थायामपि "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति। अत्र यदि भोक्तृसाहित्यमभिप्रेतं तदा सुव्यक्त एव भेदः। यदा तु प्रस्तुत[1]ब्राह्मणपदविवरणक्रमेण भोग्यसाहित्ये तात्पर्यं तदाऽपि भोक्तुर्भोग्यस्य च स्वारसिकी भेदधीर्न बाधमर्हति; ब्राह्मणस्थपरशब्दानु-

## आनन्ददायिनी

**पराभिध्यानं** परस्य सङ्कल्पः। अनादिकर्मापराधात् परः स्वसंकल्पेन स्यापहतपाप्मत्वादिकल्याणरूपं तिरोधापयति। तत एव हि परमपुरुषजीवसङ्कल्पादेवास्य जीवस्य बन्धविपर्ययौ संसारमोक्षावित्यर्थः। **सुषुप्तीति**। तद्दशायामेव ज्ञानतदभावरूपविरुद्धधर्मप्रतिपत्तेस्स्वाभाविको भेदो वक्तव्य इत्यर्थः। सुषुप्त्युत्क्रान्त्योः सुषुप्तिकाले उत्क्रान्तिकाले च लुप्तसकलज्ञानात् प्रत्यगात्मनस्तदीनामेव सर्वज्ञतया भेदेन व्यपदेशात् प्रत्यगात्मनोऽथान्तरं परमात्मेत्यर्थः। अत्र प्राज्ञेन सम्परिष्वक्तः प्राज्ञेनान्वारूढ इति कर्मकर्तृव्यपदेशश्च भेदक इति ध्येयम्। **प्रस्तुतब्राह्मणेति**। ब्रह्मविदाप्नोति परम्' इति ब्राह्मणं; तत्र ब्रह्मपदविवरणं 'सत्यं ज्ञानमतन्तं 'ब्रह्म' इति, वित्पदविवरणं 'यो वेद निहित गुहायाम्' इंति, परशब्दविवरणं 'सर्वान्कामान्सह ब्रह्मणा विपश्चिता' इत्येतद्वाक्यीमत्यर्थः। **ब्राह्मणस्थपरशब्देति**। परशब्दस्य भेदार्थकत्वात् ब्राह्मणवाक्य एव भेदोऽवगम्यते।

[1] ब्राह्मणविवरण—**पा.**

## सर्वार्थसिद्धिः

ग्रहाच्च। एवं "परात्परं पुरुषमुपैति दिव्यम्" इत्यादि। एतदपि सूत्रित "मुक्तोपसृप्यव्यपदेशाच्च" इति। "ब्रह्म वेद ब्रह्मैव भवति" [1]इत्यादि वाक्यं तु "निरञ्जनः परमं साम्यमुपैति" इति मुक्तविषयतयैव प्राकरणिकेन वाक्येन परमसाम्यतत्परतया स्थापितार्थम्। परमसाम्य च "भोगमात्रसाम्यलिङ्गाच्च" इति सूत्रेण नियमितम्। श्रुत्यन्तरे च "तादृगेव

## आनन्ददायिनी

स च भेदो न कल्पितः, मुक्तिसाधनीभूतज्ञानविधायकस्यातत्त्वज्ञानोपदेशकत्वायोगात्, न चास्याभेदोपदेशकत्वमिति भावः। **एवमिति**। शरीरेन्द्रियादिभ्यः परो भिन्नो जीवः, तस्मात्परं भिन्नं ब्रह्म प्राप्नोतीत्यर्थः। कर्मकर्तृरूपभेदो मुक्तिकालीनो हि सत्य एवेत्यभिप्रायेणाह—**एतदपीति**। 'ब्रह्म वेद' इत्यत्र तस्यैवकारस्य 'इववद्वैववार्थकाः' इति निघण्टुबलादिवार्थकत्वेऽपि तस्यैव ग्रहणमित्यत्र नियामकमाह—**निरञ्जन इति**। **'सन्दिग्धे तु वाक्यशेषात्' इति न्यायेन 'छागो** वा मन्त्रवर्णात्' इत्यत्राप्राकरणिकमन्त्रविशेषप्रातिपन्नविशेषपरत्वे **कैमुतिकन्यायेन** च प्राकारणिकवाक्यशेषोपस्थापितविशेषपरत्वं सिद्धमिति भावः। ननु परमसाम्यमेवाभेद इति चेत्, तत्राह—**परमसाम्यं चेति। भोगमात्रेति**। साधारणधर्मोक्तेर्भेदस्य सिद्धत्वात् स्वपरन्यायसूत्रादिविरुद्धमभेदपरत्वमिति भावः। **श्रुत्यन्तरे चेति**। 'यथा शुद्धमुदकं शुद्ध उदक आसिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा' इत्यादावित्यर्थः। इवार्थे एवकारस्य प्रयोगं च दर्शयति—

[1] इति वाक्य—**पा.**

## सर्वार्थसिद्धिः

भवति "इति निदर्शितम्; विष्णुरेव भूत्वेत्यादिन्यायाच्च। **मोक्षधर्मे** च—

परेण परधर्मी च भवत्येष समेत्य वै।

इत्यादिभिः परमसाम्यमेव प्रदर्शितम्। अनेन साम्यं यास्या-[1]मीति च मुमुक्षोरभि[2]सन्धिरप्यभिधीयते। स्वयं चागीयत "मम साधर्म्य-मागताः" इति। "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" इति जीवब्रह्मतादात्म्योक्त्याऽनिष्टप्रसङ्गमाशङ्क्य "अधिकं तु भेदनिर्देशात्" इति च प्रत्युक्तम्। स्रष्टुस्सृज्यस्य भेदः श्रुत्यैव[3] हि निर्दिश्यते।

अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः।

## आनन्ददायिनी

**विष्णुरेवेति**। 'वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति' इत्यनेन समत्वादित्यर्थः। परेण समेत्य परस्य यो धर्मः साम्यं तद्वानासीदित्यर्थः। **अनेन साम्यमिति**। मुमुक्षोः कामना-विषयस्य विद्यासाध्यत्वात्तस्यैव मुक्तप्राप्यत्वादिति भावः। किंच जीवब्रह्मैक्यं सूत्रविद्विष्टं चेत्याह—**इतरेति**। ब्रह्मणः 'तत्त्वमसि' इत्यादि-भिर्जीवतया व्यपदेशाज्जीवस्य च दुःखित्वाद्धितरूपजगदकरणमित्यादि-दोषप्रसक्त्या ब्रह्मणो जगत्कारणत्वं न संभवतीत्याशङ्क्य 'करणाधिपाधिपः 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'पृथगात्मानं प्रेरितारं च मत्वा' इत्यादिभिः परमात्मनो जीवादन्यस्यैव निर्देशान्न दोष इत्युक्तमित्यर्थः। साक्षाद्भेद-प्रतिपादकशब्दोऽपीत्याह—**स्रष्टुरित्यादिना**। **अन्यः** मायिन ईश्वरा-दन्यः। नन्वभेदश्रुतीनामपि सत्त्वेनान्यतरस्यान्यतरानुसारित्वे विनिगम-

---

[1] मीति मु—**पा.** [2] संधिरभि—**पा.** [3] व निर्दि—**पा.**

## सर्वार्थसिद्धिः

इति । एवं प्रस्पष्टार्थसूत्रप्रतिष्ठापितस्वरसार्थानां भेदश्रुतीनां न त्वदभीष्टवत् प्रत्यक्षादिविरोध', प्रत्युतानुगुण्यमेव । तस्मादेवंविधनिर्बाधानन्यपरबहुविधश्रुत्यनुसारेण जीवपरसामानाधिकरण्यस्य भेदनिषेधस्य च निर्वाहे संभवति निर्दोषकल्याणगुणाकरे ब्रह्मण्यविद्यादिदोषमाविष्कुर्वन्नात्मीयामसूयामेवाविष्करोषि । तन्निर्णीतं च **मोक्षधर्मान्ते** परस्य बन्धप्रसङ्गरहितत्वम्, इतरस्य बन्धमोक्षभागित्वं च ।

तत्र यः परमात्मा तु स नित्यो[1] निर्गुणो मतः ।
स तु नारायणो ज्ञेयस्सर्वात्मा [2]पुरुषो हि सः ॥
न लिप्यते कर्मफलैः पद्मपत्रमिवाम्भसा ।
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैस्स युज्यते ॥

इति ॥ ४० ॥

## इत्यविद्याकल्पकश्रुतार्थापत्तिभङ्गः.

---

### आनन्ददायिनी

काभाव इत्यत्राह—**एवमिति** । किंच वेदाचार्यो हि वेदार्थान्मोक्षधर्मे विशदमाविश्चकार, तदनुसारतस्सूत्र चेत्याह—**निर्णीतं चेति** । **निर्गुणः** सत्वरजस्तमोगुणरहितः; तस्यैव वैदिकप्रसिद्धेः । **मोक्षबन्धैः** संसारमोक्षाभ्यामित्यर्थः । केचित्तु व्यक्तयभिप्रायं बहुवचनमित्याहुः ॥ ४० ॥

## अविद्याकल्पकश्रुतार्थापत्तिभङ्गः

---

[1] निर्गुणः स्मृतः—**पा.** [2] पुरुषोत्तमः—**पा.**

तत्त्वमुक्ताकलापः

**मायाविद्यादिशब्दैः प्रकृति[1]रभिमता ज्ञान-कर्मादयो वे-**

सर्वार्थसिद्धिः

आस्तां[2] श्रुतार्थापत्तिः, श्रुतिभिरेव भावरूपाज्ञानं सिध्यतीत्यत्राह —मायेति।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।

इत्यत्र न प्रकृतेर्मिथ्यात्वं प्रतिपाद्यते, यथाक्रममुद्देश्योपादेयस्थापनोपपत्तेः। [3]अत्र हि पूर्ववाक्यस्थमायामायिशब्दार्थबुभुत्सायां प्रसिद्धार्थप्रकृतिमहेश्वरशब्दाभ्यां संशयादिरपाचिकीर्षितः। अन्यथा उद्देश्योपादेयक्रमविपर्यासः। तथा चाहुः—

यद्भूतयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्।

आनन्ददायिनी

प्रसङ्गसङ्गतिमाह—**आस्तामिति**। अत्र किं मिथ्यारूपाविद्यासाधको मायाशब्द उताविद्याशब्द आहोस्विदनृतशब्दो यद्वाऽसच्छब्दोऽथवाऽव्याकृतशब्द उताहो तमश्शब्द इति विकल्पमभिप्रेत्याद्यं दूषयितुमुपक्रमते—**श्रुतिभिरेवेत्यादिना**। ननु प्रकृत्युद्देशेन मायात्वविधाने मिथ्याभूतजगदुपादानसिद्धिरित्यत्राह—**प्रकृतेरिति**। 'अस्मान्मायी सृजते विश्वमेतत्' इति पूर्ववाक्यविवरणत्वमस्येत्याह—**अत्र हीति**। **आहुरिति**। मीमांसका इति शेषः। ननु 'पादपांसुना यूपमनक्ति' 'दध्ना जुहोति' 'पयसा जुहोति' 'खादिरो यूपो भवति' 'यस्य पर्णमयी जुहूर्भवति' इत्यादौ वैपरीत्यं दृष्टमि[4]ति चेत् श्रुत्यादिसस्कार्यतावोधकाभावे तन्नियमाङ्गीकारादिति भावः।

[1] रभिहिता–**पा.** [2] श्रुत्यर्था–**पा.** [3] अत्र पूर्व–**पा.** [4] ति न च श्रुत्यादि सस्कार्यतादिवोध–**क.**

## सर्वार्थसिद्धिः

इति। न च मायाशब्दो मिथ्यीवाचा ; लोक[1]वेदनिघण्टुपाठाभावात्। क्वचित्प्रयोगस्तु भाक्तः स्यात् ; अन्यथा "देवमायेव निर्मिता" "स्वमायया सांप्रतमागतं वा "ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्" तेन मायासहस्रं तत्" इत्यादिभिर्विरुध्येत। नीतिशास्त्रेषु च मुख्यामुख्यसंकलनेन सप्तविधोपायपरिगणने मायेन्द्रजालयो[2]रन्यथाप्रतिभासनसामर्थ्यरूपतया विभागसिद्धः। मन्त्रौषधादिविशेषवति च मायावीति प्रयोगः, न तु क्वचिदपि मिथ्यार्थसंबन्धिनि। तिमिरादिभासितरज्जुसर्पादौ

## आनन्ददायिनी

किं चोद्देश्यविधेयभाववैपरीत्येऽपि नाविद्यासिद्धिरित्याह—न चेति। **लोकनिघण्टुरमरादिः**। **वेदनिण्टुः पारतत्क्र्यादिः**। केचित्तु—लोकवेदशब्दाभ्यां लोकवेदप्रयोगोऽभिमतः। नन्वैन्द्रजालिकपदार्थे इदं सर्वं मायेति लोकप्रयोगदर्श[3]नात् तत्सिद्धिरित्यत्राह—**क्वचिदिति**। **अन्यथा**—तस्य मुख्यार्थत्वे। **देवमाया** देवीरूपा माया आश्चर्य[4]रूपा। **मायां विशालाक्षीं** विचित्रसृष्टिहेतुभूतां प्रकृतिमित्यर्थः। **मायासहस्रं** वञ्चनथा प्रयुक्तप्रहरणादिकमित्यर्थः। ननु देवमायेत्यादिप्रयोगानामेव भाक्तत्वमस्तु, विनिगमकाभावादित्यत आह—**नीतिशास्त्रेष्विति**। अन्यथाकरणसामर्थ्यं माया, अन्यथाप्रतिभासजननसामर्थ्यमिन्द्रजालमिति द्रष्टव्यम्। शक्ति[5]ग्राहकं प्रयोगमप्याह—**मन्त्रौषधेति**। अन्यथाकरणसामर्थ्यरूपमिति भावः। [6]मिथ्यार्थवाचकत्वे भ्रान्ते पुरुषादौ अध्यासाधिष्ठानभूतरज्ज्वादौ वा मायावीति प्रयोगं आरोप्ये सर्पादौ च मायाशब्दप्र[7]योगं चानिष्टमापादयति। **न तु क्वचिदिति**। ननु पूर्वं क्वचित्प्रयोगो भाक्त इत्युक्तेर्मिथ्यावस्तुनि

[1] नैघण्टकपाठा—**पा.** [2] रन्यथाकरणान्यथा—**पा.** [3] नात् सिद्धिः—**क.** [4] रूपां मा—**ग.** [5] ग्रायकप्रयोग—**ग.** [6] मिथ्यात्ववाचक—**क.** [7] योगं च न निर्दिष्ट—**ग.**

## सर्वार्थसिद्धिः

च मायाशब्दो न दुष्टचरः। स्वमतव्यामोहितानां प्रयोगस्त्वनादेयः। "मायां न सेवे भद्र ते न वृथा धर्ममाचरे" "मायाविनं मायया वर्तमानम्" इत्यत्र च व्यामोहनमात्रं विवक्षितम्।

तेन वञ्च्यते लोकान्मायायोगेन केशवः।

इत्येतदप्यसुरवञ्चनाशक्तियोगपरम्।

"इन्द्रो मायाभिः पुरुरूप ईयते"

इत्येतच्च शक्तिविशेषैः प्रभूतरूपप्रकाशनपरम्, अन्यथाऽनन्वयात्। न चेदमिन्द्रभ्रान्तिपरं वाक्यं, प्रशंसार्थप्रकरणविरोधात्। कथमन्यथा "युक्ता ह्यस्य हरयश्शता दश भूरि त्वष्टेह राजति" इत्यादिकं घटते? "संभवाम्यात्ममायया" इत्येतदप्योचित्यात् स्वच्छन्दावतारहेतु-

## आनन्ददायिनी

मायाशब्दप्रयोगसिद्धेस्तद्वृत्ति मायाविशब्दप्रयोगोऽनुक्तसिद्ध इति चेत्, न। ऐन्द्रजालिके प्रयोगस्य सिद्धत्वेऽपि तद्व्यतिरिक्तभ्रान्तिस्थले प्रयोगाभावात्; ऐन्द्रजालिके च विचित्रकार्यकरत्वेनान्यथासिद्धः प्रयोगः, न च तत्र भाक्तत्वोक्तिविरोधः। इन्द्रजालस्यैव मायात्वेन तज्जन्यस्य कार्यतया भाक्तत्वौचित्यादिति भावः। ननु **वाचस्पत्यादौ** प्रयोगो दृश्यत इति चेत्तत्राह—**स्वमतेति**। **व्यामोहनं** वञ्चनाशक्तिः। स्तुतिप्रकरणतामेव दर्शयति—**कथमन्यथेति**। अस्य इन्द्रस्य हरयो दशशताः सहस्रं युक्ताः प्राप्ताः। तस्मात्त्वष्टा इन्द्रः भूरि राजति पुरुषरूपत्वेन प्रकाशत इत्यर्थः। **औचित्यादिति**। विचित्रकार्यकरशक्ति[1]वाचिनोऽपि बुद्धिरूपविशेषशक्तिपरत्वं युक्तमित्यर्थः। वस्तुतस्सामान्यशब्दस्य पुरुषशब्दवत् विशेषेऽपि शक्तिरित्याह—

[1] वाचिनो बु-**क.**

## सर्वार्थासिद्धिः

भूतबुद्धिविशेषविषयम्। 'माया वयुन ज्ञानम्" इति च नैघण्टुकाः। एवं सति "इच्छागृहीताभिमतोरुदेहः,

समस्तशक्तिरूपाणि तत्करोति जनेश्वरः।
देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया॥"

इत्यादिभिरैकार्थ्यं स्यात्। "मम माया दुरत्यया" इत्यादिषु गुणमयीति विशेषणात् [1] त्रिगुणद्रव्यविषयत्वमेव कण्ठोक्तम्। तथा च तन्नामपाठः। एतेन—

भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।

इत्यपि गतार्थम्। "भूयश्चान्ते विश्वमायानिवृत्तिः" इत्येतदपि प्रस्तुतयोगबलान्निश्शेषमायातरणमेव निर्दिशति। एवं "विष्णुमाया-महा[2]वर्त", "विष्णोर्विचित्राः प्रभवन्ति मायाः" इत्यादिकमपि

### आनन्ददायिनी

**माया वयुनमिति**। ननु 'मम माया'इत्यत्रापि सङ्कल्पग्रहणसंभवे प्रकृतिपरत्वसिद्धान्तो न स्या[3]दित्याह—**मम मायेत्यादिना**। एषा गुणमयीति विशेषणादित्यर्थः। **तथा चेति**। त्रिगुणं प्रधानमिति प्रसिद्धि-रित्यर्थः। **एतेनेति**। मायया सङ्कल्पेन यन्त्रारूढानि प्रकृतिरूपयन्त्रारूढा-नीत्यर्थः। ननु 'विश्वमायानिवृत्तिः' इत्यत्र निवृत्तिप्रतियोगिन्याः पराभि-मताविद्यापरत्वं वक्तव्यं. सिद्धान्त्यभिमतरीत्याऽपि प्रकृतेर्नित्यत्वादित्यत्राह-**विश्वमायानिवृत्तिरित्येतदपीति**। मायाया निवृत्तिरसम्बन्ध इत्यर्थः।

[1] त्रिगुणविय–**पा** [2] वर्त–**पा.** [3] दित्याह–**ग.**

## सर्वार्थसिद्धिः

सत्यविषयमेव संमन्तव्यम्। "मायामात्रं तु" इति सौत्रं पदमपि स्वतन्त्र-संकल्पमूलस्वाप्नसर्गस्याश्वर्यतमत्वपरम्। जीवकर्तृकसृष्टिव्यवच्छेद एव ह्यधिकरणे [1]युज्येत। प्रागेव हि स्थापितप्रपञ्चमिथ्यात्वानामिह पुनस्सु-प्रसिद्धे स्वप्नविषये विशेषतश्शङ्का नाङ्कुरात। योगे वा जागरप्रपञ्च-सत्यत्वमभ्यनुज्ञायैव [2]चिन्ता स्यात्। अविद्या[3]शब्दोऽपि न क्वचिद-प्यनिर्वचनीयजगदुपादानविषय.। तथा हि "क्षरं त्वविद्या ह्यमृतं तु विद्या" इत्यादौ "क्षर प्रधानम्" इत्यादिप्राकरणिकवाक्यै-काथ्यात् प्रधानविषयत्वमेव युक्तम। अत्र च विद्याशब्दोक्तात् पुरुषादन्यतामात्रेण प्रकृतावविद्याशब्द.। न च सा मिथ्या,

गौरनाद्यन्तवती सा जनित्री भूतभावनी।

## आनन्ददायिनी

**सत्यविषयमेवेति**। सत्यभूतत्रिगुणसङ्कल्पशक्त्यादिवैषम्यविषयमेवे-त्यर्थः। तथा '**मायामात्रमिदं सर्वमनाभिव्यक्तस्वरूपत्वात्**' इति सूत्रमपि। इदं सर्वं स्वाप्नप्रपञ्चं सर्वं मायामात्रं विचित्रं जाग्रत्प्रपञ्च-विलक्षण, कुतः; अनभिव्यक्तस्वरूपत्वात् अभिव्यक्तं यत् लोकसिद्धं तादृशकारणसिद्धत्वाभावा[1]दित्यर्थकत्वात्तदपि पराभिमतसाधक न भव-तीत्याह—**मायामात्रमिति**। तत्सूत्रस्य पराभिमतार्थं पराकरोति—**प्रागेवेति**। आरम्भणाधिकरणादिष्वित्यर्थः। **योगे वेति**। शङ्काया इति शेष.। जागरप्रपञ्चसत्यत्वाभ्यनुज्ञाभावे स्वाप्ने विशिष्यशङ्कानुदया-त्तन्मात्रमिथ्यात्वसाधनवैयर्थ्यादिति भावः। द्वितीयं दूषयति—**अविद्याशब्द इति**। नन्वस्तु प्रधानविषयत्वं तस्यैव मिथ्यात्वोक्ता-विष्टसिद्धेरित्यत आह—**अत्र चेति**। नाविद्याशब्दो मिथ्यावचन इति भावः। विरोधाच्च न मिथ्यार्थत्वमित्याह—**न चेति**। अनन्तत्वस्य

[1] युज्यते—**पा.** [2] चिन्ता न स्यात्—**पा.** [3] शब्दो न क्व—**पा.**

## सर्वार्थसिद्धिः

त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् ।
अचेतना परार्था च नित्या सततविक्रिया ॥

इत्यादिभिस्तन्नित्यत्वसिद्धेः । कथं तर्हि "मृत्युर्वै परे देव एकीभवति, तमः परे देव एकीभवति" इति वाक्ययोर्निर्वाहः ? इत्थम्—सर्वाधारभूते परस्मिन्देवे विभक्तावस्थात्यागेनैकत्व[1]दशावस्थानमात्रं ह्यत्राभिप्रेतम् । एतेन—

प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥

इत्येतदपि व्याख्यातम् । "अविद्यया मृत्युं तीर्त्वा" [2]इत्यत्राविद्याशब्दस्तत्त्वज्ञानविरोधिनिवर्तकसत्कर्मविषयतया भाष्ये व्याख्यातः । अनु[3]वाके प्रकृतयोर्विद्याकर्मणोरेव—

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

इति परामर्शात्, पर्युदासवृत्तेर्नञश्चासन्निषयत्वोपपत्तेः ।

## आनन्ददायिनी

मिथ्यात्वविरोधित्वात्, तथा नित्यत्वस्यापीति भावः । नन्वेकीभावस्य निवृत्तिरूपतया नित्यताविरोधित्वात् कथं नित्यत्वमिति शङ्कते—**कथं तर्हीति** । मृत्युतमश्शब्दाभ्यां प्रकृतिरुच्यते । ननु यत्र लयशब्दोऽस्ति तत्र कथमित्यत्राह—**एतेन प्रकृतिरिति** । पुरुषस्य नित्यतया निवृत्त्यसम्भवात् लीङ् श्लेषण इत्यत्रात्यन्तसम्बन्धस्यैवोक्तेरिति भावः । ननु 'अविद्यया मृत्युं तीर्त्वा' इत्यत्राविद्यायास्संसारप्राप्तिहेतुत्वप्रतिपादेनन मिथ्यात्वपरत्वं स्यादित्यत्राह—**अविद्ययेति** । **प्रोक्षणीन्यायेनावयवशक्तयैवोपपत्तेर्लाघवादिति** भावः । तरतिः निवृत्तिपरः । **पर्युदासेति** ।

[1] दशयाऽवस्थान—**पा.** [2] इत्यत्राप्यविद्या—**पा.** [3] वाकप्र—**पा.**

## सर्वार्थसिद्धिः

अविद्यया मृत्युं प्राप्य स्थित इति [1]निर्वाहस्य चातिक्लिष्टत्वात्; बाधाभावे च स्वरसपरित्यागायोगात्;

ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया।

इत्युपबृंहणानुगुण्याच्च। 'अविद्या कर्मसंज्ञाऽन्या' इत्यत्र बन्धककर्मविषयत्वं वाक्यशेषसिद्धम्। "अविद्यायामन्तरे वर्तमानाः" "सोऽविद्याग्रन्थिं विकिरतीह सौम्य," "अविद्यासञ्चितं कर्म" "अविद्यातरुसंभूति बीजमेतद् द्विधा स्थितम्" इत्यादौ प्रकरणानुगुणतत्तदर्थविषयत्वं ग्राह्यम्। आदिशब्देन "अनृतेन हि प्रत्यूढाः" "त इमे सत्याः कामा अनृतापिधानाः" "तेषां सत्यानां सतामनृतमपिधानम्" इत्याम्नातोऽनृतशब्दश्च संगृहीतः। सत्कर्मणि ऋतशब्ददर्शनात्तदितरवृत्त्या दुष्कर्मविषयोऽत्रानृतशब्दः। दुष्कृतस्य च ज्ञानपिधायित्व श्रुतिस्मृतिसिद्धम्, त्वयाऽपि दुस्त्यजं च। एवमसदव्या-

## आनन्ददायिनी

समस्तत्वादिति भावः। परोक्तमर्थं दूषयति—**अविद्ययेति**। तरणस्य प्राप्त्यर्थत्वाभावात् स्थित इत्यध्याहारदोषप्रसङ्गाच्च। ननु 'एतं सेतुं तीर्त्वा' इत्यत्र प्राप्त्यर्थत्वमङ्गीकृतमिति चेन्न। तत्र मुख्यार्थासंभवात्प्राप्तिपरत्वमङ्गीकृतम्। तद्वदत्राङ्गीकारे न मानमिति भावः। **ब्रह्मविद्येति**। उक्तार्थपरत्वाभावे उदाहृतवचनविरोध इति भावः। **प्रकरणानुगुणेति**। प्रकृतिदुष्कर्मभ्रान्त्याद्यर्थपरत्वं ग्राह्यमित्यर्थः। तृतीयं दूषयति—**आदिशब्देनेत्यादि**। सत्कर्मणीति। अवयवशक्त्यैव प्रयोगोपपत्तेरिति भावः। ज्ञानपिधानलिङ्गाच्च दुष्कर्मपरत्वमित्याह—**दुष्कृतस्य चेति**। [2]चतुर्थादिं दूषयति—**एवमिति**। 'असदेवेदमग्र आसीत्' 'तद्धेदं

[1] निर्वाहस्यापि क्लि—**पा.** [2] चतुर्थ दू—**ग.**

तत्त्वमुक्ताकलापः

**त्येतत्तत्त[1]त्प्रदेशे स्फुटविदितमतो न त्वदिष्टाऽस्त्यविद्या ।**

**किंचाविद्यादिशून्यः पर इति विविधाम्नायकण्ठोक्तमर्थं**

सर्वार्थसिद्धिः

[2] कृतशब्दादिभिपि न मिथ्या[3]र्थग्रहः, अवस्थाविशेषवौशिष्ट्यपरत्वात् । तदत्र फलितमाह—**अत** इति । त्वदिष्टानिर्वचनीयत्वादिविशिष्टेत्यर्थः । अनन्यथासिद्धबहुश्रुतिप्रतिहतेश्च मायादिशब्दैर्न ब्रह्माज्ञानक्लप्तिरित्याह—**किं चेति** । निरवद्यमिति सामान्योक्त्याऽप्यज्ञानरूपमवद्यं निरस्यते । अस्ति चाकर्मवश्यत्वम्बतस्सर्वज्ञत्वश्रुतिः, "सकला न यत्र क्लेशादयस्सन्ति परावरेशे" इत्याद्युपबृंहणशतं च । मोक्षप्रदत्वश्रुत्या च स्वयं न [4]मायासंबद्धः, तत्प्रसादाधीनं [5]ह्यन्येषां मायातरणं गीयते । ननु "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" इति कर्मवश्यस्य योगसिद्धस्य गुरोरविद्यातारकत्वमाम्नातमिति चेत्; अस्तु तत्रार्थस्वभावात् परम्परया तारकत्वम्, ब्रह्मण एव साक्षान्मोक्षप्रदत्वेन प्रतिपादनात् । एवमविद्याप्रसङ्गरहिते ब्रह्मणि असाधकतमैः शब्द-

आनन्ददायिनी

तर्ह्यव्याकृतमासीत्' इत्यादावित्यर्थः । **अवस्था**—सूक्ष्मावस्था । **मायादिशब्दैरिति** । पूर्वोक्तमायादिशब्दैरित्यर्थः । ब्रह्माज्ञानपक्षे निरवद्यत्वश्रुतिविरोधश्चेत्याह—**निरवद्यमितीति** । अविद्याश्रयत्वे हि अकर्मवश्यत्वं सर्वज्ञत्वं च न स्यातामित्याह—**अकर्मवश्येति** ।

---

[1]प्रदेशैः स्फुट. [2]कृतशब्दैरपि—**पा.** [3]थ्यार्थसंग्रहः—**पा.** [4]मायावन्ध.—**पा.** [5]ह्येषां—**पा.**

तत्त्वमुक्ताकलापः

**क्षेप्तुं मायादिशब्दः क्षम इति वदतः स्याद-विद्या तवैव ॥ ४१ ॥**

**निर्दोषश्रुत्यबाधप्रणयिभिरुदितो ब्रह्मजीवा-नुबन्धी**

सर्वार्थसिद्धिः

विशेषैराविद्यां वदतस्तवैवाप्रतिपत्तिविप्रतिपत्तिभ्यां निग्रहः स्यादित्य-भिप्रायेणोक्तम्—स्यादविद्या तवैवेति ॥ ४१ ॥

**इति मायादिशब्दानां ब्रह्मदोषप्रतिपादकत्वानुपपत्तिः.**

---

अत्र केचिन्निर्दोषश्रुत्यविरोधमाकाङ्क्षन्त एवं व्यभाङ्क्षुः—अविद्या किल स्वकल्पितानां क्षेत्रज्ञानां सत्यं तिरोधायासत्यं सत्यत्वेन प्रकाशयति; दुःखादिकं च दोग्धि; माया तु ब्रह्मणः सत्यमसत्यं च सम्यगेव दर्शयन्ती दुःखादिकं चानुत्पादयन्ती विश्वव्यापारलीलारसं प्रसूत इति। इमं विभागमनुभाष्य दूषयति—**निर्दोषेति**। अफलत्वं

आनन्ददायिनी

**अप्रतिपत्तिः** — अज्ञानम्। **विप्रतिपत्तिः** — विपरीतज्ञानम्। ॥ ४१ ॥

**मायादिशब्दानां ब्रह्मदोषप्रतिपादकत्वानुपपत्ति.**

---

ननु निर्दोषत्ववचनविरोधो नास्ति, मायाया दोषत्वाभावात्। तथा च मायासिद्धौ न विरोध इत्यक्षेपसंगतिमाह—**अत्र केचिदिति**। ननु विभागस्य वैयर्थ्यं ब्रह्मणो निर्दोषत्वस्थापनस्यैव प्रयोजनत्वा-

तत्त्वमुक्ताकलापः

**मायाविद्याविभागोऽप्यफल इह परोन्मोह-[1]नार्था हि माया।**

**मिथ्यार्थान् दर्शयित्वा विहरणमपि तैस्तादृशं भावयन्ती**

सर्वार्थसिद्धिः

विवृणोति—**परेति**। अयं भावः—ये नाम केचिन्मायया क्रीडन्ति, न [2]तेऽनया मोमुह्यन्ते; परानेव व्यामोहयन्ति। अत्र तु न वस्तुतस्सन्ति भवतां परे मोहनीयाः। कल्पितांस्तु क्षेत्रिणः कल्पितानि च मोहकरणोपकरणानि स्वय सर्ववित्परमेश्वरो मायावी यदि कल्पितत्वेन पश्येत्, कथं तान् मुमोहयिषेत्? कथं च तैश्चिक्रीडिषेत्? अत ईदृशोपाधिविभागेन जीवेश्वरयोस्सदोषनिर्दोषत्वविभागो दुस्साध इति। अथ पराविद्याकल्पितानि जीवाद्युपकरणानि ब्रह्मापि स्वमायया परमार्थवत्पश्यतीति मन्वीत; तत्राह—**मिथ्यार्थानिति**। **दर्शयित्वा**—सत्यत्वेनेति शेषः। **तादृशं**—मिथ्याभूतमित्यर्थः। इयं स्वयमसत्येव माया स्वसिद्धान्यविद्यासिद्धानि वा मिथ्याभूतानि विहारोपकरणानि

आनन्ददायिनी

दित्यत आह—**अयं भाव इति**। **यदि कल्पितत्वेन पश्येदिति**। ननु यथा रामरावणादिसालभञ्जिकाजालं वस्तुतो निर्जीवत्वेन जानन्त एव सालभञ्जिका एव परस्परं मारीचादिरूपेण मोहनव्यापारे युद्धादिषु च प्रवर्तयन्तो दृश्यन्त इति चेत्सत्यम्। तत्तत्कथाभिनयेन सत्यकथाज्ञानस्य ज्ञायमानतया तदवगतिहेतुत्वेन सार्थकत्वात्। अत्र तु

[1] ना सार्ऽप माया—**पा.** [2] ते तया—**पा.**

तत्त्वमुक्ताकलापः

## मायैव स्यादविद्या न कथमितरथा स्यादनुच्छेदनीया ॥ ४२ ॥

सर्वार्थसिद्धिः

तत्साध्यं विहरणं च यदि सत्यत्वेन दर्शयन्ती अर्भकादीनामिव प्रतिबिम्बकल्पैर्जीवैस्संव्यवहारमा[1]रभेत, सैव कथमविद्या न स्यात्? सुखजनकत्वादिति चेन्न; अविद्यायामपि तस्याभ्युपगमात्। दुःखाजनकत्वे सतीति चेत्तत्राह—**इतरथेति**। इतरथा—दुःखासंभिन्नसुखजनकत्वेनाविद्यात्मकत्वाभावे सतीत्यर्थः। नन्वनादित्ववन्मायाया अनुच्छेद्यत्वमप्यस्तु, का नो हानिरिति चेत्; प्रथमं तावदसत्यस्य सर्वस्यानित्यत्वाभ्युपगमविरोधः। अथ च ब्रह्मस्वरूपवन्निर्बाधस्य नित्यस्य भावरूपस्यासत्यत्वकल्पनाविरोधः। अथवा 'विश्वमायानिवृत्तिः' इति स्वाभीष्टपरतया व्याख्यातश्रुतिविरोधः, नित्यानित्यवस्तुविवेकवैतथ्यं चेति ॥ ४२ ॥

इति मायाविद्याविभागभङ्गः.

---

आनन्ददायिनी

सर्वज्ञस्य वेदितव्याभावात्। यद्यपि ज्ञातार्थाभिनयेऽपि प्रवर्त्तमाना दृश्यन्ते। तथाऽपि तज्ज्ञानेन तात्कालिकरसाभिव्यक्तेः। न चात्रापि तथाविधमायाशब्दार्थानुपपत्तिरिति भावः। **अविद्यात्मकत्वाभावे सतीति**। ज्ञानविरोधित्वाभावादिति भावः। **नित्यानित्येति**। चकारस्त्वद्वैतसिद्धान्तविरोधादिकं समुच्चिनोति। ननु नित्यानित्यज्ञानस्यानित्यनिवृत्त्यर्थत्वात् कथं वैयर्थ्यमिति चेन्न। ब्रह्मव्यतिरिक्तनिवृत्त्यर्थत्वात्तस्येति भावः। **मायैव स्यादविद्येति** मूलस्य माया ऽविद्यैव स्यादित्यर्थः॥ ४२ ॥

मायाविद्याविभागभङ्गः.

---

[1] रभते सैव—**पा.**

तत्त्वमुक्ताकलापः

**मिथ्याभूतस्य सत्यं निरुपधि भजते न ह्युपादानभावं**
**तस्योपाधिश्च मिथ्यात्मक इति निरधिष्ठानता नास्य युक्ता ।**

सर्वार्थसिद्धिः

यत्तु मिथ्याभूतस्य प्रपञ्चस्य तादृशमेवोपादानं भवितुमर्हतीत्याहुः, तदनुभाषते —[1] मिथ्येति । अयं भावः—यद्यपि ब्रह्मोपादानकमशेषं कार्य[2]मान्नातम्; तथाऽपि तस्य न स्वरूपतस्तदुपादानत्वं युक्तम्, निर्वि[3]कारत्वात् चिद्रूपत्वाच्च । अत उपाध्यपेक्षायां ब्रह्मण उपादानत्वघटकतया प्राप्त उपाधिः स्वकार्यवन्मिथ्याभूत एष्टव्यः ।

आनन्ददायिनी

ननु मिथ्याभूतप्रपञ्चं प्रति ब्रह्मण उपादानत्वश्रुत्यन्यथानुपपत्तिबलादविद्यासिद्धिरित्याक्षेपसंगतिमाह —**यत्त्विति** । ननु सत्यस्य मिथ्याभूत प्रत्युपादानत्वं शुक्त्यादौ भवद्भिरेवोच्यत इत्यत्राह —**अयं भाव इति । निर्विकारत्वादिति** । शुक्त्यादेरपि न साक्षादुपादानत्वं यद्यपि तथाऽप्यत्र विशेष इति भावः । **चिद्रूपत्वादिति** । चितो जडात्मकत्वविरोधादिति भावः । **ब्रह्मण उपादानत्वघटकतयेति** । यत्तादात्म्यापादक कार्यं तदुपादानमिति तत्तादात्म्यापादकस्य परिणामिनो ब्रह्मनिष्ठस्यावश्यकत्वादिति भावः । ननु तर्हि ब्रह्मणः किमर्थ-

---

[1] मिथ्याभूतस्येति—**पा.** [2]मामनाम—**पा.** [3] कारत्वाद्विरूप—**पा.**

तत्त्वमुक्ताकलापः

**तस्म.त्सत्यानृते द्वे मिथुनमिति न सद्विश्व-सत्ता ह्यबाध्या**

**सद्विद्यायां च कार्यं ननु कथमसतस्सद्भवे-दित्युपात्तम् ॥ ४३ ॥**

सर्वार्थसिद्धिः

स च स्वरूपसत्यत्वाभावान्निरधिष्ठानो न सिध्येत् । अतो ब्रह्मण उपादानत्वार्थमुपाधे स्वरूप[1]सिद्ध्यर्थं च मिथः[2]करम्बितसत्यानृतमिथुनसभवः सर्गः स्वीकार्य इति । अत्र लोकसिद्धोपादानप्रक्रियाविरोधमभिप्रेत्याह—**इति न सदिति** । सत्ययोरेव हि प्रकृतिविकृतित्व दृष्टम ; न च कल्पितरजताद्युपहितस्य तत्तदर्थक्रियाकारित्वम् । अतो मिथ्योपसृष्टतयाऽपि ब्रह्मण उपादानत्वं मृग्यमिति भावः । उपादानमिथ्यात्वकल्पकासिद्धिमाह—**विश्वेति** । प्रपञ्चस्य सत्यत्वं तावद्व्यावहारिकव्यपदेशेन त्वयाऽपि संगृह्यते ; बाधश्च परिहरिष्यत इति भाव. । श्रुतिविरुद्धं च कार्यमिथ्यात्वमित्याह—**सद्विद्यायामिति** । "तद्धैक आहुः असदेवेदमग्र आसीत्" इति परमतमनूद्य स्वमतेन तत्प्रतिक्षेपे "कुतस्तु खलु सोम्यैवं स्यात् कथमसतः सज्जायेत" इति कार्यसत्यत्वं संप्रति-

आनन्ददायिनी

मुपादानत्वं स्वीकार्यामत्यत्राहि—**स चेति** । **सत्ययोरेव हीति** । नन्वविद्योपहितस्य शुक्त्यादे रजतोपादानत्वं दृष्टमिति चेन्न । तस्या-संप्रतिपन्नत्वादिति भावः । **अर्थक्रियाकारित्वं** कटकाद्युपादानत्वमित्यर्थः । **मृग्यं**—नास्तीत्यर्थः । ननु विश्वस्य [3]सत्त्वमेव नास्ति ; कुतस्तस्याबाध्यत्वमित्यत्राह—**प्रपञ्चस्येति** । **कार्यसत्यत्वमिति** । ननु

[1] सिद्ध्यर्थ मिथः—**पा.** [2] करम्भित—**पा.** [3] सत्यत्वमेव—**क.**

## सर्वार्थसिद्धिः

पन्नत्वेनोपात्तम्। अतः प्रथमप्रतीतानुसारेण 'वाचारम्भणं विकारो

## आनन्ददायिनी

'कथमसतस्सज्जायेत' इत्यस्यायमर्थः—असतः सदुत्पत्त्यसंभवात् मिथ्यैवोत्पद्यत इति प्रपञ्चस्योत्पद्यमानस्य मिथ्यात्वमिति चेन्न; तथा सति कारणस्यासत्त्वप्रसङ्गेन ब्रह्मणः सत्यत्वाभावप्रसङ्गात्। न च ब्रह्मभिन्नाविद्याया एव परिणामितयोपादानत्वं ब्रह्मणस्तु नास्त्युपादानत्वमिति वाच्यम्। तथा सति सदेवेत्युपक्रमविरोधात्। न ह्यसच्छब्दार्थस्योपादानत्वबलेन कार्यसत्त्वप्रतिपादनं तदुपपादकमिति भावः। ननु 'वाचारम्भणं विकारो नामधेयम्' इत्यत्र वाचाया आलम्बनं विकारो घटपटादिः, नामधेयं नाममात्रं, न वस्तुतस्सत्यमिति प्रतीतेः विकारोपादानतया मिथ्या सिध्यतीत्याह—**अत इति**। अयं भावः—न चात्र तत्प्रतिपादकशब्दोऽस्ति। न च वाचारम्भणादिशब्द[1]स्त्वदुक्तार्थबोधकः। वाक्संबन्धप्रतिपादनपरत्वात्। नापि विकारो नामधेयमिति शब्दादभेदोपदेशेन तत्सिद्धिः; उपक्रमभूतैकविज्ञानप्रतिज्ञाविरोधात् कार्यकारणयोर्भेदात्कथं प्रतिज्ञेति शङ्काया अभेदोपन्यासेन निवर्त्तनीयायास्तदभावबोधनेन निवर्तनासंभवात्। प्रत्युत सर्वशब्दार्थाभावप्रतिपादनेन पुनर्मुखान्तरेण प्रतिज्ञानुपपत्तिशङ्कोद्बोधकत्वात्। कस्तर्हि विकारो नामधेयमिति वाक्यस्यार्थ इति चेत्। नामशब्दः प्रसिद्धिपरः, [2]मृत्पिण्डाद्येयापृथक्[3]सिद्धा येयं विकारो घटाद्यवस्था वाचारम्भणं नाम व्यवहारविषय इति लोकप्रसिद्धः अतः शब्द[4]भेदान्न कार्यमुपादानतो भिद्यत इत्यर्थ इति, तदाह—**प्रथमप्रतीतेति**।

[1] स्तदुक्तार्थबो—क. [2] मृत्पिण्डे येयमपृथक्.—क [3] सिद्धाधेयविकारो—क
[4] भेदेन कार्यमुपादानाद्भि—क.

## सर्वार्थसिद्धिः

नामधेयम्" "अपागादग्नेरग्नित्वम्" इत्यादिकमसत्कार्यवादनिरासार्थतया नेतव्यमिति भावः। एवं "मृत्तिकेत्येव सत्यम्" "त्रीणि रूपाणीत्येव सत्यम्" इत्यादौ च श्रुत्युपात्तमृत्तिकादिसत्यत्वानुरोधेनोपादानोपादेय-द्रव्यतादात्म्यपरत्वसंग्रह एव साधीयान्। "अथ नामधेयं सत्यस्य

## आनन्ददायिनी

**अपागादग्नेरग्नित्वमिति**। अग्नित्वेन प्रतिपन्नस्याग्नेरग्नित्वमपागात्—बाधितमित्यर्थः। तथा च मिथ्यात्वमिति भावः। किं च मृत्तिकेत्येवेतीतिशब्देन मृत्तिकाप्रकारप्रतिपत्तेर्मृत्तिकात्वेन सत्यमिति प्रमाणसिद्धमित्यर्थतया विकाराणां तदन्यत्वस्यैव स्वरसप्रतीतेर्न पूर्वपक्ष्यवकाश इत्याह—**एवमिति**। ननु 'अथ नामधेय सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यं' इत्यादिषु सत्यस्य जगत. प्रमाणशब्दोपलक्षितस्य जगतश्च सत्तावैलक्षण्यावगमान्न ब्रह्मवत् पारमार्थिकत्वं प्रपञ्चस्येति चेत्तत्राह—**सत्यस्य सत्यमित्यादि**। सत्यं वैलक्षण्यमेव गम्यत इति, तथाऽपि न प्रपञ्चस्य मिथ्यात्वसिद्धिः। कालत्रयनिरूपितत्वानन्याधीनत्व[1]विशेषणाविशिष्टं ब्रह्मसत्त्वं किंचित्कालनिरूपितमन्याधीनं प्रपञ्चसत्त्वमिति वैलक्षण्यसंभवात्। किंचात्र षष्ठी न निर्धार[2]णार्थे। तथा सति प्राणानां सत्यत्वकथनेन तदन्यधर्मेण निर्धारणं स्यात्। न च सत्यत्वेन निर्धारणं. समुदायिसाधारणधर्मेण पृथक्करणायोगात्।

---

[1] विशेषविशिष्ट—क [2] णार्था—क.

## सर्वार्थसिद्धिः

सत्यं प्राणा वै सत्यं तेषामेष सत्यम्" इत्यत्र च प्रकृत्यवगतप्राणसत्यत्वाबाधेन सबन्धविभक्तेरुचितविशेषसंभवे विपरीतविवक्षाकल्पनमन्याय्यम्। यदि च प्राणेषु व्यावहारिक सत्यत्वमिहानूद्येत तदा मिथ्याभूतानां एष सत्यमिति किं नाम त्वादिष्टं निर्दिष्टं स्यात्? प्रत्युत समभिव्याहारसामर्थ्यात् ब्रह्मणोऽपि सत्यत्वमविशिष्टोपात्ततया व्यावहारिकमित्येव

## आनन्ददायिनी

तदाह—**प्रकृत्यवगतेति**। तथा च प्रतियोगित्वे षष्ठी। सत्यशब्दश्च नियन्तृपरः। 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यं तान्येतानि त्रीण्यक्षराणि सत्तियमिति तद्यत् सत् तदमृतं अथ यद्यत्तन्मर्त्यं अथ यद्य तेनोभे नियच्छति' इति चिदचिन्नियन्तृत्वस्य [1]बृहदारण्यकनिरुक्तिबलात **तत्सिद्धेः** प्राणादीनां किञ्चिन्नियन्तृणामपि नियन्तृत्वमस्य लभ्यते; 'पवित्राणां [2]पवित्रं यो मङ्गलानां च मङ्गलम्' इतिवत्। ननु सत्यशब्दस्य रूढ्यर्थ एव [3]गृह्यत इति चेन्न। 'आज्यैः स्तुवते' इत्यत्र 'तदाज्यानामाज्यत्वम्' इति श्रौतयोगार्थस्य रूढ्यर्थापेक्षया बलीयस्त्वेन स्वीकारवत् श्रौतयोगस्य ग्राह्यत्वात्। उक्तं च **वार्तिके**—

गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा स्वयम्।
वेदो यमाश्रयेदर्थं को नु तं प्रतिकूलयेत्॥

इति। तथा च सर्वनियन्तेति वाक्यार्थ इति न मिथ्यात्वसिद्धिः। किं च यदि व्यवहारिकसत्यानां प्राणानां मध्येऽतिशयेन सत्यमित्युच्येत तदा मुख्य व्यावहारिकत्वमुक्तं स्यादिति [4]ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गः, तदाह—**यदि चेति**।

---

[1] बृहदारण्यकेऽस्यानुपलम्भादत्र 'छान्दोग्यनिरुक्तिबलात्' इति पाठेन भाव्यमिति भाति. [2] पवित्रं च म—**ग.** [3] ग्राह्य इति—**ग** [4] ब्रह्मणो मिथ्या—**ग.**

तत्त्वमुक्ताकलापः

## कार्याणां यत्स्वरूपं किमपि गुणमयं कारणं कापिलोक्तं

सर्वार्थसिद्धि.

सिध्येत्। [1] स्वरूपोपाधिकसत्यत्वविधौ च तस्य नीलादिवन्निष्प्रतियोगिकत्वान्न षष्ठी समन्वीयेत। अतो यथाभाष्यमिहार्थ. ॥ ४३ ॥

### इत्यविद्याकल्पककार्यमिथ्यात्वानुपपत्तिभङ्गः.

---

अत्र यदुपजीवनेन मिथ्याभूतस्य मिथ्याभूतमेवोपादानमिति कल्प्यते तमेव प्रकृतिविकृत्यैकरूप्यनियमं निरस्यति — **कार्याणामिति**। नविलक्षणत्वाधिकरणे हि सत्त्वरजस्तमोमयस्य जगतस्तादृशमेवोपादानं युक्तम्. न तु निर्गुणं ब्रह्मेति वदतस्सांख्यस्य द्वितीयेऽध्याये **सूत्रकारैरुत्तरं** दत्तं "दृश्यते तु" इति। कथंचित्सारूप्यं ब्रह्मणोऽपि सिद्धम्; सर्वथा सारूप्यं न ते प्रकृतेरपि स्यात्; भेदाभेदाङ्गीकारेऽपि

आनन्ददायिनी

**यथाभाष्यमिति**। नियन्तृत्वं भाष्ये प्रतिपादितमित्यर्थः। 'ननु सत्य ज्ञानं' 'तत्सत्य स आत्मा' 'त्रीणि रूपाणीत्येव सत्यं' 'मृत्तिकेत्येव सत्यम्' इत्येवमादावपि तथा प्रसङ्ग इति चेत्। 'सत्यं ज्ञान' 'तत्सत्यम्' इत्यादाविष्टापत्तेः। 'मृत्तिका' इत्या[2]दौ तु योगार्थो बाधकबलात् परित्यज्यते यथा क्वचिन्मुख्यार्थत्याग इति ॥ ४३ ॥

### अविद्याकल्पककार्यमिथ्यात्वान्यथानुपपत्तिभङ्गः.

---

पूर्वसङ्गतिरेवास्य सङ्गतिरित्याह—**अत्रेति**। **भेदाभेदेति**।

---

[1] स्वरूपेऽधिक–**पा.** [2] दौ योगा–**ग.**

तत्त्वमुक्ताकलापः

## तत्क्षिप्तं माक्षिकादेः क्रिमिमुखजननात्सूत्रकारैर्द्वितीये ।

सर्वार्थसिद्धिः

समविषमदशाभेदव्यवस्थापनात् । अतः कार्यान्तरकारणव्यावर्तकाकारेण सारूप्यमपेक्षितमिति वक्तव्यम् । तत्र माक्षिकगोमयादिभ्यः क्रिमिवृश्चिकाद्युत्पत्तिदर्शनाद्व्यभिचारः । एष्वपि पार्थिवत्वाकारेण सारूप्यमस्तीति चेत्, किमतः ? तेनाकारेण तेषां तत्कारणत्वे पार्थिवान्तरेभ्योऽपि तज्जातीयोत्पत्तिप्रसङ्गात् । यदि चासजातीयोत्पादकव्यावर्तकाकारेण सारूप्यमिष्येत कथमिदं प्रकृतौ संभाव्येत ? सर्वस्याप्यन्ततः प्रकृतिकार्यत्वाभ्युपगमात्तद्व्यतिरिक्तोपादानानङ्गीकाराच्च । एव कार्यस्य विजातीयकार्यव्यावर्तकाकारेण सरूपमुपादानमित्यपि नियमो दूष्यः; सारूप्यविकल्पदौःस्थ्यस्य दुर्वारत्वात्, शरावादिजातीयव्यावर्तकघटत्वा-

आनन्ददायिनी

साङ्ख्यैः कार्योपादानयोस्तादात्म्याङ्गीकारादिति भावः । अत इति । कारणतावच्छेदकरूपेण सालक्षण्यं विवक्षितमित्यर्थः । तत्रेति । गोमयत्वादेर्वृश्चिकादावभावादिति भावः । [1]असजातीयेति । कारणतावच्छेदकभिन्नमप्यसजातीयाद्व्यावर्तकं भवति पार्थिवे गन्धवत्त्ववदिति पूर्वस्मात् भेदः । अन्तत इति । तथा च तत्र सालक्षण्यं बाधितं स्यादिति भावः । दूषणप्रकारमेवाह—सारूप्येति । उक्त-

[1] कार्यविजातीयेति—क.

तत्त्वमुक्ताकलापः

**तस्मान्मिथ्यात्मकस्य स्वयमनुपधिकं सत्यमेवास्तु सूतिः**

**सत्योपादानवादे जगदपि न मृषा स्यादितीष्टं त्विदं नः ॥ ४४ ॥**

सर्वार्थसिद्धिः

दिना मृदस्सारूप्यायोगात्। अतस्सारूप्येण वा वैरूप्येण वा अन्वयव्यतिरेकवता धर्मिग्राहकसिद्धेन वा केनचिदाकारेण निमित्तत्ववदुपादानत्वमपीति नियमः। एवं स्थिते सत्यस्य कारणत्वं कार्याणामसत्यत्वं च स्थापयतस्ते निरुपाधिकात् सतो जगदुत्पत्तौ न विरोध इत्याह— **तस्मा**दिति। निर्वि[1]कारश्रुतिविरोधात् उपहितग्रह इति चेन्न ; विकारमिथ्यात्वेन युष्माभिस्तत्समाधानात्। **सूतिः**—अध्यासाधिष्ठानतया उपादानमित्यर्थः। अत्र प्रसङ्गान्तरमाशङ्क्य परिहरति— **सत्येति**। तुशब्देन न केवलमिष्टप्रसङ्गता ; व्याप्तिसापेक्षे प्रसङ्गे पूर्ववत्सारूप्यनियमभङ्गोऽप्यस्तीति द्योत्यते ॥ ४४ ॥

**इत्युपादानोपादेयसालक्षण्यनियमभङ्गः.**

---

आनन्ददायिनी

[2]नियमभङ्गस्य प्रकृताद्युपयोगमाह—[3]एवं स्थित इति। कार्यस्य सत्यतान्यथानुपपत्त्या नाविद्याकल्पनमनुपपत्त्याभावादिति भावः ॥४४॥

**उपादानोपादेयसालक्षण्यनियमभङ्गः.**

---

[1] कारत्वश्रुति—**पा.** [2] नियमितभङ्ग—**ग.** [3] एव मत इति—**ग.**

तत्त्वमुक्ताकलापः

## दृश्यत्वाद्विश्वमिथ्यावचसि विहतयोऽसिद्धय-श्चात्र बह्व्यः

सर्वार्थसिद्धिः

अथ कार्यमिथ्यात्वासिद्धिरेवासिद्धा, अनुमानतस्तत्सिद्धेरित्यत्राह —**दृश्यत्वादिति**। मिथ्याशब्दोऽत्र 'ब्रीह्यर्थाः' इतिवद् भावप्रधानः। विगीतं मिथ्या दृश्यत्वात् यद्दृश्यं तन्मिथ्या यथा शुक्तिरूप्यमित्यत्र सर्वे दोषास्समाह्रियन्ते। विहतयस्तावत्—विगीतपदं किञ्चिन्निष्ठं विगीतत्वमुपस्थापयति, तस्यापि पक्षीकरणात् तन्निष्ठात्यन्ताभावो मिथ्यापदेनोपस्थाप्यत इति प्रतिज्ञापदयोर्व्याघातः। द्वयोरपि पदयोस्तत्त्वतः स्वार्थसमर्पकत्वाभावान्न व्याघात इति चेत्; एवं सति त्वन्मते क्वचिदपि प्रतिज्ञाविरोधो न स्यादिति विशृङ्खलविरुद्ध[1]भाषितेन भवता भवितव्यम्। ईदृशतत्त्ववेदिना च त्वया प्रतिवादिनोऽपि विरुद्धं वदन्तो न निग्राह्याः। परबुद्धिसिद्धविरोधात्तन्निग्रह[2]इति चेन्न। परबुद्धिसिद्धेऽपि त्वया तत्त्वशून्यत्वावधारणात्। किंच विगीतत्वं यदि मिथ्या

आनन्ददायिनी

अवसरसङ्गतिं दर्शयति—**अथेति**। **प्रतिज्ञापदयोरिति**। विगीतत्ववान् विगीतत्वाभाववानिति ह्यवसानादिति भावः। **एवं सतीति**। तत्त्वतः स्वार्थसमर्पकयोरेव विरोधे ब्रह्मेतरप्रतिपादकस्थले क्वचिदपि व्याघातो न स्यादिति भावः। **परबुद्धिसिद्धेऽपीति**। शुक्तिरजतभ्रान्तस्येव भ्रान्तिज्ञस्य प्रवृत्त्यभावादिति भावः। **किं च विगीतत्वमिति**। अन्यतरनिर्णयरहितमनिर्धारितमेवास्त्विति चेन्मैवम्; तथा सति विगीतस्य सत्त्वासत्त्वसन्देहे आश्रयासिद्धिप्रसङ्गादिति

[1] भाषिणा भवता भाव्यम्—**पा.** [2] इति न—**पा.**

## सर्वार्थसिद्धिः

स्यात्, तदा [1]सत्यत्वेन मिथ्यात्वेन वा संप्रतिपत्तिः स्यात्। तत्राद्ये मिथ्यात्वसाधनव्याघातः; द्वितीये साध्यत्वव्याघातः। मिथ्यापदं च सत्यमसत्यमनिर्धारितविशेषद्वयं वा मिथ्यात्व[2]मुपाददीत। प्रथमे तस्य मिथ्यावृत्तित्वव्याघातः। न हि सत्यं रूप्यत्वं शुक्तिरूप्ये वर्त्स्यति। सिद्धान्तव्याघातश्च, ब्रह्मस्वरूपस्य सत्यस्य निराधारस्यासत्य-

## आनन्ददायिनी

भावः। क्वचित् 'किं च विगीतं यदि मिथ्या स्यात्' इति पाठः, तदा विगीतं मिथ्या स्या[3]दिति साध्यते तदा साधनदशाया-मित्यर्थः। **न हीति**। ननु मिथ्यात्वं क्वचिद्वर्तते न वा, "[4]आद्ये मिथ्यात्वं सत्यमसत्यं वा, नाद्यः तदाश्रयस्य सत्यत्वनियमेन मिथ्यात्वाश्रयत्वायोगान्मिथ्याशब्दवाच्यत्वाभावप्रसङ्गात्। न द्वितीयः-तस्यापि [5]सत्यत्वरूपमिथ्यात्वाश्रयत्वाभावेन तस्य [6]मिथ्यात्वाश्रयत्वा-नुपपत्तेः। न द्वितीयः निरधिष्ठानत्वायोगादिति चेन्न। मिथ्यात्वं हि किञ्चिन्निष्ठाभावप्रतियोगित्वं तच्चान्यत्र सत एवेति न दोषः, न च त्वया वक्तुं शक्यमित्याह—**सिद्धान्तव्याघातश्चेति**। किं च मिथ्यात्वं सत्यमपि ब्रह्मस्वरूपं तदतिरिक्तं वेति विकल्पाभिप्रायेणाह—**ब्रह्मेति**। [7]ननु तस्यासत्यवृत्तित्वं माऽस्त्विति चेन्न। प्रपञ्चस्य सत्यत्वप्रसङ्गात्। ननु [8]सत्यत्वमपि ब्रह्मेति चेत्, ब्रह्मणस्तस्य सत्यत्वप्रसङ्गादेतादृशसत्यत्वाभावस्य पराभि-मतत्वेन बाध[9]कत्वाभावाच्चेति भावः। असत्यमनिर्धारितविकल्पद्वय-

---

[1] सत्यत्वेन वा मिथ्या—**पा.** [2] मुपस्थापयति—**पा.** [3] दिति बाध्यते ?—**ग.**
[4] आद्येऽपि सत्य—**क.** [5] सत्यरूप—**क.** [6] मिथ्यात्वानुपपत्तेः। ननु निरधि—**क.**
[7] ननु सत्यासत्य—**क.** [8] सत्यत्व ब्रह्मेति—**ग.** [9] काभावप्रसङ्गाच्चेति—**क.**

## सर्वार्थसिद्धिः

[1]वृत्तित्वे व्याघातः ; तदतिरिक्तस्वीकारे सत्याद्वैतव्याघातः । हेतुपदेन च पक्षधर्मतयोपस्थाप्यमानं लिङ्गं साध्यपदेनापह्नियत इति प्रतिज्ञाहेतुविरोधः। शुक्तिरूप्यगतयोश्च साध्यसाधनयोस्सत्यत्वेन ग्रहणे प्राग्वद्विरोधः। असत्यत्वेन ग्रहणे तूदाहरणवाक्येन व्याप्तिप्रदर्शनविरोधः । दृष्टान्ते च मिथ्यात्वेन प्रदर्शितस्य साध्यस्य पक्षे सत्यत्वेनोपसंहारे प्रतिज्ञोदाहरणविरोधः । असत्यत्वेनोप[2]संहारे च विधायकमेव निषेधकमिति व्याघातः । एवमसिद्धयश्च । तथाहि—यद्यपि तर्कस्यारोपितलिङ्गधी[3]रङ्गं भवति तथाऽपि

## आनन्ददायिनी

मपि द्वितीये साध्यत्वव्याघात इति विगीतपदार्थदूषणेनैव दूषितप्रायमिति न पृथक् दूषितम् । तत्प्रकारश्च मिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वापातः, यद्यनिर्धारणं [4]तदाऽपि तस्यान्यतरत्वेन पूर्वविकल्पदोष इति । [5]**केचित् अत्र ग्रन्थपातमाहुः ॥ साध्यपदेनापह्नियत इति** । प्रतीयमानाधिकरणनिष्ठाभावप्रतिपादनादिति भावः । **प्राग्वद्विरोध इति** । दृश्यत्वमिथ्यात्वयोस्सत्यत्वे आश्रयस्य शुक्तिरूप्यस्यासत्यतया सत्याश्रयत्वं न स्यादिति भावः । **असत्यत्वेनेति** । तन्निष्ठा[6]भावप्रतियोगित्वेनावगतस्य तन्निष्ठतया [7]प्रतिपादनायोगादिति भावः । किं च मिथ्यात्वेन प्रदर्शितं साध्यं पक्षे सत्यत्वेनोपसंह्रियते, उतासत्यत्वेनेति विकल्प्रमभिप्रेत्य आद्य आह-**दृष्टान्तइत्यादिना**। द्वितीय आह—**असत्यत्वेनेति** । **विधायकमेवेति** । पक्षे पक्षनिष्ठात्यन्ताभावप्रतियोगिसाध्यमस्तीति व्याघात इत्यर्थः ।

---

[1] वृत्तित्वव्याघातात् तद-**पा.** [2] संहारे तु विधा-**पा.** [3] रङ्ग तथाऽपि-**पा.**
[4] तदपि-**ग.** [5] केचित्तु अत्र-**ग.** [6] भावे प्रति-**ग.** [7] प्रतीयमानत्वापाद-**ग.**

## सर्वार्थसिद्धिः

[1]साधने तु न तथा, तथैवोभयव्यवस्थादृष्टेः। अन्यथा स्वबुद्धिकल्पितधेनु-पर्वतादिषु कल्पितैरेव कैश्चिल्लिङ्गैः पयःपावकादीननुमाय तदर्थिनां तत्र प्रवृत्तिप्रसङ्गात्। व्यावहारिकसदेव साधनाङ्गं न प्रातिभासिकमिति चेन्न; शुक्तिरूप्यस्य त्वया दृष्टान्ततयोपादानात्। अत एव प्रमितत्वेन लोक बुद्ध्यारूढमाश्रयादि भवतीत्यपि निरस्तम्। प्रतिवादि[2]संमतत्वमात्रेण पक्षीकारादि स्यादिति चेन्न; स्वार्थानुमाने तदयोगात्, तत्पूर्वकत्वात् परा-र्थप्रयोगस्य अन्यतरा[3]सिद्धिलोपप्रसङ्गाच्च। तदिह पक्षादीनां प्रमाण-तस्सिद्धौ तन्मिथ्यात्वसाधनव्याघातः। असिद्धौ चाश्रयाद्यसिद्धयो बह्व्य-स्संमन्तव्याः। विरुद्धद्वयसमुच्चयनिषेधौ[4] तु दुर्वचावित्यभिप्रायेणाह—

## आनन्ददायिनी

**साधने त्विति**। अनुमान इत्यर्थः। एवं व्यवस्थायां नियामक-माह—**अन्यथेति**। **शुक्तिरूप्यस्येति**। न च शुक्तिरूप्यस्य प्रातिभासिकत्वेऽपि त[5]द्गतद्रव्यत्वादेर्व्यावहारिकत्वमस्तिवति वाच्यम्। प्रातिभासिकस्य व्यावहारिकधर्माणाधारत्वादिति भावः। **अत एवेति**। शुक्तिरूप्यादेः प्रमितत्वेन लोकबुद्ध्या रूढ्यभावा[6]दिति भावः। **अन्य-तरेति**। वादिप्रतिवादिनोरन्यतरस्य तत्सिद्धिनियमादिति भावः। ननु हेतोः स्वरूपासिद्धिरस्तु, कथमसिद्धय इति बहुवचन-मित्यत्राह—**असिद्धौ चेति**। **विरुद्धसमुच्चयः**—पक्षतावच्छेदक-साध्यहेत्वादिसमुच्चयः। **तन्निषेधः**—मिथ्यात्वतदभावयोर्निषेधः।

---

[1] साधके तु–**पा.** [2] समतिमात्रेण–**पा.** [3] सिद्धत्वलोप–**पा.** [4] तु मुदु–**पा.** [5] द्गतदृश्यत्वा–**क** [6] दित्यर्थः–**क.**

तत्त्वमुक्ताकलापः

**पक्षादेस्सिद्ध्यसिद्ध्योर्न हि गतिरितरा नापि वादाङ्गमीदृक् ।**

सर्वार्थसिद्धिः

**पक्षादेरिति** । यदि ह्यसिद्ध्यादिदोषदुष्टमपि साधकमङ्गीक्रियेत, तदा कैव कथा कथायास्तत्फल[1]व्यवस्थायाश्चेत्यभिप्रायेणाह—**नापीति** । दुष्टमपि जल्पवितण्डयोरङ्गमिति चेन्न ; तयोर्निग्रहस्थाननिवृत्तिप्रसङ्गात् । न हि कथाङ्गस्वीकर्तुः कश्चिदपराधः स्यात् । अतः प्रतिभाक्षये परव्यामोहनेन पाक्षिकावष्टम्भविजयावहतया तयोस्तदनु[2]ज्ञानं न त्वङ्गतया, अवश्यप्रयोक्तव्यत्वप्रसङ्गाच्च । न च दुष्टानां कथाङ्गत्वं कैश्चिदनुशिष्टम् । अतिक्रान्तमर्यादानामभिमतिरुन्मदिष्णूनामिवोपेक्षणीया । किंच माध्यमिकादयोऽप्येतादृग्धेतुभिस्त्वदनिष्टं तत्तत्साध्यं साधयन्तस्त्वया न निगृह्येरन् । विमतमसाधकं दृश्यत्वात् संमतवदिति त्वदुक्तोपालम्भे च किं वक्ष्यसि ? । [3]केन वान्यदपि किञ्चित्स्वयंप्रकाशत्वादिकं साधयिष्यसि ? स्वव्या[4]घातादिदुष्टतया माध्यमिकादिप्रयोगोऽनास्थेय इति चेत्,

आनन्ददायिनी

**दुष्टमपीति** । असिद्ध्यादिदुष्टं साधनमित्यर्थः **फलं**—जयादि । **तयोरिति** । तथा च नाङ्गमित्यर्थः । हेतुमाह—**न हीति** । ननु तर्हि जल्पादौ कथं प्रयोगाभ्यनुज्ञानमित्यत्राह—**अत इति** । **अवश्येति** । तथा सति निग्रहानुद्भावनप्रसङ्गादित्यर्थः । ननु मतभेदेन सर्वमुपपन्नमिति चेत्तत्राह—**न च दुष्टानामिति** । त्वदन्योऽनुमाता नास्तीत्यर्थः । **केन वेति** । एवं च स्वयंप्रकाशत्वसाधकानामपि [5]दृश्यत्वेन साधकत्वे तदपि ते न स्यादित्यर्थः । **स्वव्याघातादीति** । विमतं

[1] व्यवहारयोश्च—**पा.** [2] ज्ञा नत्वङ्ग—**पा.** [3] केन चान्य—**पा.** [4] घातदुष्ट—**पा.**
[5] दृश्यत्वेनासाधकत्वं तदपि—**क.**

तत्त्वमुक्ताकलापः

## मर्यादां लोकसिद्धां विजहत इह ते नापरा सा प्रसिध्ये-

सर्वार्थसिद्धिः

स्वोक्तमपि तथाऽवधारय। स्वपरनिर्वाहकत्वसमाधि[1]रस्मत्पक्षे त्विष्ट इति चेत्; अन्येषामपि तथा किं न स्यात्, अविशेषात्। नन्वाभिमानिकसिद्धिभिः प्रमाणैस्सर्वसिद्धान्ताः स्थाप्यन्ते; अत ईदृशमपि कथायामङ्गं भवतीति मर्यादान्तर मया कल्प्यत इत्यत्र सेयं कल्पना प्रमाणतर्कसिद्धेत्यभिमता, उत स्ववाङ्मात्रसिद्धेति विकल्पे पूर्वस्य निर्मूलतयाऽनुदयमाह—**मर्यादामिति**। स्वाभीष्टमर्यादायाः प्रमाणादिसिद्धत्वं हि

आनन्ददायिनी

शून्यं परार्थत्वादित्यादेः स्वव्याघातकत्वादित्यर्थः। **स्वोक्तमिति**। साधकत्वस्य[2]मिथ्यात्वाभावेन तत्रैव व्यभिचारात्, मिथ्यात्वे चासाधकत्वादिति भावः। **स्वपरेति**। तथा च स्वयमन्यस्य मिथ्यात्वं साधयन् स्वस्यापि साधयतीति भावः। **अन्येषामिति**। शून्यत्वसाध[3]कानुमानानामित्यर्थः। असाधकत्वानुमानवादिनामिति केचित्। **नन्विति**। **चार्वाकव्यतिरिक्तानां** परोक्षमपि प्रमाणम्, **कणादजिनव्यतिरिक्तानां** शब्दादिकं, **साङ्ख्यवेदान्तिव्यतिरिक्तानामुपमानादिक, गौतमव्यतिरिक्तानामर्थापत्त्यनुपलब्ध्यादिकं, तद्व्यतिरिक्तानां** संभवा-

[1] रस्मत्प्रयोगे त्विष्ट—**पा** [2] कत्व मिथ्या—**क** [3] कतान—**ग**

तत्त्वमुक्ताकलापः

**निर्मर्यादोक्तिमात्राज्जगदपलपतः किं न सत्यं ततस्तत् ॥ ४५ ॥**

**साध्ये सत्येतरत्वे कथित इह भवेत् स्वस्य हि स्वान्यभावो**

सर्वार्थसिद्धिः

लोकमर्यादानुरोधेन वक्तव्यम्; अन्यथा तत्साधकासिद्धेः। अतः स्वमर्यादासिद्ध्यर्थं लोकमर्यादा अनतिक्रमणीयेति भावः। उत्तरत्र विपरीतप्रसक्तिमाह—**निर्मर्यादेति**। स्वोक्तिमात्रसिद्धमर्यादया जगन्मिथ्यात्वाभिधाने मदुक्तिमात्रसिद्धमर्यादया सत्यत्वसाधकप्रमाणाभावेऽपि जगत्सत्यमिति प्रत्युक्तिमात्रेण सिद्धौ बाधितविषयं त्वदनुमानं स्यादिति भावः ॥ ४५ ॥

मिथ्याशब्दविवक्षितं च विकल्पासहत्वेन दूषयति—**साध्य इति**। अयं भावः—किं यतःकुतश्चिदन्यत्वं सिषाधयिषितम्? उत सर्वस्मात्? आद्ये सत्यानां पृथिव्यादीनां परस्परान्यत्वेन सिद्धसाधनता; द्वितीये सर्वेषां प्रत्येकं सत्यशब्दवाच्यतया स्वस्मादप्यन्यत्वं सर्वेषां प्रतिज्ञातं स्यात्;

आनन्ददायिनी

दीत्याभिमानिकप्रमाणकल्पसिरित्यर्थः। **लोकमर्यादेति**। लोके पक्षदृष्टान्तसाध्यसाधनादीनां पारमार्थिकानामेव प्रमाणाङ्गत्वादिति भावः। सत्यत्वसाधकप्रमाणाभावेऽपीत्यभ्युपेत्यवादः। वस्तुतः प्रत्यक्षादिकमस्तीति भावः ॥ ४५ ॥

पूर्वसङ्गतिरेवात्रापीत्याह—**मिथ्याशब्देति**। सत्येतरत्वं साध्यं चेत्कथं स्वभिन्नत्वं पर्यवस्यतीति स्वस्यासत्यत्वेनैव सिद्धेः। अन्यथा इतरभेदे पृथिव्यादावपि तद्भेदप्रसङ्गेन तत्रापि व्याघातप्रसङ्गादित्यत्राह—**अयं भाव इति**। **सर्वेषां प्रत्येकमिति**। ननु सत्यत्वावच्छिन्न-

तत्त्वमुक्ताकलापः

## नान्यत्सत्यं तु दृष्टं तदवधिकभिदासाधने चेष्टसिद्धिः ।

सर्वार्थसिद्धिः

तथा च व्याघातः, तत्त्वातत्त्वयोरेकस्मिन्नसंभवात्; अन्यथा कथमनेकान्तवादनिस्तार इति । ननु विगीतानां व्यावहारिकसत्यत्वनिबन्धनं मिथस्सत्येतरत्वं न साधयामः । किं त्वस्ति किञ्चिदशेष [1]कल्पनारहितं परमार्थसत्यं, ततोऽन्यत्वं त्विहातिष्ठामहे; [2]तत्राह—**नान्यदिति** । अशेषविशेषोज्झितं किञ्चित्परमार्थसत्यं न प्रत्यक्षादिषु कुतश्चित्प्रमाणात् सिद्धम् । न च तथा स्वयं प्रकाशते, तवापि हृदयाविसंवादादिति भावः । ननु त्वयाऽपि परमार्थसद्ब्रह्माङ्गीकृतम्; अतस्तदन्यत्वसाधनमनुपालम्भनीयमित्येतदपि दूषयति—**तदवधिकेति** । न हि वयं जगतो जैनगन्धिवत् ब्रह्मानन्यत्वमङ्गीकुर्म इति भावः । अथ मिथ्याशब्दस्य

आनन्ददायिनी

प्रतियोगिकभेदस्साध्यश्चेत्, पक्षधर्मताबलात् पक्षस्य सत्यशब्दवाच्यत्वं न सिध्येदिति कथं व्याघात इति चेत्, उच्यते-सत्यत्वं हि सत्यशब्दप्रवृत्तिनिमित्तं, तच्च पक्षेऽप्यस्त्येव, तत्र तद्व्यवहारात्तथा च तद्भेदस्तत्रापि स्यादिति व्याघात इति भावः । **तत्त्वातत्त्वयोः** भेदाभेदयोः । **व्यावहारिकसत्यत्वनिबन्धनं सत्येतरत्वमिति** । इदमुपलक्षणं, मिथ्येतरत्वं वेत्यर्थः । **न प्रत्यक्षादिषु कुतश्चित् प्रमाणादिति** । प्रत्यक्षादिषु मध्ये केनचित् प्रमाणेनेत्यर्थः । **जैनगन्धिवदिति** । **यादवमत-**

[1] कल्पनातीत—**पा.** [2] अत्राह—**पा.**

तत्त्वमुक्ताकलापः

## सत्यत्वं चेन्निषेध्यं प्रसजति दहनेऽप्युष्णताया निषेधः

सर्वार्थसिद्धिः

सत्यत्वशून्यत्वमर्थ इति शङ्कते—**सत्यत्वमिति**। अत्र कालातीतत्वं निदर्शने प्रसक्तया निर्धारयति—**प्रसजतीति**। अयं भावः-इह हि प्रातीतिकं व्यावहारिकं पारमार्थिकं वा सत्यत्वं निषिध्येत? तत्राद्यः परानिष्टोपालम्भ इत्यन्यौ शिष्येते; तयोश्च व्यावहारिकसत्यत्वनिषेधे यत्रैव [1]यस्य प्रसिद्धिं मन्यसे तत्रैव तन्निषेधसीति न कथं काला[2]तीतेन चापसिद्धान्तेन च निगृह्येथाः? व्यावहारिकं च मिथ्येति त्वद्दृष्टिः; मिथ्याभूतसत्यत्वनिषेधेऽपि परेष्टमेव त्वया प्रतिष्ठापितं स्यादिति।

आनन्ददायिनी

**वदित्यर्थः। निदर्शने प्रसक्तया**—दृष्टान्ते वह्न्यनुष्णत्वानुमानेऽति-प्रसक्त्येत्यर्थः। एवं च [3]तत्र कलातीत्व वदत्रापि कालातीतत्वं निर्धारय-तीत्यर्थः। ननु सत्यत्वनिषेधस्य दहनेऽनुष्णत्वसाधकत्वाभावात् तदापादनं **पृष्ठताडनन्यायमनुकरोतीत्यत्राह–अयं भाव इति। परानिष्टोपा-लम्भः** परस्य यदनिष्टं प्रातिभासिकत्वं तस्योपालम्भो निषेध इत्यर्थः। तथा च सिद्धसाधनमिति भावः। **केचित्तु**–परानिष्टस्य [4]परासम्मतस्यानु-क्तस्येति यावत्। तथा चानुक्तोपालम्भ इत्यर्थ इत्याहुः। **व्यावहारिक-सत्यत्वनिषेध इति**। अन्यत्र तदसिद्धेः सिद्धौ वा ब्रह्मणि सिद्धिरिति ब्रह्मणो व्यावहरिकत्वापातादिति भावः। **परेष्टमिति**। सिद्धान्ति-

[1] यस्य सिद्धि-**पा.** [2] लातीतेनाप-**पा.** [3] तत्र कालातीतत्व-**क.**
[4] परासमवेत-**ग.**

तत्त्वमुक्ताकलापः

## साध्यं त्वक्षाद्यबाध्यं यदि किमपि परं तेन न व्याप्तिसिद्धिः ॥ ४६ ॥

सर्वार्थसिद्धिः

सत्यत्वान्तरनिषेधमनुवक्ति—**साध्यमिति**। तुः परेष्टविशेषनिषेधद्योतकः। **परम्**—अन्यत्। परमार्थसत्यत्वं हि लोकदृष्टादन्यत्। ब्रह्मनिष्ठं तद्वैधुर्यं चात्र बाधयोग्यादन्यदेव। अतः कथं बाधादिप्रसङ्ग इति भावः। तदूषयति—**तेनेति**। परमार्थसत्यत्वं हि व्यावहारिकादेव प्रमाणात्सिध्येत् ? पारमार्थिकाद्वा ? नाद्यः ; प्रपञ्चस्यापि तत एव तत्सिद्धौ बाधस्य दुर्वारत्वात्, क्वचित्तस्य तत्साधकत्वं क्वचिन्नेति नियामकाभावात्। द्वितीये त्वपसिद्धान्तः ; व्यावहारिकप्रमाणागोचर-सत्यत्वनिरूपिताभावेन सह व्यावहारिकप्रमाणेन कथं व्याप्तिर्गृह्येत ?

आनन्ददायिनी

संमतं पारमार्थिकं सत्यत्वमित्यर्थः। **नियामकाभावादिति**। ननु प्रत्यक्षादिभिः सत्त्वमात्रं गृह्यते, न तु पारमार्थिकत्वादि। ब्रह्मणि तु श्रुतिः सत्यादिपदवती बोधयति। तथा च तद्बोधनसामर्थ्यतदभावयो-स्सत्त्वात् कथं तदभाव इति चेत्, उच्यते-प्रपञ्चेऽपि 'प्राणा वै सत्यम्' इत्यादेस्सत्त्वेन वैषम्याभावात्। किं च मिथ्यात्वं हि कालत्रयासत्त्वं, तच्चैककालसत्त्वेनापि विरुद्धमिति तद्ग्राहिभिः कथं न बाध इति। **अपसिद्धान्त इति**। ब्रह्मान्यदसत्यमिति परसिद्धान्ता[1] दिति भावः। **व्यावहारिकेति**। प्रतियोग्यग्राहकस्याभावाग्राहकत्वादिति भावः।

[1] दित्यर्थः—ग.

## सर्वार्थसिद्धिः

तत्रापि पारमार्थिकप्रमाणाद्रूहणे [1]सिद्धान्तविरोधादिदोषस्तदवस्थः। शुक्तिरूप्यशब्देन च किं रूप्यत्वाश्रयतया रूप्यतादात्म्येन वा प्रतीतं भास्वरं द्रव्यं [2]निर्दिश्यते? एतन्निष्ठतया प्रतीतं रूप्यत्वं वा? इदंत्वेन भातं रूप्यं वा? रूप्यत्वसंसर्गो वा? रूप्यतादात्म्यं वा? विकल्पभेदाधिरूढमतद्व्यावृत्तिरूपमलीकं वा? रजतसरूपबुद्ध्याकारविशेषो वा? शुक्त्यवच्छिन्नाविद्याकृतचैतन्यविवर्तो वा? शुक्तिरजतव्ययहारगोचरमात्रं वा किञ्चित्। आद्येषु चतुर्ष्वन्यथाख्यातिस्वीकारप्रसङ्गः। [3]तत्र च निरुपाधिकमिथ्यात्वं न दृष्टम्। सोपाधिकमिथ्यात्वसाधने सर्वस्यापि प्रपञ्चस्य परस्परारोपयोग्यस्य देशकालान्तराद्युपधानेन मिथ्यात्वसाधनात् सिद्धसाधनता। न पञ्चमषष्ठौ; तयोरपि स्वस्थाने [4]सम्यक्त्वात् शुक्तिस्थयोस्तयोरस्मदनभ्युपगतयोस्त्वयोदाहर्तुमशक्यत्वात्। अत एव न सप्तमः, व्यावहारिकसत्यानामपि [5]तथाऽभ्युपगमप्रसङ्गात्। नाप्यष्टमः, न हि सत्याया बुद्धेराकारो मिथ्या स्यात्, अन्यतया अनन्यतया वा प्रमितस्य

## आनन्ददायिनी

ननु भाव एव मिथ्यात्वं तथा च न दोष इति चेत्, निषेधरूपत्वोक्तिविरोधादिति भावः। **विकल्पभेदेति**। विकल्पो ज्ञानविशेषः, तदधिरूढः तद्विषयः। अतद्व्यावृत्तिरन्यापोहरूपमलीकं किञ्चिदित्यर्थः। **बुद्ध्याकारविशेषः**—बुद्धिस्वरूपविशेषः। **शुक्त्यवच्छिन्नाविद्यांशकृतचैतन्यविवर्तः**—शुक्त्याधारकाविद्यापरिणामविशेषोऽनिर्वचनीयं रजतम्। **व्यावहारिकसत्यानामिति**। अलीकत्वाभ्युपगमप्रसङ्गादित्यर्थः। शून्यत्व न त्वदिष्टमिति भावः।

[1] सिद्धान्तादिविरोधदोष—**पा.** [2] निदर्श्यते—**पा.** [3] तत्र निरु—**पा.** [4] सत्यत्वात् शुक्तिनिष्ठयोस्तयोर्युष्मदस्मदन—**पा.** [5] तथात्वाभ्युपगमप्रसङ्गाच्च—**पा.**

तत्त्वमुक्ताकलापः

## स्वात्यन्ताभावदेशे विदितामिति यदि स्थाप्य-मिष्टं क्वचित्त-

सर्वार्थसिद्धिः

तदयोगात्। अप्रमितस्य चानुदाहर्तव्यत्वात्, अन्यथाऽतिप्रसङ्गात्। भ्रान्तिज्ञाने बुद्धितदाकारावसत्याविति तदाकारानिदर्शनोपपत्तिरिति चेन्न; बाधाभावात्; परानभ्युपगतेश्च। नवमोऽप्यत्यन्ताप्रसिद्धेरपास्तः। अपाकरिष्यते चानिर्वचनीयोत्पत्त्यादिः। नापि दशमः, सत्येषु शुक्त्यादिषु अन्यतमस्यैव कया चिद्विवक्षया शुक्तिरजतव्यवहारविषयत्वात्; अन्यथा वर्णक्रमनिर्देशवन्निरर्थकत्वापातात्; तथा चाश्रयहीनमुदाहरणमिति न कथञ्चिदपि व्याप्तिसिद्धिरिति ॥ ४६ ॥

पुनस्साध्यविकल्पे कोट्यन्तरमनुवक्ति—**स्वात्यन्तेति। स्थाप्यं**-साध्यम्। तत्र सिद्धसाधनतामाह—**इष्टमिति। क्वचित्**—योग्यस्थले। सर्वेऽपि हि पदार्थास्सामग्रीविशेषैः स्वात्यन्ताभाववत्स्वध्यस्यन्ते। तत एव हि सर्वत्र पूर्वपक्षोदयः; आहार्यालिङ्गजा च तर्कधीस्सार्वत्रिकी

आनन्ददायिनी

**भ्रान्तिज्ञाने** भ्रान्तिरूपज्ञाने। अनिर्वचनीयोत्पत्त्यादिरित्यादिशब्देन प्रतीत्यादिर्विवक्षितः। **क्वचिद्विवक्षया** परस्परात्मना प्रतीत्येत्यर्थः। **अन्यथेति।** विवक्षाविशेषेण सविषयत्वाभावे गकार-घकार मकार-यकारेत्यादिप्रत्ययरहितवर्णनिर्देशवदर्थशून्यं स्यादित्यर्थः ॥ ४६ ॥

पूर्वसङ्गत्याऽऽह—**पुनरिति। तत एव हीति।** उभयोः पूर्वपक्षसिद्धान्तयोः तात्त्विकत्वासंभवादिति भावः। **आहार्येति।**

तत्त्वमुक्ताकलापः

## तत्रैवेति त्वशक्यं क्वचिदपि न तथा [1]ह्यस्ति सिद्धान्तसिद्धिः ।

सर्वार्थसिद्धिः

निरनिष्टेऽनिष्टमुल्लोढि । अत एव हि विपर्यये पर्यवस्यति । ननु स्वात्यन्ताभावदेश एव विदितमिति साध्यं स्यात्; तथा च न सिद्धसाध्यतेत्यत्राह—**तत्रैवेतीति** । अत्र ह्यवधारणं स्वदेशव्यवच्छेदार्थम्; तदिद स्वदेशसदसद्भावयोरशक्यमेव । स्वदेश एव स्वात्यन्ताभावदेश इति प्रस्तुतप्रतिज्ञाभिप्राय इत्यत्र व्याप्ति[2]ग्रहणाभावमाह—**क्वचिदपीति** । यत्र क्वचिद्देशे काले वा जागरस्वप्नावस्थयोर्व्यावहारिकप्रातिभासिकयोर्वेत्यर्थः । शुक्तिरूप्योदाहरणं त्वसिद्धिप्रदर्शनेन प्रत्युक्तम् । एतेन स्वात्यन्ताभावप्रदेशवर्तित्वं साध्यमित्यपि [3]निरस्तम् । सिद्धसाध्यत्वपरिहारेऽपि व्याघातादेरपरिहार्यत्वात् ।

आनन्ददायिनी

स्वात्यन्ताभावदेश आरोपस्य संप्रतिपन्नत्वादिति भावः । **निरनिष्ट इति** । अनिष्टं धूमाभावः तच्छून्ये धूमाभावाद्यानिष्टं प्रसज्जयतीत्यर्थः । **नन्विति** । नन्वाकाशादेरवृत्तिपदार्थस्य तथात्वं संप्रतिपन्नमित्यंशतः सिद्धसाधनमिति चेन्न । वेदान्तिमतानुसारेण साधनान्नांशतः सिद्धसाधनमिति भावः । **स्वदेशसदसद्भावयोरिति** । स्वदेशसत्त्वे तत्रात्यन्ताभावस्य विरोधात् तत्र प्रतीयमानस्य तत्र सत्त्वात् बाधः । तदबाधे व्यवच्छेद्याप्रसिद्ध्या [4]व्यवच्छेदविशिष्टसाध्यव्याप्तिग्रहो न स्यादित्यर्थः । **स्वदेश एवेति** । स्वदेशमात्रवृत्तिस्वात्यन्ताभाववत्त्वं विवक्षितामिति वक्ष्यमाणात् भेदः । **असिद्धिप्रदर्शनेनेति** ।

[1] ह्यस्ति दृष्टान्तसिद्धिः—पा. [2] ग्रहाभाव—पा. [3] प्रत्युक्तम्—पा. [4] व्यवच्छेदात्रिविशिष्ट—क.

## सर्वार्थसिद्धिः

नहि वस्तु विकल्प्येत न विरुद्धसमुच्चयः ।
न चोभयपरित्यागो विहतिं जहतः क्वचित् ॥

न हि तदेव तत्रैव तदानीमेव विद्यते न विद्यते वेति विरुद्धानियतरूपता, ईदृशस्यानियमस्य जैनैरप्यनङ्गीकारात् । नच तदङ्गीकृतविरुद्धसमुच्चयः, स्वपरपक्षसमुच्चये सर्वकथोच्छेदापत्तेः । [1]अत एव नोभयमिथ्यात्वेनोभयत्यागः, विरुद्धान्यतरविधिनिषेधयोरितरानिषेधविधिनान्तरीयकत्वात्, स्वात्यन्ताभावसामानाधिकरण्यसाधनायोगाच्च । अस्तु वा कश्चिन्मिथ्याशब्दार्थः ; तत्र

## आनन्ददायिनी

दृश्यत्वहेतोरिति शेषः । यद्यपि संयोगादौ सम्बन्धान्तरेण वह्न्यादौ वा सिद्धसाधनमपि, तथाप्येतद्व्यावर्तनार्थं विशेषणान्तरदानेन परिहारस्संभवतीति भावः । वस्तुविकल्पः—भावस्यैव कदाचिदभावत्वम् ; समुच्चयो हि भावाभावयोरेकदा साहित्यम् । विहतिं व्याघातं परित्यजतस्तव भावस्यैवाभावत्वं भावाभावयोस्साहित्यं उभयराहित्यं वा क्वचिदुपलब्धमित्यर्थः । कुतो न दृष्टमित्यत्राह—**न हीति** । इदमुपलक्षणम्—एकस्यैव प्रतियोगितदभावरूपत्वमिति न हीत्यर्थः । **ईदृशस्येति** । जैनैः सत्त्वासत्त्वाङ्गीकारेऽपि भावाभावयोरेकाश्रयत्व नाङ्गीकृतमित्यर्थः । ननु सत्त्वासत्त्वाङ्गीकारे इदमप्यङ्गीकृतप्रायमेव । असत्त्वस्य सत्त्वाभावत्वादिति चेत्, न, तस्य स्वरूपत्वेन भावाभावरूपत्वानभ्युपगमात् । यदि विरुद्धसमुच्चयाङ्गीकारात्तन्नयाय उच्येत, तत्राह—**न चेति** । **विरुद्धेति** ।

[1] अतो नोभय—**पा.**

तत्त्वमुक्ताकलापः

## बाधश्चास्मिन्नुपाधिस्समधिगतदशदेशकालाद्युपाधौ

सर्वार्थसिद्धिः

दृश्यत्वस्याप्रयोजकत्वमाह—**बाधश्चेति** । मिथ्याशब्दवाच्यत्वे हि प्रतिपन्नोपाधौ बाधितत्वं प्रयोजकम् । अत एव न तदेव तदित्यनुपाधित्वम् । ननु बाध एवात्र साध्यस्स्यात्, तत्र च नोपाधिश्शक्यो

आनन्ददायिनी

भावाभावान्यतरनिषेधस्यान्यतरत्वनियमादिति भावः । ननु भावाभावयोः समानसत्ताकयोरेव विरोधो न भिन्नसत्ताकयोः, शुक्तिरूप्यादौ तथा दर्शनात् । तथा च स्वान्यूनसत्ताकस्वात्यन्ताभावसामानाधिकरण्यसाधनेन बाध इति चेन्न । तथा सति ब्रह्मस्वरूपज्ञानं अविद्यानिवर्तकं न स्याद्विरोधिविषयकत्वाभावात् । तथा हि—न तावत् स्वरूपज्ञानं निवर्तकं, सर्वदा सत्त्वात् । नापि प्रपञ्चाभावविषयकं, भिन्नसत्ताकाभावस्य विरोधित्वाभावे तज्ज्ञानस्य विरोधिविषयकत्वाभावेन निवर्तकत्वाभावात् । न चाभावत्वप्रकारकत्वेन निवर्तकत्वं, घटाभावज्ञानस्यापि निवर्त्तकत्वप्रसङ्गात् । न च निवर्त्यप्रतियोगिकत्वे [1]ज्ञानं निवर्तकं, प्रातिभासिकघटाभावज्ञानात् घटस्य निवृत्तिप्रसङ्गात् । न चान्यूनसत्ताकाभावज्ञानं निवर्तकं; तथा सति तादृशाभावस्य विरोधित्वे तत्सामानाधिकरण्यं न स्यात्, अविरोधित्वे घटतदभावयोः सामानाधिकरण्यप्रसङ्गः । प्रातिभासिकसर्पज्ञानेन प्रातिभासिकरज्जुनिवृत्त्यभावापाताच्च । तस्मान्नवीनमतमप्यपास्तमित्यभिप्रायेण साधनायोगाच्चेति चशब्दप्रयोग इति भावः । ननु नासौ साध्य इत्ययु-

[1] ज्ञाननिवर्तक—क.

तत्त्वमुक्ताकलापः

## नासौ साध्योऽत्र

सर्वार्थसिद्धिः

वक्तुम्; तत्राह—**नासाविति**। अयं भावः—किमत्र यस्यकस्यचित् पुरुषस्य यत्रकुत्रचिद्देशे काले वा बाधोऽस्तीत्येतावन्मात्रं साध्यम्? उतानेन प्रमाणेनास्य बाधो दृश्यत इति। न प्रथमः, एतावन्मात्र-साधनस्य ब्रह्मण्यपि सुवचत्वात्। शक्यं हि साहसिकस्य भासमानत्व-मात्रेण सर्वमिथ्यात्वं साधयितुम्। किं च ब्रह्मव्यतिरिक्त-कृत्स्नपक्षीकारेण बाधं साधयतस्तद्बहिर्भूतपुरुषदेशकालानामभावात् कस्यचित्पुरुषस्येत्यादिनिर्देशो निर्विषयः। तदन्तर्भूतपुरुषदेशकाल-विवक्षया प्रयोगे तु विद्यमानेऽप्यविद्यमानभ्रमवतः कस्यचित् क्वचित् कदाचि[1]त्तत्र तन्नास्तीति धीसंभवात् सिद्धसाध्यता। मन्यते च माध्यमिकः सांवृतेन मानेन सर्वमिथ्यात्वम्; [2]तथा तस्य विश्वबाधक-ज्ञानं जातमिति च वयमपि विद्मः। अप्रमाणमूलत्वादपारमार्थिक-

आनन्ददायिनी

क्तम्, उपाध्यभावादित्यत्राह—**अयं भाव इति**। ननु बाधो नाभाव-बुद्धिमात्रं, अपि तु प्रत्येतव्यस्येत्यत्राह—**किं चेति**। किमत्र पक्षबहि-र्भूतः पुरुषादिर्विवक्षितः, उत तदन्तर्भूतस्तत्राद्य आह—**तद्बहिर्भूतेति**। तथा च बाध इति भावः। केचित्तु साध्याप्रसिद्धिमाहुः। द्वितीय आह—**तदन्तर्भूतेति**। तथा च मिथ्याभूतदेशकालादौ मिथ्याभूतपुरुषकर्तृकस्य बाधस्य प्रमात्वं न संभवतीति भ्रान्तिरूपो वाच्यः, तादृशस्य सिद्धत्वात् सिद्धसाधनमिति भावः। तदेव सिद्धसाधनमुपपादयति—**मन्यते चेति**।

[1] तत्र नास्तीति—**पा.** [2] तथा च तस्य—**पा.**

## सर्वार्थसिद्धिः

स्तदुक्तो बाध इति चेत, त्वदुक्तोऽप्येवमेव। व्यावहारिकप्रमाणतो मदुक्तसिद्धिरिति चेत्, तदुक्तसिद्धिरपि तथैव। [1]सांवृतादिसमाख्या-वैषम्यं चार्किंचित्करम्। नापि द्वितीयः; प्रत्यक्षेण तावदस्तीत्येव प्रपञ्चः प्रतीयते। यदा च कुत्रचिन्नास्तीति मनुष, तदाऽपि तत्रैव तदभावस्य सत्यत्वम्, अन्यत्र च तत्सत्यत्व[2]मध्यक्षयामः। आह च **न्यायभाष्यकारः**—सत्सादिति गृह्यमाणं [3]तथाभूतमविपरीतं च तत्त्वमिति, असच्चासदिति गृह्यमाणं [3]तथाभूत विपरीतं च तत्त्वमिति। अनुमानं त्वद्याप्यलब्धजीवितम्। आगमिकस्तु निषेधो विध्यनुरोधेन नेतव्यः; अन्यथाऽतिप्रसङ्गात्। वाचारम्भणादिशब्दाश्च द्रव्यान्तर-[4]निरासपरा दर्शिताः। नन्वनन्तपदेनासंकोचाद्वस्तुपरिच्छेदराहित्यमपि गृह्यते; [5]सति वस्त्वन्तरे तत्परिछेदाभावो दुर्वच इति चेन्न; यथा देशकालसद्भावो न कस्यचिद्देशकालपरिच्छेदः, किंतु परिमितदेशकाल-

### आनन्ददायिनी

**सांवृतादीति**। ननु व्यावहारिकं सत्यत्वं प्रातिभासिकं सत्यत्वमिति मायिभिरभ्युपगतम्; माध्यमिकैस्तु सांवृतिकमेकमेव सत्यत्वमभ्युपगतामिति कथं समाख्याभेदमात्रमर्थभेदसत्त्वादिति शङ्कां निवारयत्यादिशब्दः। अयं भावः—'सर्वव्यवहारावैषम्यं समानत्वात्' इति सूत्रभाष्यटीकायां शून्यता वस्तुतोविशिष्टा तथापि शुक्तिकादौ प्रातीतिकमन्यत्र सांवृतिकमिति तदपि किंचित् सांवृतिक[6]मर्थक्रियाकारीति वैषम्याङ्गीकारदर्शनात् तुल्यतेति। **यथेति**। ब्रह्मणस्त्रिविधा-परिच्छेदमध्ये कालापरिच्छेदो नाम कालेन परिमितत्वाभाव एव, न तु

[1] सवृतादि-**पा.** [2] मप्यध्यक्ष-**पा.** [3] 'यथाभूतमविपरीत' इति न्यायभाष्यपाठः. [4] निषेधपरा-**पा.** [5] सति तु वस्त्व-**पा.** [6] कार्थक्रिया-**ग.**

## सर्वार्थसिद्धिः

वर्तित्वम्; तथा न वस्त्वन्तरसद्भावो वस्तुपरिच्छेदः, अपि तर्हि परिमितवस्त्वन्तरप्रकारित्वम्; यथा गौः [1]शुक्लो गच्छतीत्यादौ। न तथाऽत्र, "सर्वं खल्विदं ब्रह्म" "पुरुष एवेदं सर्वम्" इति विश्वरूपतया व्यपदेशात्। ततश्चायं सर्वाविरुद्धस्संग्रहः—

अविधेयमनाधेयमशेषमधिकं समम्।
नेति वस्तुपरिच्छेदाभावः स्याद्विश्वदेहिनः॥

## आनन्ददायिनी

कालाभावः, एवं देशापरिच्छेदोऽपि। तथा वस्त्वपरिच्छेदोऽपि सर्ववस्तुविसदृशत्वं सर्ववस्तुविशेषणकत्वं वा, न तु वस्त्वन्तराभावोऽन्यथा-वैरूप्यप्रसङ्गात्। वस्त्वन्तरस्याभावे वस्तुपरिच्छेदस्यैवासिद्धया निषेध्याप्रसिद्धेस्तौविध्याभावप्रसङ्गाच्च। न च स्वसमानवस्त्वन्तराभाव एव वस्त्वपरिच्छेदो ब्रह्मण इति वाच्यम्। तथा सति ब्रह्मान्तराभावमादायाप्युपपन्नतया [2]मिथ्यात्वासिद्धेः। न च पारमार्थिकवस्त्वन्तराभावस्स इति वाच्यम्, तथात्वे मानाभावात्। पारमार्थिकत्वेन प्रपञ्चग्राहिप्रमाणैर्बाधाच्चाबाधितगतिसंभवे तथा निर्बन्धायोगाच्चेति भावः। **सर्वं खल्विदमिति**। तथा च सर्ववस्तुविशेषणकत्वं ब्रह्मण इति भावः। ननु सर्ववस्तुविशेषणकत्वं यथाकथंचित् कालादेरपीति चेत्तत्राह—**ततश्चायमिति**। **वस्तुपरिच्छेदाभाव इति**। न स्वरूपेण वस्त्वन्तराभावः परेणापि वक्तुं शक्यः; किं तु पारमार्थिका[3] कारेण। तथा च सर्वप्रमाणाविरोधेन सर्वप्रमाणानुगुण्येन चाविधेयत्वादिना वस्त्वन्तराभावो वाच्य इति भावः। तत्र हेतुः—**विश्वदेहिन इति**। [4]विश्वस्यं तच्छरीरत्वादेवं

[1] शुक्ला गच्छ—पा. [2] मिथ्यात्वाभावसिद्धेः—ग. [3] कत्वाकारेण—ग. [4] स्य शरी—ग.

तत्त्वमुक्ताकलापः

## मानं निखिलमपि यतस्तद्विधानैकतानम् ॥ ४७ ॥

सर्वार्थसिद्धिः

यस्तु वस्त्वन्तराभावमपरिच्छित्तिमिच्छति ।
कथितोऽसौ कथाऽनर्हः क्षीबोन्मत्तैडमूकवत् ॥
किञ्च संख्यापरिच्छेदराहित्यं किं न दृश्यते ।
मानबाधाद्यदि समं निर्बाधेऽर्थे स्थितिः स्थिता ॥

पराभिमतैरुपमानार्थापत्त्यादिभिरपि न जगद्बाधः; तेषामन्तर्भावबहिर्भावयोरुक्तानतिरिक्तशक्तित्वादिति। तदेतत्सर्वमभिप्रयन्नाह—**मानमिति।**

आनन्ददायिनी

तद्विधेयमाधेयं शेषं न्यूनं सर्वमित्यर्थः। ननु लाघवाद्वस्त्वन्तराभावमात्रमेवापरिच्छिन्नत्वमित्यत्राह—**यस्त्विति**। [1]सर्वस्याभावे प्रमाणस्याप्यभावेन ब्रह्मणो मेयस्याप्यभावात् प्रमातुः सर्वस्याप्यभावादिति भावः। किं चासंख्यातत्वं संख्यापरिच्छेदाभावः क्षणलवादिनाऽप्युच्यते; न तत्र संख्यान्तराभावः एकत्वादीनां सत्त्वात्। तत्र चेदन्यथावर्णनं तदा तथा प्रकृतेऽप्यस्तीत्याह—**किंचेति**। [2]एकत्वादिग्राहकमानसत्त्वेन तदभावो न संख्यापरिच्छेदाभाव इत्यन्यथानयनमिति शङ्कते—**मानेति**। तुल्यत्वेन परिहरति—**समामिति**। स्वारसिकबाधशून्यार्थगोचरमानस्य प्रपञ्चेऽपि सत्त्वात् तेन बाधस्य तुल्यत्वात् न वस्त्वभावमात्र परिच्छेद इति भावः। **निर्बाधेऽर्थे स्थितिः स्थितेति**। प्रमाणान्तराविरुद्धार्थविषयकतया श्रुतेरवस्थापनं स्वीकर्तुं युक्तमित्यर्थः। **स्थिता**—सिद्धेत्यर्थः। **अन्तर्भावबहिर्भावयोरिति**।

[1] सर्वस्याप्यभावेन मेयस्य ब्रह्मणोऽप्यभावात् प्रमातुस्त्वस्याप्यभावादिति भावः—ग. [2] एकत्राग्राहक—ग.

तत्त्वमुक्ताकलापः

**तुच्छत्वं ते न हीष्टं सदसादितरता व्याहतत्वादिदुःस्था-**

सर्वार्थसिद्धिः

निखिलं स्वपराभ्युपेतं सर्वं तद्विघानैकतानं ब्रह्मण इव तद्विभूतिप्रपञ्चस्याप्यस्तीति बोधने नियमेन प्रवृत्तत्वान्न तद्बाधकमित्यर्थः ॥ ४७ ॥

---

पुनरप्यसंभवतोऽपि तत्तद्बाद्यभिमानात् संभवत इव साध्यविकल्पभेदाननूद्य दूषयति—**तुच्छत्वमिति श्लोकेन**। **तुच्छत्वं**—खपुष्पादिवदसत्त्वम्। **ते**—माध्यमिकसमाख्यामनिच्छत इति भावः। **न हीष्टं**—एतत्साधनेऽपसिद्धान्त इति भावः। अस्तु मिथ्यात्वं सदसत्कोटिबहिर्भूतत्वमित्यत्राह—**सदसादितरतेति**। आदिशब्देनार्थान्तरत्वादिसंग्रहः। अयं भावः—सदसद्विलक्षणत्वं नाम सत्त्वा-

आनन्ददायिनी

उक्तेष्वेवान्तर्भूतत्वेऽपि पृथक्प्रमाणत्वेऽपि प्रत्यक्षादितुल्यत्वादित्यर्थः ॥ ४७ ॥

---

पूर्वसङ्गतिरेव सङ्गतिरित्यभिप्रायेणाह—[1] **पुनरपीति**। सदसद्रूपत्वादेरिव सदसद्भिन्नत्वादेरप्यसंभवादिति भावः। सिद्धसाध्यतादिरार्थः। नन्वर्थान्तरत्वं कथम्; प्रकृतस्यैव सिद्धेरित्यत्राह—**अयं भाव**

[1] पुनरपीति। सद्रूप—**ग.**

## सर्वार्थसिद्धिः

सत्त्वात्यन्ताभावसमुदायवत्त्वं वा, सतोऽसतश्च कुतश्चिद्व्यावृत्तत्वं वा, सदसच्छब्दगोचरसर्वान्यत्वं वा, ब्रह्मतुच्छव्यावृत्तत्वं वा, ब्रह्मत्वतुच्छत्वसमुदायशून्यत्वं वा, तदुभयात्यन्ताभावसमुदायो वा, अन्यद्वा किंचित्। आद्ये व्याह[1]तत्वम्, 'परस्पर[2]विरोधे हि न प्रकारान्तरस्थितिः' इति न्यायात्, न ह्यत्रानुष्णाशीतवद्वृत्तिः, कोट्यन्तरस्यात्यन्तानुपलम्भात्। [3]न च तत्राप्युष्णानुष्णविकल्पे कोट्यन्तरं समस्ति। द्वितीये सिद्धसाध्यता, सतामेव परस्परमसद्व्यश्च व्यावृत्तत्वात्। तृतीयेऽपि स एव दोषः। अस्ति हि सत [4]एवैकस्य तत्, एकस्य सर्वसदसद्रूपत्वाभावात्। अत एव न चतुर्थः; न हि वयं ब्रह्मस्वरूपं वा निरुपाधिकतुच्छं वा विश्वं ब्रूमः; विरुद्धार्थान्तरता च, खरशृङ्गे खपुष्पाद्यन्यस्मिं[5]स्तद्भावात्। एवं पञ्चमेऽपि, खर[6]शृङ्गादौ ब्रह्मणि ब्रह्मत्वतुच्छत्वयोरसमुच्चितत्वात्।

## आनन्ददायिनी

**इति**। **व्याहतत्वमिति**। सत्त्वाभाववतोऽसत्त्वनियमादसत्त्वाभाववत सत्त्वनियमात्तदुभयाभावद्वयमेकत्र व्याहतमिति भावः। **कोट्यन्तरस्येति**। अनुष्णाशीतस्य पृथिव्यादेः संभवादिति भावः। [7]ननु तर्ह्युष्णानुष्णविकल्पेऽपि विरोधो न स्यादित्यत्राह–**न चेति**। **सतामेवेति**। सतः पटात् घटः, सतो घटाच्च पट इति परस्परमित्यर्थः। तदेवोपपादयति–**एकस्येति**। व्यासज्यवृत्त्यत्यन्ताभाववदन्योन्याभावस्यापि [8]तादृशस्सभवादिति भावः। **विरुद्धार्थान्तरता चेति**। तुच्छत्वेऽपि जगतः शशशृङ्गान्यत्वे सति ब्रह्मान्यत्वस्य सत्त्वात्तुच्छत्वं सिद्धान्तविरुद्धं सिध्येदित्यर्थः। **एवमिति**। विरुद्धार्थान्तरतेत्यर्थः।

---

[1] तता, पर–**पा.** [2] विरोधे तु न–**पा.** [3] न चात्रा–**पा.** [4] एवैकैकस्य–**पा.** [5] स्तथाभावात्–**पा.** [6] शृङ्गे ब्रह्मणि च ब्रह्मत्व–**पा.** [7] 'ननु' इति **ग** कोशे नास्ति. [8] तादृशस्य स–**ग.**

तत्त्वमुक्ताकलापः

## सिद्धा चासौ परेषां

सर्वार्थसिद्धिः

षष्ठेऽपि सिद्धसाध्यता। [1]न तु विगीतं ब्रह्मस्वरूपं, न च तुच्छम्; अन्यदपि केनचिद्विशेषशब्देनोपस्थापयितुं [2]शक्यं वा न वा? शक्यं चेदस्माभिरपि विशेषतो दूषयितुं शक्यम्। अशक्यं चेत्, अव्यपदेश्ययत्किञ्चिद्धर्मवत्त्वं साध्यं स्यादिति कस्तत्र विमन्यते। अतो यत्किञ्चिदेवैतादिति। किंच विगीतप्रयोगेषु सर्वेषु यत्र कुत्रचित् पूर्वसिद्धमेव पक्षे साध्यम्; इह तु ब्रह्मणि तुच्छे वा न साध्यग्रहः, तयोर्विपक्षत्वात्; नच विगीते, तस्य संदिग्धसाध्यत्वात्। सपक्षस्तु शुक्तिरजतशब्देन प्रदर्शयितु न शक्य इत्युक्तम्। नच परासिद्धस्साध्यावस्थो दृष्टान्तः स्यात्। तत्साधनं च दूषयिष्यते। तदसौ त्वदभिमता सदसद्विलक्षणता परेषां सर्वत्रासिद्धतया पक्षे दुस्साधेत्यभिप्रयन्नाह—**असिद्धा** चेति। ननु घटादौ तावदसद्विलक्षणत्व संप्रतिपन्नम्, सद्विलक्षणत्वमपि पटादिवैलक्षण्याद्ब्रह्मवैलक्षण्याद्वा। अतो भेदव्यव-

आनन्ददायिनी

**षष्ठेऽपीति**। ब्रह्मत्वाभावतुच्छत्वाभावयोः प्रपञ्चे समुच्चितत्वादित्यर्थः। विगीतं विवादाध्यासितं पक्ष इत्यर्थः। **विगीतप्रयोगेषु** अन्वयिप्रयोगेषु। **न च विगीत इति**। संदिग्धसाध्ये पक्षे इत्यर्थः। **सपक्षस्त्विति**। शुक्ति[3]रजतत्वस्यासिद्धेरित्यर्थः। ननु प्रसाध्याङ्गको दृष्टान्तो भवत्वित्यत्राह—**साधनं चेति**। ननु घट एव साध्यस्य प्रसिद्धत्वे व्यतिरेकित्वं न स्यादित्यत्राह—**अतो भेदव्यवहारेति**। यथा घटादावितरभेदे

[1] न हि विगी-**पा.** [2] शक्यं न वा—**पा.** [3] रजतस्यासिद्धे-**ग.**

### तत्त्वमुक्ताकलापः

## भवदनभिमतोऽ[1]न्यात्मना वेद्यतादिः ।

### सर्वार्थसिद्धिः

हारव्यवस्थापकलक्षणरूपकेवलव्यतिरेकिन्यायेन साध्यस्य पक्षैकदेश-सिद्धस्यैवाभिव्याप्तया साधनान्न साध्याप्रसिद्धिरिति । अत्र तु **सिद्धा चासाविति** नञ्प्रहाणेनोत्तरम् ; पक्षे सर्वत्र सिद्धैवेत्युक्तम् ; तथाऽपि मिथ्याशब्दनिमित्तं किञ्चित्त्वयाऽङ्गीक्रियते, तदेव साधयाम इत्यत्राह— **भवदनभिमत** इति । परे हि रजतादेश्शुक्त्याद्यात्मना वेद्यत्वं वा रजता-देरतत्संसृष्टस्य तत्संसृष्टतया भातत्वं वा बाध्यव्यवहारहेतुधीविषयत्व वा मिथ्याशब्दनिमित्त सिद्धान्तयन्ति । न चैतत् त्वया साध्यम् ; अन्यथाख्यातेरख्यातेर्वा स्वीकारप्रसङ्गात् ; तथा चापसिद्धान्तः । स्वदेशादौ च विश्व सत्यं स्यादिति विवक्षितविपरीतसाधनापत्तिः ;

### आनन्ददायिनी

सिद्धेऽपि 'पृथिवी इतरभिन्ना 'इत्यत्र पक्षभिन्नदृष्टान्ताभावाद्व्यतिरेकित्वं तथेत्यर्थः । **अभिव्याप्त्या** पक्षतावच्छेदकावच्छेदेन । **नञ्प्रहाणेनेति** । पूर्वमसिद्धा चेति पदच्छेदः, इदानीं सिद्धा चेतीति भावः । **अन्यथा-ख्यातेरिति** । अन्यस्य चान्यथाऽन्यात्मना च भानेऽन्यथाख्यातित्वम्, असंसर्गाग्रहे चाख्यातित्वमिति भावः । **स्वदेशादौ चेति** । [2]अत्र सत्त्वस्य बाधकाभावादिति भावः । परसिद्धान्तकल्पिताकारमेवाह—

---

[1] नात्मना—पा. [2] तत्र—ग.

तत्त्वमुक्ताकलापः

**विश्वं [1]हीदं मृषा नस्तदितरवपुषा त्वन्मतारोपितैश्च**

**स्यादेवं दूरतस्ते ध्रुवमपसरतोऽप्युक्तदोषानुषङ्गः ॥ ४८ ॥**

सर्वार्थसिद्धिः

अतस्सिद्धसाध्यत्वं चाह—**विश्वमिति**। हिशब्द आगोपालपण्डितं दुरपह्नवां प्रसिद्धिं द्योतयति। **तादितरवपुषा**—स्वेतरस्वरूपतयेत्यर्थः। न हि स्वप्रतियोगिकान्योन्याभाववत्त्वं वा स्वेतरतादात्म्यं वा कस्याचिदनुबोभूयामहे शोश्रूयामहे वा। परसिद्धान्तकल्पिताकारवत्तया च मिथ्यात्व सिद्धमित्याह—**त्वन्मतारोपितैश्चेति**। ब्रह्माविद्या [2]विपरिवर्तत्वानिर्वचनीयत्वबाध्यत्वैरिति शेषः। चकारादसंसृष्टसंसृष्टतयेत्यपि गृह्यते। एवमनिर्वाच्यत्वादिविकल्पकोटयन्तरेष्वपि तत्तद्विकल्पावतारेण बाधापसिद्धान्तसिद्धसाधनत्वादिदोषाणामनतिक्रमणीयत्वं प्रच्छन्नबौद्धोपालम्भव्याजेन छात्त्रान्प्रतिबोधयति—**स्यादिति**। ध्रुवं—निश्चितम्, प्रसङ्गकानामङ्गपञ्चकसंपत्तेरिति भावः ॥ ४८ ॥

आनन्ददायिनी

**ब्रह्माविद्याविपरि[2]वर्तेत्यादिना**। नन्वनिर्वाच्यत्वमेव मिथ्यात्वमस्त्विति यदि ब्रूयात्तत्राह—**एवमिति**। **तत्तद्विकल्पः**—सदसत्त्वेनानिर्वाच्यत्वं ब्रह्मशून्यान्यत्वेन वा निर्वक्तुमशक्यत्व अन्यस्यान्यात्मना निर्वक्तुमशक्यत्वं वेति विकल्पे सत्त्वेन निर्वाच्यत्वात् बाधः। ब्रह्मशून्योभयभिन्नत्वेन निर्वाच्यत्वात् स्वमतेऽपसिद्धान्तः, अन्त्ये सिद्धसाधनमिति भावः। **त** इति संबोध्याभिधानादाह—**छात्त्रानिति** ॥४८॥

[1] हीष्ट मृषा—**पा.** [2] विवर्त—**पा.**

तत्त्वमुक्ताकलापः

**साध्यं मिथ्या न वा ते द्वितयमनुचितं निष्फलत्वादिदोषा-**

**दाद्यं हीष्टं समापि प्रसजति भवतस्सत्यभेदः परस्मिन् ।**

**पक्षीकारेऽस्य**

सर्वार्थसिद्धिः

स्वरूपविकल्पेन दूषितं मिथ्यात्वं धर्मतोऽपि विकल्पासहमित्याह **साध्यमिति** । ते—ब्रह्मव्यतिरिक्तविश्वमिथ्यात्ववादिनः। **द्वितयं**–मिथ्यात्वस्य मिथ्यात्वं तत्प्रतिभटं सत्यत्वं च । अनयोरनौचित्ये क्रमात् कारणमाह—**निष्फलत्वादिदोषादिति** । आदिपदमपसिद्धान्तार्थम् । नैष्फल्यं सिद्धसाधनतया विवृणोति–**आद्यमिति**। अपसिद्धान्तमुद्धाटयति—**प्रसजतीति**। पुनरपि साध्यमेतन्मिथ्यात्वं पक्षीकृत न वेति विकल्पे पूर्वं दूषयति—**पक्षीकार** इति । अत्र हि प्रामाणिकमिथ्यात्वं पक्षीकृत्य तस्य मिथ्यात्वसाधने बाधः ; अन्यस्य तु सिद्धसा-

आनन्ददायिनी

पौनरुक्त्यशङ्कां परिहरन् पूर्वसङ्गत्याऽऽह–**स्वरूपेति** । मिथ्यात्वं हि सत्यं मिथ्या वेति सत्यत्वमिथ्यात्वरूपमिथ्यात्वनिष्ठधर्ममुखेनापीत्यर्थः। ननु सत्यत्वं सत्यं न वेति विकल्पपक्षोभे यः परिहारः सोऽत्रापीत्यत्राह–

तत्त्वमुक्ताकलापः

# बाधादिकमतिचरणं तद्बहिष्कारपक्षे

सर्वार्थसिद्धिः

ध्यता ; विधेयस्य निषेधात् व्याघातश्चेत्यर्थः । न ह्यत्र स्वपरनिर्वाहक-नीतिः ; यतः—

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥

उत्तरत्रोत्तरमाह—**अतिचरणमिति** । पक्षबहिर्भावो हि सपक्षतया विपक्षतया वा स्यात् । आद्ये जगन्मिथ्यात्वस्य हि मिथ्यात्वे संप्रतिपन्ने कथ तद्विरुद्धं साध्येत? द्वितीये मिथ्यात्वस्य सत्यत्वसप्रतिपत्त्या तत्र च हेतुवृत्तरतिचरणम् ; यदीदं न [1]दृश्य तर्हि साध्यमपि न स्यात् ; साधनाधीनदृग्विषयत्वायोगात् । अपि च ब्रह्मवदिह विपक्षभूतं

आनन्ददायिनी

**सत्यत्वस्येति** । **कथं तद्विरुद्धमिति** । जगन्मिथ्यात्वस्य मिथ्यात्वं नाम जगति तदभावः । तदवधारणे बाधितं कथं साध्येतेति भावः । **अतिचरणं**–व्यभिचारः । हेतोरगमनान्न व्यभिचार इति शङ्कते—**यदीति** । दृश्यत्वाभावेऽनुमितिविषयत्वमपि न स्यादिति परिहरति—**तर्हीति** । अपसिद्धान्तमप्याह—**अपिचेति** । ननु भावाद्वैतपक्षे

[1] दृश्य तदा साध्य–**पा.**

तत्त्वमुक्ताकलापः

**तच्चेद् ब्रह्मस्वरूपं भुवनमभिहितं हन्त सब्रह्मकं स्यात् ॥ ४९ ॥**

**इष्टं ब्रह्मापि दृश्यं तव च कथयतस्तस्य जिज्ञास्य[1]तादीन्**

सर्वार्थसिद्धिः

मिथ्यात्वं ब्रह्मणस्सद्वितीयत्वमापादयेत् । अभावरूपं जगन्मिथ्यात्वमसत्यमप्येकदेशिभिरङ्गीक्रियत इति चेत्, तथाऽपि तत्र हेतुवृत्तेरतिचरणं [2]दुस्तरमेव। सत्यमेव जगन्मिथ्यात्वम् ; तच्च ब्रह्मस्वरूपमेवेति नापसिद्धान्तादिदोष इति पराभिप्रेतं कृत्वाऽनुब्रूते—**तच्चेदिति**। तत्रापि सिद्धसाधनत्वमाह—**भुवनमिति** । मिथ्यात्वयोगि मिथ्या तच्च मिथ्यात्वं यदि ब्रह्म तदा विगीतं ब्रह्मवदिति साध्यार्थं [3]स्यात् , तत्र न वयं प्रत्याख्यातार इति भावः ॥ ४९ ॥

एवं व्यापकवद्व्याप्यस्यापि विकल्पासहत्वं चतुष्पद्या दर्शयति—**इष्टमिति** । यदेतन्मिथ्यात्वसाधकतयोक्तं दृश्यत्वं, तद् ब्रह्मणि विद्यते न वेति विचारे नेति पक्षस्तावद् दूष्यते । " अथातो ब्रह्मजिज्ञासा " ' तद्विजिज्ञासस्व ' ' तद्ब्रह्म ' ' आत्मा वा अरे द्रष्टव्यः ' ' आत्मन्येवात्मानं पश्येत् " [4]इत्येवमादीनि परश्शतं वाक्यानि पुरस्कृत्य श्रोतव्यमन्तव्य-

आनन्ददायिनी

नापसिद्धान्त इति शङ्कते—**अभावेति** । मिथ्यात्वस्य भावत्वेऽपि नाद्वैतविरोध इति शङ्कते—**सत्यमेवेति** ॥ ४९ ॥

आनन्तर्यसङ्गतिं दर्शयति—**एवमिति** । चतुर्णां पदानां समाहारः चतुष्पदी, चतुर्भिः पदैरित्यर्थः । केचित्तु पदशब्दः पद्यपरः । चत्वारि

[1] तादि—**पा.** [2] दुस्त्यजमेव—**पा.** [3] स्यादत्र—**पा.** [4] इत्यादीनि—**पा.**

## तत्त्वमुक्ताकलापः

# मिथ्या चेद् दृश्यताऽस्मिन्ननु विमतिपदेऽप्येव-मेषा त्वयेष्टा ।

### सर्वार्थसिद्धिः

त्वादिविशेषान् साधयतस्ते ब्रह्मणि दृश्यत्वनिषेधो न युक्तः । विद्यत इति पक्षे हेतोरतिचार इति भावः । ब्रह्मणि [1]दृश्यत्वं मिथ्याभूतम् ; अतो न तत्रातिचार इति शङ्कते—**मिथ्या चेदिति** । एतदुपालभते—**नान्विति** । मिथ्याभूतेनैव हि दृश्यत्वेन ब्रह्मव्यतिरिक्तेऽपि मिथ्यात्वं त्वया साध्यते । न हि दृश्यं मिथ्या, तद्धर्मस्तु[2] दृश्यत्वं सत्यमिति सम्भवति ; तथाऽङ्गीकारे तत्रैवातिचारः, सत्यद्वित्वप्रसङ्गश्चेति भावः । ननु दृश्यत्वे दृश्यत्वं त्वयाऽपि वक्तुं न शक्यम्, आत्माश्रयादिप्रसङ्गात् । अतस्सत्येऽपि तस्मिन् हेतुवृत्त्यभावान्नातिचारः स्यात् । मैवम् ; दृश्यत्व नाम लिङ्गं दृश्यत्वादिति हेतुपदेन बोध्य, न वा ? आद्येऽतिचारस्त्वयैवेष्टः । द्वितीये साध्यव्याप्यमनुपस्थापयतो हेतुपदस्य प्रयोगाङ्गतायोगः । न चैवमात्माश्रयादि[3]दोषः, परस्परनिर्वाहकसमाधिना दृश्यत्वधर्मस्य तदाश्रयाणां च दृश्यपदेन संग्रहणस्य त्वया स्वीकार्यत्वात् ; अन्यथा दृश्यत्वं न दृश्यमिति स्वोक्तिविषयत्वव्याघातात् ।

### आनन्ददायिनी

पद्यानि चतुष्पदीत्यर्थ इत्याहुः । **विद्यत इति** । ब्रह्मणस्सत्यत्वादिति भावः । **तथाऽङ्गीकार इति** । सत्यत्वाङ्गीकारे दृश्यत्वे व्यभिचारोऽद्वैतहानिश्चेत्यर्थः । **आद्य इति** । बोध्यत्वस्यैव दृश्यत्वादिति भावः । **द्वितीय इति** । तथा सत्यपार्थकत्वादिनिग्रह इत्यर्थ. । **परस्परनिर्वाहकेति** । एतादृशधर्मेषु नात्माश्र[4]यदोष इति भावः । **व्याघातादिति** ।

---

[1] दृश्यत्व तन्मिथ्या—**पा.** [2] स्तु सत्य दृश्यत्वमिति—**पा** [3] दोष स्वपरनिर्वाहक—**पा.** [4] श्रय इति—**क.**

## सर्वार्थसिद्धिः

यदि च हेतुपदजन्यधीविषयताभावेऽपि हेतुपदं तत्र प्रयुज्येत एवमनैकान्तिकादिपदमपि तज्जन्यधीविषयत्वाभावेऽपि तत्र लब्धप्रसरमिति सर्वदोषसंपातः स्यात् । दोषा[1]भावे कथं दुष्टशब्दस्सार्थ इति चेत्, दृश्यत्वाभावे कथं दृश्यशब्दस्सार्थ इति सममेतत् । किंच दृश्यत्वरहितं दृश्यत्वं निष्प्र[2]काश स्वप्रकाश वा ? नाद्यः ; स्वोक्तिव्याघातादेव । न द्वितीयः, अब्रह्मत्वात् । अतः कथं दृशिविषयत्व नासादयेत् ? अथ स्यात् दृश्यत्वशब्देन स्वगोचरदृशिनिरपेक्षप्रकाशात्यन्ताभावो वा दृशिजन्यफलाश्रयत्वं वा विवक्षितम् ? तदुभयं स्वयंज्योतिषि ब्रह्मणि नास्तीति कथ तत्रातिचार इत्यपसर्पणवाक्यमनुभाषते—

## आनन्ददायिनी

एतद्वाक्यजन्यदृशिविषयत्वादित्यर्थः । व्याघातं परिहरति—**यदीति** । दूषयति—**एवमिति** । अर्थासं[3]स्पर्शिपदप्रयोगस्य साधकत्ववद्दूषकत्वस्यापि संभवादनै[4]कान्त्याद्युद्भावनेन [5]सर्वत्र विजयः स्यादित्यर्थः । नन्वर्थशून्यशब्दप्रयोगस्य निग्रहहेतुत्वात् कथं [6]विजय इति शङ्कते—**दोषाभाव इति** । अनुमानप्रयोक्तुरपि तुल्यमित्याह—**दृश्यत्वा[7]भाव इति** । **निष्प्रकाशं**—प्रकाशरहितम् । **स्वोक्तिव्याघातादिति** । स्वोक्तिजन्यप्रकाशवत्त्वादिति भावः । **अब्रह्मत्वादिति** । तव ब्रह्मव्यतिरिक्तस्य जडत्वादित्यर्थः । **दृशिविषयत्वमिति** । दृशेर्विषयस्तत्त्वमित्यर्थः । शब्दपरेण दृशिशब्देनार्थो लक्ष्यते । यद्वा 'इक्कृष्यादिभ्यः' इतीक् प्रत्ययः । **तदुभयमिति** । यद्यपि प्राकट्यादिकं ब्रह्मण्यपि वक्तु

---

[1] भावेऽपि कथ-**पा.** [2] काश वा स्वप्र-**पा.** [3] सस्पर्शपद-**क.**
[4] नैकान्त्योद्भा-**क.** [5] सर्वश्च एष-**ग.** [6] विषय-**ग.** [7] भावादिति-**ग.**

तत्त्वमुक्ताकलापः

## लिङ्गं जाड्यादिकं चेत्तदपि मम मते ह्यंशतः स्यादसिद्धं

सर्वार्थसिद्धिः

**लिङ्गमिति।** तदुभयं दूषयति—**तदपीति**। अस्मन्मते हि ब्रह्मव्यतिरिक्ता जीवा धर्मभूतज्ञान च स्वयंप्रकाशतया स्वगोचरदृशिनिरपेक्षप्रकाशानि। अतो हेतोर्भागासिद्धिः। दृशिजन्यफलं च त्वदनुविधेयाभिमतं प्राकट्यं वा? त्वदभिमतं वेद्यगतवित्तिस्फुरणं वा? द्वयोरपि विगीते क्वचिदप्यस्माभिरनङ्गीकारात् सार्वत्रिकी स्वरूपासिद्धिः। तवापि स्फुरणस्य वाच्य [1]व्याहारारूप्य फल विगीत[2]स्यापीति चेत्, तर्हि तद्ब्रह्मापि व्याप्नोति। अन्यथा तत्र मौनैकशरणः कथं तद्व्याचिख्यासया प्रवर्तेथाः? भवन्तु चात्र यानिकानिचिल्लिङ्गानि, तानि सत्यान्यसत्यानि वेति विकल्पे पूर्वत्रापसिद्धान्तादि स्फुटमिति

आनन्ददायिनी

[3]शक्यम्; तथाऽपि स्फुरणलक्षणस्य प्राकट्यस्य ब्रह्मरूपत्वा[4]त्तत्र न सम्भ[5]वत्यात्माश्रयत्वादिति भावः। **स्वगोचरदृशिनिरपेक्षप्रकाशानीति।** निरपेक्षप्रकाशाश्च निरपेक्षप्रकाशं च निरपेक्षप्रकाशानि। 'नपुंसकमनपुंसकेन' इति नपुसकस्य शेषः। **त्वदनुविधेयो** भट्टाचार्यः; व्यवहारे भट्टनय इत्यङ्गीकारात्। **वित्तिस्फुरणं**—वित्तिरूपस्फुरणम्। यद्वा वित्तेर्ज्ञानस्य वेद्य[6]गतत्वेन प्रकाश इति वाऽर्थः। **विगीते**—

---

[1] व्यवहारा—**पा.** [2] स्येति चेत्—**पा** [3] शक्यते तथा—**ग** [4] त्तत्र—**ग.**
[5] तीत्यात्माश्रयादिति—**ग.** [6] गतत्वे प्र—**ग.**

तत्त्वमुक्ताकलापः

**मिथ्यालिङ्गैश्च सिध्येत् किमपि यदि भवेद् बाष्पधूमोऽग्निलिङ्गम् ॥ ५० ॥**

सर्वार्थसिद्धिः

कृत्वा पश्चिममनुवक्ति—**मिथ्यालिङ्गैरिति** । तत्रानिष्टमाह—**भवेदिति** । **बाष्पधूमः**—बाष्पारोपितधूमः । भ्रान्तिसिद्धस्य धूमस्य व्यभिचारदृष्ट्या वह्निगमकत्वाभावः, न तु मिथ्यात्वादिति चेत्, तत एव यन्मिथ्या न तद्गमकमिति व्याप्तिसिद्धेस्त्वदभिमतान्यपि न साध्यं साधयेयुः । साधने वा ब्रह्मण्यपि तानि कथञ्चित्कल्पितानि तदप्यपरमार्थयेयुः । एतेन परोक्तं बाधकमपि प्रतितर्कप्रत्यूढं दर्शितं भवति । अपि च सत्यत्वपक्षे याऽसौ दृग्दृश्यसम्बन्धानुपपत्तिर्बाधिकेति सभाज्यते, असत्यत्वेऽपि सा अस्ति वा न वा?। आद्ये तर्काङ्गपञ्चकान्यतमहानेर[1]सत्तर्कत्वम्; [2]तदा चाऽसत्यत्वे साध्ये कथं दृश्यत्वं हेतुरुपादीयेत? द्वितीये सत्यादन्यस्मिन् खपुष्पेऽपि दृश्यत्वानुपपत्तिर्न स्यात् । मा

आनन्ददायिनी

पक्षे । **तत एवेति** । मिथ्याभूतस्य वह्निगमकत्वाभावादित्यर्थः । **एतेनेति** । [3]कल्पितहेतुभिर्ब्रह्मणो मिथ्यात्वापादनेनेत्यर्थः । प्रपञ्चमिथ्यात्वाभावे दृक्सम्बन्धो न स्यात्, व्यावर्तमानत्वं न स्यादित्यादिबाधकतर्काः । तत्र प्रतितर्कास्तु आरोपितसाधनेन प्रपञ्चस्य मिथ्यात्वे तथाभूतेन दृश्यत्वेन सत्यत्वस्वप्रकाशत्वादिकं ब्रह्मणो न स्यात् अविशेषादित्यादय इति भावः । **अन्यतमहानेरिति** । विपर्यये पर्यव[4]सानाद्यसम्भवादिति भावः । **तदा चेति** । विरुद्धत्वादिति भावः ।

[1] रतर्कत्व—**पा.** [2] तदा वाऽस—**पा.** [3] विकिल्पितहेत्वभिप्रायेण मिथ्या—**ग.**
[4] सानासभ—**क.**

## सर्वार्थसिद्धिः

भूदिति चेन्न ; ख्यातिबाधान्यथानुपपत्तितर्कानुदयप्रसङ्गात् । अथ शब्द-ज्ञानानुपातिवस्तुशून्यविकल्पगोचरतामात्रेण तस्य दृश्यत्वं, सत्येतरत्व-साध्यापेक्षया च सपक्षत्वमिष्येत, तदा तद्वदेव तुच्छत्वेऽपि सभवति अभि[1]मतमनिर्वचनीयत्वं न नियम्येत। शब्दज्ञाननिर[2]पेक्षश्च खपुष्पाद्य-ध्यासः प्रागपि दर्शितः । भवतु तत्राप्यनिर्वचनीयत्वं शब्दमात्रानुपाति-विकल्पविषये तुच्छत्वम् । तत्र च विवक्षितदृश्यत्वानुपपत्तिस्सिद्धेति चेत् ; तदपि न ; शब्दमात्रपतीतबाह्यागमविषयाणामन्येषामपि पूर्व-पक्षवाक्यार्थानामनिर्वचनीयत्वाभ्युपगमात् । अस्तु तत्रापि तुच्छत्वम्, किं नश्छिन्नमिति चेन्न ; प्रत्यक्षाद्याभासप्रतिपन्नेऽप्याभासप्रतिपन्नत्वा-

## आनन्ददायिनी

**ख्यातिबाधेति** । [3]असत्त्वे **भानं** न स्यादित्यसद्वैलक्षण्यायोगादिति भावः । **अथेति** । शब्दविषयकज्ञानानन्तरभावि यच्छून्य-विषयकं ज्ञानं तादृशसविकल्पकगोचरत्वं शून्यस्या[4]प्यस्त्वित्यर्थः । ननु [5]शब्दज्ञानजन्यज्ञानविषयत्वेनानिर्वचनीयत्व साध्यते ; तदेवात्र दृश्यत्व-मभिमतामित्यत्राह—**शब्दज्ञाननिरपेक्ष इति** । **प्रागपीति** । माध्य-मिकमतभङ्ग इत्यर्थः । सर्वस्याप्यनिर्वचनीयत्वे ख्यातिबाधाभ्यां सदसद्वैलक्षण्यं न स्यादित्यत्राह—**शब्दमात्रेति** । यस्य शब्दनिरपे-क्षाध्यासो न तस्माद्याबृत्तिः साध्येति भावः । **तदपीति** । शब्द-निरपेक्षाध्यासाभावादिति भाव । ननु मायिपक्षेऽपि [6]शब्दज्ञानमात्रजन्य-विकल्पविषयाणां सत्त्वात् किमर्थं बाह्यागमादिपर्यन्तधावनं कृतमिति

---

[1] मतानिर्व–**पा.** [2] पेक्षस्य खपु–**पा.** [3] असत्त्वेन न स्या–**ग** [4] प्यस्तीत्यर्थ –**ग.**
[5] शब्दमात्रजन्य–**क.**

## सर्वार्थसिद्धिः

विशेषेण तुच्छबहिर्भावक्लप्तिभङ्गप्रसङ्गात्। ननु सत्ये दृक्सम्बन्धोऽनुपपन्नः, अस्वयंप्रकाशस्य स्वतस्सिद्धिविरहेण सत्यत्वायोगात्। तुच्छेऽपि तथा, स्वरूपाभावे संबन्धाभावात्; अनिर्वचनीये त्वविद्यामाहत्म्यादाध्यासिकस्संबन्धस्सिध्यन् दुरपह्नव इति, तन्न; पराधीनसिद्धेरपि निर्बाधस्य सत्यत्वाविरोधात्; [1] सत्यत्वेऽपि ब्रह्मणि आध्यासिकदृक्संबन्धाभ्युपगमाच्च।

दृक्संबन्धश्च दृश्यानामसत्यत्वे विवक्षितः।
सत्यत्वादिविकल्पेन सीदत्यनुपपत्तिमान्॥

सत्यत्वे त्वनुपपद्यमानो हि दृक्संबन्धः सत्योऽसत्य उभयरूपोऽनुभयरूपो वा?। नाद्यः; सत्यत्वे प्रपञ्चस्य दृक्संबन्धस्सत्यो न स्यात्। असत्यश्चासाविति विपर्ययविश्रमायोगात्। विषयसत्यत्वे हि धिया

## आनन्ददायिनी

चेन्न। तेषामीश्वराध्यासविषयत्वेन वैषम्यादिति भावः। मायिपक्षेऽपि दूषयितुमन्यथानुपपत्तिस्वरूपमाह—**नन्वित्यादिना**। ननु सत्यत्वे सम्बन्धानुपपत्तिरेव बाध इति चेत्तत्राह—**सत्यत्वेऽपीति**। ननु वृत्तिविषयत्वमेव ब्रह्मणो न चैतन्यसम्बन्ध इति चेत्तर्हि प्रपञ्चेऽपि वृत्तिविषयत्वमेव न चैतन्यविषयत्वमिति वक्तुं शक्यत्वात्। **दृक्सम्बन्धेति**। दृश्यानां सत्यत्वेऽनुपपद्यमानो दृक्सम्बन्धः सत्योऽसत्यो वेति विकल्पासहत्वेनानुपपन्न इत्यर्थः। **उभयरूपः**—सत्यासत्यस्वरूपः। **अनुभयरूपः**—सत्यासत्यभिन्नः। **सत्यत्वे प्रपञ्चस्येति**। त्वया ह्येवं [2]तर्कः प्रयोज्यः; प्रपञ्चस्य सत्यत्वे दृग्दृश्यसम्बन्धः सत्यो न स्यादिति, तत्र सत्यश्च सम्बन्धः; तस्मादसत्यश्चासौ प्रपञ्च इति विपर्यये पर्यवसाने

[1] सत्येऽपि—**पा.** [2] बाह्यैरयं तर्कः—**ग.**

## सर्वार्थसिद्धिः

संबन्धः स्वीकार्यः। न चासौ घटते विकल्पदौःस्थ्यादिति प्रसङ्ग-तद्विपर्ययाविति चेन्न; इष्टप्रसङ्गत्वात्। दृशस्सत्यत्वेऽपि दृश्यसंबन्धा-सत्यत्ववद् दृश्यस्य सत्यत्वेऽपि [1]दृशिसंबन्धमात्रासत्यत्वमनुपपत्त्या कल्प्यम्। दृक्संबन्धासत्त्वे तदधीनसिद्धेः कथं सत्यत्वमिति चेन्न; असत्यात्सत्यसिद्धेस्त्वया त्वद्विधैश्च जांघुष्यमाणत्वात्; अस्माकं तु संबन्धविकल्पदौःस्थ्यानङ्गीकारादेव समीहितसिद्धिः।

संबन्धफलसिद्धौ च स्वरूपे दुरपह्नवे।
अन्तर्भावबहिर्भावविवादस्त्विह निष्फलः॥
ये च दृग्दृश्यसंबन्धे सयोगादिविकल्पतः।
दोषाः प्रलपितास्तेऽत्र [2]दृश्याः सत्यत्वभीरवः॥
सबन्धमात्रदौर्घट्यात्तद्विशेषोऽपि दुर्घटः।
इति चान्धस्य जात्यन्धयष्टिदानोपम विदुः॥

### आनन्ददायिनी

वाच्ये दृग्दृश्यसम्बन्धस्यापि पक्षान्तर्भावात् बाधेन पर्यवसानं न स्यादित्यर्थः। **विकल्पदौःस्थ्यादिति**। संयोगसमवायादिविकल्प-दौःस्थ्यादित्यर्थः। **असत्यात् सत्यसिद्धिः**—रज्जुसर्पादिभिर्भयसिद्धिः। **त्वद्विधाः**—योगाचारादयः। तैरिन्द्रियैस्तथा[3]विधैर्ज्ञानसिद्धिरङ्गीकृता। अनङ्गीकारे हेतुमाह—**सम्बन्धफलेति**। **अन्तर्भावेति**। प्रमाणसिद्ध-स्यान्यतरत्वसम्भवादिति भावः। **अत्र दृश्याः सत्यत्वभीरव इति**। अत्र काल्पनिकसम्बन्धपक्षे सत्यत्वात् भीरवो विरोधिनस्ते दोषा दृश्याः **द्रष्टव्या इत्यर्थः**। **भीरुभिरिति** पाठः क्वचित्। **इति चान्धस्येति**।

---

[1] दृश्यसंब–**पा.** [2] दृश्यासत्यत्व–**पा.** [3] विधेयज्ञान–**क.**

## सर्वार्थसिद्धिः

न द्वितीयः, विषयस्य सत्यतायाम्[1]सत्यस्संबन्धो न स्यादिति ह्यत्र प्रसङ्गः स्यात्। अयं ब्रह्मण्यतिचरितः, [2]इष्टप्रसङ्गश्च ; [3]विपर्ययविश्रान्तिश्चाद्याप्यसिद्धा। अत एव न तृतीयचतुर्थौ, व्याघाताच्च। तथाऽपि कोऽसौ दृग्दृश्ययोस्संबन्ध इति [4]निर्मत्सरः पृच्छामीति चेत्, वयमपि निर्मत्सराः पृच्छन्तं पृच्छामः। तत्र किंनामेति वा, किंस्वरूप इति वा, संयोगादिषु कतम इति वा, तेष्वन्तर्भूतो बहिर्भूतो वेति वा, सत्योऽसत्यो वेत्यादिप्रकारकोटिभेदेन प्रश्नार्थः स्यात्? नाद्यः, [5]अज्ञातविशेषनाम्नामानन्त्यात्; सामान्यतस्तु प्रश्नवाक्येऽपि प्रख्यातेः। न द्वितीयः, सर्वत्र स्वरूपमात्रे प्रश्नोत्तरविचारादेरनवतारात्। न तृतीयः, संयोगादिराश्रयन्तर्भावनिर्बन्धाभावात्, अन्यथा [6]सर्वत्र तज्जातीयराशिविशेषप्रश्नप्रसङ्गात्।

### आनन्ददायिनी

सम्बन्ध[7]स्य दौर्घट्याभावात् तद्विशेषस्य सुतरां दौर्घट्यं नास्तीति भावः। **अयमिति**। ब्रह्मणो वेदान्तजन्यवित्तिविषयत्वादित्यर्थः। **इष्टेति**। असत्यत्वाभावस्येष्टत्वादित्यर्थः। **विपर्ययविश्रान्तिरिति**। असत्यश्चायं सम्बन्ध इति वाच्यम्; न च प्रपञ्चमिथ्यात्वसिद्धेः प्राक् दृग्दृश्यसम्बन्धो मिथ्यात्वेन सिद्ध इति भावः। **अत एवेति**। इष्टप्रसङ्गाद्विपर्यविश्रान्त्यसिद्धेश्चेत्यर्थः। **अज्ञातेति**। इक्षुक्षीरादिमाधुर्याणामित्यर्थः। **सामान्यत इति**। प्रश्नवाक्ये केनचि[8]च्छब्देनाभिधानादित्यर्थः। **सर्वत्रेति**। सिद्धस्वरूप[9]धर्मिविशेषविषयत्वात् प्रश्नस्येति भावः। **अन्यथेति**। ब्रह्मणोऽपि यत्किंचिज्जातीयत्वप्रश्नप्रसङ्गेन तत्राप्युत्तरं

---

[1] सत्यसब–**पा.** [2] इष्टश्च–**पा.** [3] विपर्यये विश्रा–**पा.** [4] निर्मत्सराः पृच्छाम इति–**पा.** [5] अप्रज्ञात–**पा.** [6] सर्वत्रातज्ञा–**पा.** [7] स्य दौर्बल्यदौर्घ–**क.** [8] च्छब्दाभिधा–**ग.** [9] धर्मवि–**क.**

## सर्वार्थसिद्धिः

नापि चतुर्थः, उभयथाऽपि स्वरूपलाभे विशेषनिर्धारणवैफल्यात्, अनिर्धारितेऽप्यन्यतरकोटेरनपायात्। न पञ्चमः, परस्परविरुद्धे सर्वत्रानुपपत्तिरहितान्यतरकोटेर्यथार्हमवशेषणीयत्वात्। दूषिता च संबन्धपक्षानुपपत्तिः; दर्शितश्चासंबन्धपक्षे दोषः। यदि चैतादृशस्तर्कोऽनुग्राहकः, स तर्हि यत् प्रकाशते तन्मिथ्या यथा ग्राह्यग्राहकौ तथा संविदित्यादिसंविन्मिथ्यात्वसाधकानुमानेष्वपि सुलभः, सत्यत्वस्वप्रकाशत्वादिधर्मसंबन्धानुपपत्तेस्त्वत्प्रलापप्रस्थित्यैवाकुण्ठितप्रसरत्वात्॥

मिथ्यात्वेन च दृश्यत्वं स्वतःसंबन्धि साधयन्।
अप्रामाण्यस्वतस्सिद्धिमुद्विरत्यनया गिरा॥ ५०॥

इति दृश्यत्वानुमानभङ्गः

---

## आनन्ददायिनी

वक्तव्यं स्यादिति भावः। **दूषितेति**। सत्यत्वेऽपि सम्बन्धानुपपत्तिः परिहृतेत्यर्थः। **दर्शितश्चेति**। हेतुपदजन्यधीविषयत्वाभावेऽपीत्यादिनेत्यर्थः। तर्कस्याभा[1]ससाम्यमाह—**यदि चेत्यादिना**। तथा च माध्यमिकमतावतार इति भावः। **सत्यत्वेति**। व्यावहारिकसत्त्वं प्रातिभासिकसत्त्वं चादायान्यथासिद्धिवत् सांवृतिकसत्त्वस्वप्रकाशादिकमादायान्यथासिद्धिसम्भवादित्यर्थः। **प्रस्थितिः**—मार्गः। **मिथ्यात्वेनेति**। मिथ्याभूतं [2]दृश्यत्वं स्वतः स्वरूपाभावेऽपीति चेत् स्वयं स्वसम्बन्धिसाध्यं प्रपञ्चस्य साधयतीति वचन स्वस्याप्रामाण्यमेव प्रतिपादयतीत्यर्थः। **अप्रामाण्यस्य स्वतः सिद्धिः** स्वेन वचनेनैव सिद्धिः, स्वयमप्रमाणमिति यावत्॥ ५०॥

**दृश्यत्वानुमानभङ्गः.**

---

[1] भावसा—ग [2] दृश्यत्व स्वरू—ग.

तत्त्वमुक्ताकलापः

**व्यावृत्तं शुक्तिरूप्यं विदितमिह मृषा विश्वमेवं न किं स्यात्**
**मैवं हेतोरयुक्तेस्स खलु भिदुरता बाध्यता नाशिता वा ।**

सर्वार्थसिद्धिः

उक्तदोषदुष्टमप्यनुमानान्तरमधिकदोषशिक्षार्थं व्याचष्टे—**व्यावृत्तमिति । इह**—यत्र भाति तत्रेत्यर्थ । अन्यत्र तु प्रसङ्ग एव नास्ति; यद्वा सर्वस्मिन्निह जगतीत्यर्थः । विमतं मिथ्या व्यावर्तमानत्वात्, यदुक्तसाधनं तदुक्तसाध्यम् यथा शुक्तिरूप्यम्; तत्खलु स्वतादात्म्येन भाते शुक्तिद्रव्येऽनुवर्तमाने स्वयं व्यावर्तते, अतो मिथ्या । एवं रज्ज्वादेस्सर्पभूदलनाम्बुधारादेश्च सत्यत्वमिथ्यात्वे व्यवतिष्ठेते, इति । अत्रापि प्रागुक्तदूषणानि न प्रस्मर्तव्यानीत्यभिप्रायेण [1]प्रतिवक्ति—**मैवमिति । तत्र** हेतुदौःस्थ्यं हेतुमाह—**हेतोरिति । अयुक्तिं** [2]प्रथयितुं विकल्पयति—**स खल्विति ।** [3]सोऽस्य व्यावर्तमानत्वहेतुः, कुतश्चित् भिन्नत्वं वा ? बाध्यत्वं वा, नश्वरत्वं वा ? प्रथमं

आनन्ददायिनी

दूषितसजातीयानामप्युदाहरणभेदमात्रेण पृथग्दूषणेऽनवस्थाप्रसङ्गं परिहरन् पूर्वसङ्गत्याऽऽह—**उक्तेति** । व्यावर्तमानत्वं मिथ्या न सेत्यादिहेतुविषयविकल्पदूषणमप्यत्रास्तीत्यर्थः । **एवमिति** । रज्ज्वाद्यधिष्ठानस्यानुवर्तमानत्वात्सर्पादेर्व्यावर्तमानत्वात्सत्यमिथ्यात्वे दृष्टे इत्यर्थः । **प्रस्मरणं**-

[1] प्रतिषेधति—**पा.** [2] प्रदर्शयितु—**पा.** [3] योऽयं—**पा**

तत्त्वमुक्ताकलापः

## आद्येऽनैकान्त्यमन्त्ये

सर्वार्थसिद्धिः

दूषयति—**आद्य** इति । भिन्नत्वं ह्यत्र स्वप्रतियोगिकं वा? स्वेतरप्रतियोगिकं वा? स्वतोऽन्यतो वेति विशेषानादरेण यत्किंचित्प्रतियोगिकं वा? आदिमस्त्वसंभवग्रस्तः ; भेदाभेदकुसृष्टिश्च त्वया नाङ्गीक्रियते ; अनन्तरस्त्वनैकान्त्यहतः । सत्ये ब्रह्मण्यतद्व्यावृत्तिं [1]वदता त्वयैव स्वेतरान्यत्वस्य स्वीकारात् । तत एव सामान्योक्तिरपि निर्धूता । अत्र क्रमस्य दूषणानुपयोगित्वादपसिद्धान्तोद्घाटनत्वरया च तृतीयं दूषयति—**अन्त्य** इति । यदि ह्यत्र स्वकालसत्त्वमभ्युपेत्य उत्तरकालासत्त्वं हेतुरुद्भाव्यते, तदा मिथ्यात्वेन सिषाधयिषितस्य [2]स्वकालसत्त्वाभ्यनुज्ञानेऽपसिद्धान्तः ; हेतुसाध्यपदव्याघातश्च । अनभ्युपगतस्वकालसत्त्वे तु

आनन्ददायिनी

विस्मरणम् । **आदिमस्त्विति** । स्वप्रतियोगिकभेदस्य [3]विरोधेन स्वस्मिन्नसम्भवादित्यर्थः । **तत एवेति** । ब्रह्मण्यनैकान्त्यादित्यर्थः । **अपसिद्धान्त इति** । सत्यमेव हि सत्यत्व ; तत्काले सत्त्वे तन्निषेधायोगादिति भावः । **हेतुसाध्यपदेति** । हेतुसत्त्वप्रतिपादकहेतुपदस्य तदभावप्रतिपादकसाध्यपदेन विरोध इत्यर्थः । पूर्व-[4]कालसत उत्तरकालसत्त्वं नश्वरत्वमित्यभिप्रायेणाह—अनभ्युपगतेति ।

---

[1] वर्णयता—**पा.** [2] स्वकालसत्यत्वानुज्ञाने—**पा.** [3] विरोधे तस्मि—**ग.**
[4] काले सत—**क.**

तत्त्वमुक्ताकलापः

## स्वसमयविहतिर्मध्यमे स्यादसिद्धि-

सर्वार्थसिद्धिः

नश्वरत्वहेतुरसिद्धः । न खलु नित्यासतां खपुष्पादीनां नश्वरत्वं पामरः परीक्षको वा कश्चित् प्रत्येति ।

तत्रापि नश्वरत्वेन नित्यसत्त्वं निरुध्यताम् ।
स्वकालेतरकाले च तेन मिथ्यात्वमिष्यताम् ॥

बाध्यत्वहेतुं बाधते—**मध्यम** इति । प्रपञ्चस्य बाध्यत्वं हि स्वदेशादौ वा ? स्वारोपदेशादौ वा ? आद्ये त्वसिद्धिरवस्थापिता । द्वितीये बाधस्थलेष्वेव मिथ्यात्वसाधने सिद्धसाध्यता । अन्यत्र साधने त्वविषयवृत्तित्वम् ; अन्यथाऽतिप्रसङ्ग. ; प्रपञ्चविषयबाधेन

आनन्ददायिनी

ननूत्तरकालासत्त्वमेव नश्वरत्वमस्त्वित्यत्राह—**न खलिवति** । ननु नश्वरस्य सर्वदा निषेधाभावे सर्वदा सत्त्व स्यादित्यत्राह—[1]**तत्रेति** । यथा नश्वरत्वं किंचित्कालासत्त्वेन सर्वकालसत्त्वविरोधि तथा किंचित्कालसत्त्वात् [2]सर्वकालासत्त्वात् सर्वकालसत्त्वविरोध्यपीति विरुद्धत्वमपीति भावः । पूर्वत्र हेतुसाध्यपदयोरनन्वितत्वं दोषः ; इदानीमर्थगतो दोष उक्त इति ध्येयम् । **द्वितीये** किमारोपस्थल एव मिथ्यात्व साध्यते ; उत सर्वावच्छेदेनेति विकल्पं मनसि निधाय आद्य आह—**बाधस्थलेष्विति** । द्वितीय आह—**अन्यत्रेति** । बाधदेशाद[3]न्यत्रापीत्यर्थः । **अविषयेति** । स्वस्याविषये व्यापकतारहिते वृत्तिर्व्यापारो दोष[4]मूलः पराजयहेतुरिति यावत् । तदुक्तं वरदराजीये —'दृष्टत्वमूलं द्विविधम्' इत्यारभ्य 'असाधारणं तु त्रिविधं युक्ताङ्गहीनत्वमयुक्ताङ्गाधिकत्वमाविषयवृत्तित्वं च, इत्यादिभिः । **अन्यथेति** । एवंविधस्यापि साधकत्व इत्यर्थः । **प्रपञ्च-**

[1] तदत्रेति—**ग.** [2] सर्वकालासत्त्वविरोध्यपीति—**ग.** [3] न्यत्रेत्यर्थः—**ग.** [4] मूल परा—**ग.**

तत्त्वमुक्ताकलापः

**धीविच्छेदादिकल्पान्तरमपि कथितै[1]श्चूर्णितं दोषवृन्दैः ॥ ५१ ॥**

सर्वार्थसिद्धिः

ब्रह्मबाधस्यापि सुवचत्वात्। ब्रह्म मिथ्या, [2]सप्रपञ्चतया बाधितत्वात्, यत्कथंचिद्बाध्यते तत्सर्वथा बाध्यत इति त्वयैवाश्रितत्वादिति। ननु यत्सत्यं तन्नित्यं प्रकाशते, स्वतश्च, यथा ब्रह्म, विगीतं तु न तथा; सुषुप्त्यादौ प्रपञ्चभानाभावात्, जागरादौ चान्यत एव भानात्। किंच सत्यस्य सर्वस्मिन् प्रकाशमाने प्रकाशो दृश्यते, यथा सांवित्स्वरूपस्य; न तथा प्रपञ्चस्य, अप्रकाशमाने घटादौ पटादिप्रकाशदर्शनात्। सत्यं च ब्रह्म देशपरिच्छेदरहितम्; न तथा विगीत[3]मिति मिथ्या स्यात्; अतः कोट्यन्तरसंभवात् विकल्पन्यूनः प्रस्तुत उपन्यास इति शङ्कापनुत्त्यै कोट्यन्तरेष्वप्युक्तदोषानतिदिशति—**धीविच्छेदेति**। यदत्र कदाचिद-

आनन्ददायिनी

**विषयबाधेन**—प्रपञ्चरूपविषयस्य बाधेन। यद्वा प्रपञ्चरूपे देशे ब्रह्मणो बाधेनेत्यर्थः। **ब्रह्मबाधः**—ब्रह्मणो मिथ्यात्वम्। **सप्रपञ्चतया**-प्रपञ्चविशिष्टाकारेण। ननु सप्रपञ्चत्वेन बाधे तेन रूपेण मिथ्यात्वमस्तु न स्वरूपेणेत्यत्राह—**यत्कथंचिदिति**। **स्वतश्चेति**। यत्सत्यं तत्स्वतः प्रकाशत इत्यर्थः। ततश्च व्यापकनिवृत्त्या सत्यत्वनिवृत्तिरित्यर्थः। **किं चेति**। सत्यं चेत् सर्वस्मिन्प्रकाशमानेऽपि प्रकाशेतेति भावः। **सत्यं च ब्रह्मेति**। प्रपञ्च[4]स्य सत्यत्वे देशपरिच्छेदो न स्यादिति भावः। **उक्तदोषानिति**। ब्रह्मण्यतिप्रसङ्गादिदोषानित्यर्थः। असाधकत्वे हेतुमाह—

[1] श्चूर्णितं-**पा** [2] सप्रपञ्चात्मना वा-**पा.** [3] मिति तन्मिथ्या-**पा.** [4] स्यासत्य-**क.**

## सर्वार्थसिद्धिः

प्रकाशमानत्वान्मिथ्येति, तत्र किमस्मदाद्यपेक्षया कदाचिदप्रकाशमानत्वं हेतुः? उत सर्वापेक्षया? नाद्यः, सामग्र्यनुदयप्रयुक्तस्य प्रकाशाभावस्य प्रकाश्यमिथ्यात्वसाधकत्वायोगात् न च पशुभिर्नृपशुभिश्चाविदितेष्वदृष्टेश्वरादिषु प्रामाणिकैरसत्यत्वमध्यवसीयते। वयं तु तत्राप्यध्यवस्याम इति चेन्न; ब्रह्मण्यपि प्रसङ्गात्। विदितमेवास्माभिरप्यात्मतया ब्रह्मेति चेत्, किमर्थं तर्हि तद्विविदिषया यज्ञदानाद्युपादानम्? शारीरकारम्भश्च। अविदिताकारबोधार्थमिति चेन्न, तस्यैवाकारस्य मिथ्यात्वप्रसङ्गात्। तत्त्ववेदकवाक्यवेद्यस्य च मिथ्यात्व व्याहतम्। निराकारे च कथं विदितावदिताकारभेदः? तत्कल्पनयेति चेत्तर्हि कल्पिताकारविविदिषयैव शास्त्राद्यारम्भात् स्वेष्टोपप्लवः। न द्वितीयः, ईश्वरस्य नित्यसर्वज्ञतया तदसिद्धेः। प्रकाशप्रकाश्ययोश्च भिन्नायुष्कत्वं

### आनन्ददायिनी

**प्रामाणिकैरिति**। व्यभिचारादिति भावः। कदाचिदप्रकाशमानत्वं ब्रह्मण्यसिद्धमेवेति शङ्कते—**विदितमेवेति**। **किमर्थमिति**। वेदनस्य सर्वदा प्रकाशमानस्य यज्ञादिसाध्यत्वाभावेन तेषां वैयर्थ्यमिति भावः। इष्टापत्तिं परिहरति—**तत्त्वेति**। किं च स आकारो ब्रह्मस्वरूपं वा तदन्यो वा; नाद्य इत्याह—**निराकारे चेति**। द्वितीयं शङ्कते—**तत्कल्पनयेति**। **स्वेष्टस्य** तत्त्ववेद[1]कस्य **उपप्लवो** भङ्गः। नन्वीश्वरज्ञानस्य नित्यस्य कथमनित्यगोचरत्वं नित्यज्ञानविषयस्य नित्यत्वानियमात्, तथा च नासिद्धिरित्यत्राह—**प्रकाशेति**। **भिन्नायुष्कत्वमिति**। न्यूनाधिककालवृत्तित्वं अविद्याप्रपञ्चसुखदुःखेच्छाद्वेषतत्प्रकाशब्रह्मसाक्षि-

[1] कत्वस्य—क

## सर्वार्थसिद्धिः

युष्माभिरपि दुरपह्नवम्; अनादिसाक्षिचैतन्यविषयभूतानामविद्याव्यतिरिक्तानामनादित्वानङ्गीकारात्, स्वतःप्रकाशमानत्वाभावाच्च। [1]सत्यत्वनिषेधः पूर्वहेतुविकल्पे दूषितः; परतः प्रकाशोऽपि कारणदोषबाधकप्रत्ययाभावात् प्रतिष्ठितप्रामाण्यः। यच्च सत्यं सवित्स्वरूपं सर्वस्मिन् प्रकाशमाने प्रकाशते, न तथा विगीतम्, अतो मिथ्येति; तदसत्; सर्वसंविदामैक्यस्यास्माभिरनभ्युपगमात्, त्वयाऽपि तस्य दुस्साधत्वाच्च। अन्यथा कथं न सर्वे सर्वज्ञाः? स्वसंविदो गुरुसंविदा प्रतिवादिसंविदा चैक्यं पश्यन् किं तदनुगुणं नाचरसि? भिदुरास्तु संविदः स्ववेद्येतरप्रकाशदशायां न प्रकाशन्त इति न तन्निदर्शनम्। एतेन सत्यं सत् सर्वत्र वेद्ये प्रकाशत [2]इत्यपि दत्तोत्तरम्। प्रतिवित्तिवेद्यानां

## आनन्ददायिनी

ज्ञानानामिति भावः। तदेवोपपादयति—**अनादीति**। **अविद्याव्यतिरिक्तानामिति**। यद्यपि विद्याया अपि भिन्नायुष्कत्वं; तथाऽपि किंचिद्वैषम्यमादायात्यन्तवैषम्यं सुखादीनां दर्शयितुं तथोक्तमिति भावः। **पूर्वहेतुविकल्प इति**। पराधीनसिद्धेरपीत्यादिनेति शेषः। **सर्वसंविदामिति**। संविदोऽप्युक्तप्रकाशरहितत्वात् न व्यतिरेकव्याप्तिग्रह इत्यर्थः। सर्वसंविदामैक्ये परस्परविरुद्धाचरणं न स्यात्; अनुकूलबुद्धेः प्रतिकूलबुद्धेर्वा एकरूपायास्सर्वसाधा[3]रण्यादिति भावः। सर्वज्ञत्वाभ्युपगमे बाधकमाह—**स्वसंविद इति**। ननु संविन्नानात्वमस्तु को दोष इत्यत्राह—**भिदुरास्विति**। दृष्टान्ता[4]सिद्ध्या व्याप्यत्वासिद्धिरिति भावः। ननु तर्हि सत्स्वरूपं निदर्शनं स्यादित्यत्राह—**एतेनेति**। दत्तोत्तरत्वमेव दर्शयति—**प्रतीति**। ननु (भेदिभिः) स्वीकृत एव

[1] सत्यस्य निषेधः—**पा.** [2] इति दत्तो—**पा.** [3] रण्यमिति—**ग.** [4] सिद्धौ व्या—**ग.**

## सर्वार्थसिद्धिः

सतां परस्परव्यावृत्तत्वात्। सत्तारूपस्तु तेषां धर्मो न त्वया सत्यत्वेन स्वीक्रियते, शेषं तु स्वस्थाने भविष्यति। यत्तु देशपरिच्छेदवतां स्वदेशेऽपि निवृत्तिः सेत्स्यतीति, तदपि नश्वरत्वोक्तन्यायेन प्रत्युक्तम्। यदि हि यत्र क्वचिद्देशे व्यावृत्तिर्हेतुस्स तर्हि स्वदेशासत्त्वं न साधयेत्, तत्सत्त्वे विरोधाभावात्। सार्वत्रिकव्यावृत्तिस्तु साध्यगर्भेति न हेतुः स्यात्।

यन्न क्वचिन्न क्वचित्तत्खरशृङ्ग[1]दिरीतितः।
इति मध्यमशिक्षा च स्वविधिक्षेपखण्डिता॥ ५१॥

## इति व्यावर्तमानत्वानुमानभङ्गः.

---

### आनन्ददायिनी

दृष्टान्तोऽस्त्वित्यत्राह—**शेषं त्विति**। अद्रव्यसर इत्यर्थः। तदेवोपपादयति—**यदि हीति**। देशपरिच्छेदो हि [2]देशव्यावृत्तिरिति तद्विकल्पोपपत्तिः। [3] सर्वत्र व्यावृत्तिर्हि तन्निष्ठात्यन्ताभावघटितेति तयैव तत्साधने साध्याविशेष [4]इत्याह—**सार्वत्रिकेति**। **यन्न क्वचिदिति**। यत्क्वचिदसत् तत् क्वचिदपि न सत् शशशृङ्गादिवदसदेवेत्यर्थः। **मध्यमशिक्षा**-**शून्यवादिसकाशादभ्यासः**। स्वविधेर्ब्रह्मणोऽपि क्षेपेण मिथ्यात्वापादकत्वेन निरस्तेत्यर्थ इति पूर्वोक्तार्थसङ्ग्रहः। ब्रह्म मिथ्या यथाकथञ्चित् व्यावृत्तत्वादिति वक्तुं शक्यत्वादिति भावः॥ ५१॥

## व्यावर्तमानत्वानुमानभङ्गः.

---

[1] दिनीतितः—**पा.** [2] देशे व्या—**ग.** [3] सर्वद्रव्यावृत्तिभिन्नतन्निष्ठात्यन्ताभाव घटिते तथैव—**ग** [4] इत्यत्राह—**ग.**

तत्त्वमुक्ताकलापः

**यत्स्यात्तत्सर्वदा स्याद्यदपि च न भवेत्तच्च न स्यात् क्वचिदपि क्वापि व्योमारविन्दादिवदिति यदि न**

सर्वार्थसिद्धिः

नश्वरत्वहेतावुक्तदोषमनिर्धारयतः कालपरिच्छेदसामान्यमुखेन मिथ्यात्वशङ्कामङ्कुरन्तीमुज्जिहीर्षुरुद्घाटयति—**यत्स्यादिति**। विवक्षितस्य हेतोरनादरप्रतिरोधाय प्रथममिहानुग्राहकोक्तिः। यत्कचित्काले स्यात् तत्कालान्तरेऽपि स्यात्; सत्त्वभावत्वे ब्रह्मण इव सामग्रीसहस्रेणाप्यमत्त्वापादनायोगात्। असत्त्वभावत्वे खपुष्पस्येव कालविशेषे सत्त्वापादनासंभवात्। तदिहानुग्राह्याभिप्रायेणाह—**यदपीति**। अयमत्र प्रयोगः—यत्प्रागूर्ध्वं चासत् तन्मध्येऽप्यसत्, यथा संप्रतिपन्नम्, विमतं च तथात्वान्मिथ्येति। अनयोस्तर्कानुमानयोराभा[1]सतामभिप्रेत्याह—**नेति**। तर्के तावत्किं कालविशेषोपश्लिष्टं सत्त्वं प्रसञ्जनीयम्? उताविवक्षितकालविशेषं सत्त्वमात्रं वा?। नाद्यः, स्वस्वरूपस्यैवाभावे

आनन्ददायिनी

पूर्वसङ्गत्याऽऽह—**नश्वरत्वेति**। **कालपरिच्छेदसामान्यमुखेनेति**। कालविशेषे सत्त्वमात्रेणेत्यर्थः। **क्वचित्काले स्यात्** कालविशेषे यदि सदित्यर्थः। ननु प्रयोगस्य प्रतिज्ञापूर्वकत्वादत्र तदभावात् कथं प्रयोग इत्यत्राह—**अयमत्रेति**। यद्वोदाहरणादिकानिति **मीमांसकाभिमतस्य** पूर्वपक्ष्यभिमतत्वात् तथा प्रयोग उपपन्न इति भावः। **कालविशेषोपश्लिष्टं** स्वकालान्यकालसत्त्वमित्यर्थः। **नाद्य इति**। ननु

[1] सत्वमभि—**पा.**

### तत्त्वमुक्ताकलापः

**व्याहतेस्साध्यहेत्वोः ।**

### सर्वार्थसिद्धिः

स्वकालाभावात् तदवधिककालान्तरासिद्धेः तदुपश्लिष्टप्रसञ्जनीयबोधासंभवेन तत्प्रसङ्गायोगात् । न द्वितीयः, इष्टप्रसङ्गत्वात्, प्रसञ्जकैकदेशस्य प्रसञ्जनीयत्वायोगाच्च । अथ विशिष्टाङ्गीकारे विशेष्याङ्गीकारप्रसङ्गः, तच्च नास्ति बाधादित्याकूतम्; तदपि न; अन्यतो बाधादृष्टेः । एतेन तर्केण बाधमुज्जीव्यैतत्सिद्धेरशक्यसंपादनत्वात् कुतश्चिदसत्त्वस्यासिद्धौ सत्त्वस्य प्रसञ्जनीयत्वायोगाच्चेति भावः । अनुग्राह्याभासत्वे विरोधं हेतूकरोति—**व्याहतेरिति** ।

### आनन्ददायिनी

स्वकालान्यकालसत्त्वं नापाद्यमपितु भूतादिकालसत्त्वमिति न दोष इति चेन्न । भूतकालाद्युपाधेस्तत्काल एव सत्त्वाभावे स्वका[1]लस्यापि भूतकालतया सिद्धसाधनम् । तत्काल एव सत्त्वे तत्रैव व्यभिचारः । एतेन सर्वकालसत्त्वमापाद्य[2]मिति निरस्तम् । सर्वकालत्व हि सर्वो[3]पाध्युपहितकालत्वं, तेषामुपाधीनां प्रति[4]नियतत्वे तैरेव व्यभिचारः । प्रतिनियतत्वाभावे स्वकालस्यापि सर्वोपाध्यवच्छिन्नत्वात् सिद्धसाधनमिति भावः । **प्रसञ्जकेति** । प्रसञ्जकस्य यत्किञ्चित्कालसत्त्वस्य सत्त्वघटितत्वादिति भावः । प्रसञ्जकैकदेशत्वदोषपरिहारं शङ्कते—**अथेति** । कालविशेषसत्त्वाङ्गीकारे सत्त्वमप्यङ्गीकार्यम्, तन्न शक्यम्, सत्त्वस्य बाधितत्वादिति भाव । **अन्यतः**—तदनुग्राह्यादन्यतः । अनिष्टत्वरूपाशङ्काहानेराभासत्वमित्याह—**कुतश्चिदिति** । विशेष्यसत्त्वापादन-

[1] लस्य भूत--**ग.** [2] मित्यपि निरस्तम्-**ग.** [3] पाध्यवच्छिन्नकालत्व-**ग.**
[4] नियतत्वेनैव-**ग.**

तत्त्वमुक्ताकलापः

**मध्ये सत्त्वं गृहीत्वा खलु तदुभयतोऽसत्त्व-लिङ्गं गृहीतं**

सर्वार्थसिद्धिः

साध्यहेत्वोरित्येतत् '[1]लक्षणहेत्वोः' इतिवत्। अत्र हेतुसाध्ययोर्व्याहतिं विवृणोति—**मध्य** इति। अयमत्राशयः—कालविशेषा[2]सत्त्व ह्यसिद्धं तावन्न लिङ्गं स्यात्, त्वयाऽपि तथाऽनभ्युपगमात्। तत्सिद्धिस्तु स्वकालेऽप्यसत्त्वं क्रोडीकृत्य वा? बहिष्कृत्य वा? पूर्ववत्रासिद्धिरंशतस्साध्याविशेषश्च; स्वदेश-

आनन्ददायिनी

मिष्टमिति भावः। ननु साध्यहेत्वोरिति [3]मूले निर्देशोऽनुपपन्नः; 'द्वन्द्वे घि' इति हेतुपदस्य पूर्वनिपातनियमादित्याशङ्कां मनसि निधाय 'लक्षणहेत्वोः क्रियायाः' इति सौत्रनिर्देशव्यभिचारचिह्नेन पूर्वनिपात-शास्त्रस्यानित्यत्वावगमान्न दोष इत्याह—**साध्यहेत्वोरित्येतदिति**। ननु मध्ये सत्त्वग्रहणपूर्वकमेवासत्त्वं गृह्यताम्, कथं व्याहतिरित्यत्राह—**अयमत्राशय इति**। ननु मिथ्याभूतमेवास्माभिर्लिङ्गत्वेनाभ्युपगम्यत इति कुतोऽसिद्धिर्दोषः स्यादित्यत्राह—**त्वयाऽपीति**। कालविशेषासत्त्व-स्यासिद्धिस्सत्त्वमेव। तस्य त्वयाऽप्यभ्युपगमादित्यर्थः। स्वरूपासिद्धे-र्दोषत्वाभ्युपगमेन साधकत्वानभ्युपगमादिति केचित्। **स्वकालेऽ-प्यसत्त्वमिति**। स्वकालासत्त्वे सति तदुत्तरकालासत्त्वं हेतुरित्यर्थः। **अंशत इति**। हेत्वेकदेशस्य स्व[4]कालासत्त्वस्यासिद्धया विशिष्टस्या-

[1] **लक्षणहेत्वोरितिवदिति**—'लक्षणहेत्वोः क्रियायाः' (पा. सू. ३-२-१२६) इति पाणिनीयसूत्रे पूर्वनिपातप्रकरणस्यानित्यत्वतात्पर्येण लक्षणहेत्वोरिति निर्देशवत् साध्यहेत्वोरित्यत्रापि 'द्वन्दे घि' (पा सू. २-२-३२) इत्यस्यानित्यत्वान्न हेतुशब्दस्य पूर्वनिपाननियम इत्याशयः। अतोऽत्रानुपदमेव वृत्तौ हेतुसाध्ययोरिति प्रयुक्त चेति बोध्यम्. [2] षासत्त्व तावदत्यन्तासिद्ध न लिङ्ग—**पा.** [3] मूले निर्देशान्नैतत् द्वन्द्वे—**ग.** [4] कालस—**ग.**

## सर्वार्थसिद्धिः

कालासत्त्वात्मनो मिथ्यात्वस्य प्रचि[1]ख्यापयिषितत्वात् । उत्तरत्र स्वकालसत्त्वानुमतिलब्धजीवितेन हेतुना कथं सा प्रतिक्षिप्येत? तत्कालवर्तित्वबुद्ध्यपेक्षया प्रागुत्तरकालपरिक्लृप्तिरिति चेत्, न; नित्ययाऽपि धिया तत्कालवर्तित्वग्रहणोपपत्तेः । अनित्यबुद्ध्यपेक्षया प्रागूर्ध्वसमय सिद्धिरिति चेत्, बुद्धेस्तर्हि स्वकालसत्त्वमेष्टव्यम्, अन्यथा तदवधिकपूर्वोत्तरासिद्धेः । बुद्धिरपि बुद्ध्यधीनसिद्धिः, न तु [2]वस्तुतस्सतीति चेन्न; अनित्यबुद्धिवन्नित्यबुद्धिरपि तथेति प्रसङ्गे निवारकाभावात् । किं चासौ स्वाधीनसिद्धिर्वा स्वेतरबुद्ध्यधीनसिद्धिर्वा? नाद्यः, अनित्य[3]बुद्धे-

## आनन्ददायिनी

सिद्धिरित्यर्थः । अशत इत्येतदुत्तरत्राप्यन्वेतीत्यप्याहुः । **उत्तरत्रेति** । स्वरूपेणासत्त्वस्य सिद्धतयोत्तरकालाद्यसत्त्वं वक्तव्यम् । कालस्योत्तरकालाद्यसत्त्वं वक्तव्यम् । कालस्योत्तरत्वं च तत्सत्ताकालापेक्षयेति तदुपजीविसत्ताको हेतुरित्यर्थः । ननूपजीव्यित्व नास्ति सत्तायाः; किं तु तद्बुद्धेरेवेति शङ्कते— **तत्कालेति** । किं तद्बुद्धिर्नित्या विवक्षिता, यद्वाऽनित्येति विकल्पाभिप्रायेणाद्य आह—**न नित्ययेति** । तदवच्छिन्नत्वात् कालमात्रस्य तत्पूर्वोत्तरकालासिद्धिरित्यर्थः । द्वितीयं शङ्कते— **अनित्येति** । अशतो बाधं व्यभिचार चाभि[4]प्रेत्याह—**बुद्धेरिति । बुद्धिरपीति** । तथाच न बाध इति भावः । [5] तस्य नित्यबुद्धिर्दृष्टा. तेन बुद्धित्वादिहेतुना ब्रह्मरूपनित्यबुद्धेरपि स्वतः सत्त्वाभावेन साऽपि सती न स्यादित्याह —**अनित्येति** । बुद्धिरपि बुद्ध्यधीनसिद्धिरित्येतद्विकल्पयति—**किं चेति** । स्वयंप्रकाशतानभ्युपगमादित्यत्र प्रकाश-

---

[1] ख्यापयिष्यमाणत्वात्—**पा.** [2] वस्तुसती—**पा** [3] बुद्धेस्त्वयंप्रकाशत्वान—**पा.**
[4] प्रेत्याह - अबुद्धेरिति—**ग.** [5] तर्ह्यनित्यबुद्धिर्दृष्टान्तेन—**ग.**

## सर्वार्थसिद्धिः

स्त्वया स्वयंप्रकाशतानभ्युपगमात्; अभ्युप[1]गमे चानित्यसत्यत्वप्रसक्तेः। न द्वितीयः; अन्यबुद्ध्या तत्स्वरूपसिद्धावनित्यबुद्धेर्नित्यभानप्रसङ्गात्। ईश्वरबुद्धिवत् स्वकालवर्तित्वप्रतिभासे स्वत एव सत्याया अनित्यबुद्धेः कालोपाधित्वप्रसङ्गात्। तत एव तदपेक्षः पूर्वोत्तरकालासत्त्वलिङ्गेन स्वोपजीव्यमध्यकालसत्त्वप्रतिषेधः प्रासादनिगरणप्रयासप्राय इति। अत्र सतोऽसत्त्वमसतस्सत्त्वं च दुस्साधमिति दुरभिमानमुन्मूलयति—

## आनन्ददायिनी

ताया अभ्युपगम इति षष्ठीसमासो न सम्भवति 'उभयप्राप्तौ' इति विहितषष्ठ्याः 'कर्मणि च' इति निषेधादिति चेत्; न। शेषषष्ठ्यास्समाससंभवात्। यदा कर्मविवक्षा तदोभयप्राप्ताविति नियमात्तदविवक्षायां शेषत्वविवक्षासम्भवात्। ननु शेषत्वविक्षा न संभवति 'अधीगर्थदयेशां कर्मणि' इत्यादिभिर्नियमादिति चेन्न। **महाभाष्य**[2]**एव माषाणामश्नीयादित्यादि**प्रयोगनिर्वाहात्। न च 'अधीगर्थ' इत्यादिवैयर्थ्यम्, समासनिषेधार्थत्वात्। यद्वा करणत्वविवक्षायां तृतीयेति नानुपपत्तिः। **अभ्युपगमे चेति**। स्वयंप्रकाशत्वस्य सत्यताव्याप्तिस्त्वयाऽप्यभ्युपगतेति भावः। **नित्यभानप्रसङ्गादिति**। बुद्धेः सार्वकालिकत्वात्तदवधिकत्वं वक्तुं न शक्यमित्यर्थः। ननु [3]तद्बुद्धेर्नित्यत्वेऽपि यत्कालवर्तित्वं प्रति[4]भासाविषयस्तदवधिकस्स्यादित्याशङ्क्य परिहरति—**स्वकालेति**। तत्काले सत्त्वस्य बाधकाभावेन साधकसत्त्वादिति भावः। उपसंहरति—**तत एवेति**। बाधित इति भावः। नन्वपरोक्षसामग्रीपरत्वे व्यवहितान्वयः स्फुटतरः वेदनस्योपादानं

[1] गमे वानित्यसत्त्वप्र- **पा.** [2] एवान्यत्रापि माषाणा—**ग** [3] तद्बुद्धिर्नि—**ग.**
[4] भासविषयस्तदवधिक—**क.**

तत्त्वमुक्ताकलापः

## सामग्र्या चावधी द्वौ स्फुटतरविदितौ साऽपि तत्तत्प्रवाहात् ॥ ५२ ॥

सर्वार्थसिद्धिः

**सामग्र्येति** । अपरोक्षप्रमितिसामग्र्येत्यर्थः । यद्वा जनिध्वंस-सामग्र्योपलक्षितौ पूर्वापरावधी प्रत्येकं समुदायतो वा यथावस्तु प्रत्यक्षसिद्धाविति वाक्यार्थः । तरपा पण्डितपृथुकतिर्यक्पर्यन्तदुरपह्नवत्वं सूच्यते । ततश्च निर्बाधस्फुटदृष्टापह्नवे वैभाषिकादिपरिभाषया ब्रह्मणोऽपि कालपरिच्छेदरहितत्वादेव खपुष्पकल्पत्वं प्र[1]सज्यत इति भावः । ननु कालपरिच्छिन्नात्पत्तिज्ञप्तिसामग्रीसिद्धावेवं वाच्यम्, सैव कुतस्त्येत्यत्राह—**साऽपीति** । सामग्रीस्वरूपप्रवाहस्तद्बोधकप्रवाहश्चानादिरपर्यनुयोज्य इति भावः ।

किंचानित्यत्वसत्यत्वे नानित्यं सत्यतां त्यजेत् ।
तदसत्यत्वपक्षे तु नित्यत्वात्सत्यता भवेत् ॥ ५२ ॥

**इति अनित्यमि[2]थ्यात्वक्लृप्तिपरिहारः.**

---

आनन्ददायिनी

चानपेक्षितमिति तत्सामग्रीपरत्वमयुक्तमित्यभिप्रायेणाह—**यद्वेति** । प्रत्येकं जनिसामग्र्युपलक्षितपूर्वावधिः ध्वंससामग्र्युपलक्षितपरावधिश्च ज्ञायेते मिलितौ वेत्यर्थः । कालपरिच्छेदरहित तुच्छमिति वैभाषिका ऊचु[3]रित्याह—**वैभाषिकेति** । किं च नित्यत्वस्यापि पक्षान्तर्भावोऽस्ति न वा; न चेत् तस्य सत्यत्वात् तत्र हेतोर्व्यभिचारः । तदाश्रयस्यापि सत्यत्वनियमेन बाध इत्याह—**किं चेति** । आद्य आह—**तदसत्यत्व**

[1] सज्येतेति—पा. [2] थ्याक्ल—पा. [3] रित्यलाह—क.

तत्त्वमुक्ताकलापः

## आम्नायस्यापि शक्तिर्न खलु गमयितुं स्वोपजीव्यप्रतीपं

सर्वार्थसिद्धिः

मा भूदनुमानम् ; नित्यनिर्दोषनिगमवाक्यगणैरेव निर्विशेषसम्वप्रकाशसच्चिदानन्दब्रह्मव्यतिरिक्तसर्वमिथ्यात्वसिद्धिः स्यादित्यत्राह—**आम्नायस्येति** । अय भावः—प्रत्यक्षमुपजीव्यानुमानस्य, ते उभे उपजीव्य शास्त्रस्य च प्रवृत्तिः, [1]तच्चेत्ते बाधेत, अनुमानेऽपि कालात्ययापदिष्टकथैव न स्यात् ; तथा च बाधाभावे कथं दूष्यदूषणव्यवस्थेति कथात्रयोच्छेदः।

आनन्ददायिनी

**इति** । अनित्यत्वं हि नित्यत्वाभावः , तस्यासत्यत्वं नित्यत्व, तथा च मिथ्यात्वसाधनव्यापारेण विनायकसृष्टौ व्याप्तस्य मर्कटसृष्टिपर्यवसानवत् सर्वनित्यत्वपर्यवसानात् साधु समर्थितमद्वैतमिति भावः ॥ ५२ ॥

### अनित्यमिथ्यात्वकृप्तिपरिहारः.

———

आक्षेपसङ्गत्याऽऽह—**मा भूदिति** । ननु प्रसक्तिसापेक्षस्यापि निषेधस्य प्रसक्तिबाधकत्वमदृष्टमिति कथं न गमकत्वमागमस्येत्यत्राह—**अयं भाव इति** । ते प्रत्यक्षानुमाने । वह्निरनुष्णः पदार्थत्वादित्यनुमानेन प्रत्यक्षस्य बाधप्रसङ्गेन बाधहेत्वाभासो न स्या[2]दित्याह—**अनुमानेऽपीति** । **तथा च बाधाभाव इति** । अनुमाने बाधस्य दोषत्वाभावे तुल्यन्यायेन तदधीनव्यभिचारादीनामपि दोषत्वाभावात्

[1] तच्चैते—**पा.** [2] दित्यत्राह—**क.**

तत्त्वमुक्ताकलापः

**यूपादित्यैक्यवाक्यप्रभृतिरितरथा नोपचारं भजेत ।**

सर्वार्थसिद्धिः

ननु पदपदार्थादिस्वरूपमात्रं शास्त्रस्य प्रत्यक्षादुपजीव्यम्, अनुपजीव्यं तु तत्सत्यत्वं प्रमाणाभासभासितं शास्त्रेण बाध्येत; मैवम्; न हि जगत्सत्यत्वग्राहिणः प्रमाणाभासत्वमितः पूर्वं सिद्धम् । ततश्च तदाभासत्वसिद्धया शास्त्रेण तद्बाधः, तेन च सेति मिथस्संश्रयः स्यात् । अस्त्वाम्नायत्वमेव प्राबल्यकारणमित्यत्रातिप्रसङ्गमाह—**यूपादित्येति** । ननु "आदित्यो यूपः" इत्यादेराम्नायस्य कर्मविधिशेषतयाऽन्यपरत्वात् दुर्बलतया प्रत्यक्षानुविधानेन वृत्त्यन्तरस्वीकारः, इह तु तत्त्वावेदकवाक्यस्यातत्परत्वासंभवात् प्रत्यक्षादिबाधकत्वं युज्यते । हन्त, किं

आनन्ददायिनी

सर्वमदुष्टमेवेति वादजल्पवितण्डात्मककथात्रयस्यापि दूष्यदूषणव्यवस्थाधीनस्य उच्छेदस्यादित्यर्थः । ननु सत्त्वग्रहप्रत्यक्षस्य न श्रुत्युपजीव्यत्वमिति शङ्कते—**नन्विति** । यद्यप्यसत्त्वेन [1]ज्ञानस्य बोधकत्वमयुक्तम्, लिङ्गादौ तदभावात् । तथाऽप्यभ्युपेत्य समाधत्ते—**मैवमिति** । तुल्यत्वादिति भावः । ननु तात्पर्यवती श्रुतिः प्रत्यक्षाद्यपेक्षया प्रबलेति न यूपादित्यवाक्यसाम्यमिति शङ्कते—**नन्विति** । अन्यशेषत्वेऽपि तदनुगुणतया स्वार्थेऽपि तात्पर्यमस्त्येव । 'व्रीहीन्प्रोक्षति' इत्यादेरिष्टिविधिशेषत्वेऽपि स्वार्थपरत्वदर्शनात् । देवताविग्रहादिवाक्यैरर्थवादैर्विग्रहादिस्वीकारात् 'यन्न दुःखेन' इत्यादिभिश्च फलस्वीकाराच्चान्यशेषत्वं न स्वार्थत्यागकारणमित्याह — **हन्तेति** ।

[1] ज्ञातस्य—क.

## सर्वार्थसिद्धिः

क्रियाशेषत्वमेव मन्त्रार्थवादानां स्वार्थप्रहाणकारणम् [१] तथा सत्यतिप्रसङ्गात् । तावता त्वन्या[1]र्थं स्वार्थबोधनं सिध्येत् । क्वचिच्च स्वार्थप्रहाणं बाधादेव ; न त्वन्यशेषत्वात् । तथ[2]व हि लोके वेदे च स्तुत्यादे[3]र्दृष्टिः ; अनन्यपरेष्वपि "ब्रह्म वनं ब्रह्म स वृक्ष आसीत्' इत्यादिष्वर्थासभवे भाक्तो निर्देशः । ननु जगद्ब्रह्मसामानाधिकरण्येऽपि स्वरूपैक्यविरोधात् बाध्यार्थतयोपचारः स्यात्, तन्न, श्रुतिस्मृतिशतबाधेन सभवन्त्यां गतौ विपरीतलक्षणाङ्गीकारायोगात् । व्याप्तिविशेषापेक्षया च सामानाधिकरण्यं व्यज्यते, "स भूमिं विश्वतो वृत्वा,

### आनन्ददायिनी

**लोके** गङ्गायां घोष इत्यादौ। वेदे 'ग्रावाणः प्लवन्ते' इत्यादौ। आदिशब्देनैन्द्रमन्त्रः कृष्णल श्रपयेत् इति विधिवाक्यं च सङ्गृह्यते। **अनन्यपरेष्वपीति**। तत्र भवन्मते बाधार्थपरत्वमभ्युपगम्यते; तदङ्गीकारे जडाजडयोरैक्यबाध एव बीजम्। तथा 'तत्त्वमसि' इत्यत्र स्वरूपलक्षणायां च। तथा च तात्पर्यवत्त्वेऽपि प्रत्यक्षविरोधे दौर्बल्यमित्यर्थः। ननु तर्हि त्वन्मतेऽपि 'सर्वं खलु' इत्यादिस्थले [4]सर्वत्रान्यपरत्वस्यावश्यकत्वे बाधार्थसमानाधिकरण्यमेवाभ्युपगम्यतामित्याशङ्कते—**नन्विति**। बाधभिया स्वार्थं परित्यज्यान्यार्थस्वीकारो यत्र तत्र स एव बाधः कथं स्वीकर्तुं शक्य [5]इत्यत्राह—**तन्नेति**। अन्यथा गङ्गायां घोष इत्यादौ घोषाद्यभावपरत्वं स्यादिति भावः। रक्त वस्त्र नील वस्त्रमितिवदपृथक्सिद्धसम्बन्धेन सामानाधिकरण्यं मुख्यमेवेति न मुख्यार्थत्यागोऽपीत्यभिप्रायेणाह—**व्याप्ति विशेषेति**।

---

[1] र्थस्वार्थ—**पा.** [2] व च लो—**पा.** [3] ईष्टे—**पा.** [4] सर्वशून्यपर—**ग.** [5] इत्यत्राह—**क.**

## सर्वार्थसिद्धिः

अत्यतिष्ठद्दशाङ्गुलम्" "पुरुष एवेद सर्वम्" "सर्वं समाप्नोषि ततोऽसि सर्वः" "सर्वगत्वादनन्तस्य स एवाहमवस्थितः" इत्यादिषु । अत एव "ब्रह्मैवेद सर्वम्, आत्मैवेदं सर्वम्, यत्र त्वस्य सर्वमात्मैवाभूत्" इत्याद्याः सावधारणनिर्देश[1]शाश्चाब्रह्मात्मकत्वनिषेधाभिप्रायाः । तथा च "नेह नानाऽस्ति किञ्चन" इत्यादिकमपि गतार्थम् । इदं च वाक्यं यदि ब्रह्मणि नानात्वं प्रतिषेधेत्; तदा ब्रह्मैकत्वसिद्धौ का कथा तद्गुणविभूतिनिषेधस्य ? अथ भावप्राधान्यानाञ्जस्य किञ्चनेति पदवैयर्थ्यं च मत्वा नानाभूतं किञ्चन वस्तु ब्रह्मणि नास्तीति [2]योज्येत, तथाऽपि न जगन्निषेधः; ब्रह्मण्यविद्यमानानामपक्षयविनाशरूप[3]वर्णा(दी)नामिव स्वाधारेषु निराधारतया वा वृत्त्युपपत्तेः । बहुव्यापिनि सर्वाधारतया चाधिगते ब्रह्मणि "नास्ति किञ्चन" इति निषेधात् तन्मिथ्यात्वे तात्पर्यं गम्यत इति चेत्, तथा सति नेद [4]किञ्चनास्तीत्येतावद्वक्तव्यम् । अधिकरणोक्तित्वजागलस्तनायेत । अथ प्रपञ्चे नानात्वं [5]नास्ति नानाभूतं नास्तीति वा प्रतिषेधेत, [6]तदाऽपि न प्रपञ्चस्वरूपबाधः, तन्नानात्वनिषेधे वाक्यप्रवृत्तेः । तत्र दृष्टश्रुतविरोध-

### आनन्ददायिनी

**तथा चेति** । नानाशब्दस्यासाहित्यवाचकत्वात् जगति ब्रह्मासहभूत वस्तु नास्ति, सर्वस्य तदात्मकत्वादित्यर्थः । किं [7]चानेन वचनेन किं नानात्व निषिध्यते, उत नानाभूतं वस्त्विति विकल्पमभिप्रेत्याद्य आह—**इदं चेति** । द्वितीयं शङ्कते—**अथेति** । **अधिकरणेति** । [8]इहेत्युक्तिरित्यर्थः । **तत्रेति** । प्रत्यक्षादिभिर्भेदस्य प्रतिपन्न-

[1] शा अप्यत्र—**पा** [2] युज्येत—**पा.** [3] वर्णाना—**पा.** [4] किञ्चन नानास्ति—**पा.** [5] नास्तीति वा नाना—**पा.** [6] तथाऽपि—**पा** [7] चानेन कि—**क.** [8] इहेत्यर्थ—**क.**

तत्त्वमुक्ताकलापः

## अक्षान्नायः स्वपूर्वापरविहतिभयान्नेतिनेत्यादिवाक्यं

सर्वार्थसिद्धिः

परिहृत्यै विश्वस्य ब्रह्मात्मकत्वादिसाधर्म्यविधौ वा जडपण्डितशत्रुमित्रादिवैधर्म्यदृष्टिनिषेधे वा तात्पर्यं स्थापनीयम् । इयं च गतिः "एकधैवानुद्रष्टव्यः" "विद्याविनयसंपन्ने" "सुहृन्मित्रार्युदासीन" इत्यादिभिरनुगृह्येत । अत ईदृशेषु[2] सर्वेषु वाक्येष्वेवं सर्वाविरुद्धः कश्चिदर्थस्समर्थनीय इत्यभिप्रायेण "अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति "इति वाक्यं तावदविरुद्धार्थविषयं साधयति —अक्षेति । प्रत्यक्षग्रहणमनुमानस्याप्युपलक्षणम् । आम्नायशब्द इह श्रुत्यन्तरपरः । अत्र "द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव च" इत्यादि पूर्ववाक्यम् । "अथ नामधेयं सत्यस्य सत्यम्" इत्यादि पश्चिमम् । तदिह प्रत्यक्षानुमानश्रुत्यन्तरपूर्वापरविरोधभीत्या मध्यमं "नेति नेति" इत्यादिवाक्यं ब्रह्मगुणविभूतिविग्रहाद्यबाधेन ब्रह्मण्येवानुक्तातिशयान्तरपरं नेतव्यम् । ततश्च लोकदृष्टप्रकारवैलक्षण्यार्थ-

आनन्ददायिनी

त्वात्तदविरुद्धपरत्वस्य वक्तव्यत्वादिति भावः । निषेधस्वारस्यादाह—जडेति । अनन्तरोक्तार्थे उपष्टम्भकमाह—इयं चेति । एवकारेण वैषम्यबुद्धिनिषेधः । 'विद्याविनय'इति 'पण्डितास्समदर्शिनः' इति वैषम्यदर्शननिषेधे तात्पर्यादिति भावः । श्रुत्यन्तरं 'नित्यो नित्यानां''पृथगात्मानं' इत्याद्यम् । पूर्वापरस्थवाक्येनापि 'नेति नेति' इति वाक्यस्य न मिथ्यापरत्वमित्याह—पूर्वापरेति । ततश्चेति । नेति नेतीति लौकिकप्रमाणगम्या-

[1] ब्यं–पा. [2] षु वाक्ये–पा.

तत्त्वमुक्ताकलापः

**वैलक्षण्यादिमात्रं प्रथयति भुवनाद्ब्रह्मणो विश्वमूर्तेः ॥ ५३ ॥**

**प्रत्यक्षेणैव पुंसां भवति दृढतरो देह एवात्ममोहो**

सर्वार्थसिद्धिः

मिह केचिदाहुः । अन्ये तु इति नेति व्यवहारेणेतोऽधिकं किञ्चिदस्तीति निर्देष्टव्य नास्तीति । प्रकृतैतावत्त्वसूत्रभाष्योक्तमिहादिशब्दसंगृहीत ब्रूमः । पूर्वप्रदर्शितप्रकारमात्रयोगाद् ब्रह्मणः प्रकृतमेतावत्त्वं "नेति नेति" इत्यादिवाक्य प्रतिषेधतीति । ब्रह्मणो विश्वमूर्तेरिति पदाभ्यां धर्मिग्राहकप्रसिद्धगुणविभूत्यादिप्रकर्षः प्रख्याप्यते ॥ ५३ ॥

**इति निषेधश्रुतीनां प्रत्यक्षादिविरुद्धप्रतिपादकत्वानुपपत्तिः.**

---

ननु प्रत्यक्षस्य प्रत्यक्षान्तरेणेव परोक्षेणापि बाधस्तत्रतत्र संमतः, तद्वदिहापि स्यादिति शङ्कते—**प्रत्यक्षेणेति** । अस्ति हि मनुष्यत्व स्थूलत्वादिविशिष्टे पिण्डे तिरश्चामिव विपश्चितामप्यात्मत्वाभिमानः ; तत्र चामोक्षादसमाहितदशायां जाग्रतः स्वपतो वा दर्पणतलदत्तदृष्टेरिव

आनन्ददायिनी

द्विलक्षणमित्यर्थः । **केचित्त्विति** । एतस्मात्परं वस्तु नास्तीति वाक्यार्थः । स्वाभिमतार्थमाह—**प्रकृतैतावदिति** । सूत्रार्थमाह—**पूर्वप्रदर्शितेति** ।

**निषेधश्रुतीनां प्रत्यक्षादिविरुद्धप्रतिपादकत्वानुपपत्तिः.**

---

पूर्वाक्षेपेण सङ्गतिमाह—**नन्विति** । **असमाहितदशा**–असमाधिदशा । **स्वपतः**–स्वप्नावस्थस्य । ननु विरोधिज्ञाने जाग्रति विपश्चितां कथं भ्रम इत्यत्राह—**दर्पणतलेति** । औपाधिकस्य [1]विशेषदर्शना-

[1] विशेषणद–क.

तत्त्वमुक्ताकलापः

**ज्वालैक्यप्रत्यभिज्ञाद्युभयमपि च तद्बाध्यते ह्यागमाद्यैः ।**

**तस्मादक्षादिसिद्धं श्रुतिभिरपि जगद्बाध्यना-मित्ययुक्तं**

**सन्देहार्हेषु शक्तं यदिह न खलु तद्दोषदूरे-ष्वपि स्यात् ॥ ५४ ॥**

सर्वार्थसिद्धिः

सामग्रीसामर्थ्यादनिच्छतोऽपि देहविभ्रमे बाधितानुवृत्तिरित्यभिप्रायेण दृढतरशब्दः । अस्य ज्वालैक्यप्रत्यभिज्ञायां विपरिणतानुषक्तिः ; अपिः प्रत्यक्षस्य बाध्यत्वसंभावनार्थः ; चकारश्चन्द्रसूर्यपरिमाणाल्प-त्वादिभ्रमाकारसंग्रहार्थः । आगमाद्यैरित्यनेनानुमा[1]नवत्परेष्टमर्थापत्त्यादि-कमपि गृह्यते । अत्र देहात्मबोधस्यानुमानागमाभ्यां ज्वालैक्यग्रहस्य चानुमानेन बाधः । एवं निदर्शितमर्थं प्रकृते निवेशयति—**तस्मा-दिति** । विषमो दृष्टान्त इत्याभिप्रायेणाह—**इत्ययुक्तमिति** । **सन्देहार्हेष्विति** । अयं [2]भावः—क्षेत्रभूषणादिनयात् मम देह इति

आनन्ददायिनी

निवर्त्यत्वादिति भावः । **अस्येति** । दृढतरशब्दस्य दृढतरेति स्त्रीलिङ्ग-तया विपरिणतस्यानुषक्तिरित्यर्थः । **अर्थापत्तिः**—दृग्दृश्यसम्बन्धा-नुपपत्तिः । **आदिशब्देन** मिथ्यात्वसाधकतर्कसङ्ग्रहः । ननु [3]सन्देहा-र्हत्वमेव न संभवति, निश्चयस्य सत्त्वात् । यदि निश्चयेऽपि तद्योग्यता स्यात्तर्हि प्रत्यक्षस्यापि सत्यग्राहिणस्सत्त्वेऽपि तथा स्यादिति बाधस्या-दित्यत्राह—**अयं भाव इति** । ननु मम देह इति [4]बुद्धिरयुक्तैव

[1]नादिव—**पा.** [2]भावः-इह क्षेत्र—**पा.** [3]सदेहाभिमतत्व—**ग.** [4]बुद्धिरयुक्तेतिवत्स्थूलो—**ग.**

## सर्वार्थसिद्धिः

व्यतिरेकप्रत्ययस्तावद्दूरपह्नवः । ममात्मेत्यत्तु घटम्यात्मेतिवत् स्वरूपपरमिति सर्वसंमतम् । वीतरागजन्मादर्शनादिभिश्च देहात्मभेद-

## आनन्ददायिनी

स्थूलोऽहमित्यभेदधियः सत्त्वात् । न चाप्रामाण्यशङ्का, [1]तथासत्य-न्यतोऽप्रामाण्यसन्देहेऽनया शङ्काकलङ्कितत्वकथनासङ्गते । किं चाप्रा-माण्यशङ्काकलङ्कितत्वेऽपि न विपरीतप्रत्यक्षसंभवः, विपरीतप्रत्यक्षे विद्यमाने तदयोगात् । अन्यथाशीतप्रत्यक्षकाल एव शैत्यप्रत्यक्षमपि स्यात् । किं च तथाभूतप्रत्यक्षेणैव बाधितत्वात् किं शास्त्रबाधनेनेति चेत् । अत्राहुः—प्रत्यक्षस्य न तावत् साक्षाद्विरोधः, स्थौल्यावच्छेदेना-भेदप्रतीतिः, भेदबुद्धिस्तु देहत्वावच्छेदेन । तथा चावच्छेदकभेदान्न विरोधः । यथेदंत्वावच्छेदेन रजताभेद[2]ग्रहेऽपि शुक्ती रजत नेति, यथा वा रजतत्वेन पुरोवर्त्यभेदग्रहेऽप्यापणस्थरजतत्वेन तद्भेदग्रह । ननु तथाऽपि स्थौल्यनिषेधः कथं स्यात्प्रत्यक्षप्राबल्यस्य भवद्भिरुक्तेरिति [3]चत् । अत एव देहेन संसृष्टत्वादात्मनोऽयःपिण्ड इव बहिर्गतलौहित्य देहगतस्थौल्यमात्मनि भासते स्वगतं वेति सन्देह उपन्यस्त इति शास्त्रेण तस्य बाध इति । केचित्तु—अहंत्वाश्रय [4]स्थौल्याध्यासात्तदवच्छिन्न [5]भेदो मा ग्राहि देहत्वावच्छिन्नभेदो गृह्यत एव, प्रतियोगितावच्छेदकरूप-[6]भेदाभावग्रहादिति वदन्ति । **ममात्मेति** । वस्तुतोऽत्र ममशब्दार्थात् अत्म[7]शब्दार्थस्य भेदोऽस्त्येव । ममशब्दः शरीरविशिष्टपरः तदेक[8]देश-त्वादात्मनः, यथा वनस्य वृक्ष इति ध्येयम् । **वीतरागेति** । जात-स्सर्वोऽपि स्तन्यप्रवृत्त्या सराग एव ; रागश्च जन्मान्तरसंस्कारोद्बोधात् ।

---

[1] तथास्त्यन्यतो—**ग.** [2] ग्रहे शुक्ती—**क.** [3] चेत्तत एव—**ग.** [4] स्थौल्या-भासा—**ग.** [5] भेदेन मात्राभिदेहत्वावच्छिन्नभेदेन गृह्यत एव ?—**ग.** [6] भेदाभावा-दिति—**ग.** [7] शब्दार्थस्य भेदस्यैव ?—**ग.** [8] देशित्वा—**ग.**

## सर्वार्थसिद्धिः

स्संभाव्यते । अतस्तन्नायःपिण्डादिन्यायात् भ्रमहेतुसंसर्गविशेषवति द्रव्यद्वये स्थौल्यचैतन्यादिगुणव्यतिहारधीः स्यादिति शङ्काकलङ्कितस्तत्तद्देहात्मबोधस्सर्वेषां सर्वदा संभवन्नपि नित्यनिर्दोषनिगमजन्यधिया न्यक्कारमर्हति । ज्वालैक्यधीरिप्यदृष्टनिर्वापणस्य पुनरारोपितदीपेऽपि संभवात् सादृश्यसादेश्यभेदाग्रहादिप्रसूतेति लैङ्गिक्या धिया नियम्येत । चन्द्र[1]सूर्यपरिमाणाल्पत्वादिबोधेष्वपि दूरत्वादिदोषसंप्रतिपत्त्याऽनन्यथासिद्धानुमानागमसिद्धया बुद्धया बाधः साधीयान् । इह तु तत्तत्प्रमाणदोषत्वेन सभावितानां सर्वेषामसिद्धेर्न शास्त्रबाध्यत्व सभाव्यमिति ॥ ५४ ॥

**इति परोक्षबाध्यत्वयोग्यायोग्यप्रत्यक्षविभागः.**

---

## आनन्ददायिनी

जन्मान्तरयोगश्च देहाति[2]रिक्तस्यैवेति भावः । "यो मे हस्तादि" इत्युक्त आदिशब्दार्थः । नन्वात्मनि स्थौल्याध्यासे देहभेदग्रहोऽस्तु ; देहे अहंत्वाध्यासे कथमित्यत्राह—**अतस्तन्नाय इति** । **चैतन्यं** आत्मत्वम् । **न्यक्कारः**—प्रामाण्यनिश्चयः । परोक्ष[3]ज्ञानबाध्यापरोक्षान्तराणामपि न दृष्टान्ततेत्याह—**ज्वालैक्यधीरिति** । तत्र संभावितदोषत्वेनाप्रामाण्यशङ्काकलङ्कितत्वात्परोक्षेण बाधो युक्त इति भावः । दार्ष्टान्तिके वैषम्यमाह—**इह त्विति** ॥ ५४ ॥

**परोक्षबाध्यत्वयोग्यायोग्यप्रत्यक्षविभागः.**

---

[1] सूर्यादिपरि—पा. [2] रिक्तस्येति—ग. [3] ज्ञानबो—ग.

तत्त्वमुक्ताकलापः

**प्रत्यक्षं दोषमूलं श्रुतिरिह न तथाऽपौरुषेयत्वहाने-**

**स्तस्मात्सा बाधिकाऽस्येत्यसदखिलधियामन्ततो दोषसाम्यात् ।**

सर्वार्थसिद्धिः

पुनः प्रत्यक्षादेर्निर्दोषत्वमसिद्धमिति शङ्कते । **प्रत्यक्षमिति**-अयं भावः—विगीतं प्रत्यक्षं दोषमूलं प्रत्यक्षत्वात् द्विचन्द्रादिप्रत्यक्षवत् । अत एव तन्मूलस्यानुमानस्यापि दोषमूलत्वं सिद्धम्। श्रुतिस्तु न तथा ; सर्वेषु कल्पेषु एकरूपतयैव श्रूयमाणतया पौरुषेयत्वासंभवेन वक्तृदोषप्रसङ्गाभावात्, इह च तद्वेद्ये ब्रह्मणि भेदनिषेधे वाऽनन्यगोचरत्वेन तात्पर्यस्थापनात्। अतस्सा श्रुतिरस्य प्रत्यक्षस्य बाधिकेति । तदेतत् प्रत्याचष्टे—**इत्यसदिति** । स्वव्याघाताददोषादिति भावः । अभिप्रेतं विवृणोति—**अखिलधियामिति** । अथ समाधिः—प्रत्यक्षत्वा[1]दिति

आनन्ददायिनी

आक्षेपसङ्गत्याऽऽह—पुनरिति । ननु प्रत्यक्षं दोषमूलमित्ययुक्तं हेत्वभावात् , अविद्यामूलत्वं त्वसिद्धं, सिद्धौ वा श्रुतिसाधारण्यमित्यत्राह—**अयं भाव इति** । ननु निर्दोषत्वेन बाधकत्वे यूपादित्य-[2]वाक्यादपि प्रत्यक्षबाधः स्यादित्यत्राह—**इह चेति** । तात्पर्यवती श्रुतिर्बलवती । यूपादित्यवाक्यस्य त्वर्थवादत्वान्न तात्पर्यवत्त्वमिति भावः । नन्वखिलधियां कथं दोषसाम्यं श्रुतीनां तदभावादित्यत्राह—**अयं समाधिरिति** । **ध्यानजन्ये शब्दजन्य इति** । मतभेदेन कैश्चि-

[1] दितिहेतुः स्वप्र—**पा.** [2] वाक्यादेरपि—**ग.**

## सर्वार्थसिद्धिः

स्वप्रकाशप्रत्यक्षेऽपि वृत्तेरनैकान्ति[1]कम्। अथानित्यप्रत्यक्षत्वादिति विशेष्येत, तथाऽपि स्वा[2]भीष्टध्यानजन्ये शब्दजन्ये वा परब्रह्मप्रत्यक्षे तद्वृत्तिसिद्धा। तत्रापि दोषमूलत्वाभ्युपगमे कथं तत्त्वसाक्षात्कारसिद्धिः? दोषमूलादपि तत्सिद्धावतिप्रसङ्गः। दुष्टप्रत्यक्षमूलतया चानुमानस्यापि बाध्यत्वं दुर्वच स्यात्। यदि च प्रत्यक्षत्वमात्रेण पृथिव्यादिस्वरूप-प्रत्यक्षस्य दोषमूलत्वम्, बोधकत्वादेव ब्रह्माद्वैतवाक्यानामपि किं नैतत्स्यात्? वाक्यदोषत्वेन संप्रतिपन्नं किञ्चित्तत्र न दृश्यत इति चेत्; समानमेतद्विमतेऽपि प्रत्यक्षे; अतिरिक्तदोषानुमा[3]नस्य तु वाक्येऽपि कः प्रत्यूहः? भेदवासनाख्यो दोषः प्रत्यक्षे प्रसिद्ध इति चेन्न। शब्देऽपि [4]तस्यास्तद्वत् प्रसिद्धत्वात्। न ह्यत्र प्रकृतिप्रत्ययपदवाक्यपदार्थवाक्यार्था-दिविकल्पान् वासनानपेक्षानभिमन्यध्वे। न च द्विचन्द्रादिवासनानां वासनात्वादेव दोषत्वम्; किंतु भ्रान्तिमूलत्वात्। अतोऽभिन्नेष्वेव

## आनन्ददायिनी

द्ध्यानजन्यब्रह्मगोचरमानसप्रत्यक्षस्य स्वीकारात् कैश्चिच्छाब्दापरोक्षस्य स्वीकारात्। **दोषमूलादपीति**। दोषरूपकारणादित्यर्थः। दोषजन्य-स्यापि तत्त्वगोचरत्वे भेदप्रत्यक्षस्यापि तथेति बाधो न स्यादिति भावः। **दोषेति**। दुष्ट[5]प्रत्यक्षत्वमेव दोषः। तन्मूलतया ह्यनुमानस्य बाध्यत्वं ब्रूषे तन्न स्यादित्यर्थः। आभाससाम्यमाह—**यदि चेति**। ननु सप्रतिपन्नातिरिक्तमनुमास्यत इत्यत्राह—**प्रत्यक्ष इति**। **न ह्यत्रेति**। सर्वेषामपि भेदगोचरत्वादिति भावः। ननु वासनात्वेनादोषत्वाद्वाक्यादि-मूलानां वासनात्वेऽप्यदोषत्वमिति शङ्कते—**भ्रममूलत्वादिति**। भ्रम-

[1] क·—**पा.** [2] भीष्टे ध्यान—**पा.** [3] स्य वाक्ये—**पा** [4] तस्य तद्वदेव प्रसि—**पा.** [5] प्रत्यक्षमेव—**ग.**

## सर्वार्थसिद्धिः

भेदवासना दोषः, अयथार्थस्मृतिहेतुत्वात्। अन्यथा ह्यद्वैतवासनाया अपि दोषत्वप्रसक्तिः। प्रत्यक्षे तु वासना भ्रान्ति[1]प्रसूतैवेति चेत्; न. वासनाया दोषत्वसिद्धौ तद्धेतोरनुभवस्य भ्रान्तित्वसिद्धिः; ततश्च तत्सिद्धिरिति मिथस्संश्रयात्। एतेन भेदधीजनकत्वाद्वासनाया दोषत्वमित्यपि प्रत्युक्तम्; पृथिव्यादिभेदधिया भ्रान्तित्वसिद्धौ तज्जनकवासनाया दोषत्वम्, ततश्च तदिति। तत्त्ववेदकवाक्यबाधितत्वात् भेदधिया भ्रान्तित्वे सिद्धे ततस्तद्धेतोर्दोषत्वकल्पौ नान्योन्याश्रय इति चेन्न; प्रत्यक्षस्य वासनाख्यदोषमूलत्वे सिद्धे वाक्यस्य तद्विरुद्धतत्त्ववेदकत्वम्; ततश्च भेदधियां भ्रान्तित्वम्; तत एव तद्धेतुवासनाया दोषत्वम्; ततः प्रत्यक्षस्य दोषमूलत्वमिति चक्रकापत्तेः; पर्वसंकोचेन

## आनन्ददायिनी

जन्यत्वात भ्रमजनकत्वाच्चेत्यर्थः। अयथार्थस्मृतिहेतुत्वात् प्रत्यक्षे तु वासना भ्रान्तिप्रसूतैवेति चोक्तः। तद्धेतोरनुभवस्य भ्रान्तित्वसिद्धिरित्युपलक्षणम्, तज्जन्यस्मृतेरपि भ्रान्तित्वसिद्धिरिति द्रष्टव्यम्। भेदधीजनकवासनाया दोषत्वमित्यत्र अतत्त्वमेव दोषत्वप्रयोजकं, उत भेदधियोऽपि भ्रान्तित्वात्तज्जनकत्वमिति विकल्पे प्रथमे भेदधीजनकवासनाया एव तत्त्वेन जनकत्वं किमिति नोच्यत इत्यत्र नियामकाभावेन निरस्ते द्वितीयं दूषयति—**पृथिव्यादिभेदधियामिति**। शङ्कते—**तत्त्वेति**। **पर्वसंकोचेनेति**। भेदधियां भ्रान्तित्वे सिद्धे वाक्यस्य तत्त्ववेदकत्वं, तत्त्ववेदकत्वे भ्रान्तित्वमित्यादिक्रमेणेत्यर्थः।

---

[1] प्रसूतेति—**पा.**

तत्त्वमुक्ताकलापः

## शास्त्रस्यापि ह्यविद्याप्रभृतिभिरुदयस्संमतस्त्वन्मतस्थै-

सर्वार्थसिद्धिः

मिथस्संश्रयो वा। प्रत्यक्षं सर्वं भेदवासनामूलमित्यपि निर्विकल्पके दुर्वचम्; तस्य त्वयाऽपि संस्कारजन्यत्वानभ्युपगमात्। अस्ति च शब्दानुगमवादिनामप्यवासनार्घानं प्रथमाक्षसन्निपातजं प्रत्यक्षम्; तत्कल्पितयोश्शब्दविवर्तपरिणत्यो[1]स्संस्कारनिरपेक्षप्रकाशत्वात्। अस्तु सर्वजननी मायैव निर्विकल्पके दोष इति चेन्न; वाक्यतज्जन्यज्ञानयोरपि तदपत्यभेदत्वादिति। तदिदमाह—**शास्त्रस्यापीति**। प्रभृतिशब्देन

आनन्ददायिनी

जन्यत्वविशेषणेऽपि व्यभिचारमाह—**प्रत्यक्षमिति**। तस्य वासना जन्यत्वे निर्वि[2]कल्पकत्वं न स्यात्, स्मृतिवदिति भावः। ननु—

"न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते॥"

इति ये वदन्ति, तन्मतानुसारेणेदमनुमानं स्यादित्यत्राह—**अस्ति चेति**। शाब्दास्त्वेवमाहुः—

"वस्तुस्फोटः स एकोऽस्मिन् प्रपञ्चः प्रतिभासते।"

इति। तत्र सर्वप्रपञ्चोऽध्यस्तो भासत इत्येकः पक्षः। तस्यैव परिणाम इत्यपरः। उभयत्रापि स्फोटे ध्वनिगोचरसाक्षात्कारस्य वासनानिरपेक्षत्वात् व्यभिचार इत्यर्थः। 'न सोऽस्ति'इत्यादिनियमेऽपि श्रौत्रे प्रत्यक्षे वासना[3]नपेक्षत्वादिति भावः। **तत्कल्पितयोरिति**। वासनाया विवर्ते परिणामे च सहकारितया प्रकाशहेतुत्वादिति भावः। **तदपत्यभेदत्वादिति**। अविद्याजन्यत्वाद्भेदान्तानां तत्त्वावेदकत्वं भज्येतेति भावः।

---

[1] संस्कारापेक्ष—**पा.** [2] कल्पक न—**क.** [3] नानिरपेक्ष—**ग.**

तत्त्वमुक्ताकलापः

## स्तस्यानाविद्यभावे न हि निखिलभिदापह्नव-ईशक्यशङ्कः ॥ ५५ ॥

सर्वार्थसिद्धिः

भदवासना तन्मूलभेदभ्रमं च गृह्णाति ।

अतः प्रत्यक्षमात्रस्य दोषमूलत्वकल्पना ।

निर्दोषज्ञप्तिसद्भावं न सहेतेति निश्चिनु ॥

अथ शास्त्रस्य ब्रह्मवदविद्यावच्चानादित्वादविद्यामूलत्वं नास्तीति मुग्धा[1] द्वैतिमतमनूद्य दूषयति—तस्येति। [2]तत्र शास्त्रस्यादोषकल्पितानादिभावत्वात् ब्रह्मवदविद्यातद्विवर्तान्यतया च सत्यत्वप्रसक्तौ स्वाभिमतमद्वैतं भज्येतेति भावः ॥ ५५ ॥

इति शास्त्रप्रत्यक्षयोर्दोषसाम्यापादनम् .

---

आनन्ददायिनी

उक्तमर्थं कारिकया संगृह्णाति—अतः प्रत्यक्षेति। अनाविद्यभाव इति मूलम्—आविद्यं अविद्याधीनं तन्न भवतीत्यर्थः ॥ ५५ ॥

शास्त्रप्रत्यक्षयोर्दोषसाम्यापादनम् .

---

[1] द्वैतमत–पा. [2] अत्र शास्त्रस्य दोषाकल्पि–पा.

तत्त्वमुक्ताकलापः

## दोषोत्थत्वाविशेषे न हि भवति परं पूर्वबाध-प्रगल्भं

सर्वार्थसिद्धिः

अत्र कैश्चिदनाकलिततर्कतन्त्रगतिभिः प्रपञ्चलुण्टाकैरेवं प्रत्यवस्थितम्—दोषमूलत्वाविशेषेऽपि परत्वाद्द्वैतवाक्यजन्यं ज्ञानं प्रत्यक्षस्य बाधकम्,

पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यति।

इति न्यायात; न चाविशेषः परस्य बाधकत्वं प्रतिरुन्ध्यात्, प्रमाणसिद्धत्वाविशेषेऽप्युद्घातृप्रतिहर्त्रपच्छेदयोर्युगपदुभयसंभवे परस्य नैमित्तिकशास्त्रस्य बाधकत्वस्थापनात्; अपैति च रज्जुसर्पभीतिः कस्यचिदनाप्तवाक्येनापि; अतश्शास्त्रतः प्रत्यक्षबाधश्शक्य इति, तत्प्रतिक्षिपति—**दोषोत्थत्वेति**। अयं भावः—न हि सर्पभूदलनश्रमयोरुपारतनस्य

आनन्ददायिनी

पूर्वसङ्गतिमनुसृत्याह—**अत्रेति**। अविशेषत्वेऽप्युद्घातृप्रतिहर्त्रपच्छेदनिमित्तयोः शास्त्रयोः पौर्वापर्येणैव बाध्यबाधकभावः स्थापित इत्याह—**प्रमाणसिद्धेति**। ननु दोषमूलत्वे बाधकत्वं नापपद्यत इत्युक्तौ नेदमुत्तरम्, शास्त्रयोर्दोषमूलकत्वानभ्युपगमादित्यत्राह—**अपैति चेति**। नन्वनाप्तवाक्यस्य दोषोत्थस्याप्यपरत्वमात्रेण रज्जुसर्पधीबाधकत्वं दृष्टमिति चेत्तत्राह—**अयं भाव इति**। यत्र चानाप्तवाक्येन बाधः, तत्रापि दोषमूलत्वज्ञानाभावेन प्रामाण्यभ्रमात् [1]तज्ज्ञाने तु न

[1] ज्ञाने न बाधक—क.

तत्त्वमुक्ताकलापः

**दोषज्ञानं तु मा भूदविदुषि पुरुषे वस्तुतस्त्वन्यथा तत् ।**

**निर्दोषत्वाभिमन्तृस्वसमयिमतिभिः किं न मिथ्याकृतान्ताः**

सर्वार्थसिद्धिः

बलीयस्त्व[1]मुत्पादयितुं शक्यम्। अनाप्तवाक्यबाधि[2]ते रज्जुसर्पे तदनाप्तत्वपरामर्शिनस्तद्भ्रयं पुनरनुषज्यते। इह त्वादावेव दोषमूलत्वाविशेषशिक्षितः प्रतिसंहितश्चेति न परबलीयस्त्वभावनावकाश इति। दोषपरामर्शाभावमन्वारुह्यापि दूषयति—**दोषज्ञानमिति**। तुः वैपरीत्यद्योतकः। **वस्तुतास्त्विति**। अत्र तुः विदुषि तद्भीसंभवद्योतनार्थः। दोष एव ह्ययथार्थधीहेतुः; तज्ज्ञानं तु [3]तद्विस्रम्भनिवर्तकम्। दुष्टस्यापि बोधस्य दोषपरामर्शाभावमात्रात् वस्तुस्थितिवैपरीत्यव्यवस्थापकत्वेऽतिप्रसङ्गमाह—**निर्दोषत्वेति**। [4]सर्वे हि वादिनः स्वसिद्धान्तस्थापकं निर्दोषमभिमन्यन्ते। नच तत्तथ्यम्; नच तथातथा भिद्येत वस्तुगतिः;

आनन्ददायिनी

बाधकत्वमित्याह—**अनाप्तवाक्येति**। नन्वत्रापि दोष[5]मूलत्वाज्ञानमस्त्वित्यत्राह—**इह त्विति**। **शिक्षितः** उपदिष्टः। **प्रतिसंहितः** प्रकर्षेण युक्त्या निश्चितः। **दोष एवेति**। बाधो नाम विषयापहारः भ्रान्तित्वाज्ञानमात्रेण भ्रान्त्या विषयापहारो न भवतीति न बाधकत्वमित्यर्थः। **तद्विस्रम्भेति**। दोषमूलत्वज्ञाने[6]नाप्रामाण्यबुद्ध्या प्रामाण्य[7]बुद्धि-

[1] मुपपाद—**पा.** [2] ते च रज्जु—**पा.** [3] तद्विभ्रमनि—**पा.** [4] सर्वेऽपि वादि—**पा.** [5] मूलत्वात् ज्ञान—**ग.** [6] नाप्रमाबु—**ग.** [7] बुद्धिरिति वर्तते—**ग.**

तत्त्वमुक्ताकलापः

[1]प्राबल्यं चेन्निषेधः पर इति मुखरं तुर्यबौद्धस्य तूर्यम् ॥ ५६ ॥

सर्वार्थसिद्धिः

व्याघातात्। तदिह स्वपक्षस्थापकदोषानाकलनमात्रेण बाह्यसिद्धान्ता विपश्चिद्विदितदोषाः किं न मिथ्या भवन्ति? तद्वदिहापि बाधकदोषस्य सतः परामर्शे अन्यथाऽपि वा बाध्यबाधकभावो दुर्धर्षण इति भावः। अनन्यगतिकापच्छेद[2]न्यायनिदर्शनमात्रेण तुल्यस्यापि परस्य प्राबल्ये सर्वबाधकमाध्यमिकविजयतूर्यं जोघुष्येतेत्याह—प्राबल्यमिति। निषेधः पर इत्येतावता तस्य प्राबल्यं चेदित्यन्वयः ॥ ५६ ॥

इति दोषसाम्ये परस्य बाधकत्वानुपपत्तिः.

---

आनन्ददायिनी

निवर्तत इत्यर्थः। व्याघातादिति। जीवस्याणुत्वमहत्त्वादिविरुद्धाकारप्रसङ्गेन प्रपञ्चस्य सत्यत्वमिथ्यात्वशून्यत्वादिप्रसङ्गेन च व्याघात इत्यर्थः। अन्यथाऽपि परामर्शाभावेऽपि। अनन्यगतिकेति। दोषमूलत्वेऽपि परस्य बाधकत्वे सर्वनिषेध्यसापेक्षस्य माध्यमिकवाक्यस्याद्वैतवाक्यादपि परत्वेन ब्रह्मापि बाध्येतेति भावः। "निर्दोषत्वाभिमन्तृस्वसमयिमतिभिः" इति मूलस्य निर्दोषत्वेनाभिमन्तारो ये स्वसमयिनः तेषां स्वसिद्धान्ते निर्दोषत्वाभिमानिनां मतिभिरित्यर्थः ॥ ५६ ॥

दोषसाम्ये परस्य बाधकत्वानुपपत्तिः.

---

[1] प्रागल्भ्य–पा. [2] न्यायदर्श–पा.

तत्त्वमुक्ताकलापः

**निर्दोषं यच्च शास्त्रं तदपि बहुविधं बोधयत्येव भेदं**
**वाक्ये तत्त्वोपदेशप्रकरणपठिते नान्यपर्यं प्रतीमः ।**

सर्वार्थसिद्धिः

असंभावितदोषादौपनिषदवाक्यादद्वैतज्ञानं सिध्यतीति परोक्ते प्रतिबन्दि प्रस्तुवान इव स्वपक्षमपि स्थापयति—**निर्दोषमिति**। बहुविधं भेदम्—आधाराधेयभावादिभिरीशेशितव्यभेदम्, भोक्तृभोग्यनियन्तृभावैस्तत्त्वत्रयभेदम्, अणुत्वविभुत्वादिभिर्जीवेश्वरभेदम्, बद्धमुक्तनित्यतदवान्तरविभागैर्जीवभेदम्, एतेषु च कालभेदेन तत्तदवस्थाभेदं चेत्यर्थः। प्रतिषेधगन्धिना त्वयाऽपि प्रतिषेध्यधीर्दुरपलपेत्येवकाराभिप्रायः। प्रस्तुतभेदवाक्यान्यन्यपरत्वान्न भेदं विदधतीत्यत्राह—**वाक्य इति**। नहि सद्विद्यादिषु कर्मविधय उपासनविधयो वा संनिदधतीति [1]त्वयाऽपि संप्रधार्यते। सन्ति च तत्रापि "अहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इत्यादीनि तत्तद्द्रव्यस्वरूपव्यापारादिविविधभेदविषयाणि वाक्यानि। अतोऽनन्य-

आनन्ददायिनी

पूर्वसङ्गत्याऽऽह—**असंभावितेति**। [2]प्रतिबन्द्या अनुत्तरत्वाभिप्रायेणाह—**स्वपक्षमपीति**। **अन्यपरत्वादिति**। निषेध्यसमर्पकत्वेन निषेधविधिशेषतया निषेध्ये तात्पर्याभावादित्यर्थः। ननु 'पौर्वापर्ये

[1] त्वया स—**पा.** [2] प्रतिबन्द्यनुत्त—**ग.**

तत्त्वमुक्ताकलापः

## नात्रापच्छेदनीतिर्नियतिमति सदोपक्रमन्याय-सिद्धेः

सर्वार्थसिद्धिः

परनिर्दोषवाक्यसिद्धत्वादद्वैतवद्द्वैतमपि दुर्निषेधमित्यभिप्रायः। ननु प्रतिषेधस्य प्रसक्तिसापेक्षत्वात् भेदप्रसञ्जकवाक्यं पूर्वं तन्निषेधकं तु परत्वेनापच्छेदनयात्तद्बाधकं स्यादित्यत्राह—**नात्रेति**। अत्रेत्यनेनाभिप्रेतं हेतुमाह—**नियतिमतीति**। अय भावः—अनियतपौर्वापर्ये ह्यपच्छेद-

आनन्ददायिनी

पूर्वदौर्बल्यं प्रकृतिवत्' इत्यधिकरणे पौर्वापर्यमेव बाध्यबाधकभावे तन्त्रमिति निर्णीतं; तच्च नियतत्वेऽपि न हीनमिति कथमप्रवृत्तिरित्यत्राह—**अयं भाव इति**। ज्योतिष्टोमे वह्निष्पवमानस्तोत्रे 'पञ्चर्त्विजः समन्वारब्धाः प्रसर्पन्ति अध्वर्यु प्रस्तोताऽन्वारभते प्रस्तोतारमुद्गातोद्गातारं प्रतिहर्ता प्रतिहर्तारं ब्रह्म ब्रह्माणं यजमानः' इत्यन्वारम्भणं [1] विधाय दैवात्तस्य विच्छेदे प्रायश्चित्तं च विहितं 'यद्युद्गाताऽपच्छिद्येत [2]अदक्षिणो यज्ञः संस्थाप्यः तेन पुनर्यजेत। तत्र तद्द्यात् यत्पूर्वस्मिन् दास्यन् स्यात्। अथ प्रतिहर्ताऽपच्छिद्येत सर्ववेदसं दद्यात्' इति। तत्र यद्येकस्मिन् प्रयोगे पौर्वापर्येणापच्छेदे तन्निमित्तशास्त्रद्वयमपि तत्क्रमेण प्रसक्तम्। तत्र विरोधात्समुच्चयासंभवेऽन्यतरबाधे पूर्वस्यैव बाधस्समर्थितः। [3] तत्रानियतत्वात् पौर्वापर्यस्य प्रयोगान्तरे सावकाशं शास्त्रमिति युक्तं तत्र कस्यचिद्बाधः। इह तु नियते सावकाशत्वाभावात् न बाधो युक्तः। अन्यथाऽतिरात्रे षोडशिग्रहणाग्रहणशास्त्रयोरपि

[1] विधायैकस्य—**ग.** [2] अदक्षिणः क्रतुस्संस्थाप्यः—**ग.** [3] तत्र नियत—**ग.**

## सर्वार्थसिद्धिः

नयः, नियमे तूपक्रमनयात् परानुत्पत्तिरेवेति नीतिविदः। इह च त्वयैव प्रसञ्जकप्रतिषेधकयोः पौर्वापर्यनियमः स्थापितः; अतः परस्यैव दौर्बल्यं प्रत्येतव्यमिति। अनुष्ठाने त्वस्य न्यायस्यानन्यथाभावमभिप्रेत्य

## आनन्ददायिनी

परेण पूर्वस्य बाधः स्यात्। तथा च विकल्पसिद्धान्तो निर्मूलः स्यात्। [1]ननु तत्र ग्रहणाग्रहणवद्विकल्पः [2]किमर्थं नाश्रित इति चेन्न। विकल्पस्याष्टदोषदुष्टत्वेन गत्यभावविषयत्वादिति भावः। नन्वेकवाक्य एवोपक्रमनयो वेदोपक्रमाधिकरणे दर्शितः, कथमत्रेत्यत्राह—**इह चेति**। प्रसञ्जकप्रतिषेधयोरेकवाक्यत्वे[3]नन्वयादिति भावः। उपक्रमत्वं च पूर्वभावित्वमिति बोध्यम्। ननु नियतिमतीत्यनेनैवोक्तार्थाभिधाने पौनरुक्त्यमित्यत्राह—**अनुष्ठाने** त्विति। शास्त्रनैयत्यं नियतिपदेनोच्यते। अनुष्ठाननैयत्यं सदाशब्देन। तथा च वाक्यस्य नियतपौर्वापर्ये अनुष्ठानस्यैकरूप्ये चोपक्रमन्याय इत्यर्थः। न चैवं ग्रहणाग्रहणवाक्येऽप्युपक्रमन्यायस्स्यादिति वाच्यम्। तत्रानुष्ठाननैयत्याभावात्। न चात्राप्यनुष्ठानाभावात् तदैकरूप्यं [4]नास्तीति वाच्यम्। तद्बोधस्यैवानुष्ठानशब्देन विवक्षितत्वात् तदुपासनानुष्ठानस्य वा संभवाच्चेति भावः। तथा चास्य न्यायस्य प्रवृत्तिहेतुभूतमनु[5]ष्ठानेऽनन्यथाभावमभिप्रेत्येति वाक्यार्थः। **केचित्तु**—अनुष्ठानेऽस्य न्यायस्यान्यथाभावमभिप्रेत्येति पठन्ति। तदाऽयमर्थः—अस्यापच्छेदन्यायस्यानुष्ठानविषयतयाऽन्यथासिद्धतया [6]प्रमाणविषयत्वाभावादित्यर्थः। ननूपक्रमोपसंहारयोस्तुल्यत्वेऽयं न्यायो भवेत्। निषेधे तु निषेध्यानुवादस्य निषेधार्थत्वान्न तुल्यत्वम्।

---

[1] ननु ग्रहणा—**ग.** [2]किमर्थं तत्र नाश्रित—**ग.** [3] नानन्वया—**क.** [4] न स्यादिति—**ग.** [5] ष्ठानेनान्यथा—**ग.** [6] प्रामाण्यवि-**ग.**

तत्त्वमुक्ताकलापः

**स्वप्रख्याप्यापलापे श्रुतिरपि वृषलोद्वाहमन्त्रायते वः ॥ ५७ ॥**

सर्वार्थसिद्धिः

सदाशब्दः। ननु लोकसिद्धान् भेदांस्तावत्प्रसिद्धत्वादनुवदति, अलौकिकानपि प्रतिषेधार्थमेवोपदिश्य प्रतिषेधतीति परप्रा[1]बल्यं दुर्वारम्, तत्राह—**स्वप्रख्याप्येति**। अप्रख्यातस्य प्रख्यापनाद्धरं तत्र तूष्णींभावः। न हि भ्रमनिवर्तनाय प्रवृत्तं शास्त्रं भ्रमान्तरमुत्पादयतीति त्वदन्यः प्रतिपद्येत। तदिह श्रुतिः प्रत्यक्षाद्यनवगतान् भेदान् स्वयं विधत्ते प्रतिषेधति चेति वृषलविवाहमन्त्रवद्व्याघात एव पारिशेष्यत इति भावः। एतेन सगुणनिर्गुणश्रुत्योरपि परप्राबल्यवर्णनं निरस्तम्॥ ५७॥

**इति भेदतन्निषेधश्रुत्योरपच्छेदन्यायानर्हत्वम्.**

---

आनन्ददायिनी

अन्यथा घटो नास्तीत्यत्राप्यस्ति नेत्यनयोर्विरोधेन उपक्रमन्यायप्रसङ्गादिति शङ्कते—**नन्विति**। नन्वलौकिकभेदे कथं निषे[2]धार्थानुवादोऽप्राप्तत्वादित्यत्राह—**अलौकिकेति**। सत्यकामादीनित्यर्थः। यथा 'जर्तिलयवाग्वा वा जुहुयात् गवीधुकयवाग्वा वा जुहुयात्' इत्यस्य 'अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च' इति निषेधार्थानुवादत्वमिति भावः। **अप्रख्यातस्येति**। जर्तिलादिवाक्येऽपि न निषेधार्थप्रसङ्गनं, तत्र निषेधविध्यभावात्। अनाहुतिवाक्यस्याजाक्षीरविध्यत्वर्थवादत्वादिति भावः। अस्ति नास्ति, करोति न करोति, भुङ्क्ते न भुङ्क्ते, स्वपिति न स्वपितीत्यादिपरस्परावरुद्धार्थकं द्रविडभाषावाक्यं वृषलोद्वाहमन्त्रः ॥ ५७ ॥

**भेदतन्निषेधश्रुत्योरपच्छेदन्यायानर्हत्वम्.**

---

[1] बल्यं तत्राह—**पा.** [2] धार्थत्वानु—**ग.**

तत्त्वमुक्ताकलापः

# भेदः प्रत्यक्षसिद्धो न निगमविषयः स्यादिति त्वर्भकोक्तिः

सर्वार्थसिद्धिः

एवमपि मुग्धान्प्रति मुग्धैरुपादेशि। भेदस्तावद् भूतभौतिकादिष्वा-संसारं प्रसिद्धः ; अतीन्द्रियनिष्ठोऽप्यसौ सामान्यतः प्रत्यक्ष एव ; [1]अन्यथा कथं भेदसामान्यप्रयुक्तभेदशब्दवाच्यत्वादि; व्याप्तिग्रहणायोगात्। व्याप्ति-ग्रहणरूपं हि [2]प्रत्यक्षं दृष्टादृष्टसकलव्यक्तिगोचरमिति धूमानुमानादि-ष्वपि समर्थयन्ते। सावयवत्वानित्यत्वव्याप्तिग्रहणमतीन्द्रियसावयवपक्षी-कारेण शिक्षयन्ति। तदिह भेदमात्रस्य प्रत्यक्षविषयत्वादप्राप्तप्रापक-स्वभावशास्त्रगोचरत्वं न संभवतीति। एतदनुभाष्योपालभते—**भेद** इति। तुः सर्वशास्त्रनिर्विषयत्वप्रसङ्गावहत्वं द्योतयति। प्रायेण हि तवापि यत्किं-चिद्भेदविषयं सर्वं शास्त्रम् ; अन्ततः परप्रतिपन्नादन्यदेव हि सर्वशास्त्रे

आनन्ददायिनी

पूर्वसङ्गत्याऽऽह—**एवमपीति। सामान्यत इति।** सामान्य-प्रत्यासत्त्येत्यर्थः। **कथमन्यथेति।** भेदत्वसामान्यप्रत्यासत्त्या तदुप-स्थित्यभावे तत्यातीन्द्रियस्य भेदशब्दवाच्यत्वग्रहो न स्यात्। अनुमान-स्यापि तन्मूलकव्याप्तिग्रहमूलतया तदभावे प्रवृत्त्ययोगादिति भावः। तत्र नैयायिकसम्मतिमाह—**व्याप्तीति। कक्षीकारः**—अन्तर्भावः। **प्रायेण हीति।** ज्योतिष्टोमादिवाक्यमपि [3] यागस्वर्गसाधनत्वादिभेद-गोचरमित्यर्थः। **परप्रतिपन्नादन्यत्**—स्वातिरिक्तप्रमाणागम्यमित्यर्थः।

---

[1] अन्यथा भेद–**पा.** [2] प्रत्यक्षमदृष्ट–**पा.** [3] यागस्स्वर्ग–**ग.**

तत्त्वमुक्ताकलापः

**प्रख्यातादन्यमेनं प्रथयति यदसौ त्वन्मताद्वै-तवन्नः ।**

सर्वार्थसिद्धिः

प्रख्याप्यम् । तद्यदि यस्यकस्यचिद्भेदान्तरस्य प्रत्यक्षतया सामान्यतः सर्वभेदग्रहणात् शास्त्रस्य विषयलोपः स्यात्, लुप्येत तर्हि सकल-लौकिकवैदिकशास्त्राविषयः । व्याकरणादिव्युत्पत्तिलोपादद्वैत[1]शास्त्रमप्य-शक्यारम्भं स्यात् । अतो भेदस्य [2]शास्त्राविषयत्वं निराचिकीर्षता सिषाध-यिषितस्याभेदस्यापि तन्निराकृतमेवेति । अथ सर्वशास्त्रे प्रतिपत्तृणामन्य-प्रतिपन्नादन्यद्विशेषतः प्रतिपित्सार्हं प्रतिपाद्यमिति पश्यसि, [3]तदा मन्मतेऽपि लोकप्रसिद्धगजतुरगनीलपीतादिभेदातिरिक्तः परावरादिभेद उपनिषद्घोषणीयः । तदिदमाह—**प्रख्यातादिति** । असावित्यौचित्या-

आनन्ददायिनी

**शास्त्रस्य**—भेदशास्त्रस्य । **लुप्येतेति** । सर्वस्याप्युक्तगत्या प्रत्यक्षादि-विषयत्वादिति भावः । **लौकिकं**—स्मृत्युक्तं, **वैदिकं** वेदगम्यम् । किं चाद्वैतशास्त्रगतपदानि व्याकरणादिव्युत्पा[4]द्यानि चेत्तद्ग्रहणसमयेज्ञातत्वा-न्निर्विषयं स्यात् । अव्युत्पाद्यत्वे व्युत्पत्तिरहितस्यार्थशून्यत्वात् ध्वन्या-दिवन्निर्विषयं स्यात् इत्याह—**व्याकरणादीति** । आदिपदेन उपमानकोशादि । ननु व्याकरणादिना व्युत्पत्तिरस्तु । तथाऽपि न निर्विषयत्वं शास्त्रस्य, अद्वैतस्य वाक्यार्थत्वेन पदार्थत्वाभावादिति शङ्कां पदार्थस्य स्वरूपानतिरेकादभेदस्य नापूर्वत्वमिति न सविषयत्व-मित्युपसंहरति—**अत इति** । सिद्धान्तेऽद्वैतस्य प्रतिपाद्यत्वानङ्गीकारात्

[1] शास्त्रस्याप्यनारम्भस्स्यात्–**पा.** [2] शास्त्रवेद्यत्वं–**पा.** [3]तदाऽस्मन्मते–**पा.** [4] द्यानीति चे–**ग.**

तत्त्वमुक्ताकलापः

**सन्मात्रग्राहि चाक्षं नियमयसि ततो ब्रह्म दृश्यं मृषा स्यात्**
**किं ते श्रुत्या तदानीं**

सर्वार्थसिद्धिः

निगमः परामृश्यते । त्वन्मताद्वैतवादिति प्रतिबन्दिपरम् । तथा हि—यदि भेदमात्रस्य प्रसिद्धत्वादलौकिकभेदोऽपि शास्त्रविषयो न स्यात्, अभेदमात्रस्यापि प्रतिवस्तु सर्वलोकप्रसिद्धत्वात् त्वदभिमतमद्वैतमपि तदविषयः स्यात् । यदि प्रसिद्धविलक्षणमद्वैतं तत्प्रतिपाद्यं पश्यसि, भेदेऽपि तादृशे तथैव दीयतां दृष्टिरिति । प्रत्यक्षविषयत्वादेव शास्त्राविषयत्वे परस्य सिद्धान्तविरोधमपि सूचयति—**सन्मात्रेति** । भेदस्य भ्रान्तिविषयत्वं सन्मात्रस्य प्रत्यक्षविषत्वं च त्वया स्थाप्यते । अतस्तस्यापि शास्त्राविषयत्वं त्वया दुस्साधामिति भावः । अस्तु सन्मात्रमनागमाविषयः, भेदनिषेधमात्रे त्रय्यन्ततात्पर्यात् ; सन्मात्रं तु प्रत्यक्षत एव सिध्यतीति, तत्राह—**तत** इति । यदि प्रत्यक्षत एव ब्रह्मणस्सिद्धिः, तदा दृश्यत्वसामान्यसंगृहीत्या युष्मत्पदव्या मिथ्यात्वं दुस्तरं स्यादिति भावः । अन्यमपि सिद्धान्तविरोधमाह—**किमिति** । प्रत्यक्षत एव ब्रह्मस्वरूपसिद्धौ

आनन्ददायिनी

परसिद्धान्तस्य दूष्यत्वात् कथं निदर्शनमित्यत्राह—**प्रतिबन्दिपरमिति** । **सन्मात्रस्य च प्रत्यक्षत्वं** प्रत्यक्षप्रमितिविषयत्वम् ।

तत्त्वमुक्ताकलापः

## [1]फलमभिलषतां क्वापशूद्राधिकारः ॥ ५८ ॥

सर्वार्थसिद्धिः

तद्विभूतिगुणादेश्च मिथ्यात्वादनुपदेष्टव्यत्वे भेदनिषेधस्य च माध्यमिकोपदिष्टैरेव तर्कैस्सिद्धे। शारीरकविचारा[2]र्थिनः श्रुतिसाध्यं न किंचित्स्यादित्यर्थः। ब्रह्मविद्यायां शूद्राधिकारप्रतिषेधोऽपि दुश्शक इत्याह—**फलमिति**। ब्रह्मणस्तय्यन्तवेद्यत्वे सिद्धे ह्यनधीतश्रुतीनां ब्रह्मविद्यायामनधिकारस्सिध्येत्; प्रत्यक्षवेद्यत्वे तु त्रैवर्णिकावि[3]शिष्टः शूद्रोऽनधिकारी न स्यादिति भावः॥ ५८ ॥

इति अलौकिकभेदस्य शास्त्रवेद्यत्वोपपत्तिः.

---

आनन्ददायिनी

**भेदनिषेधस्येति**। तस्याप्युक्तरीत्या [4]शास्त्रविषयत्वायोगादिति भावः। **मूलम्—फलं अभिलषतां** मुमुक्षूणां **ते** तव मते **श्रुत्या** न किंचित्प्रयोजनं, तथा चापशूद्राणां त्रैवर्णिकानामेवाधिकारः क्व कुत्रापि न सिध्यतीत्यर्थः ॥ ५८ ॥

अलौकिकभेदस्य शास्त्रवेद्यत्वोपपत्तिः.

---

[1] फलमपि लभताम्—**पा.** [2] र्थिनस्ते श्रु—**पा.** [3] शिष्टश्रु—**पा.** [4] शास्त्राविषयत्वयोगा—**ग.**

तत्त्वमुक्ताकलापः

## वेदा बुद्धागमाश्च स्वयमपि हि मृषा मानता चैवमेषां

सर्वार्थसिद्धिः

ये चैते प्रमाणप्रमेयादिभेदान् भ्रान्तिसिद्धान् साधयन्ति, तेषां योगाचारादिसमयमनास्थाय त्रय्यन्तवादाश्रयणं बालप्रलोभनार्थमित्यभिप्रायेणाह—**वेदा इति**। **स्वयं**—स्वरूपतः। अपिना व्यापारानुग्राहकयोस्संग्रहः। **मानता**—प्रामाण्यम्। **एवं**—मृषा। **एषाम्**—उभयेषाम्। स्थिराभावादेव सौगतानां बोद्धा मिथ्याभूतः; स्थिरसद्भावेऽप्यद्वैतिनामात्मनोऽनुभूतिमात्ररूपत्वेनाबोद्धृत्वात् तदाश्रयतया भातस्याहमर्थस्याविद्याविवर्तत्वाच्च बोद्धुर्मिथ्यात्वं सिद्धम्। बुद्धिरपि सर्वा माध्यमिकस्य मिथ्या; मायावादिनस्तु शास्त्रसाध्या; साध्यत्वादेव सत्यव्यतिरिक्ता। अपि च अनेनोक्तं बुद्धिस्थैर्यं निर्विशेषत्वविरोधात् काल्पनिकम्; योगाचारोक्तं

आनन्ददायिनी

प्रसङ्गादाह—**ये चेति**। **एषां**—[1] वेदबुद्धागमानाम्। ननु स्थिरत्वास्थिरत्ववैषम्यात् कथं साम्यमित्यत्राह—**स्थिरसद्भावेऽपीति**। **तदाश्रयतया**—अनुभूत्याश्रयतया। **योगाचारादिभिः** साधारण्यमुक्त्वा सर्वमिथ्यावादिमाध्यमिकसाम्यमप्याह—**बुद्धिरपीति**। ननु मायिभिः शास्त्रजन्यज्ञानस्य मिथ्यात्वेऽभ्युपगम्यमानेऽपि तद्विषयभूतज्ञानस्य स्थैर्यस्याङ्गीकारात् कथं साम्यमित्यत्राह—**अपि चेति**। ननु स्थिरत्वस्य कल्पितत्वेऽपि मायिभिस्स्वरूप[2]मात्रमङ्गीकृतमिति कथं साम्यमिति चेन्न। स्वरूपे [3]सत्यत्वस्याप्यभावादिति भावः।

[1] उभयेषां—**क**. [2] मात्रमिति—**ग**. [3] सत्यत्वव्याप्य—**ग**.

तत्त्वमुक्ताकलापः

**बोद्धा बुद्धिः फलं च स्थिरतदितरताद्यन्तरालं च बुद्धेः।**

**आतस्त्रैविद्यडिम्भान् ग्रसितुमुपनिषद्वारवाणो-पगूढैः**

**प्रायः प्रच्छादिता स्वापटुभिरसुरता पौण्ड्रका-द्वैतनिष्ठैः॥ ५९ ॥**

सर्वार्थसिद्धिः

क्षणिकत्वमपि तथैव, क्षणिकधियां ग्राह्यग्राहकस्वगत[1]विशेषस्य मिथ्या-त्वाभ्युपगमात्। **फलं**–[2]व्याहारो हानोपादानादि च। एवं सर्वतस्साम्ये कुदृष्टीनामन्यतरपरिग्रहनियतौ निदानमुत्प्रेक्षमाण इवोपालभते--**आत** इति। शेषमतिरोहिततात्पर्यम्। एवमिह **यादवप्रकाशीयस्संग्रहः**—

वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम्।
बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंसदः॥

इति॥ ५९॥

**इति प्रपञ्चमिथ्यात्ववादिनां सौगतसाम्यापादनम्.**

---

आनन्ददायिनी

**अन्यतरपरिग्रहनियतिः**–बौद्धागमान्विहाय वेदपरिग्रहनियतिरित्यर्थः। आत इत्यतइत्यर्थेऽव्ययम्। **मूलं–स्तिरतदितरताद्यन्तरालं**—स्थिरत्व-क्षणिकत्वादिवैषम्यमित्यर्थः। **आदि**शब्देन जन्यत्वादिर्गृह्यते। **वारवाणं** कवचम्। **स्वापटुभिरित्यादि**। पौण्ड्रकः कश्चित् काशिराज आत्मानं

[1] विशेषमिथ्या–**पा.** [2] व्यवहारो–**पा.**

तत्त्वमुक्ताकलापः

## त्वन्निष्ठा सिद्ध्यसिद्ध्योः परमतनियतिस्सिद्धि-मेवाधिरूढा

सर्वार्थसिद्धिः

अथास्मिन् पश्यतोहराणां पक्षे विकल्पदौःस्थ्यं विविधमुदाहरति **त्वन्निष्ठेति**। नितिष्ठत्यस्मिन् परीक्षेति निर्णयोऽत्र निष्ठा; तद्विषय एव वा राद्धान्तः। याऽसौ त्वन्निष्ठा सा असिद्धा भ्रान्तिसिद्धा वा; तर्हि तद्विपरीता परेषां निष्ठैव प्रमितिसिद्धिमधिरोहेत्। अथ प्रमिति-सिद्धा, प्रमितिर[1]सौ व्यावहारिकी वा पारमार्थिकी वा? न प्रथमः; दत्तोत्तरत्वात्। तादृश्या तया परमतान्यपि किं न सिध्येयुः? अस्म-दुक्तबाधकैरिति चेत्, तदुक्तबाधकैस्त्वन्मतमपि न सिध्येत्। ते

आनन्ददायिनी

वासुदेवममनुत, तद्वत् सर्वात्माभेदनिष्ठाः स्वकीयेन सिद्धान्तेन हेतुना अपटवः। यद्वा स्वकीयः सिद्धान्तोऽपटुर्येषां त इति स्वापटवः वैदिकबहिष्कारभीरवः, तैरित्यर्थः[2]। 'असत्यमप्रतिष्ठम्' इत्यादि-गीतावचनादसुरता चैषामवगन्तव्या॥

### प्रपञ्चमिथ्यात्ववादिनां सौगतसाम्यापादनम्.

---

प्रसङ्गादाह—**अथेति**। भ्रान्तिसिद्धा भ्रान्तिरूपेण सिद्धा, भ्रान्त्या सिद्धा वा। **प्रमितिसिद्धेत्यत्राप्येवमर्थः**। ननु प्रमितेर्व्याव-हारिकत्वेऽपि विषयस्य सत्यत्वमस्त्वित्यत्राह—**तादृश्येति**। अविशे-

[1] सौ चेत् व्याव—**पा.** [2] यद्वा मूले 'स्वापटुभिः' इत्यत्र स्वा पटुभिरिति च्छेद.। पटुभिः स्वकीयासुरताप्रच्छादनकुशलैः स्वा स्वकीया असुरता प्रच्छादितेत्यर्थः.

तत्त्वमुक्ताकलापः

## वेदस्यामानतायां त्वदभिमतहतिर्मानतायां च तद्वत् ।

सर्वार्थसिद्धिः

बाधकाभासा इति चेत्, तदुक्ता अपि तथैवेत्यन्ततस्त्वमेव ब्रूषे। स्वव्याघातादिदोषस्त्वधिकः । तदिदं संजगृहुः—

स्वशास्त्रनिर्णये सिद्धे सिद्धाः स्युर्लोकनिर्णयाः ।
स्वशास्त्रनिर्णयेऽसिद्धेसिद्धाः स्युर्लोकनिर्णयाः ॥

अपि च वेदाः प्रमाणमप्रमाणं वा? अप्रमाणत्वे [1]कथं ततस्तद्विषयसिद्धिः? अन्यथा बाह्यागमैरपि तत्तद्विषयाः किं न सिध्येयुः? कथं तर्ह्यप्रमाणात् भयविस्मयादिसिद्धिः? इत्थम्—न हि वयमप्रमाणस्य स्वानुरूपार्थक्रियाकारित्वं नेति ब्रूमः; किंतु न ततस्तद्विषय-

आनन्ददायिनी

षादिति भावः । **अन्ततस्त्वमेवेति** । सर्वमिथ्यात्वं वदता बाधकानामपि मिथ्यात्वकथनादिति भावः । द्वितीयपक्षं दूषयति—**स्वव्याघातादिदोषस्त्विति** । तन्नयायेन सर्वेषां पारमार्थिकत्वसिद्धेः पारमार्थिक्याश्च [2]प्रमितेः स्वमिथ्यात्वसाधनाच्च व्याघात इति भावः । **केचित्स्वत्र ग्रन्थपातं ब्रुवते** । असिद्धा भ्रान्तिसिद्धा वेत्युक्तेः पूर्वसम्मतिमाह—**तदिदमिति** । **स्वशास्त्रनिर्णयः**—स्वनिष्ठेत्यर्थः । एकत्रासिद्ध इति च्छेदः । **कथं तर्हीति** । रज्जुसर्पादिवाक्यात् भयादिदर्शनादित्यर्थः । आदिशब्देन पलायनादिः । **स्वानुरूपा**–स्वरूपा-

[1] कथं तद्वि–**पा.** [2] प्रतीतेः–**ग.**

तत्त्वमुक्ताकलापः

## साध्याऽसाध्याऽपि मुक्तिस्त्वदुपगमहता तत्समं चान्यदित्थं

सर्वार्थसिद्धिः

सत्यत्वस्थापनं सिध्येदिति । प्रमाणत्वं तु तस्य सत्यमसत्यं वा ? आद्ये ब्रह्मणः स्वरूपभूतमन्यद्वा ? नाद्यः, ब्रह्मणश्शब्दधर्मत्वायोगात् । न द्वितीयः, सदद्वैतव्याघातात् । असत्यत्वे तु वृत्तमेवोत्तरम् । मुक्तिश्च ब्रह्मण उपायसाध्या ? उत स्वरूपत्वादसाध्या वा ? आद्ये भावरूपा अभावरूपा वा ? पूर्वत्राद्वैतभङ्गः । उत्तरत्र सत्यमिथ्याप्रतियोगिकत्वविकल्पे प्राच्योऽपसिद्धान्तहतः ; पश्चिमस्तु प्रध्वंसमिथ्यात्वमपि स्थापयेदेव । अलब्धस्वरूपस्य हि प्रध्वंसोऽपि स्वरूपं न [1]लभेत । एव स्वयंप्रकाशत्वादिषु [2]स्वतस्सिद्धत्वान्यतस्सिद्धत्वादिविकल्पदौःस्थ्यं दुस्तरमित्याह— **तत्समं चान्यदिति** । उक्तानुक्त[3]तर्काणां मोघत्वं व्यञ्जयन्निगमयति— **इत्थमिति** । **रक्षोभ्य** इत्यनेन स्वव्याघातकमायापवर्तकत्व [4]व्यज्यते ।

आनन्ददायिनी

नुबन्धिनी । आद्यं दूषयति—**प्रमाणत्वं त्विति** । प्रमाणत्वमपीत्यर्थः । **प्राच्यः** सत्यप्रतियोगिकः, सत्यत्वानभ्युपगमादिति भावः । **अलब्धेति** । अन्यथा शशशृङ्गादेरपि ध्वंसप्रसङ्गादिति भावः । **स्वयंप्रकाशत्वादीत्यादि**शब्देन नित्यत्वादयो विवक्षिताः । स्वतस्सिद्धत्वे स्वयं प्रमितिर्न वा, प्रामाण्यं च व्यावहारिकं न वेत्यादिविकल्पे सर्वस्यापि स्वतस्सिद्धिप्रसङ्गः । परतस्सिद्धत्वेऽप्येवं प्रसङ्ग इति दुस्तरमिति भावः । ब्रह्म सत्यमसत्यं वा सधर्मकं निर्धर्मकं वेत्यादि विकल्प्य सत्यत्वे

[1] लभते—**पा.** स्वतस्सिद्धत्वादि—**पा.** [3] तर्काणाममोघ—**पा.** [4] व्यज्यते । रघु—**पा.**

तत्त्वमुक्ताकलापः

**रक्षोभ्यः प्रेषितोऽयं रघुपतिविशिखो राहुमीमांसकेभ्यः ॥ ६० ॥**

**शुद्धस्याशुद्धसृष्टिक्रम इति कथितश्शुद्धसत्त्वे तु तत्त्वे**

सर्वार्थसिद्धिः

यथा **रघुपतिविशिखः** तद्वत् सर्वत्राप्रतिहत इति तात्पर्यम् । **राहुमीमांसकशब्देन** सशिरस्कवेदनिर्णयप्रवृत्तमीमांसा[1]शास्त्रशरीरे विशकलिताशिरोमात्रसंग्रहीतृत्वं सूच्यते ॥ ६० ॥

**इति प्रपञ्चमिथ्यात्ववादिनां बाधकविकल्पोदाहरणम् .**

---

एवं प्रसक्तानुप्रस[2]क्तं परिसमाप्य परमप्रकृतसृष्टिविशेषोक्तिं संगमयन् प्रकरणारम्भोद्दिष्टलक्षितनित्यविभूतिपरीक्षां परिमितनिरूप्यत्वादौचित्याच्च प्रधानप्राप्यप्रापकभूतपरतत्त्वनिरूपणानन्तरं निवेशयति—**शुद्धस्येति** ।

आनन्ददायिनी

निर्विशेषत्वं न स्यात्, असत्यत्वे शून्यवादप्रसङ्गः । एवं सत्यत्वमसत्यं सत्य वेत्यादिक्रमेण प्रवर्तनीयास्तर्का अनुक्ता ज्ञेयाः। रक्षोभ्य इत्यादिमूलम्—राहुमीमांसका एव रक्षांसि, स्वय ग्रन्थकृद्रघुपतिः, तर्का एव विशिखा इति भावः ॥ ६० ॥

**विश्वमिथ्यात्ववादिनां बाधकविकल्पोदाहरणम् .**

---

अवसरसङ्गतिं दर्शयति—**एवमिति** । 'ननु प्रत्यक्परावच्च' इति विभज्य पुनः 'नित्या भूतिर्मतिश्च' इति पृथगुद्देशादीश्वरपरिच्छेदेऽन्तर्भावः कथमित्यत्राह—**परिमितानिरूप्यत्वादिति** । तथा [3]च न पृथक्

[1] शरीरेऽपि श—**पा.** [2] सक्ति—**पा.** [3] च पृथ—**ग.**

तत्त्वमुक्ताकलापः

## स्थानं नित्यं श्रुतं

सर्वार्थसिद्धिः

'शुद्धस्य' इत्यनुकथनमशुद्धद्रव्यानुप्रवेशात् तत्सृष्ट्यादिभिश्च स्वतन्त्रस्याप्यशुद्धिशङ्कामपनयति। 'अशुद्धसृष्टिक्रमः कथितः' इत्यत्र शुद्धसृष्टिक्रमस्तु वक्तव्य इति शेषः। 'शुद्धसत्त्वे तु तत्त्वे' इत्यनुवादेन तद्ग्राहकप्रमाणमपि सूच्यते। तस्याप्राकृतत्वस्थापकमाह—**स्थानमिति**। श्रूयते हि "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इति। तदिदं सदापश्यत्सूरिविशिष्टस्थानविधानार्थमिति **वेदार्थसंग्रहे** स्थापितम्। एवम् "आदित्यवर्णं तमसः परस्तात्" "क्षयं तमस्य रजसः पराके" इत्यादि। **शाट्यायनिनश्च** एवमामनन्ति "सहस्रस्थूणे विमते दृढ उग्रे यत्र देवानामधिदेव आस्ते" इति। **कौषीतकिनां** पर्यङ्कविद्या चात्र पठितव्या। सर्वमेतत्

आनन्ददायिनी।

निरूपणमर्हतीत्यर्थः। अनुवादस्य प्रयोजनं दर्शयति—**अनुकथनमिति**। नन्वर्थवादत्वान्नोक्तार्थं[1] साधयति। किं च विधित्वे साधकाभावो विशिष्टविधौ गौरवं चेत्यत्राह—**तदिदमिति**। विधिस्तु धारणे पूर्वत्वात्' इति न्यायेन विधित्वात् पदशब्दस्वारस्यात् सदापश्यत्त्वबलाच्च "यदाग्नेयोऽष्टाकपालः" इतिवद्विशिष्टविधित्वमित्यर्थः। **क्षयं तमस्येत्यादि**। अस्य पञ्चब्रह्मणः क्षयं स्थानं तं ज्ञानात्मकं रजसः पराके तमसः परस्तादिति भास्करीयव्याख्या। रजश्शब्दः प्रकृतिपरः। आदिशब्देन "ते ह नाकं महिमानः सचन्ते" इत्यादिग्रहः। **सर्वमेत-**

[1] र्थत्वं साध—**ग.**

तत्त्वमुक्ताकलापः

## तत्स्मृतमपि

सर्वार्थसिद्धिः

संक्षिप्तं **षडर्थसंक्षेपे** "व्यतिरेकाधिकरणनिवासशब्दैः" इति। "तद्विप्रासो विपन्यवो जागृवांसस्समिन्धते, विष्णोर्यत्परमं पदम्" इत्यादिप्रसिद्धिसूचनार्थस्तच्छब्दः। अस्यार्थस्योपबृंहणप्रतिष्ठितत्वमाह—**स्मृतमपीति**। यथोक्तमुत्तरश्रीरामायणे—"तच्चाकाशं सनातनम्" इति। **महाभारते** च "दिव्यं स्थानमजरं चाप्रमेयम्" इति। भगवच्छास्त्रसंहितासु च विस्तरस्सिद्धः। ननु

आनन्ददायिनी

**दिति**। पूर्वोक्तसर्वश्रुत्युक्तमित्यर्थः। **व्यतिरेकः**—तद्विष्णोः पदमिति भेदः, यत्र देवानामित्यत्र यत्रेत्यधिकरणशब्दः, पर्यङ्कविद्यायां निवासशब्दः। **केचित्तु**—'दिव्यं स्थानमजरं चाप्रमेयम्' इत्युपबृंहणस्थस्थानशब्देनाधिकरणशब्द उक्तः। क्षयशब्दो निवासशब्देनोक्त इत्याहुः। **तद्विप्रास इति**। तत्–तत्र। "सुपां सुलुक्" इति सप्तम्या लुक्। विप्रासः विप्राः। "आज्जसेरसुक्" नित्यसूरयः। विपन्यवः स्तुवानाः। जागृवांसः निद्रारूपाज्ञानविधुराः। समिन्धते। तत् विष्णोः परमं पदमित्यर्थः। **केचित्तु**—यत्तच्छब्दयोर्यथास्थानमेवान्वयमाहुः। आदिशब्देन "यो अस्याध्यक्षः परमे व्योमन्" इत्यादिसङ्ग्रहः। ननु 'तदक्षरे परमे व्योमन्' इति श्रुत्याऽक्षराख्यं परमव्योमस्थानं भवति। अक्षरशब्दश्चावस्थाविशेषवतीं प्रकृतिमेवाह, "अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते" इति लयवाक्येऽव्यक्ततमसोरन्तरालावस्थाविशिष्टद्रव्यस्याक्षरशब्दवाच्यतावगमात्। तथा च 'तमसः परस्तात्' इत्येतत्तमःपूर्ववाचीति शङ्कते—**नन्विति**। ननु तर्हि "शुद्धसत्त्वमयं

सर्वार्थसिद्धिः

" अक्षरे परमे व्योमन् " इत्यव्यक्ततमसोरन्तरालेऽवीतस्त्रिगुणपरिणति-विशेष ईश्वरस्य मुक्तानां च भोगस्थानतयाऽऽम्नायत इति **यादव-प्रकाशोक्तं** युक्तम्, अक्षरशब्दप्रत्यभिज्ञानस्यात्र बाधकाभावात्, शुद्धसत्त्वव्यपदेशस्य रजस्तमसोरभिभूततयोपपत्तेः, अप्राकृतस्थान-क्लृप्तौ च गौरवात्, तत्रापि पृथिव्यादिभेदाभ्युपगमेन प्राकृतत्व ज्ञायत इति । अत्र ब्रूमः—अक्षरशब्दप्रत्यभिज्ञामात्र त्वतिप्रसञ्जकम् । अस्ति चात्र " परमे व्योमन् " इति समभिव्याहारो बाधकः ; न हि तमोनन्तरस्याक्षरस्य व्योमत्वम् ; उपचारस्तु गत्यभावे । अस्मत्पक्षे त्वक्षरपरमविशेषणाभ्यां प्रसिद्धव्योमवैलक्षण्यं युक्तम् । नच स्थाना-

आनन्ददायिनी

स्थानं " इति व्यपदेशः कथम् ? प्राकृतत्वेन रजस्तमोमिश्रत्वादित्यत्राह—**शुद्धसत्त्वेति** । ननु गौणव्यपदेशो दोष इत्यत्राह—**अप्राकृतेति** । ननु प्रामाणिकत्वान्न दोष इत्यत्राह—**तत्रापीति** । प्राकृतत्व एव प्रमाणमिति भावः । अत्र किमक्षरशब्दमात्रप्रत्यभिज्ञा विवक्षिता, उत बाधकाभावसहिता, यद्वा साधकान्तरसहिता, नाद्य इत्याह—**अक्षरेति** । अक्षरशब्दस्य वर्णादावपि प्रयुक्तेरेकान्ततः प्रत्यभिज्ञा न भवतीति भावः । न द्वितीय इत्याह—**अस्ति चेति** । तदेवोप-पादयति—**न हीति** । **तमोनन्तरस्य** " अक्षरं तमसि " इति तमस्संनिहितस्येत्यर्थः । तस्य व्योमशब्दवाच्यत्वाभावादिति भावः । तृतीयं दूषयति—**अस्मत्पक्ष इति** । यथा परशब्दादिविशेषणमहिम्ना प्रसिद्धजीवविलक्षणस्येश्वरस्यात्मत्वं, यथा वा प्रथमविशेषणमहिम्ना " वषट्कर्तुः प्रथमभक्षः " इत्यस्य भक्षान्तरत्वं तथाऽत्रापीति [1]न तव

[1] न तत्साध—**ग.**

## सर्वार्थसिद्धिः

न्तरादिस्वीकारे गौरवं, यथाश्रुतमात्रसंग्रहणात् । पृथिव्यादिभेदस्तु शब्दादिगुणतारतम्यसारूप्यात्; युष्मदिष्टाक्षरस्थाने च प्रकृत्यामिव पृथिव्यादीनामसान्निधानात् । न च तत्त्वसंख्याधिक्यप्रसङ्गो दोषः, कालवदेव पृथक्त्वोपपत्तेः ;

" त षड्विंशकमित्याहुः सप्तविंशमथापरे "

इत्यधिक[1]संख्याज्ञानात् । न चैवं षट्त्रिंशत्तत्त्ववादस्यापि स्वीकार्यत्वम्, अनाप्तागमप्रणीतस्यानादरणीयत्वात्; आप्तागमे त्वधिकगणनमनतिविप्रकृष्टावान्तरपरिणामसंख्यापनाभिप्रायं बोद्धव्यम् । लोकं

आनन्ददायिनी

साधकमिति भावः । **यथाश्रुतेति** । कल्पनायामेव गौरवस्य दोषत्वमिति भावः । प्राकृतत्वप्रत्यभिज्ञानं निराचष्टे—**पृथिव्यादीति** । तथा च मुरु-पृथिवीत्वाभावान्न प्राकृतत्वप्रत्यभिज्ञेति भावः । प्रत्यभिज्ञायाश्शङ्काऽपि नास्तीत्याह—**युष्मदिष्टेति** । " तदक्षरे " इत्यादिस्थले पृथिव्यादिशब्दाश्रवणात् तन्निबन्धना कथ प्रत्यभिज्ञेति भावः । **केचित्तु** अक्षरस्थाने अक्षरावस्थाविशिष्टे पृथिव्याद्यवस्थासम्बन्धाभावात्कथ प्रत्यभिज्ञेति वदन्ति । ननु शुद्धसत्त्वस्य न तावत्त्रि[2]गुणेऽन्तर्भावः । नापि कालात्मादौ । तथा चाति[3]रेके सख्याविरोधः स्यादित्यत्राह — **न चेति** । संख्याविरोधं परिहरति—**तामिति** । **अनाप्तागमप्रणीतस्येति** । अनाप्तागमप्रतिपन्नस्येत्यर्थः । **केचित्तु** अनाप्तप्रणीतस्येति पाठस्साधुरिति वदन्ति । **अनतिविप्रकृष्टेति** । अत्यन्तभेदानर्हप्रकृत्यवस्थाभेदाभिप्रायमित्यर्थः । अनुमानादिभिः प्राकृतत्वं साध्यत इत्यत्राह—**लोकमिति** । नरशिरःकपालशुचित्वानुमानवदागमबाधित-

[1] सख्याश्रवणात्-**पा** [2] गुणान्त-**ग.** [3] तिरिक्तसख्या-**ग.**

तत्त्वमुक्ताकलापः

## कलया तत्र देहाद्यवस्थाः ।

सर्वार्थसिद्धिः

वैकुण्ठनामानम्" इति प्रकृत्य "अप्राकृतं सुरैर्वन्द्यम्" इति विशेष्यते । अत एवाण्डा[1]न्तर्वर्तिलोकविशेषत्वशङ्काऽपि निर्धूता । "न तस्य प्राकृता मूर्तिः" इत्यनेनापि द्रव्यान्तरं सिध्यति । न चात्र बाधकमस्ति ; अतश्शुद्धाशुद्धविभूतियुगलं व्यवस्थितमिति । नन्वेवमपि नित्यानित्यविभूतिविभागोऽनुपपन्नः, अत्राप्यात्मस्वरूपादेर्नित्यत्वात्, तत्राप्यैच्छदेहादेरनित्यत्वात्, तत्राह—**कलयेति** । नित्यानित्यप्राचुर्यविवक्षया तथा विभाग इति भावः । न हि तत्रत्यानां पृथिव्यादीनामीश्वरदेहादीनां चात्रत्यवत् सृष्टिप्रलयौ । उक्तं हि **महाभारते**—

नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् ।
ऋते तमेकं पुरुषं वासुदेवं सनातनम् ॥

इति । भूतशब्दोऽत्र कार्यांशपरः । अत एव जीवलयोक्तिरौपचारिकी ; वासुदेवशब्दोऽत्र परविग्रहविशिष्टपरः ; स्वरूपनित्यत्वस्य

आनन्ददायिनी

मिति भाव । **माध्वपक्षं** निराचष्टे—**अण्डान्तर्वर्तीति** । प्रकृतिबहिर्भावादिति भावः । मूर्तिविशेषे प्राकृत[2]त्वनिषेधादप्यण्डान्तर्वर्ति न भवतीत्याह—**न तस्येति** । नन्वस्मदादिप्राकृतमूर्त्यपेक्षया वैलक्षण्यं बोध्यत इत्यत्राह—**न चात्रेति** । तथा सति प्राकृतशब्दस्य सामान्यस्य निष्कारणस्संकोचो दोषः स्यादिति भावः । ननु भूतशब्दस्य पृथिव्यादिपरत्वेऽहकारादेरनित्यता न स्यात्, उपलक्षणत्वे वस्तुमात्रपरतया प्रकृत्यादेरप्यनित्यता स्यादित्यत्राह—**भूतशब्द इति** । ननु वासुदेवशब्दो वसत्यस्मिन्निति व्युत्पत्त्या सकलजगद्विशिष्टवाची कथं

[1] न्तर्वृत्ति—**पा.** [2] विशेषेप्राकृतत्वविशेषादण्डा—**ग.**

तत्त्वमुक्ताकलापः

## सृष्टेः प्रागेकमेवेत्यपि निगमवचस्तल्लक्ष्यमाणव्यपेक्षं

सर्वार्थसिद्धिः

जीवेष्वपि समत्वात्। विशिष्टलयस्य वासुदेवे विश्वविशिष्टेऽपि सिद्धत्वात परविग्रहनित्यत्वोक्तिस्तदनुबन्ध्युपलक्षणार्था। ननु कारणवाक्येष्वेकत्वावधारणादनन्तरं च बहुभवनसङ्कल्पोक्तेर्नित्यस्थानादिव्यपदेशस्त्रिदशामरत्वन्यायेन नेतव्य इति त्रय्यन्तकुदृष्टीनां सर्वेषां व्यावघोषी, तत्राह—**सृष्टेरिति**। अयं भावः—सृष्टिकालापेक्षया लक्ष्य-

आनन्ददायिनी

परविग्रहमात्रविशिष्टपर इत्यत्राह—**विशिष्टलयस्येति**। जीवन्यायेन प्राकृतविशिष्टस्य लयसंभवात् तदन्यविग्रहविशिष्टमात्रपरत्वमित्यर्थः। नन्वेतावता प्रकृतपृथिव्यादीनां नित्यत्वे किमायातमित्यत्राह—**परविग्रहेति**। परविग्रहस्य पृथिव्याद्यात्मकत्वात्तन्नित्यत्वे पृथिव्यादिनित्यत्वमपि सिद्धमिति भावः॥

अत्र मतद्वयं—पञ्चोपनिषदात्मकानि पृथिव्यादीनि पञ्चैवेश्वरनित्यमुक्तादिनित्यानित्यशरीररूपादिनाऽवस्थितानि अनित्यानि मुक्तशरीराणि ईश्वरनित्ययोर्नित्यानित्यरूपाणीत्येकं मतम्। अपरं तु प्राकृतवच्चतुर्विंशतितत्त्वात्मकानि महदादीनीन्द्रियादीनि च [1]सन्तीति। इदं मतद्वयमपि न्यायसिद्धाञ्जने सम्यगाचार्यैरुपवर्णितमिति तत्र द्रष्टव्यम्। **नन्विति**। एकमेवाद्वितीयमिति द्वितीयनिषेधस्य प्राकृतत्वादिविशेषनिर्देशाभावात, तथा बहुभवनसंकल्पेऽपि प्राकृतत्वादिविशेषाश्रवणादिति भावः। **व्यावघोषी** व्यत्ययेन घोषः। कर्मव्यतीहारे णच्चि रूपम्। ननु "सदेव सोम्य" इति वाक्ये, इदमिति वर्तमानस्य जगतो निर्देशात् कथं लक्ष्यमाणव्यपेक्षमिति भाविनिर्देश इत्यत्राह—**अयं भाव इति**। ननु मायोपाधिविलयोऽस्तु

[1] सन्ति च—ग.

तत्त्वमुक्ताकलापः

**नो चेत्स्वाभीष्टमायोपधिमुखविलये स्वस्ति विश्वप्रसूत्यै ॥ ६१ ॥**

सर्वार्थसिद्धिः

माणस्य जगत उपदेशकालापेक्षयेदङ्कारगोचरस्य प्रलयदशायामविभक्तनामरूपतया एकत्वमवधार्यते । अत एव हि "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत' इति श्रुतिरेकत्वबहुत्वप्रकारमेतमेव व्यनक्ति । अथापि यथाश्रुति जीवादिसमस्तैक्ये को दोष इत्यत्राह —**नो चेदिति** । अयं भावः—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।

इत्यादिकमास्तां तावत् ; चोदयितृणां तु स्वसिद्धान्तविरोधः स्यात् । न हि मायाविलयः प्रलये मृषावादिभिरङ्गीक्रियते ; औपाधिकभेदवादिभिश्चोपाध्यंशप्रध्वंसः । मुखशब्दः स्वाभाविक [1]भेदवाद्युक्तचिदचिदीश्वरशक्तित्रयसंग्रहार्थः । यदि मायोपाधिशक्तीनामपि विलयस्तैरभ्युपगम्येत, तदुपहिताद्ब्रह्मणो विश्वप्रसूत्यभावात् अनुपहितस्य च तस्य तत्कारणत्वानभ्युपगमात् बहुभवनसङ्कल्पपूर्वकविश्वसृष्ट्याद्यभावात् कारणवाक्यं सर्वं कबन्धमीमांसककल्पितमूषरत्वमेव भजेतेति । स्वस्तीत्युपालम्भकाकुगर्भम् ॥ ६१ ॥

**इति नित्यविभूतिसद्भावः.**

---

आनन्ददायिनी

अनन्तरं चोत्पन्नमायोपाधिभ्यां विश्वसृष्टिरस्त्वित्यत्राह—**अयं भाव इति** । **न हीति** । [2]तस्या मायाया मिथ्याभूतत्वात् सता ब्रह्मणैक्यायोगादैक्ये

[1] भेदाभेद—**पा.** [2] तस्य मा—**ग.**

तत्त्वमुक्ताकलापः

**ज्ञानत्वं चेद्रहस्यागमविदितमिति स्वीकृतं नित्यभूतेः**

**षाड्गुण्यात्मत्वमेवं प्रसजति सह तत्पाठतोऽतो जडा सा ।**

सर्वार्थसिद्धिः

अथ नित्यविभूतौ जडाजडविकल्पे प्रथमं दर्शयति—**ज्ञानत्वमिति**। अय भावः—प्रसिद्धशास्त्रेषु तावदजडत्वं शुद्धस्य सत्त्वस्य न पश्यामः । अथ **रहस्यागम**वाक्यविशेषैस्तदिष्येत, एष्टव्यं तर्हि षाड्गुण्यमयत्वमपि ; तस्यापि तस्मिन्नेव शास्त्रे सहपाठात् । इष्टप्रसङ्गोऽयमिति

आनन्ददायिनी

वा ब्रह्मणोऽपि मिथ्यात्वापातात् । तथा च एकमित्यस्य विशिष्टैक्यपरत्वाभावे मायोपाध्योर्विलयः प्रलये आवश्यक इति प्रलयानन्तरं सृष्टिर्न स्यादिति भावः । **स्वाभाविकभेदवादी—यादवः** ॥

**नित्यविभूतिसद्भावः**

---

पूर्वसङ्गत्या निरूपयति—**अथेति** । ननु श्रौतेऽर्थे कथं विश्वासः ? अन्यदपि तथाश्रौतं चेत्तदप्यस्तु, न तावता श्रुतपरित्याग इत्यत्राह—**अयं भाव इति** । **षाड्गुण्यमयत्वमपीति** ।

तत्रानन्दमया भोगा लोकाश्चानन्दलक्षणाः ।

तत्त्वमुक्ताकलापः

**तत्संबन्धात् कुतश्चित्तदुपचरणमित्याहु[1] रेके परे तु**

**ज्ञानत्वाजाड्यकण्ठोक्त्यनुगुणमवदन्मुख्यतामात्मनीव ॥ ६२ ॥**

सर्वार्थसिद्धिः

चेन्न ; चेतनत्वप्रसङ्गात् । न च तदप्यस्त्विति वाच्यम्, जीवेश्वरविकल्पबाधात् । षाड्गुण्यमयत्वमौपचारिकमिति चेत्, ज्ञानमयत्वमपि तथैव स्यादविशेषात् । अतस्त्रिगुणविभूतिरिवाद्यापि सा विभूतिरन्याधीनसिद्धितया जडैवेति कुतस्तत्र ज्ञानत्वोक्तिरित्यत्राह— **तत्संबन्धादिति** । निरशेषाविद्यानिवृत्तिहेतुतया, निरुपाधिकज्ञानविकासस्थानतया, अन्यतो वा कुतश्चित्संबन्धात् " आयुर्घृतम् " इतिवज्जडेऽपि ज्ञानत्वोपचार इत्यवोचन् केचित् । पक्षान्तरमुपक्षिपति— **परे त्विति** । ' किमात्मि[2] कैवैषा भगवतो व्यक्तिः ' इत्यनुयोगे 'यदात्मको

आनन्ददायिनी

आनन्दं नाम तल्लोकं परमानन्दलक्षणम् ।

षाड्गुण्यप्रचुरा नित्यं [3]स्वाच्छन्द्याद्देशतां गतः ।

" पूर्णषाड्गुण्यविग्रहम् " इत्यादिभिः सिद्धमित्यर्थः । " अन्नमयो यज्ञः " " मल्लमयो ग्रामः " इतिवत्तदाश्रयत्वप्रतीतेस्तदङ्गीकारे चेतनत्व स्यादित्याह—**चेतनत्वेति** । **जीवेश्वरेति** । [4]जीवत्वेऽतिप्रसङ्गादीश्वरत्वे

---

[1] रेकेऽपरे—**पा.** [2] कैषा **पा** [3] स्वच्छस्याद्देशता—**ग.** [4] जीवत्वे श्रुत्यादिप्र ?—**ग.**

## सर्वार्थसिद्धिः

भगवान्' इति प्रतिवचनात्; 'किमात्मको भगवान्' इति पुनरनुयोगे च 'ज्ञानात्मकः' इत्यादिप्रत्युक्तेः, शक्त्यात्मकत्वादिवन्मुख्य [1]त्वविरोधाभावाच्च,

स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्।

इत्युपबृंहणस्वारस्याच्च विषयाश्रयावच्छेदनिरपेक्षं स्वगोचरज्ञाननिरपेक्षप्रकाशनत्वनिमित्तेनात्मनीव ज्ञानत्वं मुख्यमिति ॥ ६२ ॥

## इति नित्यविभूतेर्जडत्वाजडत्वपक्षौ.

---

## आनन्ददायिनी

सान्तत्वविरोधादिति भावः। **शक्त्यात्मकत्वादीति**। विशेषणत्वाद्यथा [2]शक्तिरूपत्वं तथा ज्ञानत्वमपि न विरुद्धमिति भावः। **उपबृंहणस्वारस्याच्चेति**। [3]स्वसत्तां भासयतीति प्रतीतेरिति भावः। ननु विषयाद्यवच्छेद्याभावे कथ ज्ञानत्वमित्यत्राह—**विषयेति**। स्वगोचरज्ञाननिरपेक्षत्वस्यैव ज्ञानशब्दप्रवृत्तिनिमित्तत्वादिति भावः। **ज्ञानत्वाजाड्यकण्ठोक्तीति** मूलम्—ज्ञानत्वरूपं यदजाड्यं तस्य कण्ठोक्तिरित्यर्थः ॥ ६२ ॥

## नित्यविभूतिजडत्वाजडत्वपक्षौ.

---

[1] त्वे विरो—**पा**. [2] शक्त्यात्मकत्व तथा—**क**. [3] स्वसत्ता गायतीति ?—**ग**.

तत्त्वमुक्ताकलापः

**निस्संकोचा समस्तं चुलकयति मतिर्नित्य-मुक्तेश्वराणां**

**बद्धानां नित्यभूतिर्न विलसति ततः कस्य सा स्वप्रकाशा ।**

**मैवं नित्येश्वरादेस्समति मतिविभवे साऽस्तु तेनानपेक्षा**

सर्वार्थसिद्धिः

नन्विह जडपक्ष एव साधीयान्, पक्षान्तरं तु न संभवमृच्छतीत्यभिप्रायेण चोदयति—**निस्सङ्कोचेति** । न हि कंचित्पुरुषमनपेक्ष्य किंचित्प्रकाशत इति संभवति । पुरुषास्तु नित्यमुक्तेश्वरास्सर्वज्ञा निष्प्रतिघया स्वधर्मभूतधिया सर्वं साक्षात्कुर्वते । बद्धानां तु नित्यविभूतिर्न प्रकाशत एव । अतः स्वप्रकाशत्व न स्यादित्याक्षेपः । तत्र यथाश्रुतस्यारस्यसक्तस्समाधत्ते—**मैवमिति** । अभिप्रेतं विवृणोति—**नित्येति** । यथाऽऽत्मनां नित्यस्वप्रकाशानां धर्मभूतधीगृह्यमाणदशाया-

आनन्ददायिनी

आक्षेपसङ्गत्याऽऽह—**नन्विति** । तत्र किं नित्यमुक्तेश्वरान् प्रति स प्रकाशो व्यवहारहेतुः, उत बद्धान् प्रतीति विकल्प्याद्य आह—**पुरुषास्त्विति** । तेन नित्यविभूतेस्तान् प्रति तदुक्तिर्युक्तेति भावः । द्वितीय दूषयति—**बद्धानां त्विति** । स्वगोचरज्ञानं विनेति शेषः । **तत्र यथाश्रुतेति** । न हि प्रयोजनमपेक्ष्य श्रुत्यर्थकल्पना, किं तु श्रुतानुसारेण वस्तुसत्त्वमङ्गीकार्यमिति भावः । **यथाऽऽत्मनामिति** ।

तत्त्वमुक्ताकलापः

**वेद्यानु[1]द्भासकाले मतिरिव न तु सा बन्धकाले विभाति ॥ ६३ ॥**

सर्वार्थसिद्धिः

मपि स्वप्रकाशत्वं नापैति, तथा सर्वज्ञैस्तत्तद्धिया साक्षात्क्रियमाणस्यापि शुद्धसत्त्वस्य स्वप्रकाशत्वमविरुद्धमिति । तर्हि सर्वसाधारण्याद् बद्धान् प्रत्यपि भासेतेत्यत्राह— **वेद्येति** । यथा धर्मभूतज्ञानस्य विषयग्रहणवेलायां स्वाश्रयायैव भातीत्यवस्थाभेदात् पुरुषभेदाच्च भाननियमः, तथा स्वसाक्षात्कर्तृणामेव स्वयमपि प्रकाशत इति व्यवस्थायां न कश्चिद्बाधः । पुरुषाणां नैरपेक्ष्यं न वस्तुस्वभावं प्रतिरुणद्धीति भावः । नन्वयं प्रकाशः स्वविषयबुद्धिधर्मो वा,

आनन्ददायिनी

ननु सुषुप्तिकाले स्वप्रका[2]शत्वं प्रयोजनवदेव, तदा धर्मभूतज्ञानाभावादिति चेन्न । तथाऽपि नित्येश्वराणां प्रयोजनाभावात् स्वप्रकाशत्वं न स्यात्। प्रयोजनाभावेऽपि प्रमाणबलात् स्वीकारे शुद्धसत्त्वेऽपि तुल्यमिति भावः । शङ्कते—**तर्हीति** । **अवस्थाभेदात्**—विषयग्रहणावस्थाभेदात्। **पुरुषभेदात्**—तदाश्रयभेदात , यथा धर्मभूतज्ञानं स्वप्रकाशत्वेऽपि न सर्वं प्रति प्रकाशत्वेन सर्वदा प्रकाशते, तथा स्वसाक्षात्कारकाले तत्तत्पुरुषान्प्रति प्रकाशावस्थावत्त्वादयं नियम इत्यर्थः । ननु तर्हि स्वसाक्षात्कारेणैव प्रकाशोपपत्तौ किमस्य प्रकाशताङ्गीकारेणेत्यत्राह— **पुरुषाणामिति** । **प्रकाशः**—प्रकाशत्वं । **स्वविषयबुद्धिधर्मः**—

[1] ज्ञानका—**पा.** [2] शत्वे प्रयो—**ग.**

## सर्वार्थसिद्धिः

स्वधर्मो वा ? पूर्वत्र स्वप्रकाशत्वहानिः । उत्तरत्रानादिरागन्तुको वा ? आद्ये बद्धान् प्रत्यप्यनादिरिति भानप्रसङ्गो दुर्वार । द्वितीये कारणानिरूपणादसभवः । मैवम् ; न ह्या[1]गन्तूनां सर्वेषां विशेषकारणमस्माभिर्विविच्यते । न चास्मदविवेचितामिति नास्ति ; अतिप्रसङ्गात् । सामान्यकारणं तु विश्वकर्तुरिच्छादिक श्रुतमेव । अत एव हि नित्यानां मुक्तानां च स्वच्छन्दचिकीर्षासन्ततिभेदसिद्धिरिति ॥ ६३ ॥

**इति नित्यविभूतेरजडत्वपक्षोपपत्तिः.**

---

## आनन्ददायिनी

नित्यविभूतिगोचरधर्मः । **स्वधर्मः**--नित्यविभूतिधर्मः । अत्र किं विशेषकारणानिरूपणं विवक्षित, यद्वा सामान्यकारणनिरूपणं, नाद्य [2]इत्याह—**न ह्यागन्तूनामिति । अतिप्रसङ्गादिति** । विद्युदादेर्जन्यत्वाभावप्रसङ्गादिति भाव. । द्वितीय आह **सामान्येति** । वस्तुतोऽप्राकृतकार्ये भगवदिच्छैव विशेषकारण तदतिरिक्त तु नापेक्ष्यमित्याह—**अत एव हीति** । विश्वकर्तुरिच्छात इत्यर्थः । **मूलं**--**चुलुकयति**—विषयीकरोति । **न विलसति**-न प्रकाशते । **मतिविभवः**—मतिविभुत्वम् ॥ ६३ ॥

**नित्यविभूतेरजडत्वपक्षोपपत्तिः.**

---

[1] गन्तुकाना—पा [2] इत्यत्राह—ग.

तत्त्वमुक्ताकलापः

**तत्त्वान्यप्राकृतानि त्रिगुण इव परिणामतश्चेद्भवेयुः स्थानादि स्यादनित्यं न यदि न घटते भूततादीति चेन्न। अत्रत्यक्ष्मादितत्त्वक्रमनियतगुणप्राक्रियाद्यैक-रूप्या-**

सर्वार्थसिद्धिः

दिव्यस्थानादेर्नित्यत्वमाक्षिप्य प्रत्याह—**तत्त्वानीत्यर्धेन**। **त्रिगुण इव**-त्रिगुणद्रव्ये यथा परिणामतः पृथिव्यादिविभागस्तथेत्यर्थः। **स्थानादि स्यादनित्यमिति**। सङ्घातिनामनित्यत्वे कथं तत्सङ्घात-नित्यत्वमिति भावः। अपरिणामपक्षं शङ्कते—**न यदीति**। तत्र चोद्यमाह—**न घटत** इति। अप्राकृतपञ्चभूतादिव्यपदेशो न युज्यत इत्यर्थः। [1]नित्येष्वप्याकाशादिपञ्चभूतसमाख्यानिवेशस्यान्यथासिद्धि-माह—**अत्रत्येति**। त्रिगुणविकृतीनां हि तत्त्वानां परिणतिविशेषादेक-[2]द्वित्र्यादिगुणनियतिः। दिव्यतत्त्वानां तु नित्यसिद्धा। ततश्च यथा

आनन्ददायिनी

पूर्वसङ्गत्याऽऽह—**दिव्यस्थानादेरिति**। **संघातिनामिति**। पृथिव्यादीनामनित्यत्वे तत्संघातभूतस्थानादीनामनित्यत्व[3]मिति भावः। आदिशब्देन विग्रहादेर्ग्रहः। **अप्राकृतेति**। आकाशादिक्रमेणोत्पत्तावेव ह्येकद्व्यादिगुणयोगनिमित्ताकाशादिव्यपदेश इति भावः। **अन्यथा-सिद्धिः**—प्रकारान्तरेण निर्वाहः। **एकद्वित्र्यादिगुणनियतिरिति**।

[1] अनित्येष्वप्या—**पा.** [2] द्वित्रादि—**पा.** [3] मित्यर्थ.—**ग.**

तत्त्वमुक्ताकलापः

**नित्येऽपि स्यान्निमित्तानुगतिनियमितस्तत्तदाख्याविशेषः ॥ ६४ ॥**

सर्वार्थसिद्धिः

नित्ये चानित्ये च निमित्ताविशेषात् परेषां पृथिव्यादिशब्दः, तथाऽत्रापि तत्तद्गुणतारतम्यनिमित्तस्तत्तच्छब्द इति नित्यत्वाविरोधः ॥ ६४ ॥

**इति अप्राकृतस्थानादेरनित्यत्वादिपरिहारः.**

---

आनन्ददायिनी

नन्वत्र 'संख्ययाऽव्ययासन्न' इति बहुव्रीहिर्न संभवति, तत्र पदद्वयस्यैव समासोक्तेः। अनेकेषां समासेऽपि 'बहुव्रीहौ' इति समासान्तप्रसङ्गादिति चेत्, **अत्राहुः**—द्वन्द्वो वा समासः। नच 'त्यदादीनि' इति समासबाधः। 'संख्याया अल्पीयस्या.' इति 'द्व्येकयोः' इति निर्देशेन च संख्याशब्देषु तदप्रवृत्तिज्ञापनात्। अत एव द्वौ वा द्वौ वेति विग्रहे एकशेषमात्रस्य अप्रवृत्त्या द्विशब्दे बहुवचनाभावात्सर्वत्र द्विवचनमेवेति शाब्दानां वचनमप्युपपद्यते। अत एव 'द्व्येकयोः' इति द्विवचनमिति वदद्विशब्दाद्द्विवचननिर्देश एव भावप्रधाननिर्देशे हेतूक्तौ न त्वेकशेषप्रसङ्गः। सरूपद्वन्द्वाभावस्त्वनभिधानात्। यद्वा बहुव्रीहिरेव समासः। समासान्तशास्त्रस्यानित्यत्वाद्वा तदुपपत्तिरिति। एकद्वित्रेति पाठ इत्यन्ये। **तथाऽत्रापीति।** शब्दमात्रगुणकमाकाशशब्दवाच्यं, शब्दस्पर्शमात्रगुणकं वायुशब्दवाच्यं, शब्दस्पर्शरूपगुणकं तेजश्शब्दवाच्यं, तदेव रसविशिष्टं जलशब्दवाच्यं, तदेव गन्धसहितं पृथिवीशब्दवाच्यमिति नित्यानित्यसा[1]धारण्यमिति भावः ॥ ६४ ॥

**अप्राकृतस्थानादेरनित्यत्वादिपरिहारः.**

---

[1] धारणमिति—ग.

तत्त्वमुक्ताकलापः

**निर्दिष्टं पौष्करादौ स्वयमखिलकृता स्वं वपु-र्नित्यसिद्धं**

**नित्या लिङ्गेति चैकायननिगमविदो वाक्य-भाष्यादि चैवम्।**

**नित्यत्वं वासुदेवाह्वयवपुषि जगौ मोक्षधर्मे मुनीन्द्रो**

सर्वार्थसिद्धिः

अथ परविग्रहनित्यतां प्रमाणतः स्थापयति—**निर्दिष्टमिति**। **श्रीपौष्करे** तावत्—

नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर।

इति। **श्रीसात्वते** च "नित्यं नित्याकृतिधरं" इति भगवन्मूर्तिं [1]प्रस्तुत्य "नित्या लिङ्गा स्वभावसंसिद्धिः" इति **रहस्याम्नायोक्तमाह**—**नित्येति**। अत्र **ब्रह्मनन्द्यादिसंप्रदायमाह**—**वाक्येति**। आप्ततमोपबृंहणमाह—**नित्यत्वमिति**। यथा—

नित्य हि नास्ति जगति भूतं स्थावरजङ्गमम्।

आनन्ददायिनी

अत्रापि पूर्वसङ्गतिरेवेत्याभिप्रायेणाह—**अथेति**। **तदाकारः**—तस्य विग्रहः। **नित्या लिङ्गा**—लिङ्गानि विग्रहाः। लिङ्गव्यत्ययश्छान्दसः। स्वभावतस्संसिद्धेत्यर्थे कर्मणि क्तिन्। वाक्यकारोऽपि.... इत्यभिप्रायेणाह—**अत्रेति**। **आदिपदेन द्रमिडभाष्यकारादयः**। **आप्ततमेति**। **"भारतः पञ्चमो वेदः"** इति प्रसिद्धेरिति भावः।

[1] प्रकृत्य—पा.

तत्त्वमुक्ताकलापः

**नित्येच्छातस्तथा तत्तदिह विहतिमान् सांश-जन्मादितर्कः ॥ ६५ ॥**

सर्वार्थसिद्धिः

ऋते तमेकं पुरुषं वासुदेवं सनातनम् ॥

इति। [1]**वैष्णवे पुराणे**—"सदैकरूपरूपाय" इति। "इच्छा-गृहीताभिमतोरुदेहः" इति स्मरणाद्विग्रहस्येच्छागृहीतत्वे कथं नित्यत्वम्, तस्मिन् वा कथं तदित्यत्राह—**नित्येच्छात** इति। अयं भावः—अवतारविग्रहेषु तावदिच्छागृहीतत्वमविरुद्धम्। नित्येऽप्यनिच्छाया-मनित्यत्वप्रसङ्गमभिसन्धाय नित्येच्छाधीनस्थितित्वविवक्षयेच्छागृहीतत्व-वाचोयुक्तिर्युक्तेति। अत्र तर्कबाधं परिहरति—**तदिति**। तथा—प्रमाणसिद्धत्वादित्यर्थः। सांशत्वेन जन्मादिसहितत्व तद्विरहेण वा

आनन्ददायिनी

सदैकरूप रूपं यस्येति विग्रहात् सदैकरूपत्वोक्तिरिति भावः। ननु "नित्येच्छातस्तदा तत्" इत्यनेन नित्येच्छासिद्धत्वमुक्तम्। न च नित्यजन्यत्वेन नित्यत्वम्, सर्वस्यापि नित्येश्वरजन्यत्वेन नित्यत्वप्रसङ्गा-दित्यत आह—**अयं भाव इति**। भगवतो विग्रहा द्विविधाः, नित्या अनित्याश्च। तत्रानित्यविषयमिच्छागृहीतवचनमिति भावः। साधा-रण्येऽपि न दोष इत्याह—**नित्येऽपीति**। इच्छाव्यतिरेके विग्रह-व्यतिरेक इति व्याप्तिसंभवादित्यर्थः। **सांशत्वेनेत्यादि**। प्रमाण-

[1] श्रीवैष्णवे—**पा.**

## सर्वार्थसिद्धिः

निरंशत्वं प्रासञ्जयितुं न शक्यमिति भावः । यत्तु कैश्चिदुच्यते—नित्यं निष्कलं निर्विकारं च परं ब्रह्म शारीरश्रुत्या स्वरूपत एव विचित्रविग्रहाकारम्; तत एव विग्रहनित्यत्वम्; न चात्र स्वरूप-विग्रहयोर्भेदः, नापि भेदाभेदप्रसङ्ग इति, न तद्भावनीयम्; अन्यथा विश्वाद्वैतस्यापि संग्राह्यत्वप्रसङ्गादिति ॥ ६५ ॥

## इति पराविग्रहनित्यत्वम्.

---

## आनन्ददायिनी

बाधितत्वादिति भावः । **माध्वमतमनुवदति–यच्चिति** । तद्दूषयति–**न तद्भावनीयमिति** । 'निष्कलं–निर्विकारम्' इत्यादिश्रुत्या निरवयवत्व-निर्विकारत्वादिप्रतिपादनात् । यदि प्रमाणविरुद्धमपि सिध्येत्तदाऽऽह—**अन्यथेति** । विज्ञानघनत्वादिप्रतिपादनस्य जडतादात्म्येऽपि विरोधाभाव-प्रतिपादनप्रसङ्गादिति भावः । **अत्र केचिद्भगवतो विग्रहा नित्या एवेति** वदन्ति । तथा सति "विग्रहे च व्यूहविभवादयः, कालकर्माधीनपरिणाम-मात्रं हि तेषु निषेध्यं, न तु भगवत्संकल्पमात्रकृतमपि । तदेवं शरीराण्यपि कानिचिन्नित्यानामीश्वरस्य वा अनित्येच्छापरिग्रहादनित्यानि" इत्यादिन्यायसिद्धाञ्जनग्रन्थविरोधः ॥ ६५ ॥

## पराविग्रहनित्यत्वम्

---

## सर्वार्थसिद्धिः

केचिदाहुः—वीरशृङ्गारादिरसानुबन्धीनि अस्त्रभूष[1]णानि ; तानि तदुचिताधिकारिणां यद्यपि तत्तद्विग्रहेष्वनुसंधेयानि, तथाऽप्यत्यन्तनिष्कामानां तादृशचिन्तनमयुक्तं, "प्रशान्तं साक्षसूत्रकम्" इत्यादिविशेषणाच्च ; न चावाप्तसमस्तकामस्य "निर्दोषो निरनिष्टः" इत्यादिप्रख्यातप्रकारस्य परमात्मनो भूषणादिसाध्यं किंचिदस्ति ।

## आनन्ददायिनी

अत्रापि पूर्ववत् सङ्गतिरित्यभिप्रायेणाह—**केचिदिति** । वीररसानुबन्धीनि शङ्खचक्रादीन्यस्त्राणि, शृङ्गाररसानुबन्धीनि कौस्तुभादिभूषणानि । **तदुचिताधिकारिणामिति** । परनिग्रहकामानां नृसिंहत्रिविक्रमादिध्याने—

चक्रं शङ्खं तथा खड्गं शार्ङ्गं नन्दकमेव च ।

शूलं परश्वथ शक्तिः,

इत्यादिभिः—

हारकेयूरकटककौस्तुभादिविराजितम् ।

गोपिकामध्यगं वेणुं पूरयन्तं रविप्रभम् ॥

इत्यादिभिश्च नृसिंहगोपालादिध्यानादावभिधानादिति भावः । **प्रशान्तमिति** । पुरुषोत्तममन्त्रोपासनध्याने निष्कामानां चिन्तोक्ता । तत्राक्षसूत्रादिकं नास्त्राभरणादिकमिति भावः । ननु तत्तदधिकारिणां तत्तदायुधभूषणादिकं ध्यानोपयोगि भवतु ; निष्कामस्य माऽस्तु ; तथाऽपि त्रिवर्गस्येव तत्सद्भावे न किंचित् बाधकमित्यत्राह—**न चेति** । तत्रास्त्रभूषणादिभिः किंचित्साध्यं प्रयोजनं वक्तव्य, प्रयोजनं चेष्टप्राप्ति-

[1] णादीनि—पा.

तत्त्वमुक्ताकलापः

**अस्त्रैर्वा भूषणैर्वा किमिह भगवतोऽवाप्तकामस्य तस्मा-**

**देवो देहेऽपि वीतावरण इति जगुः केऽपि जैनोपजप्ताः ।**

**किं वा देहेन विश्वात्मन इति वदतां किं प्रतिब्रूयुरेते**

सर्वार्थसिद्धिः

अत इदमुच्यते—

"न ते रूप न चाकारो नायुधानि न चास्पदम्"

इति; तदिदमनुभाषते—**अस्त्रैरिति** । देहेऽपीत्यादिकमुपालम्भ-काकुगर्भम्। अपिशब्देन स्वरूपे वीतावरणत्वं व्यज्यते; तेनातिरेहित-स्वभावत्वमनुसन्धत्ते । अत्र प्रतिबन्दिमुखेन परिहारमाह—**किं वेति** । अयं भावः—विश्वशरीरिणि ईश्वरस्य किं विशेषतः केनचिद्विग्रहेण

आनन्ददायिनी

रनिष्ट[1]निरसनं च । तत्रावाप्तसमस्तकामत्वान्नेष्टमवाप्तव्यमस्ति; निर्दुःखत्वात्सर्वसमत्वेनानिष्टानामभावाच्च न निवर्तनीयं चेति प्रयोजना-भावान्न तत्सिद्धिरिति भावः । अत्र जितन्तास्तोत्रवचनमपि संवाद-यति—**अत इति** । ननु साध्याभावेऽपि तद्भ्रमायायुधादिकमस्त्वि-त्यत्राह—**अपिशब्देनेति** । ननु कथं देहवत्तामात्रेणास्त्रादेः प्रयो[2]जनवत्त्वमित्यत्राह—**अयं भाव इति** ।

---

[1] निरासश्च—**ग.** [2] जनत्व—**ग.**

तत्त्वमुक्ताकलापः

**तच्चेतस्याश्रितार्थं तदधिकरणकं सर्वमप्येवमस्तु ॥ ६६ ॥**

सर्वार्थसिद्धिः

परिगृहीतेनेति चोदयतां किमेते प्रत्युत्तरं ब्रूयुः[1] अथ योगविशेषसक्तानां चित्तालम्बनसिद्ध्यर्थमीश्वरस्य दिव्यगात्रपरिग्रह इति, तथैवास्त्रभूषणादिपरिग्रहोऽपीति तुल्यप्रमाणसिद्धत्वादेष्टव्यम् । न च शान्त्यर्थभावनाविरोधः, यथोपदेशमस्त्राद्युपयोगस्य स्वीकार्यत्वात्, "दामोदरं बन्धगत." [1] इत्यादिवत् । तथा भगवज्जन्मादिवेदिनो जन्मादिनिवृत्तिश्च स्मर्यते । ऊहमात्रेण विरोधक्लृप्तिस्त्वतिप्रसक्त्यै स्यादिति ॥ ६६ ॥

**इति परस्यास्त्रभूषणाद्यनुपपत्तिपरिहारः.**

---

आनन्ददायिनी

"तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे ।"

इत्युक्तरीत्या समाधान वक्तुमाह—**अथेति । यथोपदेशमिति ।** भक्तानिष्टनिरसनादेः प्रयोजनत्वादिति भावः । "ज्वरार्तो जलशायिनम्" इत्यादिशब्दार्थः । **स्मर्यत इति ।**

जन्म कर्म च मे [2]दिव्यं त्वेवं यो वेत्ति तत्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

इत्यादिरित्यर्थः । **ऊहमात्रेणेति ।** आयुधा[3]दिमत्त्वाङ्गीकारेऽवाप्तसमस्तकामत्वविरोधो लोकवदित्यादितर्कैरित्यर्थः । तथा सति श्रौतमात्रे तर्केण बाधः शक्योत्प्रेक्ष इति भावः । **तदधिकरणकं सर्वमिति** मूलं—शरीराधिकरणकमस्त्रभूषणादिकमित्यर्थः ॥ ६६ ॥

**परस्यास्त्रभूषणाद्यनुपपत्तिपरिहारः**

---

[1] इतिवत्—पा. [2] दिव्यमेवं—पा. [3] दिधृत्यङ्गी—ग.

तत्त्वमुक्ताकलापः

**रूपस्थानायुधाख्याजनिलयविधृतिव्यापृती — च्छागुणादे-**

**र्विश्वाधारे निषेधो विधिरपि विषयद्वैतशाम्य-द्विरोधौ ।**

**इत्थंभूते निषेधः क्वचिदपि न विधिं बाधते सावकाशः**

सर्वार्थसिद्धिः

ये तु मन्यन्ते—परस्य ब्रह्मणो विग्रहादिषु विधिनिषेधौ दृश्येते, तत्र निषेधप्राबल्याद्विधीनामन्यार्थत्वमिति, तान् प्रत्याह—**रूपेति** । विषयद्वैतं विषयभेदः । तेन विधिनिषेधौ शाम्यद्विरोधौ । ततः किमित्यत्राह—**इत्थमिति** । इत्थंभूते—आलम्भादिवद्विशेष[1]विधिलब्धसिद्धावित्यर्थः । एवमनभ्युपगमेऽतिप्रसङ्ग इति भावः । विधिनिषेधयोरत्र विषयभेदं विवृण्वन् तस्यैकश्रुतिपठितत्वेन न्यायानिरपेक्षप्रासिद्धि-

आनन्ददायिनी

[2]आक्षेपसङ्गतिमाह—**ये तु मन्यन्त इति** । **विषयद्वैतमिति** । द्वयोर्भावो द्विता, द्वितैव द्वैतं, स्वार्थे प्रज्ञादित्वादण् । **केचित्तु** द्विताया स्सम्बन्धी भेदो द्वैतमित्याहुः । **एकश्रुतिपठितत्वेनेति** ।

'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।'

"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"

---

[1] विधिसिद्धा-पा. [2] आक्षेपिकी संगतिरित्याह-ग.

तत्त्वमुक्ताकलापः

**कल्याणैरस्य योगस्तदितरविरहोऽप्येकवाक्यश्रुतौ च ॥ ६७ ॥**

सर्वार्थसिद्धिः

मप्याह—**कल्याणैरिति** । एतेनापच्छेदन्यायस्यात्र दूरनिरस्तत्वं सूच्यते ॥ ६७ ॥

इति विग्रहादिविधिनिषेधविरोधप्रशमनम्.

---

आनन्ददायिनी

[1] इत्यादिश्रुतयः । **एतेनेति** । पदाहवनीयन्यायविषयत्वादिति भावः । **रूपमित्यादिमूलं—रूपं**—विग्रहः । **स्थानं** वैकुण्ठादि । **आयुधं** चक्रादि । **आख्या** वासुदेवादिसमाख्या । **जनिः** उत्पत्तिः । **लयः** अतिसूक्ष्मावस्था । **विधृतिः** जगद्धारणम् । **व्यापृतिः** सृष्टिव्यापारः ॥ ६७ ॥

विग्रहादिविधिनिषेधविरोधप्रशमनम्

---

[1] इत्यादिन्यः श्र—**ग**.

तत्त्वमुक्ताकलापः

**देहादिर्देवतानां हविरनुभवनं सन्निधेर्योग-पद्यं**

**प्रीतिर्दानं फलस्याप्यसदिति कथयन्त्यर्धलो-कायतस्थाः ।**

**तत्राध्यक्षादिदूरस्वमहिमसदृशाशेषवैशिष्ट्य-मासां**

सर्वार्थसिद्धिः

अत्र प्रसङ्गात् सर्वदेवतानां विग्रहादिपञ्चकनिरासं परिहर्तुं तमनुभाषते—**देहादिरिति** । आदिशब्देन इन्द्रियभोग्यभोगोपकरणादिसङ्ग्रहः । अर्धलोकायतमतम् —कर्माराध्यापह्नवमतम् । एतत्प्रतिक्षिपति—**तत्रेति** । तस्मिन् पक्षे प्रतिक्षेप्ये सतीत्यर्थः । अध्यक्षादिदूरत्वोक्तिः यूपादित्यैक्यादिवन्नात्र बाधप्रसङ्ग इति ज्ञापनार्थम् । स्वमहिमसदृशत्वोक्त्या स्वपरोपयोगिसाधनानुगुण्यसूचनम् । अशेषशब्देन तत्तदाराध्यप्रातिनियतविग्रहतदनुबन्ध्यस्त्रा[1]दिसर्वसंग्रहः । प्रभृति-

आनन्ददायिनी

सङ्गतिः स्पष्टेत्याह—**अत्रेति** । **आदिशब्देन** भोगस्थानादेर्ग्रहः । **कर्माराध्येति** । मीमांसकमतमित्यर्थः । **स्वपरोपयोगेति** । देवतानामतिमहिमतया तद्विग्रहादीनां स्वपरोपयोगहेतुत्व[2]मस्तीति भावः । तदनुबन्धीनि इन्द्रियाणि । आदिशब्देन देशादेर्ग्रहः । **प्रभृतिशब्देनेति** । तेषु विग्रहादिमत्त्वश्रवणादिति भावः । ननु मन्त्रार्थवादादीनामन्य-

[1] दिसंग्र—पा. [2] मस्त्विति—क.

तत्त्वमुक्ताकलापः

## तत्तद्विध्यर्थवादप्रभृतिभिरविदुस्तत्परैरेव शिष्टाः ॥ ६८ ॥

सर्वार्थसिद्धिः

शब्देन मन्त्राणां स्मृतीतिहासपुरा[1]णादीनां संग्रहः । अप्रधानेऽप्युपयुक्ते तात्पर्यमस्त्येवेत्यभिप्रायेण तत्परैरेवेत्युक्तम् । **देवताधिकरणे** च विग्रहादिनिरासो न सूत्रोक्तः । प्रयोजकाप्रयोजकविभागमात्रं तु न विग्रहादि-

आनन्ददायिनी

शेषत्वात् कथं विग्रहादिपरत्वमित्यत्राह—**अप्रधानेऽपीति** । 'यन्न दुःखेन' इत्यादेरर्थवादस्य विध्यनुगुणस्वार्थे तात्पर्याङ्गीकारादिति भावः । ननु 'देवता वा प्रयोजयेदतिथिवत्' इति विग्रहादिमत्त्वे देवताया एव यागप्रयोजकत्वं स्यात्, यथाऽतिथेरातिथ्यप्रयोजकत्वम् । तथा च देवताधिकरणविरोध इत्यत्राह—**देवताधिकरणे चेति** । 'अपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं स्यात्' इति सूत्रेण देवताया आर्थप्राधान्येऽपि विधिवाक्येन स्वर्ग[2]साधनतया कर्म कर्तव्यतया चोदितं पुरुष प्रवर्त्तयतीति प्रयोजकत्वतदभावचिन्ता तत्र क्रियते; न तत्र विग्रहसत्त्वासत्त्वविचार इति भावः । ननु विशेषातिदेशलक्षणे 'विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्' इत्यधिकरणे द्रव्यदेवतयोस्साम्ये द्रव्यबलीयस्त्वसमर्थनं देवतासत्त्वे न स्यादित्यत्राह—

---

[1] णाना च संग्र—पा. [2] साधकत—ग.

## सर्वार्थसिद्धिः

सदसत्त्वापेक्षम् । [1]हविर्देवतासामान्ये हविर्बलीयस्त्व प्रमाणप्रसक्ति-वैषम्यात् । विशेषणतः पर्यायतश्च देवताभेदोक्तिस्तथातथोद्देशार्था । विस्तरस्त्वन्यत्र । **शिष्टाः—बोधायनटङ्कद्रामिडादयः** ॥ ६८ ॥

## इति विग्रहादिपञ्चकनिराकरणपरिहारः.

---

### आनन्ददायिनी

**हविर्देवतेति** । अत्र हि देवताया अभावान्न द्रव्यसाम्यस्य प्राबल्यमपि तु द्रव्यस्य प्रत्यक्षत्वेन शीघ्रोपस्थितिकत्वाद्देवताया अतीन्द्रियत्वेन तत्साम्यस्य विलम्बितप्रतीतिकत्वादिति भावः । 'इन्द्राय राज्ञ एकादशकपाल निर्वपेत्' इत्यारभ्य विहितत्रिपुरोडाशिन्यां 'अभिगमनेना-वद्यति' इति सहावदानप्रयुक्तसहप्रदानप्राप्तौ 'नाना वा देवतापृथक्त्वात्' इति देवतापृथक्त्वात् पृथक्प्रदानं समार्थितं, तन्न स्यात्, पृथक्त्वा-योगात् । एकस्यैवेन्द्रस्य राजत्वाधिराजत्वादिविशेषणयोगेन भेदाभावात् । तथा च नातिरिक्ता देवता । सौर्यपौष्णचर्वोर्देवताभेदाभावाद्धे कर्तव्ये 'सूर्याय जुष्टं निर्वपामि सूर्यायेद पूष्ण इदम्' इत्याद्युद्देशत्यागे चानियमस्स्यादित्यत्राह—**विशेषणेति** । तत्तद्विशेषणवता तत्तच्छब्दे-नैवोद्देशत्यागः कर्तव्य इति नियमार्थं शास्त्रे नामविशेषणभेदा-दौपचारिको भेद उक्तः । यथा प्रवर्तनालाघवाद्विधे[2]रन्यतस्सिद्धाग्नि-विद्याद्यपेक्षिणो न स्वतस्तत्र प्रयोजकत्वं, तथा विधिगतशब्दस्योपस्थि-ततया न शब्दान्तरा....हादिना....ह । किं च यथा 'न हिंस्यात्' इति रागप्राप्तहिंसादेरेव शीघ्रोपस्थितिकतया निषेध्यत्वं तथा विधिगतशब्दस्यै-

---

[1] हविर्दैवतसा—पा. [2] रन्यथासिद्धाग्नि—ग.

तत्त्वमुक्ताकलापः

**साधुत्राणादिहेतोस्तदुचितसमये विग्रहांशः स्वकीयैः**

**स्वेच्छातस्सत्यरूपो विभुरवतरति स्वान् गुणौघाननुज्झन् ।**

सर्वार्थसिद्धिः

यद्यपि भगवतो गुणविग्रहादियोगस्सत्यः, तथाऽपि षाड्गुण्यस्य व्यापित्वमयुक्तम् ; विभवेषु विपरीतदृष्टेः, [1]व्यूहेषु च सकर्षणादिषु ज्ञानबलादिगुणद्वन्द्वनियमोक्तेरित्यत्राह—**साधुत्राणेति** । "अजोऽपि सन्न-

आनन्ददायिनी

व शीघ्रोपस्थितिकतयोहादौ ग्रहो न तत्परित्यागो मानाभावात् । केचित्तु विशेष्यभेदाभावेऽपि विशेषणप्रयोगादुद्देशे ऊहे च नियम उपपद्यते । प्रदानभेदश्च विशेषणप्रयुक्तभेदमादायैव, अन्यथा विशषणवैयर्थ्यादिति वदन्ति । तस्मान्न तद्वशेन देवताद्यभिलाप इति भावः । **अन्यत्रेति** । 'तदुपर्यपि बादरायणः सम्भवात्' इत्याधिकरणभाष्यादावित्यर्थः । **आदिशब्देन** गुहादयो विवक्षिताः । **मूलं—हविरनुभवनं**—हविर्ग्रहणं तद्भक्षणम् । **यौगपद्यं सन्निधेः**—युगपन्नानादेशेषु सन्निधानम् । **प्रीतिः**—देवतायाः कर्मजन्या प्रीतिः । **फलस्य दानं**—फलप्रदानमित्यर्थः ॥ ६८ ॥

विग्रहादिनिराकरणपरिहारः.

---

प्रसङ्गादाह—**यद्यपीति** । हेतुमाह—**विभवेष्विति** । सार्वत्रिकत्वे रामकृष्णादिष्वज्ञानाशक्त्यादिदर्शनस्यानिरुद्धादिविभवेषु

[1] व्यूहेषु स—**पा.**

तत्त्वमुक्ताकलापः

## व्यूहे संकर्षणादौ गुणनियतिरभिव्यक्तिवैषम्य-मात्रा-

सर्वार्थसिद्धिः

व्ययात्मा" इत्यादिप्रसिद्धमिह प्रतिसन्धेयम्। प्रतिनियतगुणद्वन्द्वोक्तेरन्यथासिद्धिमाह—**व्यूह इति**। अयं भावः—

निगूहनं चतुष्काणां द्वन्द्वानां च प्रकाशनम्।
षाड्गुण्यस्य तथाभूतसमाधिस्थोपयोगतः॥

मोहनशक्त्या मनुष्यादिसजातीयशङ्कास्पदेषु विभवेष्वपि हि सिद्ध षाड्गुण्यम्। व्यूहेषु कैमुत्यसिद्धम्। सर्वेष्वपि हि भगवत्त्वं पूर्णत्वं च प्रख्याप्यते। संकर्षणादौ व्यवस्थया गुणद्वन्द्वाभिव्यक्ते-गुणचतुष्कान्तराणामनभिव्यक्तेश्च विशेषनिर्देशोपपत्तिरिति। "न कर्मणा वर्धते नो कनीयान्" स न साधुना कर्मणा भूयान् नो एवा-

आनन्ददायिनी

व्यवस्थायाश्चानुपपत्तेरिति भावः। 'अजोऽपि सन्' इति गीतायां स्पष्टमुक्तेरित्यर्थः। ननु षाड्गुण्यं क्वचिदभिव्यक्तं चेत् सर्वदा सर्वत्राभिव्याक्तिः स्यात्। [1]न चेत्कदाचिदपि कुत्रापि न स्यात्। न च जीवापहतपाप्मत्वादितुल्यता, जीवेऽभिभावककर्म[2]सत्त्वेन तदुपपत्तेः। तद्वद्भगवतः कर्मवश्यत्वाभावादित्याह—**अयं भाव इति**। तथाचानभिव्यक्तेरन्यकारणत्वान्न भगवतः कर्मवश्यत्वमिति भावः। **निगूहनं चेति**। षड्गुणस्य षण्णां गुणानां मध्ये, पात्रादित्वात् साधुः। **चतुष्काणां** चतुर्णां निगूहनम्। स्वार्थिकः कः। **द्वंद्वानां**—क्रमेण द्वयोरित्यर्थः। **समाधिस्थोपयोगतः**—तथाभूतसमाधिनिष्ठपुरुषानुग्रहायेत्यर्थः। **भगवत्त्वं** षाड्गुण्यम्। सर्वत्र पूर्णत्वे प्रमाणमाह—**न कर्मणा वर्धत**

[1] नो चे—**ग.** [2] सत्त्वे तदु—**ग.**

तत्त्वमुक्ताकलापः

**वृद्धिह्रासाद्यभावात् स हि भवति सदा पूर्ण-षाड्गुण्यशाली ॥ ६९ ॥**

**शास्त्रादीनां प्रवृत्तिः प्रतितनु नियता स्याद्धि संकर्षणादौ**

सर्वार्थसिद्धिः

साधुना कनीयान्" "अन्यूनश्चाप्यवृद्धश्च" इत्यादिश्रुतिस्मृतिबलेन वृद्धिह्रासाद्यभावात् व्यूहादिषु गुणकात्स्न्र्यमाह—**वृद्धीति** ॥ ६९ ॥

**इति परव्यूहादिपञ्चरूपस्यापि पूर्णषाड्गुण्यवत्त्वम्.**

---

उक्तेषु व्यूहेषु क्रमाच्छास्त्रप्रवर्तनधर्मनयनतत्त्वगमनरूपमुपकार-त्रयं जीवमनोहङ्कारेष्वभिमानत्रय संहारसृष्टिरक्षारूपलीलात्रय च व्यपदिश्यते; तत्र प्रथमत्रिके व्यवस्थानुपपत्तिचोद्य सुपरिहरमित्यभि-प्रायेणाह—**शास्त्रादीनामिति** । द्वितीयतृतीयत्रिके विरोधं परिजिहीर्षु-

आनन्ददायिनी

**इति** । **व्यूहादिष्विति** । अवतारस्य सत्यत्वमजहत्स्वस्वभावतेत्यादि-कमनुसंधेयम् । **मूलं—तदुचितसमये** 'यदा यदा हि धर्मस्य' इत्यादिनोक्तसमये, **विग्रहांशैः** स 'उज्जहारात्मनः केशौ सितकृष्णौ' इत्यादिकमनुसन्धेयम् । **स्वेच्छात इत्यादि** । 'स्वेच्छामात्रनिदानता' इत्यादिकमिहानुसधेयम् ॥ ६९ ॥

**परव्यूहादिपञ्चरूपस्यापि पूर्णषाड्गुण्यवत्त्वम्.**

---

प्रसंगस्संगतिः । **शास्त्रप्रवर्तनं**—[1] तदुपदेश । **धर्मनयनं धर्माचारः** । **तत्त्वगमनं**—तत्त्वप्रेरणम् । **तत्रेति** । शरीरव्यापारत्वेन

[1] शास्त्रप्रयोक्तृपदेशः- ग.

तत्त्वमुक्ताकलापः

**जीवादौ या विभज्याभिमतिरिह लयोत्पत्ति-रक्षाविधिश्च ।**

**तत्तद्विद्याविशेषप्रतिनियतगुणन्यायतस्तौ तु नेयौ**

सर्वार्थसिद्धिः

रनुभाषते—**जीवादाविति** । [1] अत्रेदमाभिप्रायिकं चोद्यम्—यदि सङ्कर्षणादयोऽपि वासुदेव एव स्युस्तदा अभिमानत्रयस्य सजिहीर्षादि-त्रयस्य चैकाश्रयत्वाव्यवस्था न स्यात्; अतस्ते परस्मादन्ये केचित् पुरुषा इति । परिहरति—**तत्तदिति** । यथैक एव परमात्मा तत्त-द्विद्याविशेषव्यवस्थितगुणविशेषवत्तयोपास्य इति **गुणोपसंहारपादे** निरणायि, तथाऽत्रापि मिथस्संघटितविग्रहाभिमानव्यापारविशेषवत्तया व्यूहनिष्ठैर्विभज्यानुसन्धे[2]य इति भावः । चेतनभेदक्लृप्तौ बाधमाह—

आनन्ददायिनी

व्यवस्थोपपत्तेरिति भावः । ननूत्तरत्रिकद्वये कथं व्यवस्थानुपपत्तिः, तत्रापि शरीरभेदमादाय परिहारसंभवादित्यत्राह—**अत्रेदमिति** । **एका-श्रयत्वादिति** । शास्त्रप्रवर्तनादिवच्छरीरद्वारकत्वाभावादिति भावः ।

---

[1] अत्रैवमामि—**पा.** [2] या इति—**पा.**

तत्त्वमुक्ताकलापः

**सर्वस्यैकोऽभिमन्ता स हि सकलजगद्व्यापृतिष्वेऽकर्ता ॥ ७० ॥**

सर्वार्थसिद्धिः

**सर्वस्येति** । न हि विश्वमूर्तेरभिमानः कश्चित्संकुचति, न च संहारादौ क्वचिदुदास्ते, न च हिरण्यगर्भादिवद्विशेषणभूतचेतनान्तराण्यत्र वचनान्तरप्राप्तानि ; प्रत्युतैक्यमेव प्रतिपादितमित्याशयः ॥ ७० ॥

**इति व्यूहेषु विशेषाभिमानादिविरोधपरिहारः.**

---

आनन्ददायिनी

**संकुचति**—प्रादेशिक इत्यर्थः । **न च संहारादौ क्वचिदुदास्ते**—संहारादिव्यापारे कर्तव्ये क्वचित् प्रदेशविशेष उदासीनो भवति, परमात्मन एकदेशे सजिहीर्षाभाव इत्यर्थः । तदन्यपुरुषाङ्गीकारे तु प्रदेशभेदेन प्रलयादिक स्यात्, त्रयाणां तुल्यतया प्रतिबन्धप्रसङ्ग इति भावः । मूलं—**प्रतितनु**—शरीरभेदेन, **अभिमतिः** अभिमानं, **लयः**—संहारः, **रक्षा** रक्षणं, तेषां, द्वन्द्वान्ते श्रूयमाणो विधिशब्दः प्रत्येक संबध्यते, **तौ**—अभिमतौ रक्षाविधिश्च । 'पुमांस्त्रिया' इति पुंसः शेषः ॥ ७० ॥

**व्यूहेषु विशेषाभिमानादिविरोधपरिहारः.**

---

[1] मानविरो—**पा.**

तत्त्वमुक्ताकलापः

**त्रिव्यूहः क्वापि देवः क्वचिदपि हि चतुर्व्यूह उक्तस्तदेवं**

**व्याघातेऽन्योन्यबाधादुभयमिदमसत्कल्पनामात्रमस्तु ।**

**तत्राद्ये व्यूहभेदे त्रियुगगुणतया चिन्तनीये परस्मा-**

**द्युक्ताभेदाविवक्षा तदनुपगमने तत्त्वसंख्यादिबाधः ॥ ७१ ॥**

सर्वार्थसिद्धिः

मानमेयमलिम्लुचास्त्वाहुः—त्रिव्यूहचतुर्व्यूहवाक्ययोर्विरोधात् सर्वमेतदुपासनार्थं कल्पनामात्रसिद्धमिति । तदनुब्रूते—**त्रिव्यूह इति** । प्रतिवदति—**तत्रेति** । विरोधं शमयति—**आद्य इति** । वस्तुतश्चतुर्व्यूहत्वेऽप्याद्यव्यूहस्य षड्गुणतयाऽनुसन्धेयत्वात् परस्मादभेदं विवक्षित्वा त्रिव्यूहत्वोक्तिः प्रवृत्तेति न मिथो बाधश्शङ्कनीय इति हृदयम् । उक्तप्रकारानभ्युपगमेऽतिप्रसङ्गमाह—**तदनुपगमन इति** । एवमिह प्रसङ्गः—यदि न्यूनाधिकनिर्देशमात्राद्विरोधः, तदा क्वचिदप्यनुक्तमन्यतो ग्राह्य न स्यात्; ततश्च विद्यैक्ये गुणोपसंहारस्त्यज्येत; तथा

आनन्ददायिनी

आक्षेपसङ्गतिं दर्शयति—**मानमेयेति** । **उपासनार्थमिति** । तथासति नार्थविरोधोऽर्थस्यैकरूप्यादिति भावः । **विद्यैक्य इत्युपलक्षणम्** । कर्मकाण्डेऽपि शाखाभेदेनाज्ञातानामुपसंहारो न स्यादिति द्रष्टव्यम् ।

तत्त्वमुक्ताकलापः

## मूर्तीनां मूलमूलिप्रभृतिषु बहुधा वैपरीत्य-प्रतीते-

सर्वार्थसिद्धिः

छान्दोग्ये भूतत्रयं तैत्तिरीयके भूतपञ्चकं अन्यत्र च तथातथा न्यूनमधिकं च तत्त्वजातमधीतमिति तत्त्वसंख्याव्यवस्थापनं च विलयेतेति। आतिवाहिकगणनादिसङ्ग्रहार्थ आदिशब्दः। एवं च पञ्चमूर्त्यादिपरिगणनाऽपि परित्रातेति वेदितव्यम् ॥ ७१ ॥

**इति व्यूहगणनावैषम्यनिर्वाहः.**

---

पुनरपि मुखान्तरेण मूर्तिकल्पनामनुभाषते—**मूर्तीनामिति**। अस्ति हि तत्तत्संहितास्वभिन्ननाम्नो मूर्तेर्भिन्नकारणकत्वं वर्णभुजादि-

आनन्ददायिनी

**छान्दोग्ये भूतत्रयमिति**। 'हन्ताहमिमास्तिस्रो देवताः' इति पृथिव्यप्तेजसामेवाध्ययनात्। **तैत्तिरीयक इति**। 'आत्मन आकाशस्सभूतः। आकाशाद्वायुः' इत्यादिभिरित्यर्थः। **एवं च पञ्चमूर्त्यादीति**। परव्यूहविभवान्तर्याम्यर्चावताररूपेण। **मूलं—त्रियुगगुणतया चिन्तनीये**—त्रियुगः ज्ञानादिषड्गुणवान्, तस्य गुणतया ध्यातव्ये। **केचित्तु**—त्रियुग युगत्रयं तद्गुणकत्वेनेत्यर्थ इत्याहुः। (अ)**भेदाविवक्षा**—अभेदेन पृथग्विवक्षा नास्तीत्यर्थः ॥ ७१ ॥

**व्यूहगणनावैषम्यनिर्वाहः.**

---

पूर्वसङ्गतिमेव दर्शयति—**पुनरपीति**। **अस्ति हीति**। एकस्य भिन्नकारणकत्वं विरुद्धमिति भावः। वर्ण रक्तादि, **आदिशब्देन**

तत्त्वमुक्ताकलापः

**वर्णादौ बीजतादिव्यवहृतिवदियं वर्णना भावनार्था।**

**मैवं कालादिभेदात् प्रशमितविहतौ कल्पितत्वं न कल्प्यं**

**नो चेद् ब्रह्माद्युदन्तेष्वपि विषमकथाभेदवैयाकुली स्यात् ॥ ७२ ॥**

सर्वार्थसिद्धिः

वैषम्यं च। अतो मन्त्राक्षरेषु बीजतत्कार्यव्यपदेशवत् सितरक्तादिव्यपदेशवच्च [1]भावनार्थं दृष्ट्युपदेशमात्रमेतदिति भावः। एतन्निषेधति —मैवमिति। काल्पनिकत्वशङ्कामूलं विरोधं परिहरति—कालादिभेदादिति। उक्तानभ्युपगमेऽतिप्रसङ्गमाह—नो चेदिति। सन्ति हि चतुर्मुखस्य सप्त जन्मानि; रुद्रस्य ब्रह्मपुत्रत्वं ब्रह्मानुजत्वं च। [2]चन्द्रादीनामपि कारणभेदाः कथ्यन्ते। न चैतेषु कल्पादिभेदप्रशमित-

आनन्ददायिनी

मूर्धादयः। अत इति। वर्णानां परस्परोपादानोपादेयभावशुक्लगुणाद्यभावेऽपि अं बीजं शुक्लो वर्ण इत्यादि मन्त्रशास्त्रे व्यपदिश्यत इति भावः। काल्पनिकत्वेऽपि यथा वह्नेर्व्यक्तिभेदेन नानाकारणकत्वम्, तथा कालभेदेन भिन्नानां मन्त्रमूर्तीनां सर्वमुपपन्नमिति भाव.। न केवलं पञ्चरात्राद्युक्त एव एवं परिहारः, किं तु श्रुतिस्मृत्याद्युक्तोऽपीत्याह—सन्ति हीति। चन्द्रादीनामिति। अत्रिनेत्रसमुद्रमधुरिपुमानसादि-

[1] भावनार्थदृष्टि-पा. [2] इन्द्रादी-पा.

तत्त्वमुक्ताकलापः

## ईशस्य व्यष्टिभेदानभिदधति मनोवाङ्मयादीन् यदन्ये

सर्वार्थसिद्धिः

विरोधेषु काल्पनिकत्वशङ्कावकाशः, तथाऽत्रापि स्यात्; अन्यथा तत्रापि विपरीतापत्तिरिति ॥ ७२ ॥

### इति प्रादुर्भावादिप्रक्रियान्तरोपपत्तिः.

---

इह केचिदीश्वरस्वरूपेऽपि भोक्तृभोग्यन्यायेन समष्टिव्यष्टिभेदं वर्णयन्ति, वदन्ति च मनोमयप्राणमयवाङ्मयाख्यं व्यूहत्रयम्; तदनुभाषते—**ईशस्येति**। ईदृशोऽयं भेदः किं भोग्यवत्परिणामतः. उत

आनन्ददायिनी

प्रभवत्वमित्यर्थः। **आदिशब्देन** वसिष्ठादय उक्ताः। **उदन्तः**—वृत्तान्तः। **विषमकथाभेदः**—नानाविधसृष्टिवादविशेषः ॥ ७२ ॥

### प्रादुर्भावादिप्रक्रियान्तरोपपत्तिः.

---

प्रसङ्गसङ्गत्या **ब्रह्मदत्तमतं** दूषयति—**इहेति**। स एवमाह—सर्वशक्तिस्वयंप्रकाशसन्मात्रं ब्रह्म यदा सर्वतत्त्वसमष्टीभूतं भवति तदेश्वरो जीवः प्रकृतिरिति त्रेधा नित्यविभागवद्भवति। तत्रानुवृत्तं सन्मात्र ततो विलक्षणं फेनतरङ्गबुद्बुदापेक्षया निस्तरङ्गसमुद्रवत्. तत्रेश्वरः सदा ज्ञानानन्दैश्वर्याविर्भावहेतुब्रह्मशक्तिसंपन्नस्तदंशत्वात्, एवमीश्वरोऽपि मनोमयो वाङ्मयः प्राणमय इति विभागवान्, एवं भिन्न ईश्वर आदित्याग्निचन्द्ररूपेण मनोवाक्प्राणानधितिष्ठतीति। **भोग्यवदिति**।

तत्त्वमुक्ताकलापः

**तत्र त्रेधा यदीष्टा विकृतिरविषया निर्विकारा-गमाः स्युः ।**

**नित्यत्रित्वे तु नैकेश्वरनियमगतिर्भ्रान्तिसिद्धे विभागे**

सर्वार्थसिद्धिः

भोक्तृवत्स्वभावतः, अथ प्रतिबिम्बितचन्द्रादेरिव भ्रान्तित इति विकल्पं मन्वानः प्रथमे निर्विकारश्रुतिविरोधमाह—**तत्रेति** । त्रेधेत्यनन्त-व्यष्ट्यन्तराणामुपलक्षणम् । सर्वात्मनो ब्रह्मणस्सविकारत्वादीश्वरांशे हि तैर्निर्विकारत्वश्रुतिर्निबोधिता ; तत्राप्यनवकाशत्वं [1]तस्या. प्रसक्तम् । द्वितीय दूषयति—**नित्यत्रित्व इति** । "एको देवः सर्वभूतेषु गूढः" "एकश्शास्ता न द्वितीयोऽस्ति शास्ता" इत्यादिभिर्विरोधः स्यादिति भावः । तृतीयेऽनिष्टमाह—**भ्रान्तीति** ।

आनन्ददायिनी

अचेतनप्रकृतेर्महदादिपरिणामवदित्यर्थः । **भोक्तृवदिति** । चेतनानामिव स्वत एव भेदः । **त्रेधेत्यनन्तव्यष्ट्यन्तराणामिति** । विश्वतैजसप्राज्ञा-दिभेदानामित्यर्थः । नन्वीश्वरविषयत्वाभावेऽपि श्रुतेर्ब्रह्मण्येवेश्वरादिविभाग-स्वाभाविको न स्यात्, मायाकल्पितविभागेनैव सर्वोपपत्तेः । तथा च भोक्तृभोग्येश्वरभेदेन विभागो नित्यसिद्ध इत्यभ्युपगमो व्यर्थ इति

---

[1] तस्यापि प्रस-पा.

तत्त्वमुक्ताकलापः

## मायादायादपक्षः श्रुतिरपि नियतैरस्त्वधिष्ठान-भेदैः ॥ ७३ ॥

सर्वार्थसिद्धिः

**मायादायादपक्षः**—मायार्जितभ्रान्तिविभागोपजीविपक्षः ; स ते स्यादिति शेषः । सत्यम् . ईश्वरमनभ्युपगच्छतामीश्वरत्रित्वश्रुतिस्तर्हि निरधिष्ठानभ्रमविषया स्यादित्यत्राह—**श्रुतिरपीति** । अयं भावः—ईश्वरस्तावन्मायोपहिते ब्रह्मणि कल्प्यताम् ; त्रित्वं च तस्य द्विचन्द्रादिन्यायात् मायाविलासविप्लुतब्रह्माधिष्ठानतया स्वीक्रियतामिति । यद्वा मनोमयादिविभागवादिनी श्रुतिः कथं निर्वोढव्येत्यत्राह—**श्रुतिरपीति** । अपिशब्द [1]इह एतादृशश्रुत्यसंभवाभिप्रायः । संभवेऽप्युच्यते परोपकारकमनःप्रभृत्यधिष्ठानभेदादीश्वरस्य मनोमयत्वादिविभागो निरुह्यतामिति ॥ ७३ ॥

**इति ईश्वरस्वरूपविषयसमष्टिव्यष्ट्यादिवादनिरासः.**

---

आनन्ददायिनी

भावः । **सत्यमिति** । ईश्वराधिकरणककर्तृकत्वप्रतिपादकत्वान्मनोमयादिश्रुतेरिति भावः । नन्वधिष्ठानभूतब्रह्मण एकत्वात्तत्र भेदाभावात्तद्विषयतया च तद्विषयश्रुतिः कथं निर्वाह्येति तत्रैवाकाङ्क्षा तत्रैवाधिष्ठानशब्दश्चास्वरस इत्यभिप्रायेणाह—**यद्वेति** । मूलं—**विकृतिः** परिणामः । **निर्विकारागमाः**—निर्विकारश्रुतयः ॥ ७३ ॥

**ईश्वरस्वरूपविषयसमष्टिव्यष्ट्यादिवादनिरासः.**

---

[1] इह तादृ–पा.

तत्त्वमुक्ताकलापः

**युक्तिः प्रश्नोत्तरादेर्न हि पुरुषाभिदां बुद्धिभेदं च मुक्त्वा**

**तस्माद्व्यूहादिभेदे कतिचन पुरुषाः स्युः परेणानुबद्धाः ।**

सर्वार्थसिद्धिः

पुनरपि परव्यूहादिषु पुरुषभेदमाशङ्कते—**युक्तिरिति** । आदिशब्देन कृष्णबलभद्रादिषु मिथो [1]विवादकोपादि संगृह्यते । अस्ति तावत्सात्वतादिषु गुरुशिष्य[2]न्यायेन वासुदेवसंकर्षणादीनां प्रश्नप्रतिवचनक्रमेण विद्याधिगमः । तत्र न तावत् स्वात्मानं स्वयं पृच्छति प्रतिवदति वा; हेतुप्रयोजनयोरसंभवात् । अतः प्रष्टृप्रतिवक्तृचेतनभेदः कल्प्य इति । ननु भेदकानिश्चये कथं भेदक्लृप्तिरित्यत्राह—**बुद्धिभेदं च मुक्त्वेति** । न्यून[3]बुद्धिः पृच्छेदधिकबुद्धिरनुशास्तीति लोकवेदप्रसिद्धमिति भावः । एतदन्यथासिद्धमित्यभिप्रायेण [4]प्रति

आनन्ददायिनी

पूर्वाक्षेपेण सङ्गतिरित्याह—**पुनरपीति** । आदिशब्देन नरनारायणादिग्रहः। **हेतुः** अज्ञानं, **प्रयोजनं**—ज्ञानम् । **न्यूनबुद्धिरिति**। न्यूनाधिक-

---

[1] विषाद—**पा.** [2] न्याये वासु—**पा.** [3] बुद्धिः परिपृ—**पा.** [4] प्रतिवक्ति—**पा.**

तत्त्वमुक्ताकलापः

**तत्र स्वच्छन्दलीलः स्वयमभिनयति स्वान्यतां सर्ववेदी**

**तद्वच्छिष्यादिवृत्तिप्रसृतिमिह सतां शिक्षयन् सानुकम्पः ॥ ७४ ॥**

सर्वार्थसिद्धिः

क्षिपति—**तत्रेति** । चेतनभेदाभावेऽपि प्रश्नोत्तराद्युपपत्तिमाह—**स्वच्छन्दलील इति** । स्वयमित्यनेन स्वस्यैवेति गम्यते । अभिनयप्रयोजनमाह—**तद्वदिति** । शिष्याचार्यादिभिरेवं वर्तितव्यमिति धार्मिकशिक्षणं देवस्य दयान्वितलीलाप्रसूतमिति भावः ॥ ७४ ॥

**इति ईश्वरस्य स्वात्मनि शिष्याचार्यत्वाद्यभिनयफलम् .**

———

आनन्ददायिनी

बुद्ध्योरेककालीनयोराश्रयभेदकत्वादिति भावः । **चेतनभेदाभावेऽपीति**। इच्छैव हेतुरिति भावः । फलाभावशङ्काऽपि नेत्याह—**अभिनयप्रयोजनमिति** । मूल—**अनुबद्धाः**–परस्य व्यष्टिभूता इत्यर्थः ॥ ७४ ॥

**ईश्वरस्य स्वात्मनि शिष्याचार्यत्वाद्यभिनयफलम् .**

———

तत्त्वमुक्ताकलापः

विश्वान्तर्वर्तिबालोदरगतमखिलं कस्य विश्वा-
सभूमि-
स्तस्मादौपेन्द्रमीदृग् भवतु रसवशादिन्द्रजालं
प्रवृत्तम् ।
मा भूदाश्चर्यशक्तेरवितथमिदमित्येव सर्वार्थ-
सिद्धे-
र्व्याघातस्योपशान्तिस्तदनुगुणदशाभेदयोगा-
दिभिः स्यात् ॥ ७५ ॥

सर्वार्थसिद्धिः

अत्र मायामता[1]नुयायी चोदयति—विश्वेति । विश्वशब्देन त्रैलोक्यादि गृह्यते । कस्यचि[2]दन्तरेण किंचिद्वर्तते, तदेव तदानीमेव तस्माद्बहिरेव ; क एतच्छ्रद्दधीतेति भावः । विश्वापह्नवाभिलाषी स्वोक्त-फलितमाह—तस्मादिति । रसवशात्—इच्छावशादीप्सितक्रीडारस-वशाद्वा । तादृशाद्भुतविवक्षया प्रतिषेधति—मा भूदिति । तत्तत्प्रक-रणपरामर्शेन मिथ्यात्वपरिहारे सिद्धे विरुद्धवत्प्रतिपन्न सर्वमविरुद्धावस्था-विशेषादिविवक्षया निर्वोढुं शक्यम् । तत्र भगवद्विग्रहविभूत्यादीनां

आनन्ददायिनी

भगवल्लीलाव्यापारस्य मिथ्यात्वे तन्नयायेन सर्वमिथ्यात्व सेत्स्य-तीत्याक्षेपसङ्गत्याऽऽह—अत्रेति । अवस्थाविशेषमाह—तत्रेति । सङ्कोच-

[1] नुयायी चो—पा. [2] दन्तरे किं—पा.

सर्वार्थसिद्धिः

सङ्कोचशक्तिर्विकासशक्तिस्तत्तदभिमानविषयसजातीयोत्पादनशक्तिस्सूक्ष्म-स्थूलावस्थाभेदः परिमितविग्रहव्यङ्ग्यापरिमित [1] स्वरूपलक्षणमित्यादिकं यथार्हमवधारणीयम्। एवम् "अणोरणीयान् महतो महीयान्" इत्यादीनि ब्रह्मस्वरूपविषयवाक्यान्यपि तत्तदविरुद्धार्थविवक्षया नेतव्यानि। वस्त्वन्तराद्दृष्टवैचित्र्यमात्रेण विरोधशङ्कायां सर्वत्रातिप्रसङ्गः स्यादिति ॥ ७५ ॥

इति आश्चर्यवृत्तान्तविशेषसत्यत्वम्.

आनन्ददायिनी

शक्तिवशात् परिमिततया प्रतिपन्ननन्दनन्दनविग्रहस्य यदा जगद्बहिः ष्ठमिव लक्ष्यते तदा संकोचः, विकासशक्तिमत्त्वात् यदोदरगतं दृश्यते तदा विकासः। कालभेदस्य सौक्ष्म्यात् **पत्रशतवेधन्यायेन** यौगपद्याभिमानः। तत्तदात्मत्वेन भेदाग्रहविषयपदार्थान्तरसृष्ट्या बाह्यान्तरवस्तुनो भेदाग्रहः। भगवत एव स्थूलसूक्ष्मविग्रहभेदे स्थूलापेक्षयाऽन्तःस्थत्वं सूक्ष्मापेक्षया बाह्यता स्थौल्याग्रहाद्वा विग्रहैक्याभिमानः। यद्वा—जालरन्ध्रेण सूर्यो गृह्यमाणो जालमध्यगत इव भासते, तद्वत् सूक्ष्मशरीरद्वारेण सर्वस्यापि व्यङ्ग्यतया तन्मध्यगतत्वेन भानमिति भावः। **परिमितेति**। विग्रहकाले अपरिमितं विग्रहान्तरं गृह्यते, तेन तदपेक्षयाऽन्तर्वर्त्तित्वं परिमितापेक्षया बहिःष्ठत्वमित्यादिकमादिशब्दार्थः। नन्वणुत्वमहत्त्वे अपि स्वरूपस्य स्यातामित्यत्राह—**एवमिति**। अणुत्वमहत्त्वयोरेकदा विरुद्धत्वाद्विग्रहभेदेन वा स्वरूपे महत्त्वं विग्रहेऽणुत्वमिति वा एकस्मिन्नेव विग्रहे कालभेदेनैव वा निर्वाह्यमित्यर्थः। एतादृशसामर्थ्यस्यान्यत्रादर्शनान्मिथ्यात्वमिति शङ्कायामननादीनामितरवस्तुवैजात्यं [2] व्यवहितग्रहणहेतुत्वादिकं च न स्यादित्याह—**वस्त्वन्तरेति**। मूल, **विश्वान्तर्वर्तीति**-विश्वान्तर्वर्त्तिनो बालस्योदरे विश्वमन्तर्वर्तीति विरुद्धमित्यर्थः ॥ ७५ ॥

आश्चर्यवृत्तान्तविशेषसत्यत्वम्.

[1] स्वरूपमित्या-**पा**.

## सर्वार्थसिद्धिः

अथ निखिलजगत्कारणतयाऽवधृतस्येश्वरस्य सर्वसृष्ट्यनुगुणेषु ज्ञानशक्त्यादिष्वनुपपत्तिः परिह्रियते । तत्र ज्ञाने तावदयुक्तिरेवं शङ्क्यते —नित्यसर्वज्ञ ईश्वरः भविष्यद्वस्तु भविष्यत्त्वेन पश्यति न वा ? पूर्वत्र तस्यैव वस्तुनो भवदवस्थायां भूतावस्थायां च किं स एवोल्लेखस्तदन्यो वा ? आद्ये भवतो भूतस्य च भविष्यत्त्वेनोल्लेखाद्भ्रान्तिरेव स्यात् ; द्वितीये 'पश्यत्यचक्षुः' इत्यादिना करणनिरपेक्षज्ञानवत्त्वेन कथितस्य कार्य-ज्ञानासंभवात् प्रतिक्षणं भिदुरानन्तोल्लेखसन्ततिपरिग्रहो निर्मूलः स्यात् । भविष्यतां भविष्यत्त्वेनादर्शनं तु तेषामदर्शनत एव वा, स्वस्वरूपमात्र-दर्शनेन वा, वर्तमानत्वभूतत्वदर्शनेन वा स्यात् ? आद्ये किंचिज्ज्ञत्व-प्रसङ्गः । द्वितीयेऽपि प्रकारतस्स एव । तृतीये तु भ्रान्तत्वं दुस्तरम् । एवं वर्तमानेऽतीते च वर्तमानत्वादिबुद्धिरस्ति वा न वा ? सा च निवृत्तिमती नित्या वा ? इत्यादिविकल्पेन प्रसक्ता दोषाः प्रतिसन्धेया

## आनन्ददायिनी

अथ ज्ञानादीनामनुपपत्त्या मिथ्यात्वे 'यः सर्वज्ञः' इत्यादेरुपासना-र्थतया नेतव्यत्वे तन्न्यायेन विग्रहादेरपि तादर्थ्यं स्यादिति पूर्वा-क्षेपेण संगतिरित्याह—**अथेति** । प्रसङ्ग एव संगतिरित्यन्ये । **भवदवस्थायां**—वर्तमानावस्थायाम् । **स एवोल्लेखः**—भविष्यत्त्वेनो-ल्लेखः । **भवतः**—वर्तमानस्य । **कथितस्येत्यनन्तरमीश्वरस्येति** शेषः । **प्रतिक्षणमिति** । मूलभूतस्य कारणस्याभावे कार्यायोगात्तादृशसंततिरेव स्यात्तथाऽपि तदङ्गीकारे निर्हेतुकवादस्स्यादिति भावः । **द्वितीयेऽपीति** । भविष्यत्त्वरूपधर्मज्ञानविरहात् किंचिज्ज्ञत्वप्रसङ्ग इति भावः । **सा च**—बुद्धिरपीत्यर्थः । **निवृत्तिमती**—अनित्या । आदिशब्देन अनित्याऽपि कारणजन्या न वेत्यादिविकल्पोऽभिप्रेतः । अतीतवस्तुन्यतीतत्वेन बुद्धौ तस्य भविष्यत्तादशायामप्युल्लेखस्स्यात् । तथात्वे वस्तुनो द्वैरूप्यं

तत्त्वमुक्ताकलापः

**यद्भावित्वेन बुद्धं भवति तदथ चातीतरूपं तदस्मि-**

**न्नुल्लेखो भिद्यते चेदकरणजमतेरैकरूप्यं प्रकुप्येत् ।**

**प्राचीनोल्लेख एव स्थितवति तु गते भाविबुद्धिर्भ्रमः स्यात्**

सर्वार्थसिद्धिः

इति । [1]तदभिप्रेत्याह---**यद्भावित्वेनेति** । **भवति तत्**---वर्तमानत्वावस्थां प्राप्नोति । [2]**अथ चातीतरूपं**---वर्तमानत्वावस्थानन्तरमतीतावस्थं स्यादित्यर्थः । **तत्**--तस्मात् । **अस्मिन्**--अवस्थात्रयवति वस्तुनि। नित्यसर्वज्ञबुद्धेरागामित्वाद्युल्लेखो भिद्यते चेत्करणनिरपेक्षबुद्धेरीश्वरस्य नित्यैकरूपसर्वदर्श[3]नानुपपत्तिः स्यात्। प्राचीनोल्लेखे नित्यानुवृत्ते तु, वर्तमाने गते भविष्यत्त्वबुद्धिर्भ्रान्तिः स्यादिति [4]परचोदनानुवादः । अत्रोल्लेखभेदे

आनन्ददायिनी

स्यात् । यदि वस्तु न तथा तर्हि भ्रान्तिता स्यात् । यदि च बुद्धिरेव न तादृशी तस्य भविष्यत्त्वदशायां विद्यमानस्य भविष्यत्त्वस्य ज्ञाने सर्वज्ञताभङ्गोऽनित्यज्ञानं च कारणानिरूपणान्नेत्यादिदोषाः प्रतिसन्धेया इत्यर्थः। **नित्यैकरूपेति** । वर्तमानतादशायमतीततादशायां च भविष्यत्त्वबुद्ध्यभावात् भविष्यत्त्वदशायां वर्तमानताबुद्ध्यभावात् सर्वज्ञता कदाऽपि न

---

[1] तदेतद्--**पा.** [2] अथवाऽतीत--**पा** [3] नासिद्धिः स्या--**पा.** [4] परिचो--**पा.**

तत्त्वमुक्ताकलापः

## मैवं पूर्वापरादिक्रमनियतसदोल्लेखसत्यत्व-सिद्धेः ॥ ७६ ॥

सर्वार्थसिद्धिः

तदभावे चादोष इत्यभिप्रायेण प्रतिषेधति—मैवमिति । उल्लेखभेदपक्षे तावदेवं निस्तारः—नह्यत्र करणनिरपेक्षज्ञानवत्त्वविरोधः, चक्षुरादि-निरपेक्ष[1]त्वेऽपि हेतुतस्साध्यप्रकाशोपपत्तेः । हेतुश्चोल्लेखसन्ततावुत्तरोत्तरस्य पूर्वपूर्वः । तत्प्रवाहानादित्वाच्च न कदाचिन्निर्मूलत्वम् । न चेदृशानवस्था दोष इति । एकरूपोल्लेखपक्षे त्वाह—पूर्वापरेति । अयं भावः-[2]सर्वं कार्यं [3]स्वकाले न हि नित्यासत् ; तच्च किंचिदपेक्ष्य पूर्वं किंचिदपेक्ष्योत्तरम् । तत एव त्रिप्रकारं कार्यं सर्वदैकबुद्धिसमारूढम् । न कदाचिदपि स्वकालवर्तिनः कालान्तरवर्तित्वेनोल्लेखः । भविष्यत्त्वादिकं चापेक्षिकम् । किंचिदपेक्षयोत्तरत्वमेव कस्यचित्तत्समकालप्रागभावावतस्तदपेक्षया भविष्यत्त्वम् । एवं किंचिदपेक्षया पूर्वत्वमेव तत्समकाल-

आनन्ददायिनी

स्यात् । क्रमबुद्ध्या तु न सर्वज्ञता । अतिप्रसङ्गादिति भावः । हेतुत इति । अत एव निर्हेतुकवादनिरास इति भावः । हेतुश्चेति । ननु भविष्यत्त्वरूपोल्लेखसन्ततेः कथं वर्तमानत्वोल्लेखसन्ततिः स्यात् , तथा सति घटसन्तत्या पटत्वोल्लेखिसन्ततिप्रसङ्गात् , सजातीयसन्तत्यभावे चादिमसन्तत्ययोगाच्चेति चेत् न, पूर्वपूर्वावस्थैव तत्तद्विषयोपरक्तोत्तरतत्संततेर्हेतुः, तत्तद्विषयोपरागस्य नियामकत्वात् । अत एव न निर्मूलत्वम् । न चातीतादौ कथमिति वाच्यम् । तत्रापि तत्संबन्धिनिवृत्तेस्संनिहितत्वेन

[1] त्वे हे—**पा.** [2] सर्व हि का—**पा.** [3] स्वकालेसत्तच्च—**पा.**

प्रध्वंसवतोऽतीतत्वम् । तच्च किंचित्कादाचित्कम् । न हि नित्यापेक्षया किंचिद्भविष्यद्भूतं वा । एवं सर्वप्रकारं वस्तु सर्वज्ञबुद्ध्या यथावस्थितरूपेण सर्वैदैवोल्लिख्यत इति करणनैरपेक्ष्य विपर्यासविरहश्च सिध्यतीति ॥

य एव स्यादसर्वज्ञस्सर्वज्ञं न स बुध्यते ।
इति तद्बोधबाधार्थी तन्निषेधेऽपि न क्षमः ॥ ७६ ॥

## इति सार्वज्ञ्यानुपपत्तिनिरासः.

---

### आनन्ददायिनी

वर्तमानध्वंसप्रतियोगित्वादेरुल्लेखसम्भवात् । तत्काले यथावस्थितसर्ववस्तुविषयकज्ञानवत्त्वमेव हि सर्वज्ञत्वं, अन्यथा भ्रान्तत्वप्रसङ्गात् । न च वर्तमानकाले भविष्यत्त्वस्याज्ञानान्न्यूनता ; तदाऽप्यतीतत्वेन भविष्यत्त्वस्य पूर्वं भविष्यदासीदित्यनुभवेन दोषाभावादिति भावः । तथा च तत्तद्भूस्त्वपेक्षया पूर्वत्वसमकालत्वोत्तरत्वात्मकानां सर्वदा तत्तदपेक्ष्यैकरूप्यात् बुद्धिरप्येकरूपेति न कदाचिदनुपपत्तिरिति भावः । किं चेश्वरस्य सार्वज्ञ्यनिषेधं जानाति न वा । पूर्वत्र प्रतियोगिज्ञानाभावात् निषेधो नोपपद्यते, उत्तरत्र तस्य प्रमाणतोबाधे बाधासंभव इत्यभिप्रायेणाह -- **य एवेति** । [1] निषेध्या असर्वज्ञःप्रमाणवृत्तान्ताद्यनभिज्ञः, सर्वज्ञं किं न बुध्यते, उत नेति विकल्पे सति तत्सार्वज्ञ्यनिषेधार्थनिषेधे क्षमोऽपि नेत्यर्थः ॥ ७६ ॥

## सार्वज्ञ्यानुपपत्तिनिरासः.

---

[1] अत्र 'निषेद्धा' इति पाठः स्यात्.

तत्त्वमुक्ताकलापः

**नीलं किंचित्तदानीमरुणमिति न खल्विन्द्रजालादृतेऽद्धा**

**नो चेदेवं विरोधः क्वचिदपि न भवेत् कश्च जैनेऽपराधः ।**

सर्वार्थसिद्धिः

ईश्वरस्य सर्वशक्तित्ववादमपह्नोतुमिच्छन् कश्चिद्विरुद्धोदाहरणं तावद्व्यवस्थापयति--नीलमिति । अद्धा—सत्यम् । इत्यद्धेत्यन्वयः । इन्द्रजालतिरोहितस्त्वेवमद्धेत्यभिमन्येतेति भावः । उक्तानभ्युपगमेऽतिप्रसङ्गमाह--नो चेदिति । क्वचिदपि—दूष्यदूषणपूर्वपक्षासिद्धान्तादावपीत्यर्थः । अतिप्रसङ्गान्तरमाह—कश्चेति । विरुद्धसप्तभङ्गीपरिग्रहो हि जैनस्यापराधः, विरोधोच्छेदे सोऽपि न निगृह्येतेति भावः । विरोध-

आनन्ददायिनी

ननु सर्वशक्तित्ववादस्योपासनार्थत्वे तन्न्यायेन सर्वस्याप्युपासनार्थत्वमिति चोद्यसंगतिमभिप्रेत्याह—**ईश्वरस्येति**। प्रासङ्गिकी सङ्गतिरित्यन्ये । नन्विन्द्रजालत्वेऽपि वस्तुनो विरोधः कथं परिहर्तुं शक्य इत्यत्राह—**इन्द्रजालतिरोहितेति**। प्रतीतिमात्रमेव न वस्तुनस्तथात्वमिति भावः । वस्तुत इन्द्रजालतिरोहितदृष्टेरपि न युगपत् प्रतीतिरपि तु क्रमेणेति ध्येयम्। सिद्धान्तादावपीत्यादिशब्देना[1]ज्ञत्वादिकं ग्राह्यम् । स्यादस्ति, स्यान्नास्ति, स्यादस्ति नास्ति च, [2]स्यादस्ति चावक्तव्यं, स्यान्नास्तिचावक्तव्यं स्यादस्ति च नास्ति चावक्तव्यमित्युक्ता सप्तभङ्गी ।

[1] अत्र 'ज्ञत्वज्ञत्वादिकं' इति पाठः स्यात्. [2] अत्र 'स्यादवक्तव्यम्' इत्यधिकेन ग्रन्थेन भाव्यमिति भाति.

तत्त्वमुक्ताकलापः

**तस्मादीशो विरुद्धद्वितयमघटयन् सर्वशक्तिः कथं स्या-**

**न्नैवं व्याघातशून्येष्वनितरसुशकेष्वस्य तादृक्त्वसिद्धेः ॥ ७७ ॥**

सर्वार्थसिद्धिः

सिद्धिमुपजीव्य चोदयति—**तस्मादिति**। शक्तिर्हि शक्यविषया। विरुद्धं तु घटयितुं न [1]शक्यम्। अतोऽशक्यसद्भावात् कथं सर्वशक्तिः स्यादित्याक्षेपः। अविवक्षितदूषणमिदमित्यभिप्रायेण प्रत्याह—**नैवमिति**। अभिप्रेतं विवृणोति—**व्याघातेति**। नहि व्याहतमीश्वरो घटयतीति तस्य सर्वशक्तित्वं ब्रूमः; किंतु यत् कार्यं तत्सर्वं करोति, ततश्चान्यैरप्य[2]शक्यं करोतीति सिध्येत्। ईदृशमस्य सर्वशक्तित्वमाग-माभिप्रेतम्। तच्च विरोधाभावाद्युज्यत एवेति ॥ ७७ ॥

**इति सर्वशक्तित्वस्थापनम्.**

---

आनन्ददायिनी

**विरुद्धं त्विति**। नीलिमारुणिम्नोर्युगपदेकावच्छेदेन सामानाधिकरण्यमश-क्यमित्यर्थः। **अविवक्षितेति**[3] ॥ ७७ ॥

**सर्वशक्तित्वस्थापनम्.**

---

[1] शक्यम्। ततो-**पा.** [2] क्यमपि करो-**पा.** [3] अत्रैतद्व्याख्याभागो लुप्त इति भाति.

तत्त्वमुक्ताकलापः

**संगृह्य ज्ञानयत्नौ कतिचन निखिलस्रष्टुरिच्छां तु नैच्छन्**

**तस्यां द्वेषः क एषामनुमितिशरणानीकनासीर-भाजाम् ।**

सर्वार्थसिद्धिः

स एवमस्तु सर्वज्ञस्सर्वशक्तिरीश्वरः ; तथाऽ[1]पि तस्य चिकीर्षा नाङ्गीकार्या । न हि कर्तुः कार्योत्पादकत्वमिच्छाप्रयुक्तम् ; यत्नाभावे क्वचिदपि ततस्तदसिद्धेः । इच्छाभावेऽपि प्रयत्नतः कार्यसिद्धिर्जीवन-पूर्वकप्रयत्नकार्यनिश्वासादिनिष्पत्त्या संगृहीता । अतः कार्यलिङ्गे[2]न उपदेशलिङ्गेन वा कर्तुर्ज्ञानयत्नवत्त्वमात्रमेवानुमेयम् ; किमजागलस्तन-कल्पया चिकीर्षयेति काश्यपीयाः केचिदाचक्षते । तदिदमन्वाचष्टे—संगृह्येति । तुशब्दः प्रदर्शितमनपेक्षितत्वं द्योतयति । अत्र प्रतिबन्दि-मभिप्रेत्य प्रतिब्रूते—तस्यामिति । अनुमानादागमाच्चेश्वरसिद्धिं

आनन्ददायिनी

[3]भगवतो यादृशमात्रेण सिद्धेर्नैव चिकीर्षणम् ।
विषयित्वनिदान च तज्ज्ञानं चापि ते विभोः ॥

इति ज्ञानयत्नवत्त्वमेवेश्वरस्य, न तु चिकीर्षेति वैशेषिकैकदेशी, तं दूषयितुमाह—स एवमस्त्विति । प्रसङ्गस्सङ्गतिरिति भावः । इच्छाभावेऽपीति । यद्यपि भगवद्ज्ञानयत्नयोर्नित्यत्वादेव न चिकीर्षा-पेक्षा, तथाऽपि जन्येऽपि तन्नियमो नास्तीति, जन्यत्वेऽपि न चिकी[4]र्षाक्षेप इति भावः । काश्यपीयाः गौतमीयाः, वैशेषिकाँ इत्यन्ये ।

[1] पि चि—पा. [2] न वोप—पा. [3] 'भगवद्यत्नमात्रेण' इति, 'ज्ञानप्रयत्नमात्रेण' इतिवाऽत्र पाठ. स्यात्. [4] 'र्षापेक्षेति' इत्यत्र स्यात्.

## सर्वार्थसिद्धिः

**नैयायिका** निर्धारयन्ति, **वैशेषिका**स्त्वागममप्यनुमानीकृत्य तदेकवद्यमीश्वर तन्त्रयन्ति। अनुमानं च ज्ञानयत्नवच्चिकीर्षामपि समर्थयितुं शक्नोति। तत्र यदि जीवनपूर्व[1]कप्रयत्नन्यायेन चिकीर्षानैरपेक्ष्य सगृह्येत तद्वदेव ज्ञाननैरपे[2]क्ष्यं किं न स्यात्? न हि ज्ञानम[3]पि प्रयत्नमनपेक्ष्य क्वचित् कार्यं जनयति; प्रयत्नस्तु ज्ञानमनपेक्ष्यापीति दृष्टमेव। अत एव चिकीर्षा प्रयत्नोत्पत्त्यर्थमन्यत्रापेक्ष्यते, इह तु नित्यप्रयत्ने किं तयेत्यपि मन्दम्। चिकीर्षोत्पत्त्यर्थमन्यत्र ज्ञानमपेक्ष्यते, इह तु प्रयत्नस्य नित्यत्वेन चिकीर्षानैरपेक्ष्यात् किं ज्ञानेनेत्यपि सुवचत्वात्। प्रयत्नस्य स्वतो विषयनियमाभावात्, ज्ञानविषयेण सविषयत्वं वक्तव्यमिति चेन्न, उक्तोत्तरत्वात्। न हि जीवनपूर्वकप्रयत्नस्य स्वाधारज्ञाननियतविषयत्वम्; नच सर्वकार्यविषयस्य ईश्वरप्रयत्नस्य विषय[4]नियामकापेक्षा; सत्यां च तस्यां सहकारिशक्तिभूतजीवादृष्टविशेषत एव प्रयत्नस्य

### आनन्ददायिनी

**वैशेषिकास्त्विति**। प्रमाणद्वयवादित्वादिति भावः। एतानि पदानि स्मारितपदार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बकत्वादित्यादिरूपेणानुमानकारणं बोध्यम्। **तन्त्रयन्ति**—साधयन्ति। ननु विनिगमनाविरहादुभयसिद्धिरन्यथा प्रयत्नस्यैवासिद्धिरस्त्वित्यत्राह — **न हि ज्ञानमपीति**। अत एवेत्येतद्विवृणोति—**चिकीर्षेति**। पुनर्ज्ञानसिद्धिं शङ्कते—**प्रयत्नस्येति**। ज्ञानस्यैव स्वतो विषयित्वं तदधीनमिच्छाप्रयत्नयोर्विषयित्वमिति ज्ञानाभावे प्रयत्नस्य विषयित्वं न स्यादिति भावः। **स्वाधारेति**। स्वस्य प्रयत्नस्याधारे विद्यमानं यज्ज्ञानं तेन नियतविषयमित्यर्थः। **सत्यां च तस्यामिति**। अपेक्षायां सत्यामपि ज्ञानं

[1] कयत्न–पा [2] क्ष्यमपि किं–पा. [3] पि क्वचित्प्रयत्नमनपेक्ष्य कार्य–पा. [4] नियमापेक्षा–पा.

## सर्वार्थसिद्धि.

नियतविषयत्वे संभवति सर्वविषयज्ञानेन प्रयत्नस्य विषयनियमकल्पनं बालिशकृत्यम्। विषयत्वमात्रं चात्र न यावद्धीविषयत्वम्, नित्यानामपि निष्पाद्यत्वप्रसङ्गात्; अशक्यविषयप्रयत्नवत्तया वा डिम्भादिकल्प ईश्वरः स्यात्। अथ स्वासाधारणधीविषयेणैव विषयवत्त्वं प्रयत्नस्येति मन्येन तदपि न: धिय इव प्रयत्नस्यापि नियामकनिरपेक्षविषयत्वोपपत्ते; अन्यथा कल्पनागौरवात्। स्वतस्सविषयत्वे ज्ञानत्वप्रसङ्ग इति चेन्न; धियोऽपि तन्नियामकत्वाभावात्। नच स्वाधारधीविषयस्य सर्वस्य प्रयत्नविषयत्वमिति मन्यसे; सारूप्येऽप्यवान्तरलक्षणेन भेदोपपत्तेः; अन्यथाऽतिप्रसङ्गात्। किंच सामग्रीनियतवि[1]षये निरीश्वरज्ञाने

## आनन्ददायिनी

नापेक्षितमिति भावः। किंचिदर्थमभ्युपगतमपि ज्ञान तन्नियामकत्वाभावाद्व्यर्थं स्यादित्याह—**सर्वविषयेति**। ननु प्रयत्नस्य यत्किंचिद्विषयत्वं प्रति ज्ञानस्य सर्वविषयस्य नियामकत्व मास्तु, विषयत्वमात्रे तदस्त्वित्यत्राह—**विषयत्वमात्रमिति**। एकविषयत्वासम्भवात्, मात्रचः कात्स्न्र्यपरत्वमिति, नित्यानामपि निष्पाद्यत्वरूपं कार्यत्व स्यादित्यर्थः। **यावद्धीविषयमिति**।[2] विस्वयमनतिक्रमणे व्यावधिभावः? धीविषयव्यापनं विषयत्वमात्रमित्यर्थः। **अन्यथेति**। ज्ञानकल्पन गुर्विति भावः। तदेवोपपादयति—**न चेति**। ज्ञानस्य सर्वविषयत्वं प्रयत्नस्य कार्यमात्रविषयत्वमित्यभ्युपगमादिति भावः। स्वतस्सविषयत्वेऽप ज्ञानवैलक्षण्यमाह—**सारूप्येऽपीति। अन्यथेति**। यदि सविषयत्वेऽप्यवान्तरवैलक्षण्यमादाय भेदो न स्यात्तदा ज्ञानाधीनसविषयत्वविशेषाच्चिकीर्षाप्रियत्नयोर्वैलक्षण्यं न स्यादिति भावः। किं च ज्ञानस्य स्वतोविषयत्व किं जीवज्ञाने ग्राह्यमुतेश्वरज्ञान इति विकल्पे आद्यं दूषयति—**किं च सामग्रीति**।

[1] येऽनीश्व—**पा.** [2]अत्र 'अनतिक्रमणेऽव्ययीभाव' इति अवधारणेऽव्ययीभाव इति वा पाठः स्यात्

## सर्वार्थसिद्धिः

व्याप्तिर्दुर्ग्रहा ; ईश्वरज्ञा[1]न त्वद्याप्यसिद्धम् । यदि च यथादृष्टप्रकारानादरेण बुद्धियत्नयोर्हेतुनिरपेक्षत्वं कल्प्यते, तथा यत्नस्य बुद्धिनिरपेक्षविषयत्वमदृष्टमभिमन्यताम्; अविशेषाल्लाघवाच्च । एवं बुद्धिमात्रमवलम्ब्य प्रयत्नपरित्यागप्रतिबन्दि[2]रपि प्रयोक्तव्या । ईश्वर इच्छात्यन्ताभाववान् कर्मवश्यव्यतिरिक्तत्वात् घटादिवत्, इत्यादिषु च तादृशप्रयोगः प्रतिप्रयोक्तव्यः। धर्मिसिद्ध्यसिद्ध्यादिवि[3]कल्पेन दूषणजात च दुस्तरमिति

## आनन्ददायिनी

सामग्र्यधीनत्वान्नियतविषयत्वस्येत्यर्थः । द्वितीयं दूषयति—**ईश्वरज्ञानं त्विति । हेतुनिरपेक्षत्वं** नित्यत्वमित्यर्थः । **एवमिति** । पूर्वं यत्नमात्रस्य सिद्धिरुक्ता, इदानीं ज्ञानमात्रमेवास्तु, प्रयत्नस्तु न कल्प्यो लाघवादिति प्रतिबन्दिरिति भावः । ननु कार्यं प्रति यत्नस्य साक्षाद्धेतुत्वात्तत्सिद्धिरस्तु. ज्ञानस्य यत्नद्वारकत्वात् कथमेव प्रतिबन्दिरिति चेत् । न युक्ता द्वारद्वरिभावे, स एव तु नास्ति, उभयोर्नित्यत्वात्, नापि कार्यत्वमपि कृतिजन्यत्वमिति कृतिसापेक्षम्, अन्योन्याश्रयेण कार्यत्वहेतोरसाधकत्वप्रसङ्गादिति युक्ता प्रतिबन्दिरिति ध्येयम् । **इच्छात्यन्ताभाववानिति** । समवायसम्बन्धनेच्छात्वावच्छिन्नप्रतियोगिकात्यन्ताभाववानित्यर्थः । प्रादेशिकत्वे नियामकाभावात् पक्षतावच्छेदकावच्छेदेन सिद्धिरिति भावः । **तादृश इति** । ईश्वरो ज्ञानप्रयत्नात्यन्ताभावान् कर्मवश्यान्यत्वात् घटवदित्यपि प्रयोग इत्यर्थः। किं च ईश्वरं सिद्धं पक्षीकृत्य साध्यते उतासिद्धं, सिद्धं चेत्, चिकीर्षावत्त्वेनापि सिद्धम् । असिद्धं चेत्, आश्रयासिद्धिरिति दूषयति-**धर्मिसिद्धीति** । आदिशब्देन व्याप्त्यादिसिद्धिर्विवक्षिता । केचित्तु

[1] न चाद्या—**पा.** [2] रपि योक्त—**पा.** [3] कल्पभेदेन दू—**पा.**

तत्त्वमुक्ताकलापः

**श्रुत्या तद्बोधयत्नावभिदधति यदि क्षम्यतामेवमिच्छा**

**निर्वाह्यं त्वाप्तकामप्रभृतिवचनमप्यान्यपर्यो-परुद्धम् ॥ ७८ ॥**

सर्वार्थसिद्धिः

यथाश्रुतिबलादीश्वरज्ञानप्रयत्नस्थापन शङ्कते—**श्रुत्येति** । तथा 'सोऽकामयत' इत्यादिश्रुति[1]बलात्तदिच्छाऽपि स्वीक्रियतामित्याह-**क्षम्यतामिति** । नन्वाप्तकामत्वपूर्णत्वादिश्रुतिस्मृतिशतैरिच्छाराहित्यमीश्वरस्य सिध्येदित्यत्राह —**निर्वाह्यमिति** । तुश्शङ्कानिवृत्त्यर्थः । अयं भावः— आप्तकामशब्दस्तावदीशितुरिष्टव्याभावमिच्छाराहित्यं वा न ब्रूते । अत्र कामशब्दस्य काम्यपरत्वे कामनापरत्वे वा तत्प्राप्तिवचनतस्तन्निषेधायोगात् । अत इष्ट सर्वमस्य प्राप्तमेव भवतीति तात्पर्यं [2]ग्राह्यम् । नित्यानां वा [3]योग्यानां प्राप्तत्वं प्रत्येतव्यम् । अत एव पूर्णशब्दोऽपि

आनन्ददायिनी

धर्मिसिद्ध्यसिद्धिग्रन्थमवतारिकाशेष व्याचक्षते । नन्वन्यतरस्य निर्वाह्यत्वे 'सोऽकामयत' इत्याद्येवान्यपरतया निर्वाह्यं किं न स्यादित्यत्राह—**अयं भाव इति** । प्रतिज्ञातार्थमुपपादयति—**अत्रेति** । आप्तशब्दस्याप्लृ-व्याप्तौ इत्यस्माद्व्युत्पत्तेरिति भावः । **प्राप्तमेव भवतीति** । यदाऽपेक्षते तदैव प्राप्त भवति, न तु विलम्बत इत्यर्थः । ननु प्राप्तशब्दस्य प्राप्ततुल्यतायां पर्यवसानादमुख्यत्वं दोष इत्यत्राह—**नित्यानां वेति** । नित्यानि योग्यानि अपहतपाप्मत्वकल्याणगुणादीनि । 'सदा पूर्णः' 'पूर्णस्य पूर्णः' इत्यादिनिर्वाहमाह—**अत एवेति** । ननु निर्गुणवाक्य-

[1] लादिच्छा—**पा.** [2] ग्राह्यम् । अनित्यानां—**पा** [3] वा भोग्यानां—**पा.**

तत्त्वमुक्ताकलापः

## स्वीकृत्येशानतत्त्वं कतिचन जहतस्तत्प्रसादादिसाध्यं

सर्वार्थसिद्धिः

गुणादिपौष्कल्यमाह, न तु श्रौतीं कामनां निरुन्ध्यात्। विधिनिषेधविरोधशमनं च प्रागेव स्थापितम्। तदिह सर्व[1]काम्यविषयाप्रतिहतानन्याधीनेच्छावानीश्वरः ; जीवस्तु न तथा। ईप्सितालाभजनितदुःखं च क्षेत्रज्ञस्यैव ; नित्यमुक्तेश्वराणां तदलाभ एव नास्तीति नियमः ॥ ७८ ॥

**इति ईश्वरस्येच्छावत्त्वसिद्धिः.**

---

अथ [2]प्रस्तुतानु[3]बद्धं पण्डितमन्यप्रलपितं प्रदर्शयति—**स्वीकृत्येति**। अयमत्राभिसन्धिः—यद्यपि राजादिवत्कर्मवश्या देवताः

आनन्ददायिनी

विरोधात् कामवाक्यं कामनां न प्रतिपादयतीत्यत्राह—**विधिनिषेधेति**। एवं चाप्तकामादिवाक्यार्थमाह—**तदिहेति**। अप्रतिहतेत्यनेन व्यावर्त्य दर्शयति—**ईप्सितेति**। अनन्याधीनेत्यनेन व्यावर्त्य दर्शयति—**नित्यमुक्तेति**। ईश्वरग्रहण तु तावन्मात्रेण साधारण्यप्रदर्शनेन भेदप्रदर्शनार्थम्। मूलं—**अनुमितिशरणानां**, अनुमानैकनिष्ठानां वैशेषिकादीना, **अनीका** सेना, तदग्रगानामित्यर्थः ॥ ७८ ॥

**ईश्वरस्येच्छावत्त्वम्.**

---

अवसरसंगतिमाह— **अथ** [3]**प्रस्तुतानुबद्धमिति**। हेत्वनुक्तेराह—**अयमत्रेति। यद्यपीति**। कर्माधीनत्वात् प्रीतिकोपयोरिति भावः।

[1] कार्यविष-पा. [2] प्रकृता-पा. [3] बन्ध-पा.

तत्त्वमुक्ताकलापः

**गङ्गाम्भःपञ्चगव्यप्रभृतिवदवदन् पावनत्वादि तस्य ।**

**तच्छुत्यादिप्रतीपं यदपि च फलदं दर्शितं निष्प्रसादं**

सर्वार्थसिद्धिः

कुप्यन्ति तृप्यन्ति च; तथाऽपि न तथा परः पुरुषः; निरपेक्षत्वात् सर्वभूतसुहृत्त्वाच्च । अतस्तस्मिन् प्रसादकोपव्यपदेशौ भाक्तौ; तदुपचारापचारशक्तित एवानुकूलप्रतिकूलसंपत्तिः । पावनत्वं मोक्षप्रदत्वं च तस्य "यस्य देवे परा भक्तिः" इत्यादिस्वारस्याद्गङ्गोदकादेरिव स्वविहितविषयानुष्ठानसामर्थ्यात्स्यादिति। इमं पक्षं पण्डितरूपपदव्या प्रतिक्षिपति—**तादिति** । "धातुः प्रसादात्" "मत्प्रसादात्"[1]इति श्रुतिः स्मृतिश्चेह प्रख्यापिता । अत्र च मुख्ये संभवति न गौ[2]णत्वकल्पना न्याय्या । प्रशस्तवस्तुविषयतत्तत्कर्मशक्त्यैव फलसिद्धिरित्युक्तं प्रतिवक्ति—**यदपीति**। **निष्प्रसादम्**—आराध्यप्रसादनिरपेक्षमित्यर्थः ।

आनन्ददायिनी

किं च सापेक्षस्य ह्युपचारापचाराभ्यां प्रीतिकोपौ, न चैवं परा देवतेत्याह—**निरपेक्षत्वादिति**। निरपेक्षस्यापि चेत् प्रीत्याद्यभ्युपगमः, तदा च प्रीतिरेव[3] स्वस्यात् न कर्मत इति कर्मवैयर्थ्यमित्याह—**सर्वभूतेति** । कर्मशक्तिरेव फलदेत्याह—**अत इति** । अनुकूलफलमैश्वर्यादि । **पावनत्वं** सर्वकर्मनिवर्तकत्वम्। **यस्य देवेत्यादि**। यथा गुरुभक्तेः शास्त्रज्ञान[4]हेतुत्वं न दृष्टमुखेन ज्ञानकारणं, तथा देवताभक्तिरपीत्यर्थः । **पण्डितरूपः**—

[1] इत्यादिश्रुतिरिह—**पा.** [2] णकल्प—**पा.** [3] 'स्वत स्यात्' इत्यत्र पाठस्यात्. [4] अत्र 'हेतुत्वेन' इति पाठे कथचिद्योज्यम्.

तत्त्वमुक्ताकलापः

**तच्चैतस्य प्रसादादिति हि निजगदुर्धर्म-मर्मज्ञचित्ताः ॥ ७९ ॥**

**त्रय्यन्तोदन्तचिन्तासहचरणसहैरेभिरस्मिन् परस्मिन्**

सर्वार्थसिद्धिः

यद्वा—क्रियादिस्वरूपं स्वयमचेतनत्वात प्रसादवन्निष्प्रसादं फलप्रद-मिति । उपलक्षणमेतत् ; निष्कोपमित्यपि ग्राह्यम् । **एतस्य**—सर्वकर्तुस्सर्वसुहृद इति भाव· । **धर्ममर्मज्ञचित्ता** इत्यत्र धर्माणां कारणभूत कार्यभूतं च भगवत्कटाक्षण स्वपीडायां धर्मपीडनात धर्ममर्मत्वेनोपचरितम् । धर्मस्य यथा परप्रसाद कारणम्, एवमधर्म-स्यापि तत्कोपः कारणम् । श्रूयते हि तस्य साध्वसाधुकर्मकारयितृत्वम्; स्मर्यते च बहुशः ॥ ७९ ॥

**इतीश्वरस्य साध्यप्रसादादिमत्त्वम्.**

---

एव सकलफलप्रदस्य सत्त्वस्थानां स्वयंफलभूतस्य च परस्य प्रतिपादनेन श्रोतृणामनुनिष्पन्नं फलविशेषमाह—**त्रय्यन्तेति** ।

आनन्ददायिनी

पाण्डित्यपूर्तिरहितः । ईषदसमाप्तौ रूपप्रत्ययः । सर्वप्रसिद्धो मार्ग इत्यर्थः । आराध्यप्रसादमङ्गीकृत्य तदपेक्षत्वमुच्यत इवेति ? भाति । तद्व्यावृत्त्यर्थमाह—**यद्वेति** । **कटाक्षणं** कटाक्षः, प्रीतिरिति यावत् । **श्रूयते हीति** । 'एष ह्येव' इत्यादिनेति शेषः ॥ ७९ ॥

**ईश्वरस्य साध्यप्रसादादिमत्त्वम्.**

---

अस्य सरस्य प्रयोजनं कथयन्निगमयतीत्याह—**एवमित्यादिना** । मूलं—**सहचरणसहैः** सहायभूतैः । **प्रभृतिशब्देन** त्वरादि गृह्यते ।

तत्त्वमुक्ताकलापः

भक्तिश्रद्धास्तिकत्वप्रभृतिगुणसिरावेधिभि - स्तर्कशस्त्रैः ।
स्वार्थत्वस्वाश्रयत्वस्ववशयतनताद्यूहवर्गो - पवर्ग-
श्छिद्येताच्छेद्यपूर्वोत्तरसरयुगलस्यूततत्त्व - स्थितीनाम् ॥ ८० ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापे तृतीयो नायकसरः.

---

सर्वार्थसिद्धिः

पूर्वोत्तरयोस्सरयुगलयोः समर्थितानां चेतनाचेतनतत्त्वस्थितीनां यथा-संभवं स्वशेषत्वं स्वाधारत्वं स्वाधीनव्यापारत्वं चेतनान्तरशेषत्वादिकं च विवेकशून्या मन्यन्ते । सोऽयमुपद्रवस्सर्वशेषिणस्सर्वाधारस्य सर्व-नियन्तुरीश्वरस्य प्रतिष्ठापकैः प्रमाणानुग्राहकैः प्रतिक्षिप्येतेति ॥ ८० ॥

इति ईश्वरनिरूपणप्रयोजनविशेषः.

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य श्रीमद्वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापव्याख्याया सर्वार्थसिद्धौ तृतीयो नायकसरः.

---

आनन्ददायिनी

उपवर्गः—उपद्रवः । क्वचिदुपसर्ग इति पाठः । उत्पत्तिरित्यर्थः । पूर्वोत्तरसरयुगले स्यूतेषु प्रतिपाद्येषु तत्त्वेषु अच्छेद्या दृढा स्थितिर्निश्चयो येषामित्यर्थः ॥ ८० ॥

## आनन्ददायिनी

इत्थं त्रयीमकुटदेशिकवर्यसूक्ति-
सर्वार्थसिद्धिजगदीशसरस्य टीकाम् ।
व्यातानिषं गुरुमुखादवगम्य भावं
सन्तः सहध्वमिह मामकसाहसिक्यम् ॥

इति श्रीकुशिककुलजलनिधिसुधाकरनिगमशिखरपरविद्याकुमुदिनीसम्मोदकरस्य
वेदान्ताचार्यस्य भागिनेयेन वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन
नृसिंहदेवेन विरचितायामानन्ददायिन्यां सर्वार्थसिद्धिटीकायां
तृतीयो नायकसरः

———

WD 863 GBPM—750—6 6-55

मैसूरुप्राच्यविद्यासंशोधनसंस्थायां देवनागराक्षरैर्मुद्रितेषु
सम्प्रति विक्रयायोपलभ्यमानानां संस्कृतग्रन्थाना
अकारादिसूचनी.

---

| क्रमसंख्या | पुस्तकनाम ग्रन्थश्रेण्यङ्कश्च | मूल्यम् रू. आ. |
|---|---|---|
| १ | अद्वैतसिद्धिः, मधुसूदनसरस्वतीकृता, गुरुचन्द्रिका-टीकायुता, द्वितीयसंपुटम्. प्रथमपरिच्छेदे असतः साधकत्वोपपत्तिप्रभृति अविद्याप्रतिपादकश्रुत्युपपत्तिपर्यन्ता (७८). | .. ३ ४ |
| २ | अद्वैतसिद्धिः, मधुसूदनसरस्वतीकृता, गुरुचन्द्रिकाटीकायुता, तृतीयसम्पुटम्. (प्रथमपरिच्छेदान्ता (८०). | . २ ४ |
| ३ | अभिलषितार्थचिन्तामणिः, प्रथमसंपुटम् (६९) | २ ० |
| ४ | अर्थशास्त्रपदसूची प्रथमसंपुटम् (६५) .... | ... २ ८ |
| ५ | ,, द्वितीयसंपुटम् (६६) .. | २ ८ |
| ६ | ,, तृतीयसंपुटम् (६८) . | ... २ ० |
| ७ | अलङ्कारमणिहारः, द्वितीयसंपुटम् परिकरालङ्कारप्रभृति मालादीपकालङ्कारान्तः (५८). | . ३ ८ |
| ८ | अलङ्कारमणिहारः, तृतीयसंपुटम्, सारालङ्कारप्रभृतिहेत्वलङ्कारान्तः (६२). | २ ८ |
| ९ | अलङ्कारमणिहारः, चतुर्थसंपुटम् रसवदलङ्कारप्रभृति समग्रः (७२). | २ ४ |
| १० | आपस्तम्बशुल्बसूत्रम्, कपर्दीय — करविन्दीय — सुन्दरराजीयव्याख्याभिस्सहितम् (७३). | . २ १२ |
| ११ | आपस्तम्बश्रौतसूत्रम्, रामाग्निचिद्वृत्तिसहितधूर्तस्वामिभाष्यभूषितम्, प्रथमसंपुटम्. (१—५ प्रश्नाः) (८७). | ४ ० |
| १२ | आपस्तम्बश्रौतसूत्रम्, रामाग्निचिद्वृत्तिसहित - धूर्तस्वामिभाष्यभूषितम् द्वितीयसंपुटम्. (६-८ प्रश्नाः) (९३). | ८ ८ |
| १३ | आयुर्वेदसूत्रम्, योगानन्दनाथभाष्यसहितम् (६१) .. | २ ० |

| क्रमसंख्या | पुस्तकनाम ग्रन्थश्रेण्यङ्कश्च | मूल्यम्—रू. | आ. |
|---|---|---|---|
| १४ | क्रियासारः, श्रीनीलकण्ठशिवाचार्यविरचितः, प्रथमं संपुटम्. (१—४ उपदेशाः) (९५). | .... ५ | ८ |
| १५ | खादिरगृह्यसूत्रम्, रुद्रस्कन्दीयवृत्तिसहितम् (४१) | .. १ | ० |
| १६ | तत्त्वमुक्ताकलापः, श्रीवेदान्ताचार्यकृतः, तदुपज्ञ-सर्वार्थसिद्ध्याख्यवृत्त्या तद्व्याख्यानन्ददायिनी-भावप्रकाशाभ्यां च समलङ्कृतः, प्रथमं सम्पुटम्, प्रथमो जडद्रव्यसरः, (७६). | .... ४ | ० |
| १७ | तत्त्वमुक्ताकलापः, श्रीवेदान्ताचार्यकृतः, तदुपज्ञ-सर्वार्थसिद्ध्याख्यवृत्त्या तद्व्याख्यानन्ददायिनी-भावप्रकाशाभ्यां च समलङ्कृतः, द्वितीयं सम्पुटम् द्वितीये जीवसरे प्रथमभागः. (८१). | .... ३ | ० |
| १८ | तत्त्वमुक्ताकलापः, श्रीवेदान्ताचार्यकृतः, तदुपज्ञ-सर्वार्थसिद्ध्याख्यवृत्त्या तद्व्याख्यानन्ददायिनी-भावप्रकाशाभ्यां च समलङ्कृतः तृतीयं सम्पुटम्, द्वितीये जीवसरे द्वितीयो भागः. (९४). | .. ६ | १२ |
| १९ | तत्त्वमुक्ताकलापः, श्रीवेदान्ताचार्यप्रणीतः, श्रीनृसिंह राजप्रणीतानन्ददायिन्याख्यव्याख्यासंवलितया मूलकृदुपज्ञसर्वार्थसिद्ध्याख्यवृत्त्या समलङ्कृतः चतुर्थं सम्पुटम्, तृतीयो नायकसरः (९७). | .... ६ | ० |
| २० | तत्त्वार्थसूत्रं, श्रीमदुमास्वामिविरचितम्, श्रीभास्कर-नन्दिविरचितसुखबोधाख्यवृत्तियुतम्. (८४). | .. २ | ४ |
| २१ | तर्कताण्डवम्, व्यासयतिकृतम्, न्यायदीपाख्यव्याख्या-युतम्, प्रथमसम्पुटम्, प्रथमपरिच्छेदः. (७४). | ... ३ | ० |
| २२ | तर्कताण्डवम्, व्यासयतिकृतम्, न्यायदीपाख्य-व्याख्यायुतम्, द्वितीयसम्पुटम्, द्वितीयपरि-च्छेदे विधिवादान्तम् (७७). | . २ | ० |
| २३ | तर्कताण्डवम्, व्यासयतिकृतम्, न्यायदीपाख्य-व्याख्यायुतम्, तृतीयसम्पुटम्, द्वितीयपरि-च्छेदान्तम्. (७९). | . . २ | ० |
| २४ | तर्कताण्डवम्, व्यासयतिकृतम्, न्यायदीपाख्यव्या-ख्यायुतम्, चतुर्थसम्पुटम्, तृतीयपरि-च्छेदान्तम्. (८२). | . .. २ | ४ |

| क्रमसंख्या | पुस्तकनाम ग्रन्थश्रेण्यङ्कश्च | मूल्यम्—रू. आ. |
|---|---|---|
| २५ | तैत्तिरीयब्राह्मणम्, सस्वरचिह्नम्, भट्टभास्करीय-काचित्कसायणभाष्याभ्यां युतम्, द्वितीयाष्टकम्. (५७). | ३ ८ |
| २६ | प्रमेयरत्नालङ्कारः अभिनवचारुकीर्तिपण्डिताचार्य-विरचितः. (८८). | ... २ १२ |
| २७ | प्राकृतमणिदीपः, श्रीमदप्पयदीक्षितसुधीप्रणीतः, तिरु तिरु—श्रीनिवासगोपालाचार्यसुधीप्रणीतया प्राकृतमणिदीपदीधित्याख्यया टिप्पण्या समलङ्कृतः प्रथमसंपुटम्. (९२). | ... ६ ४ |
| २८ | यादवाभ्युदयकाव्यम्, श्रीवेदान्ताचार्यविरचितं श्रीमदप्पय्यदीक्षितेन्द्रविरचितव्याख्यासमलङ्कृतम्, प्रथमसंपुटम् (१३-१८ सर्गाः). (८६). | .... ३ ४ |
| २९ | यादवाभ्युदयकाव्यम्, श्रीवेदान्ताचार्यविरचितम्, श्रीमदप्पयदीक्षितेन्द्रकृतव्याख्यासमलङ्कृतम्, द्वितीयसंपुटं (१९-२४ सर्गाः). (८९). | ... ५ ० |
| ३० | वाक्यार्थरत्नम्, सुवर्णमुद्रिकाख्यव्याख्यासमलङ्कृतम् (८३). | .... १ ० |
| ३१ | विद्यामाधवीयम्, विष्णुशर्मकृतमुहूर्तदीपिकाटीकायुतम्, प्रथमसम्पुटम्, (१-५ अध्यायाः). (६३). | ... २ ० |
| ३२ | विद्यामाधवीयम्, विष्णुशर्मकृतमुहूर्तदीपिकाटीकायुतम्, द्वितीयसम्पुटम्, (६-१० अध्यायाः). (६७). | ... २ ० |
| ३३ | विद्यामाधवीयम्, विष्णुशर्मकृतमुहूर्तदीपिकाटीकायुतम्, तृतीयसम्पुटम्, (११-१५ अध्यायाः). (७०). | ... १ ८ |
| ३४ | वेदान्ततत्त्वविवेकः, श्रीनृसिंहाश्रमिविरचितः, तदुपज्ञेन तत्त्वविवेकदीपनेन अग्निहोत्रयज्वकृतपूरण्याख्यव्याख्यया च समलङ्कृतः. (९६). | .... १५ ० |
| ३५ | शैवपरिभाषा शिवाग्रयोगिकृता (९०) ... | ... ३ ० |
| ३६ | श्रीमद्ब्रह्मसूत्रभाष्यम्, आनन्दतीर्थीयम्, तत्त्वप्रकाशिका-चन्द्रिका-प्रकाशयुतम्, तृतीयसम्पुटम्. प्राणाधिकरणप्रभृति प्रथमे द्वितीयपादान्तम्. (५३). | ... ४ ० |

| क्रमसंख्या | पुस्तकनाम ग्रन्थश्रेण्यङ्कश्च | मूल्यम्—रू. | आ. |
|---|---|---|---|
| ३७ | श्रीमद्ब्रह्मसूत्रभाष्यम्, आनन्दतीर्थीयम्, तत्त्वप्रकाशिका-चन्द्रिका-प्रकाशयुतम्, चतुर्थसंपुटम् तृतीयपादे अपशूद्राधिकरणान्तम. (५९) | .. ३ | ८ |
| ३८ | सरस्वतीविलासः, व्यवहारकाण्डः (७१) | .. २ | ८ |
| ३९ | सौन्दर्यलहरी शंकराचार्यकृता, लक्ष्मीधराचार्यकृत-व्याख्यायुता, भास्करराययकृतभाष्यसहिता, भावनोपनिषत्, कालिदासकृता पञ्चस्तवी च. (तृतीयमुद्रणम्). (९१). | .. ३ | ० |
| ४० | स्मृतिचन्द्रिका याज्ञिकदेवणभट्टकृता, प्रथमसम्पुटम्, संस्कारकाण्डः (४३). | ... १ | ८ |
| ४१ | स्मृतिचन्द्रिका, याज्ञिकदेवणभट्टकृता, द्वितीय-संपुटम्. आह्निककाण्डः (४४). | .. २ | ८ |
| ४२ | स्मृतिचन्द्रिका याज्ञिकदेवणभट्टकृता, तृतीयसम्पुटम्, व्यवहारकाण्डे प्रथमभागः (४५). | .. २ | ० |
| ४३ | स्मृतिचन्द्रिका याज्ञिकदेवणभट्टकृता चतुर्थसम्पुटम् व्यवहारकाण्डे द्वितीयभागः (४८). | ... ३ | ० |
| ४४ | स्मृतिचन्द्रिका, याज्ञिकदेवणभट्टकृता, पञ्चमसम्पुटम् श्राद्धकाण्डः (५२). | .... ३ | ४ |
| ४५ | स्मृतिचन्द्रिका, याज्ञिकदेवणभट्टकृता, षष्ठसम्पुटम्, आशौचकाण्डः. (५६). | .... १ | ८ |

## संकीर्णग्रन्थाः

| | | मूल्यम्—रू. | आ. |
|---|---|---|---|
| १ | योगरत्नाकरः, कर्णाटान्ध्रभाषाटीकायुतः | . २ | १२ |
| २ | मैसूरुप्राच्यकोशागारस्थलिखितसंस्कृतग्रन्थसूचनी सविवरणा, प्रथमसम्पुटम्, वेदाः (संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषत्, मन्त्रसंग्रहश्च) | ... ३ | १२ |
| ३ | ,, द्वितीयसंपुटम्-धर्मशास्त्रम् (स्मृतिः) | .. १ | ४ |
| ४ | मैसूरु प्राच्यकोशागारस्थमुद्रितसंस्कृतपुस्तकानां प्रदर्शिनी. | .... २ | १२ |